॥ ८६० ॥ ॐ नमः ॥ श्रीगौडीपार्श्वनाथा [illegible] नमः श्रीसिद्धार्थनरेंद्रविश्रुतकुलव्योमप्रदीपोदयः सद्बोधांशुनिरस्तदुस्तरमहामोहांधकारस्थितिः इत्यादि [illegible] श्रीवर्द्धमानो जिनः १ येन कर्म [illegible] नीयमानो [illegible] श्रीमल्लक्ष्मी [illegible] २ [illegible] ३ [illegible] ४ [illegible]
मायिकादि [illegible] श्रुतस्कंधरूप [illegible] सकलश्रुत [illegible]
[illegible] श्रीमज्जिनभद्रगणि [illegible] इत्यादि [illegible]
[illegible] सांप्रतमाधातुक्षे [illegible] यमारभ्यते तत्र चादौ [illegible] भाष्यकारः [illegible]
मां वोच्छं चरणगुणसंगहं [illegible] आवस्सयाणुओगं गुरुवएसाणुसारेणं १ [illegible] कमित्याह आवस्सयाणुओगंति [illegible] ज्ञानादिगुणो [illegible] १
[illegible] विधिप्रतिषेधाभ्यामर्थप्ररूपणमित्यर्थः [illegible]
[illegible] अथवा [illegible]

[illegible] द्वादशांगं गणिपिटकं आदित्वं [illegible] तीर्थकरापेक्षया [illegible] नमस्तीर्थाये
[illegible] तीर्थकरेणापि [illegible] अथवा जीवादितत्त्व [illegible] द्वादशांग गणिपिटकोपयोगानन्यत्वाद्वा चतु
र्विधश्रीश्रमणसंघोपि प्रवचनमुच्यते [illegible]
[illegible] चरणगुणसंगहंति [illegible] अथवा [illegible]
[illegible] पिंडविशुद्ध्यादय [illegible] चरणगुणाः अथवा [illegible]
[illegible] चरणगुणसंग्रह [illegible]

[illegible]

[illegible] भाष्यकार आह [illegible]
[illegible] नादकानावद्धाभामाह [illegible]
[illegible] तीर्थकरगणधरादय [illegible]

विशेषावश्यक. ॥ ६० ॥ नमः ॥ श्री [illegible] पार्श्वनाथ [illegible] नमः श्रीसिद्धार्थनरेंद्रविश्रुतकुलव्योमप्रद्योतक सद्बोधांशुनिरस्तदुस्तरमहामोहांधका
१ रस्थितिः [illegible] कुवादिकौशिक [illegible] पादस्तमां श्री [illegible] श्रीवर्द्धमानजिनः १ येन [illegible] रूपश्रुतधर्मोयमा
नीयमाद्य [illegible] प्रणीतः श्रीमत्सुधर्म [illegible] गणाधिपमुख्यैर्लते [illegible] २ आवश्यकमतिनिबद्धगंभीरभाष्य पीयू
[illegible] श्रीजिनभद्रनामा ३ यस्याः [illegible] पार्षदै [illegible] पारंप
र्य [illegible] ४ [illegible] मा
मायिकादि [illegible] सूत्र [illegible]
कचर्यस्य निर्या [illegible] चतुष्कपूर्वधरेण श्रीमद्भद्रबाहुस्वामिना [illegible]
वस्यादि [illegible] निर्युक्तिः कृता [illegible] सामायिकाध्ययननिर्युक्तिः [illegible] गणधारिणां
[illegible] श्रीमज्जिनभद्रगणि [illegible] इत्यादि गाथासमू
ह [illegible] श्रीजिनभद्रगणि [illegible] तद्भाष्यं [illegible]
[illegible]
[illegible]
[illegible]
मां [illegible] चरणगुण [illegible] गुरूपदेशानुसारेण १ [illegible]
[illegible]
[illegible]
[illegible] १

[illegible] नमस्तीर्थाय
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

[illegible]
...तत्त्वाडंबरं तस्सु... ...एवमंगलाद्यभिधाने
व्यवस्थापितेनकश्चिदाह नन्वर्हदादयएवेष्टदेवतात्वेनप्रसिद्धास्तत्किमितितान्विहाय पृथक्कृताप्रवचनस्यनमस्कारःकृत इत्यत्रोच्यते न
मस्तीर्थायेतिवचनादर्हदादीनामपिप्रवचनमेवनमस्करणीयं अपरंचार्हदादयोप्यस्मदादिभिःप्रवचनेनैवज्ञायन्ते श्रीमदेवापिचचिरकालं
प्रवचनाद्यष्टंभेनैवप्रवर्त्तन्त इत्यादिविवक्षयार्हदादिभ्योपिप्रवचनस्यप्रधानत्वात् ज्ञानादिगुणात्मकत्वाच्च इदंत्वाशालनविरुध्यते प्रवचननमस्का
रंचक्रुर्वंद्रिःसूरयः सिद्धान्ततत्त्वावगमरसानुरंजितहृदयत्वादात्मनः प्रवचनभक्त्यतिशयःप्रख्यापितोभवतीत्यलमतिविस्तरेण मंगलादिविचारवि २
पर्येत्याक्षेपपरिहारादिकं मिहैवग्रंथकारोपिन्यक्षेणवक्ष्यतीति तदेवमियंगाथा सर्वोपिचायंग्रंथोमहामतिभिःपूर्वसूरिभिर्गंभीरवाक्यप्रबंधैर्व्युत्पन्न

भणितिप्रकारेणचव्याख्यातः तच्चव्याख्यानमित्थंयुक्तमपि गौरांगीगौरत्वपांडुरोगन्यायेनमतिमांद्यात्सांप्रतकालीन शिष्याणांनतथाविधार्थावगमहेतु
तांप्रतिपद्यतइत्याकलय्य मंदमतिनापिमयातेषांमंदतरमतीनांशिष्याणां अर्थावगमनिमित्तममुनाऋजुभणितिप्रकारेणेयंगाथाव्याख्याता सर्वोपि
चग्रंथोऽयमनेनोद्देशेनव्याख्यास्यतइतिप्रतिपत्तव्यं नचवक्तव्यंयथामहामतिपूर्वपुरुषवचनैरर्थावबोधनसंपद्यते तेषांमंदबुधैर्भवतोवचनेनकु
तोऽयंसंपत्स्यतेइति यतोजायतएवसमानशीलवचनैःसमानशीलानामर्थप्रतिपत्तिर्यदाह गामिल्लुयाणगामिल्लुएहिं मिल्लाणहोमिल्लिएहिं सम्मं
पडिवत्तीए असमत्थनविबुहभणिएहिं नियभासाएभणंते समाणसीलम्मिअत्थपडिवत्ती आयइमंदस्सविनिउणा विबुधसमूहस्यपवंधेहिं इत्यलमतिव
हुभाषितेनेतिगाथार्थः॥१॥ आवस्सयाणुयोगाभिधास्यतइत्युक्तं, किंपुनरस्यफलादिकं यद्वाच्यमित्येतद्व्याचष्टे प्रवक्त्रामह इतिशिष्यावच्छिष्यवच
नमाशंक्यावश्यकानुयोगस्यफलादीन्यभिधित्सुस्तत्संग्रहपरांद्वारगाथामाह तस्सफलजोगमंगलसमुदायत्थातहेवदाराइं तब्भेयनिरुत्तकमपओय
णाइंचपयत्थाइं॥२॥ व्याख्या॥ तस्यैवावश्यकानुयोगस्यप्रेक्षावतांप्रवृत्तिनिमित्तफलंमोक्षप्राप्तिलक्षणं तावद्वक्तव्यं ततोऽस्ययोगःशिष्यप्रदानं
संबंधोवसरःप्रस्तावोवाच्यः आवश्यकानुयोगस्य किंप्रमाणं किंमंगलमित्येतदपिनिरूपणीयं सामायिकाद्यध्ययनानां सावज्जजोगविरई उक्कित्तण
गुणवओयपडिवत्ती इत्यादिगाथयासमुदायार्थश्चसावद्ययोगविरत्यादिकोऽभिधानीयः फलंचयोगश्चमंगलंचसमुदायार्थश्चेतिसमाहारः तहेवदाराइंति
तथाद्वाराणिचोपक्रमनिक्षेपादीनि निरूपणीयानि तेषांद्वाराणांभेदावक्तव्याः॥तद्यथा॥ आनुपूर्वी १ नाम २ प्रमाण ३ वक्तव्यता ४ र्थाधिकारसमवतारभेदादु
पक्रमःषोढा ओघनिष्पन्ननामनिष्पन्नसूत्रालापकनिष्पन्नभेदान्निक्षेपस्त्रिधा सूत्रनिर्युक्तिभेदादनुगमोद्विधा नैगमादिभेदान्नयाःसप्तविधाइत्यादि रूप
क्रमणमुपक्रमः निक्षेपणंनिक्षेप इत्यादिनिरुक्तेन शब्दव्युत्पत्तिरूपंभणनीयं तथाक्रमोपि तेषामुपक्रमादिद्वाराणांप्रथममुपक्रमएव तत्रायमा
क्रमंनिक्षेपादय एतेस्मक्रमोपन्यासेनिपतःक्रमः समनुक्रमाभिधानतोनिर्दिश्यन्ते युक्तिं चात्रपश्यन्ति नह्यनानुपक्रान्तंनिक्षिप्यतेनानिक्षिप्तमनुग
म्यतइत्यादि तथोपक्रमादिद्वाराणामेवप्रयोजनं शास्त्रोपकाररूपनगरदृष्टांतेनभाव्यं यथाह्यप्राकारंमहानगरं किमप्यकृतद्वारंलोकस्यानाश्र
यणीयं भवत्येकादिद्वारोपेतमपिदुःखनिर्गमप्रवेशंजायते चतुर्धारोपेतंतुसर्वजनानामभिगमनीयं सुखनिर्गमप्रवेशंचसंपद्यते एवमिदमपिशास्त्रपुर
मुपक्रमादिचतुर्द्वारयुक्तं सुखाधिगमंचिंतनधारणादिसंपन्नंचभवतीत्येवमुपक्रमादिद्वाराणां सुखावबोधादिरूपःशास्त्रोपकारःप्रयोजनमि
हवक्ष्यतइतिभावः भेदश्चनिरुक्तंचक्रमश्चप्रयोजनंचेतिद्वंद्वः तत्त्वापश्चादुपक्रमादिद्वाराणांभेदनिरुक्तक्रमप्रयोजनानीत्येवंषष्ठीतत्पुरु
षसमासोविधेयः चःसमुच्चये भाव्यानीतियथायोगमर्थतःसर्वमपियोजितमेवेति द्वारगाथासंक्षेपार्थः॥२॥ विस्तरार्थंतुभाष्यकारएवंदिदर्शयि
षुर्यथोद्देशंनिर्देशइतिकृत्वा प्रेक्षावतांप्रवृत्त्यर्थमावश्यकानुयोगफलप्रतिपादिकांतावद्गाथामाह नाणकिरियाहिंमोक्खो तम्मयमावस्सयंजओतेणं

ण तदुक्त्वा आरंभो कारणं कज्जसिद्धिति व्याख्या ज्ञानं च सम्यगवबोधरूपं क्रिया च तत्पूर्वकसावद्यानवद्ययोगनिवृत्तिप्रवृत्तिरूपा ज्ञान
क्रियेताभ्यां तावन्मोक्षः अशेषकर्ममलकलंकाभावरूपः साध्यत इति सर्वेषामविशिष्टानां प्रमाणसिद्धमवदर्शनं [illegible] ज्ञानमेवाल [illegible] दिति
यदि नाम ज्ञानक्रियाभ्यां मोक्षस्तथापि [illegible] योगस्य किमायातं येन फलवत्तया प्रेक्षावतां तत्र प्रवृत्तिः स्यादित्याह तन्मयमावश्यकं ज्ञान
क्रियाभ्यां निर्वृत्तं तन्मयं ज्ञानक्रियासमूहरूपमावश्यकं तत्कारणं स्यादिति भावः यथा [illegible] कारणत्वेनोपचारात् [illegible] मुच्यते नन्व
[illegible] कारणत्वात्तथैवाभिधीयते [illegible] सामायिकादि षड्विधमावश्यकमपि सम्यग्
ज्ञानक्रियाकारणत्वा [illegible] ज्ञानक्रिया
[illegible]
क्रियाप्राप्ति [illegible] फलसिद्धिः [illegible] ज्ञानक्रियाप्राप्तिः [illegible]
[illegible] फलस्य [illegible] मोक्षस्य [illegible] तस्मात्स्यादिति [illegible]
ख्यानं [illegible] सर्वा [illegible] क्रियते [illegible] व्याख्यानस्य [illegible] तयोरेकाभिप्रायत्वात् [illegible]
[illegible] फलसिद्धिरिति यदि नाम [illegible]
[illegible] ज्ञानक्रियावाप्ति [illegible] मोक्षसिद्धि [illegible] कारणात्कार्यसिद्धि
र्नाकारणादिति कुत्त कारणो हि स विविक्तप्रवर्त्तमानाः प्रेक्षावन्तः समीहितमप्रतिहतकार्यमासादयंति नाकारणे अन्यथात्वात् [illegible]
णिमो [illegible] सर्वविघ्नमदूरीकृत्य [illegible] कारणं च पारंपर्येण आवश्यकानुयोग एव मोक्षस्य नच [illegible] ज्ञानक्रियाजननद्वारेण तस्य मोक्ष
संसाधकत्वा दित्तरस्य तु पारंपर्येणापि तदसाधकत्वा दिति गाथार्थः ॥३॥ उक्तं फलद्वार मथ योगद्वारमभिधित्सुराह भव्वस्स मोक्खमग्गा
हिलासिणो चिय गुरुब्बएसस्स आइए जोग्ग मिणं बालगिलाणस्स वाहारं ४ व्याख्या यदादौ प्रतिज्ञातं शिष्यप्रदानेस्य योगोवसरो वाच्य इति
तत्राह समस्तद्वादशांग्यध्ययनकालस्यादौ प्रथममिदं षड्विधमावश्यकं योग्यमुपदिशंति मुनयः शेषसमस्तश्रुतप्रदानकालस्यादौ प्रथममे
वावश्यकप्रदानस्यावसर इति भावः कस्य पुनरिदमावश्यकं योग्यमादिशंति मुनयः इत्याह भव्यस्य मुक्तिगमनयोग्यस्य जनो सच कश्चिद्दूरभ
व्यो संजातमोक्षमार्गाभिलाषोपि भवति तद्व्यवछेदार्थमाह मोक्षमार्गः सम्यग्ज्ञानदर्शनचारित्ररूपस्तमुत्तरोत्तरविशुद्धिरूपमभिल

षितुं शीलमस्य सतथा तस्य अयं चैवंविधोऽपरिणतगुरूपदेशोपि स्यात्तन्निरासार्थमाह स्थितः कर्त्तव्यतया परिणतो गुरूपदेशो यस्यासौ
स्थितगुरूपदेश स्तस्य कस्य किं यथा योग्यमुपदिशंतीत्याह बालग्लानयोरिवाहारं यथोपदिशंति भिषज इति गम्यते इदमुक्तं भवति यथा
आदौ बालस्य कोमलमधुरादिकं ग्लानस्य तु च येषामुद्गयूषादिकं तत्कालोचितमुत्तरोत्तरबलपुष्ट्यादिहेतुमाहारं योग्यं भिषजः समुपदिशंति
तथेहापि भव्यादिविशेषणविशिष्टस्य जंतोरादावेवमेवावश्यकमुत्तरोत्तरगुणवृद्धिहेतुभूतं योग्यमुपदिशंति तीर्थकरगणधरादति गाथार्थः ॥४॥ आ
श्यकस्य चादौ शिष्यप्रदानावसर प्रतिपादितस्तद्वा योगस्यासौ प्रतिपादित एव द्रष्टव्य [illegible] रनंतरमेवाख्यातत्वादिति गाथार्थः आहोश्चिदन्यापि तत्र क
हं ननु [illegible] विशिष्टस्यादौ योग्यमिदमावश्यकं [illegible] आद्योपाद्यमितीत्याह [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] शिक्षापदं शिक्षाप
[illegible]

[illegible]

रकल्पक्रमो [illegible] तदस्य गृह्णाति [illegible]

ते सूत्राध्ययनानंतरं भावीहितदर्थव्याख्यानरूपः स्थविरकल्पक्रम इह द्वितीयोऽनुयोगप्रदानस्यावश्यकस्य द्वारस्य कृतपकुमारस्योद्दतः सूत्राध्ययनकाल

स्यातिक्रान्तत्वेनेह विवक्षितत्वादनुयोगस्यैवाभिधित्सितत्वात् तत्प्रदानक्रमेणैवाधिकार इतिभावः एतावत्त्वास्यां गाथायां प्रक्तो पयोगिय

सुनरन्यदाख्यायते अनियतश्चावासो निष्पत्तीयविहारो इत्यादि तत्रासंगिकमित्यवगंतव्यं तत्र अनियतश्चावासोत्ति ततोऽस्यागृहीतसूत्रार्थस्य

शिष्यस्यानियतोवासः क्रियते ग्रामनगरसन्निवेशादिष्वनियतनिवासेनैव गृहीतसूत्रार्थः शिष्योपद्याचार्यपदयोग्यस्तदाजघन्यतोपि सोहाय

द्वयं द्वादशतीयोऽन्हादशावर्षाणि यावन्नानादेशदर्शनं नियमेन कार्यमितइत्यर्थः आचार्यपदानर्हस्यननियमः आचार्यपदार्होपिकिमितिदेश

दर्शनं कार्यतइतिचेदुच्यते सहिनानादेशेषु पर्यटंस्तीर्थकराणांजन्मादिभूमिःपश्यति ताश्चदृष्ट्वात्रजाताः इहदीक्षांप्रतिपन्ना अस्मिन्च ४

देशेनिर्वृताभगवंत इत्याद्यध्यवसायतोहर्षातिरेकाक्रान्तस्य सम्यक्त्वस्थैर्यं भवत्यन्येषांच सपश्चात्तवृत्तिरतामुत्पादयति श्रुताद्यतिशायिनश्चाचार्यादीन्नाना-

स्थानेषु पश्यतः सूत्रार्थेषु समाचार्यांचास्य विशेषोपलंभो भवति नानादेशभाषासमाचारांश्चैषबुध्यते ततश्च तत्तद्देशजानामपि विनेयानां तत्तद्भाषयाधर्मं कथ

यति ततः प्रतिबोध्यतान्प्रव्राजयति पूर्वप्रव्रजिताश्चतदुपसंपदं प्रतिपद्यंते निःशेषाभिज्ञाषासमाचारकुशलोयमितिशिष्याणां तदुपरिप्रीतियोगश्चजाय

तेइत्यादिगुणदर्शनादनियतवासः निष्पत्तीयत्ति एवंचानियतवासेन द्वादशवर्षाणिपर्यटतस्तस्याचार्यपदार्हशिष्यत्वेनात्मनोनिष्पत्तिर्भवति अन्येषांच

प्राकृतशिष्याणांतदंतिकेनिष्पत्तिर्जायतइति विहारोत्ति एवंशिष्यत्वेननिष्पत्तोसूरिपदेचप्राप्तस्वपरोपकारकरणेनदीर्घंचपर्यायंपरिपालितेऽन्यस्मिं

श्चयोग्यशिष्यआचार्यपदेव्यवस्थापिते ततोऽनंतरंविहरणंविशेषणभगवद्भिहितमार्गेपराक्रमणंविहारोविशेषानुष्ठानानुरूपोऽनेनकर्तव्यः सच

द्विविधोभक्तपरिज्ञेंगिनीपादपोपगमनलक्षणमभ्युद्यतमरणं १ जिनकल्पपरिहारविशुद्धिकल्प यथालंदिककल्पप्रतिपत्तिरूपो २ अभ्युद्यतविहारे

हारेसामाचारिज्ञात्वानुरूपासाच्चमरणलक्षणेविहारे निष्पाद्यायसीसा [illegible] १ नवा

रिवितिर्गाइ [illegible] २ [illegible] अन्नेविपुछ

म्मासु [illegible] ३ [illegible] ४ [illegible] द्वितीयेतु

विहारेजिनकल्पादिप्रतिपत्तिसामाचारी [illegible] विशुद्धचारित्रानुष्ठानेन

कृतमयात्महितंशिष्याश्चपकारतःपरहितंच निष्पन्नाश्चेदानीममगच्छपरिपालनक्षमाःशिष्याः [illegible] मनुष्ठानमुचितमिति

विचिंत्यचेदसतिपरिज्ञाने आयुःशेषकं [illegible] तदान्येऽप्यमतिशयिनमाचार्यादिकंपृच्छति तत्र [illegible]

मन्यतरन्मरणंप्रतिपद्यते [illegible] पुष्कलायुस्तु [illegible] जिनकल्पादिप्रतिपत्तिमुररीकरोति तत्रजि

नकल्पंप्रतिपित्सुः [illegible] तुलनाभिः [illegible] तद्यथा तपसासत्त्वेन सूत्रेण एकत्वेन बलेनच तुलनापंचविधोक्ता जिनकल्पंपडि

वज्जउ तुलनाभावनापरिकर्मत्वेसेकार्यानि [illegible] प्रायःपंचैवजनाः [illegible] पंचभिर्भावनाभि

जिनकल्पंप्रतिपित्सवः प्रथममेवात्मानंभावयति अप्रशस्ताश्च कंदर्पदेवकिल्बिषिकाभियोगिकासुरसंमोहस्वरूपाःपंचभावनाःसर्वथादूरतःपरित्यजंति

तत्रतपसात्मानंभावयंस्तथाक्षुधापराजयते यथादेवाद्युपसर्गादिनाऽनेषणादिकारणतोयदिषण्मासानयावदाहारंनलभते तथापिनबाध्यते सत्त्वभा

वनातुभयंपराजयते तत्रभयजयार्थं [illegible] यः प्रथमासत्त्वभावनाभवति द्वितीयादिकास्तु [illegible]

शेषाहच पढमाउवस्सयम्मि बीयावाहितइयचउक्कम्मि कोणअगेरेचउत्थी अह पंचमियामसाणम्मि सूत्रभावनयातुस्वनामवत्सूत्रंपरिचित्तं त

आकरोति यथा रात्रौ दिवा चोच्छ्वासप्राणस्तोकलवमुहूर्त्तादिकं कालं रूपपरावर्त्तनानुसारेणैव सर्वं सम्यगवबुध्यते एकत्वभावनया चात्मानं भावयन् संघा
टिकसाध्वादिना सहपूर्वप्रवृत्तानालापसूत्रार्थसुखदुःखादिप्रश्नमिथःकथादिव्यतिकरान्सर्वानपि परिवर्जति ततो बाह्यममत्वे मूलत एव व्यवच्छेदिते प
श्चाद्देहोपध्यादिभ्योऽपि भिन्नमात्मानं पश्यन्सर्वथा तेष्वपि निरभिष्वङ्गो भवति बलभावनायां बलं द्विविधं शारीरं मानसं धृतिबलं च तत्र शारीरमपि बलं जि
नकल्पार्हस्य शेषजनातिशायकमेव तपःप्रभृतिभिस्तु प्रकृष्यमाणस्य यद्यपि शारीरबलं तथाविधं न भवति तथापि धृतिबलेनात्मा तथा भावयितव्यो
यथा महद्भिरपि परीषहोपसर्गैर्न बाध्यते एताभिः पञ्चभिर्भावनाभिर्भावितात्मा जिनकल्पिकप्रतिरूपो गच्छेऽपि प्रतिवसन्नाहारादिपरिकर्म प्रथममेव
करोति तथाहारस्तृतीयपौरुष्यामुद्गाद्याप्यवल्लचणकादिकमंतप्रान्तं रूक्षं च संसृष्टमसंसृष्टं उद्धृतं हे होइ अप्पलेवाय उग्गहिया पग्गहिया उज्झिय
धम्मायसत्तमिया एवासां सप्तानामपि पिण्डैषणानामध्ये आद्यद्वयवर्जं शेषपञ्चानामध्यादन्यतरैषणाद्वयाभिग्रहेणाहारं तत्काल्येकपात्रकमपरस्या लेप
णया पानकमिति एवमात्मानं परिकर्मयित्वा गच्छान्तर्गतः पूर्वमेवात्मानं परिकर्म्य ततो जिनकल्पं प्रतिपित्सुः संघमीलयति तदभावे स्वगणानामेव स्व
माधायते ततस्तीर्थकरसमीपे तदभावे गणधरसन्निधाने तदसत्त्वे चतुर्दशपूर्वधरान्तिके तदसंभवे दशपूर्वधरप्राप्यर्णतदसत्त्वे भेतु वटाश्वत्थाशोकवृक्षा
दीनामासन्ने जिनकल्पमभ्युपगच्छति निजपदस्थापितं सूरिं सबालवृद्धं गच्छं विशेषतः पूर्वविरुद्धान्क्षमयति तद्यथा जइ किंचि पमाएणं नक
हु भे वहियं मए पुव्वि तं भे खामेमि अहं निस्सल्लो निक्कसाओ आपृच्छमेकपार्यं कुम्पाण्णं तं विहूमि गयसीसा खामेति तेजहरिहं जहा रिहं खामिया
तेण खामितस्स गुणा खलु निस्सल्लमविणयविणामग्गी लाघविमुपगम्यं अप्पडिबंधो य जिणकप्पे निजपदस्थापितसूरिप्रभृतीनामनुशास्तिं प्रय
च्छति तद्यथा पालेयव्वगणमेयं अप्पडिबंधो य होज्ज सव्वत्थ एसो सम राइणिओ अप्पतरसुओ य मा य णं तुब्भे परिभवह एस तुम्हं वि रहुपरपराउ
तुमं पि अंतेकूणरूएवं पुव्व पवन्नं विणयं मा हु पमाएहिं विणएणे जोगेसु जो जेण य गुणाहिओ उवजुञ्जइ संतेज णाणाहि ॥५॥ उभो×उं ॥४॥ विसेसउ संपयं
युत्रो इत्यादिशिक्षां दत्वा गच्छाद्विनिर्गते च षुर्गोचरातीते तस्मिन्नानंदिता साधवः प्रतिनिवर्तन्ते उक्तं च परकीयपन्नसहिऊ सभंगोवझ्झाण निरवइक्खो
धीरो पणबंधाउव सीहगिरिकंदराउवज्जो व सीहं मिव मंदरकंदराउ गच्छाविणिम्मा एतंमि चक्खुविसयमइगए अयंति आणंदियासाहू २ आभोएउंखत्तं निव्वाघाएण मा
सनिव्वाहिं गंतुं ण तत्थ विहरे साहुपडिवन्नजिणकप्पा एवंप्रभृति पन्नजिनकल्पीय प्राप्ते मासकल्पं चतुर्मासकं वा करिष्यति तत्र षड्भागान्कल्पयति ततश्च यत्र भागे
एकस्मिन्दिने गोचरचर्यां यां हिंडिति सत्र पुनरपि सप्तमदिवसे पर्यटति भिक्षाचर्या ग्रामान्तरगमनं च तृतीयपौरुष्यामेव करोति चतुर्थपौरुषीं च यत्रावगाहते तत्र नियम
मादवतिष्ठते भक्तपानकं च पूर्वोक्तैषणाद्वयाभिग्रहेणालेपकं दवच्छं गृह्णाति एषणादिविषयमुत्सर्गानं नापि साधं व्रजति एकस्यां च वसतौ यद्यप्युत्कृष्टतः सप्त जिनकल्पि
काः प्रतिवसन्ति तथापि परस्परं न भाषन्ते उपसर्गपरीषहान्सर्वानपि सहन्त एव रोगेषु चिकित्सां न कारयन्त्येव तद्वेदनां तु सम्यगेव विषहन्ते आपातसंलोकादिदोषरहित एव

स्थंडिले उच्चारादीन्करोति नास्थंडिले अममत्तअपरिकम्मा नियमा जिणकप्पियाण वसहीओ एमेव पयेराणं मोत्तूण पमज्जणं एक्कं मितिवचनात् परिकर्मर
हितायां वसतौ तिष्ठति यद्यपि निर्गच्छति तदानीयमादुर्लक्षकर्क एव न तु निषद्यायामौपग्रहिकोपकरणस्यैवाभावादिति मत्तकरिव्याघ्रसिंहादिकेच संमुखे समापतत्यपि
मार्गगमनादिना ईर्यासमितिं न भिनत्ति इत्यादिश्चान्यापि जिनकल्पिकानां सामाचारी समयसमुद्रादवगन्तव्या ठिईइंयत्ति तथा पूर्वोक्तद्विविधापि विहारस्थितिः श्रुतसं
हननादिका ज्ञातव्या तथाहि जिनकल्पिकस्य तावज्जघन्यतो नवमपूर्वस्य तृतीयमाचारवस्तूत्कर्षतस्तु संपूर्णानि दशपूर्वाणि श्रुतं भवति प्रथमसंहननो वज्रर्षभनारा
चसंहननश्चायं भवति स्वरूपेण पञ्चदशस्वपि कर्मभूमिषु संहृतस्तु कर्मभूमिष्वपि भवति उत्सर्पिण्यामसौ तृतीये चतुर्थे एकयोरेव जन्ममात्रेण तु द्वितीयारकेऽपि अवसर्पि
ण्यां तु जन्मना तृतीयचतुर्थारकयोरेव अत्रैतत्स्थस्तु पञ्चमारकेऽपि संहरणेन तु सर्वस्मिन्नपि कालेऽवाप्यते प्रतिपद्यमानकः सामायिकच्छेदोपस्थापनीयचारित्रयोः पूर्वप्रतिपन्नस्तु
सूक्ष्मसंपराययथाख्यातचारित्रयोरप्युपशमश्रेण्यामवाप्यते प्रतिपद्यमानानामुत्कृष्टतः शतपृथक्त्वं पूर्वप्रतिपन्नानां जिनकल्पिकानां सहस्रपृथक्त्वं लभ्यते जिनकल्पिकः
प्रायोऽपवादं नासेवते जंघाबलपरिक्षीणस्त्वविहरमाणोऽप्याराधकः आवश्यकीनैषेधिकीमिथ्यादुष्कृतगृहस्थविषयपृच्छोपसंपल्लक्षणाः पञ्च सामाचार्योऽस्य भवन्ति नलिच्छाद
यः अन्ये त्वाहुरावश्यकीनैषेधिकीगृहस्थोपसंपल्लक्षणास्तिस्र एव भवन्त्यारामादिनिवासिनः पृच्छादीनामप्यसंभवादिति लोचनासौ नित्यमेव करोतीत्येवमाद्यपरापि
स्थितिर्जिनकल्पिकानामागमादवसेया परिहारविशुद्धिकल्पसामाचार्यादिकं त्वनादेशेऽनुपयोगादुच्यते यथालंदिकानां तु तवेण सुत्तेण सत्तेणत्यादिका भावनादिव
क्तव्यता पथा जिनकल्पिकानामयं तु विशेषः सलेशतः प्रोच्यते उदकार्द्रः करो यावता शुष्यति तत आरभ्योत्कृष्टतः पञ्चरात्रिंदिवानि यावत्कालोऽत्र समयपरिभाषया लंदमित्यु
च्यते ततश्च पञ्चरात्रिंदिवलक्षणस्योत्कृष्टलंदस्यानतिक्रमेण चरन्तीति यथालंदिकाः पञ्चकोऽपि गणोऽभ्युत्कृष्टं प्रतिपद्यते ग्रामं च पड्वीथिकरूपाभिः षड्भिर्वीथीभिर्जिनकल्पि
कवत्परिकल्पयन्ति किंत्वेकैकस्यां वीथ्यां पञ्च पञ्च दिनानि पर्यटन्ती त्युत्कृष्टलंदचारित्वाद्यथालंदिका उच्यन्ते प्रति प्रतिपद्यमानकास्तु जघन्यतः पञ्चदश भवन्त्युत्कृष्टतस्तु सह
स्रपृथक्त्वं पूर्वप्रतिपन्नास्तु जघन्यतः कोटिपृथक्त्वं मुत्कृष्टतोऽपि कोटिपृथक्त्वं भवति एते च यथालंदिका द्विविधा भवन्ति गच्छे प्रतिबद्धा अप्रतिबद्धाश्च गच्छे च प्रतिबंधः
गीतार्थकारणात्किंचिदश्रुतार्थस्य श्रवणार्थमिति मन्तव्यमिति पुनरेकैके द्विविधा जिनकल्पिकाः स्थविरकल्पिकाश्च ये जिनकल्पं प्रतिपत्स्यन्ते ते जिनकल्पिकाः ये तु
पुनः स्थविरकल्पं समाश्रयिष्यन्ति ते स्थविरकल्पिकाः एतेषां च स्थविरकल्पिकजिनकल्पिकभेदभिन्नानां यथालंदिकानां परस्परमयं विशेषो यदाह थेराणं नाणत्तं
अतरंतं अप्पिणंति गच्छस्स गच्छे ते नियमेण करंति सुवंपि पडिकम्मं एक्केक्कपडिग्गहगा सप्पाउरणा हवंति थेराऊ जे उण संजिणकप्पे नयं तेसिं वच्छपायाणि निप्पडिकम्मसरी
रा अवि अच्छिमलंपि नेय अवणिंति विसहंति जिणारोगं कारंति कयाइ न तिगिच्छं मित्यलं विस्तरेण तदर्थिना तु कल्पग्रन्थोऽन्वेषणीय इति तस्माद्यतः प्रव्रज्याशिक्षापदानंतरमर्थ
ग्रहणाविधयं ततोऽर्थव्याख्यानरूपेणानुयोगेनायमधिकारः स्वाध्यायनकालस्यातिक्रान्तत्वेन तस्यैव प्रस्तुतत्वादिति स्थितमिति गाथार्थः ७ आह कृतपञ्चनमस्कारस्य शिष्यस्य सा
मायिकादिश्रुतं ददता चार्येणैव क्रमेणानुयोगमित्युक्तं यदि नाम तत्र मुक्तं ततः किमित्याह आरंभनमोक्कारो जइ य पवयणं तु पुव्वं तस्स भणिए पुणउ ग्ग जुत्ता आवस्सयस्स नउ यदी

त्यत्तुपगमेयुज्यादौनमस्कारोदीयते ततःपश्चात्सामायिकाद्यावश्यकं ततस्तत्र्वैतदनेनन्यायेनापतितं यदुतपूर्वप्रथमंतस्यनमस्कारस्यभणितेऽनुयोगे व्याख्यानेततोयुक्तःकर्तुमावश्यकस्या
नुयोगः व्याख्येयानुरोधेनैवहिव्याख्यानंप्रवर्त्तते व्याख्येयस्यचावश्यकस्यादौनमस्कारोदियतत्वेनभवद्भिरभ्युपगम्यते ऽनतस्तस्यानुयोगेकृते आवश्यकस्यासौकर्तुमुचित स्ततआचष्टा
थायौनमोक्कारणुओगपुव्वयं आवस्सयाणुओगंवोच्छ मितिवक्तुंयुक्तमितिभावः इतिगाथार्थः ८ अथोत्तरमाह सोसव्वसुयक्खंध ब्भंतरभूईजओऽतओतस्स आवस्सयाणुओगादि गहणगहि
ओणुओगोवि ९ सनमस्कारःसर्वेषामप्यावश्यकदशवैकालिकोत्तराध्ययनादिश्रुतस्कंधानामभ्यंतरभूतोऽंतर्गतो यतस्ततस्तस्यनमस्कारस्यादिशब्दोपभिन्नक्रमे आवश्यकादिश्रुतस्कं
नुयोगग्रहणगृहीतोऽनुयोगोपिन केवलमावश्यकादिश्रुतस्कंधग्रहणेननदंतर्गतत्वा नमस्कारःस्वरूपेणगृह्यते किंत्वावश्यकादिश्रुतस्कंधानुयोगग्रहणेननमस्कारानुयोगोपिगृहीतइत्य
शब्दार्थः तत्रश्चावश्यकानुयोगंवक्ष्य इत्युक्तेननमस्कारानुयोगोपिभणनीयस्तेनप्रतिज्ञातोद्रष्टव्यइतिभावः इतिगाथार्थः ९ कथंपुनर्नमस्कारस्यसर्वश्रुतस्कंधाभ्यंतरत्व
विज्ञायतइत्याह सस्सयसव्वसुयक्खंधंतरस्यापढममंगलग्गहणा जंचपिहोनपढिज्जइ नंदीएसोसुयक्खंधो तस्यचनमस्कारस्यसर्वाणिचतानिश्रुतानिचावश्यकश्रुतस्कंधादी
नि तदभ्यंतरताप्रतीयते कुतइत्याह सकलमांगलिकवस्तुनःप्रथमंचतन्मंगलंच प्रथममंगलं तदध्यवसायेन सर्वश्रुतस्यादौग्रहणं प्रथममंगलग्रहणंतस्मादिदमुक्तंभवति
मंगलाणंचसव्वेसिं पढमंहोईमंगलं इतिवचनात् प्रथममंगलत्वाभिप्रायेणसर्वश्रुतानामादौनमस्कारस्यग्रहणा तदभ्यंतरत्वमवसीयत एवकारणांतरमप्याह जंचेत्यादि
यच्चस्माच्चासौनमस्कारोनचाध्ययनेआवश्यकदशवैकालिकादिश्रुतस्कंधवत्तेभ्यःपृथक् सुयक्खंधात्ति श्रुतस्कंधत्वेननपठ्यते येनास्यपृथक्तेभ्यःश्रुतस्कंधरूपतास्यात् श्रुतरूप
सोततःपृथक्श्रुतस्कंधत्वाभावेसामर्थ्यात्सर्वश्रुताभ्यंतरत्वेवाऽस्यन्याय्या तस्मान्नच्चाध्ययनेष्वस्यश्रुतस्कंधत्वेनपृथगनुपादानंसर्वश्रुताभ्यंतरताज्ञापनार्थं मवेतिगाथार्थः॥१०॥
यतश्चैवंनंद्याःश्रुतस्कंधत्वेनपृथगनुपादानात्सर्वश्रुताभ्यंतरत्वेनज्ञापितोऽसौनमस्कारस्ततएवैतत्कृतंभद्रबाहुस्वामिनाकिमित्याह तेणंचियसामाइय सुत्ताणुगमाइऊनमोक्का
रं वक्काणइगुरुवी वयंनिसामाइयत्थं येनैवोक्तन्यायेननंद्यामसौसर्वश्रुताभ्यंतरतयाज्ञापितस्तेनैवकारणेनसामायिकसूत्रानुगमस्यादौनमस्कारंव्याख्याय गुरवोभद्रबा
हुस्वामिनोवदंत्यर्थव्याख्यानद्वारेणप्रकटयंति सामायिकश्रुतार्थंयदिहिपृथगसौश्रुतस्कंधस्यात्तदा आवस्सगस्सदसकालियस्सतहउत्तरज्झमायारसूयगडेनिज्जुत्तिमित्यादिग्रं
थेआवश्यकस्यनिर्युक्तिंप्रतिज्ञाय नमस्कारस्यनिर्युक्तिकरणमसंगतमेवस्यात्तस्मात् कारणादेवसर्वश्रुताभ्यंतरताऽस्यप्रतीयते ऽतोव्यवस्थितमिदंआवश्यकानुयोगप्रतिज्ञाविधा
नेनैव नमस्कारानुयोगःसंगृहीतएवकथ्यतेचनमस्कारनिर्युक्तिव्याख्यानाऽनंतरंभाष्यकारोपितदनुयोगमित्यलंविस्तरेणेतिगाथार्थः ११ तदेवंसप्रसंगमभिहितंयोगद्वार
मथतृतीयंमंगलद्वारमधिकृत्याह बहुविग्घाईसेयाइं तेणकयमंगलोवयारेहिं घित्तव्वोसोसुयमहानिहिव्वजहवामहाविज्जा श्रेयांसिबहुविघ्नानि भवंतिमहतामपीतिवचना ६
न्मेनबहुविघ्नानिश्रेयांसिभवंति तेनकारणेनपरमश्रेयोरूपत्वात्कृतमंगलोपचारैरेवसआवश्यकानुयोगोगृहीतव्यः किंवदित्याह शोभनमहारत्नादिनिधिवन्महाविद्याव
द्वेति गाथार्थः १२ कपुनस्तन्मंगलंशास्त्रस्यविधेयमित्याह तंमंगलमाईए मज्झेपज्जंतएयसत्थस्स पढमंसत्थत्थाविग्घपारगमणाययनिद्दिट्ठं तन्मंगलंशास्त्रस्यादौक्रियते
तथामध्येपर्यंतेचेति अथैकैकस्यकरणफलमाह प्रथमंमंगलंतावच्छास्त्रार्थस्याविघ्नेनपारगमनायनिर्दिष्टमितिगाथार्थः १४ तस्सेवयथेज्जत्थं मज्झिमयंअंतिमंपितस्सेव

डाक्टर भाऊदाजी स्मारक MEMORIAL

अव्वोच्छित्तिनिमित्तं सिस्सपसिस्साइवंसस्स १४ तस्यैवशास्त्रस्यप्रथममंगलकरणानुभावादविघ्नेनपरंपारमुपागतस्यस्थैर्यार्थंस्थिरतापादनार्थं मध्यमंमंगलंनिर्दिष्टमितिवर्त्तते
अंतिमंपीति अंत्यमपिमंगलंतस्यैवशास्त्रस्यमध्यममंगलसामर्थ्येनस्थिरीभूतस्याव्यवच्छित्तिनिमित्तं कस्ययोसौशास्त्रस्यार्थइत्याह शिष्यप्रशिष्यादिवंशागतस्येत्यर्थः
शिष्यप्रशिष्यादिवंशेशास्त्रार्थस्याव्यवच्छेदनिमित्तंचरममंगलमितिभाव इतिगाथार्थः १४ अत्राह मंगलकरणमसत्यं नमंगलंअहव मंगलस्सावि मंगलमउणवत्था
नमंगलममंगलत्तावा प्रेरकःप्राह भोआचार्यत्वदीयंशास्त्रंनमंगलंप्राप्नोति कुतइत्याह मंगलकरणादमंगलेहिमंगलमुपादीयते यत्तुस्वयमेवमंगलंतत्रकिंमंगल
विधानेननहिशुक्लंशुक्लीक्रियते नापिस्निग्धंस्नेह्यते तस्मान्मंगलोपादानान्यथानुपपत्तेः शास्त्रममंगलंअथमंगलंशास्त्रंमंगलस्यापिमतस्तस्यान्यमंगलंक्रियतइत्य
भ्युपगम्यतेऽनेएवंसति तर्ह्यनवस्था मंगलानामवस्थानंनक्वचित्प्राप्नोति तथाहि यथामंगलस्यापिमतःशास्त्रस्यान्यन्मंगलमुपादीयते तथामंगलस्यापितद्रूपस्यसतोऽन्यन्मं
गलमुपादेयं तस्याप्यन्यदित्येवमनवस्थाआयतीकेनवार्यते अथशास्त्रेयदुपात्तंमंगलं तस्यान्यमंगलकरणाभावइष्यते तत्रदूषणमाह नमंगलमित्तिशास्त्रमं
गलीकरणार्थमुपात्तमंगलस्यानवस्थाभयेनान्यमंगलाकरणेनतन्नमंगलंस्या दन्यमंगलाभावाच्छास्त्रवदित्यर्थः इदमुक्तंभवति यदिमंगलस्यापरमंगलविधाना
भावेनानवस्थानेष्यति तर्हियथामंगलमपिशास्त्रमन्यमंगलेऽकृतेमंगलंनाभवति तथामंगलमप्यन्यमंगलेऽविहितेनमंगलंभवेत् न्यायस्यसमानत्वात्तथाचकिमनिष्टंस्यादि
त्याह अमंगलतामंगलाभावशास्त्रेयन्मंगलमुपात्तं तदन्यमंगलशून्यत्वादमंगलंतस्यमंगलत्वाभावेशास्त्रमपिनमंगलमितिव्यक्त एवमंगलाभावइतिभावः वाशब्दः
पक्षांतरसूचकोऽनवस्थामंगलाभावोवेत्यर्थः इतिगाथार्थः १५ अथोत्तरमाह सत्थंतरभूयंमिमंगलेहोज्जकप्पणाएसा सत्थंमिमंगलंकिं अमंगलंकाणवत्थावा
शास्त्रादावश्यकादेरर्थांतरभूतेभेदवतिमंगलेउपादीयमानेभवेदुद्घट्टेत परेणविधीयमानामंगलकरणा सत्यंनमंगलमित्यादिकाकल्पनादोषोत्प्रेक्षालक्षणाशा
स्त्रंत्वावश्यकादिकेपरममंगलेस्वरूपेऽभ्युपगम्यमाने तद्भिन्नेमंगले चानुपादीयमानेहंतकिममंगलंकावाऽनवस्थात्वयाभिधीयतेतस्मादाकाशरोमंथनमेवपरस्यदोषो
द्भावनमितिभावः आहयदिशास्त्रंस्वयमेवमंगलं तर्हितंमंगलमाईएत्यादिवचनान्मंगलं तच्चकिमित्युपादीयते सत्यंकिंतुसीसमइमंगलपरिग्गहत्थमित्तं तदभि
धाणमित्यादिनावक्ष्यंति सर्वमभीष्टंमालुरिष्टा इतिगाथार्थः १६ अथसमर्थवादितयाऽर्थांतरभूतत्वमपिमंगलस्याभ्युपगम्यसमर्थयन्नाह अहवंतरंविमइमंगलं
मिनामंगलाणवत्थाउ सपराणुग्गहकारिं पईवरूवमंगलंजह्मा शास्त्रादर्थांतरभेदवत्यपिमंगलेऽभ्युपगम्यमानेमतिनामंगलताशास्त्रस्यनाप्यनवस्थाकुतइत्या
ह यस्मात्स्वपरानुग्रहकारिमंगलंप्रदीपवत् यथाहिप्रदीपआत्मानंप्रकाशयमानःस्वस्यानुग्राहकोभवति गृहोदरवर्त्तिनस्तुघटपटादीनर्थानाविःकुर्वाणःपरेषामनु
ग्राहकःसंपद्यते नतुस्वप्रकाशेप्रदीपांतरमपेक्षते यथाचलवणंरसवत्तामात्मनिचसलवणतामुपदर्शयत्स्वपरानुग्राहकंभवति नत्वात्मनःसलवणतायांलवणांतरम
पेक्षते एवमर्थांतरभूतंमंगलमपिनिजसामर्थ्याच्छास्त्रस्यात्मनिचमंगलतांव्यवस्थापयत्स्वपरानुग्राहकंभवति नतोमंगलान्मंगलरूपताप्राप्तौशास्त्रस्यतावन्नामंगलतायदा

चमंगलमात्मनामंगलरूपतायांमंगलांतरंनापेक्षते तदाअनवस्थापिदूरोत्सारितैवेति गाथार्थः ॥१७॥ पुनरप्यथापरः प्रेरयति मंगलनिप्पंतराले नमंगलमिहत्थ कयसत्तं
ते अट्ठवाणयंसयं मंगलमिहकिंतियग्गहणं इहमंगलविचारप्रक्रमेऽर्थेनोऽर्थापत्त्या पनस्तेनवाचार्यप्रसक्तंप्राशंकितदित्याह मंगलानामादिमध्यावसानलक्षणंत्रिकंमंग
लत्रिकं तस्यांतरालद्वयलक्षणमंतरालेनमंगलमिति यदाहितंमंगलमाईएमज्झेपज्जंतएयसत्थस्सेत्यादिवचनादादिमध्यावसानलक्षणेषुत्रिष्वेवनियतस्थानेषुमंगल
मुपादीयते तदातद्व्यावृत्तमंतरालद्वयमर्थापत्त्यैवामंगलंप्राप्नोतीतिभावः परएवाह यदिवासिद्धांतवादिन्नेवंब्रूयास्त्वं यदुतसर्वमेवशास्त्रंमंगलमितिप्रागेवो
क्तमतःकिमेवंपर्यते हंततर्हितंमंगलमाईए इत्यादिनाकिमिहमंगलत्रिकग्रहणंकृतं नहिसर्वस्मिन्नपिशास्त्रेमंगलेआदौमध्येऽवसानेचमंगलमित्यभिधानंयुक्तियुक्त
त्वमनुभवति तस्मादपांतरालद्वयस्यामंगलत्वंवाप्रतिपद्यस्व मंगलत्रयग्रहणंवामाकृथाइतिभावः इतिगाथार्थः १८ आचार्यःप्राह सत्थेतिह्वाविहत्ते तदंत
रालपरिकप्पणंकत्तो सव्वंचनिज्जरट्ठं सत्थमओमंगलमजुत्तं बुध्याशास्त्रेत्रिधाविभक्ते तस्यशास्त्रस्यांतरालंसदंतरालंतस्यपरिकल्पनंकुतः संभवति नकुतश्चिदि
त्यर्थः यथाहिसंपूर्णमोदकादिवस्तुनिनिरखंडेविकल्पितेऽन्तरालंनसंभवति तयात्रापीतिकस्यामंगलतास्यादिति यदिनामशास्त्रंत्रिधाविभक्तं तथापिकथंतस्यस
सर्वस्यापिमंगलतेत्याह सर्वंचावश्यकादिमंगलशास्त्रंनिर्जरार्थं कर्मापगमरूपानिर्जरार्थःप्रयोजनमस्येतिनिर्जरार्थं तथाचसतितपोवत्स्वयमेवमंगलमि
तिसामर्थ्याद्गम्यते यदिनामनिर्जरार्थत्वात्तपोवत्स्वयमेवावश्यकादिशास्त्रंमंगलं ततःकिमित्याह अतोऽमंगलमयुक्तंयतः सर्वमेवशास्त्रंमंगलं अतोमम
त्यामनितस्मिंस्त्रिधाविभक्तेयदुच्यतेऽपांतरालद्वयममंगलंतदयुक्तमित्यर्थः यदिहिशास्त्रंस्वयंमंगलंनभवेत्तदाऽन्यमंगलाभ्यासवातस्यापितदमंगलं
भवेद्यदातुसर्वमपिस्वयमेवतन्मंगलं तदाकापितस्यामंगलतानयुक्तेतिभावः इतिगाथार्थः १९ अथप्रेरकःप्राह जइमंगलंसयंचिय सत्थंतोकिमिहमंगलग्गहणं
सीसमपिमंगलपरिग्गहत्थमिनंदइभिहाणं यदिहस्वयमेवशास्त्रंमंगलमिष्यते तदातंमंगलमाईएमज्झेइत्यादिवचनात्किमिहमंगलग्रहणंक्रियते स्वतएवमं
गलग्रहणंक्रियते स्वतएवमंगलेमंगलविधानस्यानर्थकत्वादितिभावः इतिपरेणप्रेरितेगुरुराह सीसेत्यादिशिष्यस्यमतिः शिष्यमतिस्तस्यामंगलपरिग्रहः
मार्थः प्रयोजनमस्यतत्तथा तदर्थमेवशिष्यमतिमंगलपरिग्रहार्थमात्रं तदभिधानंमंगलाभिधानमित्यर्थः इदमुक्तंभवति शास्त्रादनर्थांतरभूतमेवमंग
लमुपादीयते नार्थांतरमितिप्रागेवोक्तं नंदिरपिमंगलत्वेनाभिधास्यते साचयंचज्ञानात्मिकाततःशास्त्राण्यावश्यकादीनि सर्वाणिश्रुतज्ञानरूपत्वान्नंद्यंतर्ग
तान्येवनंदिरपिश्रुतरूपत्वेनावश्यकादिशास्त्रांतर्गतैव तस्मान्नंदेर्मंगलत्वेनाभिधानेशास्त्रांतर्गतमेव मंगलमभिहितंभवति तथापिनामंगलस्यसतःशास्त्रस्य
मंगलतापादनार्थंतदभिधानंकिंतुशिष्यमतिमंगलपरिग्रहार्थंशिष्याहितस्मिन्नभिहितेमंगलमेतच्छास्त्रमितिशिष्यमतौ तन्मंगलतापरिग्रहंकरोतीतिभावः
इतिगाथार्थः २० उगाहकिंमंगलमपिमंगलबुध्याग्रहीतमेवस्वकार्यंकरोतिनान्यथाएवमेतदित्याह इहमंगलंपिमंगलं बुद्धीएमंगलंजेहामाहु मंगलत्ति

यद्बुद्धिपरिग्गहेविसणुकारणंभणियं इहलोकेमंगलमपिसद्वस्तुमंगलबुध्यागृह्यमाणमभिनंद्यमानंवामंगलंभवति यथासाधुः हिस्वयंमंगलभू
तोऽपितद्बुध्यागृह्यमाणएवप्रशास्तयेनोरक्तोर्भव्यस्यमंगलकार्यंकरोति अमंगलबुध्यानुगृह्यमाणंमंगलमपितत्कार्यमकरोति यथासएवसाधुःकारुष्याप
हतवैतीरक्तेरभव्यस्य अत्राहकश्चिन्ननुवंसत्यमंगलमप्यसाध्वादिकंमंगलबुध्यागृह्यमाणंतत्कार्यंकरिष्यति न्यायस्यसमानत्वात्तदयुक्तं असाधोःस्वतोमंग
लरूपतायाअभावात्सत्यमणिर्हिसत्यमणितयागृह्यमाणोपहितुमीरमापादयति नत्वसत्यमणिसत्यमणितयेत्यलंप्रसंगेनप्राहयद्येवंतर्हिकमेवमंगलमस्तु
तेनापिहिशिष्यमतिमंगलपरिग्रहःसेत्स्यतिकिंमंगलत्रयकरणेनत्याह मंगलतियेत्यादि मंगलत्रयेहिकृतेशिष्यस्यबुद्धौतत्परिग्रहोभवति तेनापिकिमिति
चेदित्याह नमुतत्थापिपढमंसयहत्था विग्घपारगमणायनिद्दिट्ठ मित्यादिनाकारणंनिमित्तंप्रागेवभणितंकिमितिविस्मार्यते नचवक्तव्यमेकेनैवमंगलेनतत्का
रणत्रयंसेत्स्यति यतोयथैवशास्त्रंमंगलमपिसन्मंगलबुद्धिपरिग्रहमंतरेणमंगलंनभवति साधुवत्तथाशास्त्रस्यादिमध्यावसानानिमंगलरूपाण्यपिमंग
लबुद्धिपरिग्रहंविनानमंगलकार्यंकुर्वंतीतिमंगलत्रयाभिधानमितिगाथार्थः २१ तदेवंमंगलाभिधानमुपपत्तिभिर्व्यवस्थाप्यमंगलशब्दार्थंनिरूपयितु
माह मंगिज्जइधिगम्मइ जेणहियंतेणमंगलंहोइ अहवामंगोधम्मो तंलाइतयंसमादत्ते अगिरगिलगिवगिमगीत्यादीमगिगत्यर्थोधातुरतस्तस्याऽलच्प्रत्ययो
न्तस्य मंग्यतेऽधिगम्यते साध्यतेयतोहितमनेनतेनकारणेनमंगलंभवति अथवामंगइतिधर्मस्याख्यालाआदानेधातुस्ततश्चमंगलातिसमादत्तइतिमंगलंधर्मोपादा
नहेतुरित्यर्थः इतिगाथार्थः २२ अहवानिवायणाओ मंगलमिटत्थपगइपच्चयओ सद्दोमद्दजंजह तयंजहाजोगमाउज्जं अथवानिपातनान्मंगलमितिसाध्यते क
थमित्याह इष्टार्थप्रकृतिप्रत्ययतस्तत्रेष्टोविवक्षितोऽर्थोयाभ्यांताविष्टार्थौ प्रकृतयस्तत्रयथा मदिमडेने मसज्ञानेमर्द हर्षमृदमोदस्वप्नगतिषु महपूजायामित्येवमादिप्र
त्ययस्त्वलामांप्रकृतीनांसर्वत्रअलजेवविधीयते ततोमंगलमितिरूपंनिपात्यते व्युत्पत्तिस्त्वेवंमंड्यतेऽलंक्रियतेशास्त्रमनेनेतिमंगलं तथामंद्यतेऽपयतेनिश्चीयतेविघ्नाभावो
ऽनेन तथामद्यंतिहृष्यंतिमदमनुभवंति मोदंतेशोभंतेविघ्नाभावे ननिःप्रकंपतयासज्ञायंतेशास्त्रस्यपारंगच्छंत्यनेनेति तथामह्यंतेपूज्यंतेऽनेनेतिमंगलमित्येवमादिव्या
करणशास्त्रेयथायथानिपातनसिद्धं तत्तथायोगंयथासंबंधमत्रस्वधियाऽऽयोज्यं लक्षणज्ञैरितिगाथार्थः २३ मंगलपरूवणाओ मंगलमिहेवमाइनेरुत्ता भासंतिस
त्थवसओ नामाइचउव्विहंतंच अथवामांगालयतिभवादितिमंगलं संसारादपनयतीत्यर्थः इहमंगलविचारेऽवमादिनैरुक्ताःशब्दविदःशास्त्रवत्तयोव्याकरणानुसा
रेणभाषंते मंगलशब्दार्थंव्याचक्षते आदिशब्दाच्छास्त्रस्यमाभूद्गलोविघ्नोऽस्मादितिमंगलं अथवाशास्त्रस्यमाभूल्लीनाशोऽस्मिन्नितिमंगलं सम्यग्दर्शनादिमार्ग
लयमाद्यमंगलमित्यादिद्रष्टव्यमित्यलंविस्तरेण इहतत्पर्यायानिर्दिश्याख्या तत्रतत्त्वंशब्दार्थरूपंतत्तावन्निर्णीतंपर्यायास्तुमंगलशांतिर्विघ्नविद्रावणमित्यादयः
स्वयमेवद्रष्टव्याः भेदांस्तुस्वयमेवनिरूपयितुमाह नामाइचउव्विहंतंचेति सच्चमंगलंनामादिभेदतश्चतुर्विधंभवति तद्यथा नाममंगलं स्थापनामंगलं द्रव्यमंगलं भावमं

गलं चेति गाथार्थः २४ तत्र नाम किमुच्यते इत्याशंक्य सामान्येन नाम्नस्तावल्लक्षणमाह पज्जायाणभिधेयं ठियमण्णत्थे यं तदत्थनिरवेक्खं आइच्छियं च नामं जावद
व्वयं पाएण यद्वस्तु अभिधेयात् भृतकदारकादौ इंद्राद्यभिधानं क्रियते तन्नाम भण्यते कथंभूतं तदित्याह पर्यायाणामिन्द्रशक्रपुरंदरपाकशासनशतमखहरिप्रभृतीनां समाना
र्थवाचकानां ध्वनीनामनभिधेयमवाच्यं नाम वत्स्यपिंडस्य संबंधी धर्मोऽयं नाम्न्युपचरितः न हि नामवान् भृतकदारकादिपिंडः किलैकेन संकेतितमात्रेण इंद्रादिशब्दे
नैवाभिधीयते न तु शेषैः शक्रपुरंदरपाकशासनादिशब्दैरतो नामयुक्तपिंडगतधर्मो नाम्न्युपचरितः पर्यायानभिधेयमिति पुनरपि कथंभूतं तन्नामेत्याह ठियमण्ण
त्थेत्ति विवक्षिताद् भृतकदारकादिपिंडादन्यश्चासावर्थश्चान्यार्थो देवाधिपादिः सद्भावतस्तत्र यत् स्थितं भृतकदारकादौ तु संकेतमात्रतयैव वर्तते अथवा सद्भाव
तः स्थितमन्वर्थे अनुगतः संबंधः परमैश्वर्यादिको यत्र सोऽन्वर्थः शचीपत्यादिः सद्भावतस्तत्र स्थितं भृतकदारकादौ तर्हि कथं वर्तत इत्याह तदर्थनिरपेक्षं तस्येंद्रादिनाम्नो
ऽर्थस्तदर्थः परमैश्वर्यादिस्तस्य निरपेक्षं संकेतमात्रेणैव तदर्थशून्ये भृतकदारकादौ वर्तत इति पर्यायानभिधेयं स्थितमन्यार्थं अन्वर्थं वा तदर्थनिरपेक्षं यत्क्वचिद् भृतकदारका
दौ इंद्राद्यभिधानं क्रियते तन्नामेतीह तात्पर्यार्थः प्रकारांतरेणापि नाम्नः स्वरूपमाह यादृच्छिकं चेति इदमुक्तं भवति न केवलं यन्नेतरोक्तं किं त्वन्यत्राविद्यमानमपि यदे
वमेव यदृच्छया केनचिद् गोपालदारकादेरभिधानं क्रियते तदपि नाम यथा डित्थो डविल्ल इत्यादि इदं चोभयरूपमपि कथंभूतमित्याह यावद्द्रव्यं च प्रायेणेति यावदेतद्वाच्यं द्रव्य
मवतिष्ठते तावदिदं नामाप्यवतिष्ठत इति भावः किं सर्वमपीत्याह प्रायेणेति मेरुद्वीपसमुद्रादिकं नाम प्रभूतं यावद्द्रव्यभावि दृश्यते किंचित्त्वन्यथापि समीक्ष्यते देव
दत्तादिनामवाच्यानां द्रव्याणां विद्यमानानामप्यपरापरनामपरावर्तस्य लोके दर्शनात् सिद्धांतेपि यदुक्तं नाम स्थापना व्यवह्रियंते तत्प्रतिनियतजनपदादिसंज्ञामेवाश्रित्योत्पत्त्यर्थोत
राः कुरव इत्यादि तदेवं प्रकारद्वयेन नाम्नः स्वरूपमभिहितं एतत्तृतीयप्रकारस्याप्युपलक्षणं पुस्तकपत्रचित्रादिलिखितस्य वस्त्वभिधानभूतेंद्रादिवर्णावलीमात्रस्याप्यत्र
नामत्वेनोक्तत्वादिति एतच्च सामान्येन नाम्नो लक्षणमुक्तं प्रस्तुते तु एवं योज्यते यत्र मंगलार्थशून्ये वस्तुनि मंगलमिति नाम क्रियते तद्वस्तु नाम्ना नाममात्रेण मंगलमिति कृ
त्वा नाममंगलमित्युच्यते पुस्तकादिलिखितं यन्मंगलमिति वर्णावलीमात्रं तदपि नाम च तन्मंगलं चेति कृत्वा नाममंगलमित्यभिधीयत इति गाथार्थः २५ अथ सा
मान्येन स्थापनायाः स्वरूपमाह जं पुण तयत्थसुण्णं तयभिप्पाएण तारिसागारं कीरइ व निरागारं इत्तरमियरं च सा ठवणा सा स्थापनाभिधीयते यत् किमित्याह
यत्क्रियते इंद्रादिस्थापनारूपतया विधीयते वस्तु पुनः कीदृशं नामलक्षणात् स्थापनालक्षणस्य वैसदृश्यद्योतकः केनेत्याह तदभिप्रायेण तस्य सद्भूतेंद्रस्याभिप्रायो
ऽध्यवसायस्तेन कथंभूतं तदित्याह तदर्थशून्यं स चासावर्थश्च तदर्थः सद्भूतेंद्रलक्षणस्तेन शून्यं तदर्थशून्यं पुनरपि कथंभूतं तादृशाकारं सद्भूतेंद्रसमा
नाकारं वा शब्दस्याभिन्नक्रमत्वान्निराकारं वा सद्भूतेंद्राकारशून्यमित्यर्थः चित्रलेप्यकाष्ठपाषाणादिषु तादृशाकारं भवत्यक्षादिषु तु निराकारमित्यर्थः पुनः किंभूतमि
त्वरमल्पकालीनं इतरद्यावत्कथितं तत्रेत्वरं चित्रादिगतं यावत्कथितं तु नंदीश्वरचैत्यप्रतिमादि तदपि हि निष्ठतीति स्थापनेति स्थापनात्वेन समये निर्दिष्टमेव

तदिदमिह तात्पर्यं यद्वस्तु सद्भूतेंद्रार्थशून्यं सत्तदध्यारोपात् तादृशाकारं निराकारं वा साकवरं यावत्कथितं वा स्थाप्यते सा स्थापनेति प्रकृते योजना लिख्यते क्रियते चित्रकर्मादिग
तः परममुनिस्थापनं स्थापनेति यन्मंगलं स्थाप्यते इति वा स्थापना तया मंगलं स्थापनामंगलमिति व्यपदिश्यत इति गाथार्थः २६ अथ भाष्यकारः स्वयमेव नामस्थाप
नामंगलयोरुदाहरणमुपदर्शयन्नाह जह मंगलमिह नामं जीवाजीवोभयाण देसेसु रूढं जलणाईणं ठवणाए अक्खियाईणं यथा त्वाहुदाहरणोपन्यासार्थः कथ
मित्याह जीवाजीवोभयानां ज्वलनादीनां देशे लाटदेशे भाषया मंगलमिति नाम रूढं तत्र जीवस्याग्नेर्मंगलमिति नाम रूढं सिंधुविषये अजीवस्य द्वारकवलनकस्य मंगलमिति नाम
रूढं तत्र जीवस्याग्नेर्मंगलमिति नाम रूढं सिंधुविषये अजीवस्य द्वारकवलनकस्य मंगलमिति नाम रूढं लाटदेशे जीवाजीवोभयस्य तु मंगलमिति नाम रूढं वंदनमा
लायाः इवरिकादीनामिहान्वेतनत्वाच्चादीनां तु सचेतनत्वाज्जीवाजीवोभयत्वं भावनीयं स्वस्तिकादीनां तु स्थापनालोके तस्या रूढं स्थापनामंगलत्वमिति गाथा
र्थः २७ अथ द्रव्यलक्षणमाह दवए दुयए दोरवयवो विगारो गुणाण संदावो दव्वं भव्वं भावस्स भूयभावं च जं जोग्गं २८ द्रु गताविति धातुर्मनुष्यद्रवति तांस्तान्
स्वपर्यायान् प्राप्नोति मुंचति वेति द्रव्यमित्युत्तगार्धे रानीयसर्वत्र संबध्यते तथाभूयते स्वपर्यायैरेव प्राप्यते मुच्यते वेति द्रव्यं यत्किल पर्यायान् द्रव्यं प्राप्नोति तैस्तदपि प्राप्यते
यांश्च मुंचति तैस्तदपि मुच्यत इति भावः तथा द्रवतीनां सत्तायाः पर्यायाणामुच्चतीति निरुः सत्ता तस्या एवावयवो विकारो वेति द्रव्यं अवांतरसत्तारूपाणि हि द्रव्याणि महासत्ताया अव
यवो विकारो वा भवत्येवेति भावः तथा गुणा रूपरसादयस्तेषां संद्रवणं संद्रावः समुदायो घटादिरूपो द्रव्यं तथा भव्यं भावस्य भविष्यतीति भावस्तस्य भावस्य भा
विनः पर्यायस्य यद्द्रव्यं योग्यं तदपि द्रव्यं राज्यपर्यायार्हकुमारवत् तथा भूतभावं चेति भूतः पश्चात्कृतो भावः पर्यायो यस्य तद्भूतभावं तदपि द्रव्यं अनुभूतघृताधा
रत्वपर्यायरिक्तघृतघटवत् चशब्दाद् भूतभविष्यत्पर्यायं च द्रव्यमिति ज्ञातव्यं भूतभविष्यद्घृताधारत्वपर्यायरिक्तघृतघटवत् ननु तदपि भूतभावं तथा भूतभवि
ष्यद्भावं च कथंभूतं सद्द्रव्यमित्याह यत् योग्यं भूतस्य भावस्याभूतभविष्यतोऽपि भावयोरिदानीमसत्त्वेपि यद्योग्यमर्हं तदेव द्रव्यमुच्यते नान्यदन्यथा सर्वेषामपि
पर्यायाणामनुभूतत्वादनुभविष्यमाणत्वाच्च सर्वस्यापि मुद्गलादेर्द्रव्यत्वप्रसंगादिति गाथार्थः २९ आह विनेयो ननु सामान्येन द्रव्यलक्षणमवगतं परं द्र
व्यमंगलं किमभिधीयत इति प्रस्तुतं निवेद्यतामित्याह आगमओणुवउत्तो मंगलसद्दाणुवासिओ वत्ता तन्नाणलद्धिसहिओवि नोवउत्तोत्ति तो दव्वं इह द्रव्यमंगलं
सामान्यद्विधा भवति आगमतश्चागममाश्रित्य नोआगमतश्च नोआगममाश्रित्य तत्रागमतो मंगलशब्दार्थज्ञानरूपोऽभिप्रेतस्तमाश्रित्य द्रव्यं द्रव्यमंगलमिति पर्यंते
संबंधः कोसावित्याह वक्ता मंगलशब्दार्थप्ररूपकः किं सर्वोपीत्याह अनुपयुक्तस्तदुपयोगशून्यः किंविशिष्ट इत्याह मंगलशब्दानुवासितो मंगलशब्दार्थज्ञानाव
रणक्षयोपशमसंस्कारानुरंजितमना सद्ज्ञानलब्धिमानिति यावत् ननु यदि तज्ज्ञानलब्धिमांस्तर्हि किमिति द्रव्यमित्याह तण्णेत्यादि तज्ज्ञानलब्धिसहितोऽपि मंगल

विशेषा० वृ०
१

शास्त्रार्थज्ञानावरणक्षयोपशमवानपि नोपयुक्तस्तत्र मंगलशास्त्रार्थे यस्मादसौ तेनेति तस्माद्द्रव्यमंगलं इदमुक्तं भवति अनुपयोगो द्रव्यमिति वचनान्मंगलशास्त्रार्थ
ज्ञानमपि तत्रानुपयुक्तस्तत्प्रसूत्यंसंज्ञाना लब्धिसहितो प्यागमतो द्रव्यमंगलमेवेति गाथार्थः २९ अत्राह कश्चिन्ननु कोयमागमो यमाश्रित्य द्रव्यमंगलमिद
मभिधीयते अत्रोच्यते मंगलशास्त्रार्थज्ञानमत्रागमस्तर्हि प्रेर्यते किमित्याह जइ नाणमागमोत्ति कह दव्वं दव्वमागमो कहणु आगमकारणमाया देहो सद्दो य तो
दव्वं यदि मंगलशास्त्रार्थज्ञानमागमस्तर्हि तद्वक्तासौ कथं द्रव्यमंगलं आगमस्य भावमंगलत्वेन द्रव्यमंगलत्वानुपपत्तेः अथ द्रव्यं द्रव्यमंगलमसौ तर्ह्यागमः
कथं येनागमत आगममाश्रित्येत्युच्यते द्रव्ये आगमस्याभावाद् द्वितीये भावमंगलत्वप्रसंगात्तस्मादागमतो द्रव्यमंगलमिति दूरविरुद्धमिति परेणोक्ते आचार्यः
प्राह आगमेत्यादि इदमुक्तं भवत्यागमतद्रूपकर्तृने तद्वक्ताबोद्धव्यं यत्पुनस्तस्य शब्दादिवागमो ह्यस्ति किं तर्ह्यागमस्य मंगलशास्त्रार्थज्ञानलक्षणस्य यत्कारणनिमि
त्तं देहेविद्यत इत्यवगंतव्यं किं पुनस्तदागमस्य कारणमिहावसेयमित्याह अनुपयुक्तस्य वक्तुः संबंधी आत्मा जीवो देहः शरीरं श्च जीवशरीररहितावदागम
स्य कारणं तदाधारत्वात् शरीररहितस्यागमस्यासंभवात् शब्दोपि प्रत्याय्यशिष्यगतागमस्य कारणमेव न मन्तरेण तस्याभावाद्यश्च कारणं तद्द्रव्यं भवत्येव भूतस्य भा
विनो वा भावस्य हि कारणं तु यल्लोके तद्द्रव्यमित्यादि वचनादित्याह तोत्ति यत एवं तस्माद्द्रव्यं द्रव्यमंगलमिदमित्यर्थः यद्यागमकारणमेवेह विद्यते नर्हि कथ
मिदमागमोयेनागमतो द्रव्यमंगलं स्यादिति चेदुच्यते आगमस्य कारणभूता आत्मादयो पि कारणे कार्योपचारादागमत्वेनोच्यंते भवति च कारणे कार्यव्य
पदेशो यथा तंदुला वर्षति पर्जन्यस्तस्मादागमतो द्रव्यमंगलं न विरुध्यत इति गाथार्थः ३० अथ न त्थि न एहिं विहूणं सुत्तं अत्थो अ जिणमए किंचि आसज्ज
उ सोआरं नए नयविसारउ बूयादिति वचनात् जिनमते सर्वेपि पदार्था नयैर्विचारणीया इत्यतो द्रव्यमंगलमपि नयैर्विचारयन्नाह एगो मंगमिवं णेगाणे
गमेआरं गाइणेगमनयस्स संगहनयस्स एकं सव्वंचिय मंगलं लोए वक्ष्यमाणशास्त्रार्थस्य नैगमनयस्य मते नैकोनुपयुक्तो मंगलशास्त्रार्थरूपक एकं द्रव्य
मंगलं अनेके त्वनुपयुक्तास्तत्प्ररूपका अनेकानि द्रव्यमंगलानि अयं हि नयः सामान्यविशेषांश्चाभ्युपगच्छत्येव तत्र विशेषवादित्वपक्षे एकोनुपयु
क्त एकं द्रव्यमंगलं अनेकेत्वनुपयुक्ता अनेकानि द्रव्यमंगलानीत्युपपद्यते एवं विशेषाणां पृथग्भिन्नत्वादिति संग्रहनयस्य तु वक्ष्यमाणस्वरूपस्य
केवलसामान्यवादिनो मतेन सर्वस्मिन् लोके एकमेव द्रव्यमंगलं सर्वेषां द्रव्यमंगलत्वसामान्यादव्यतिरिक्तत्वात् व्यतिरेके वा द्रव्यमंगलत्वप्राप्तेः सामान्यस्य च त्रिभु
वनेप्येकत्वादिति गाथार्थः ३१ एतदेवाह एकं निच्चं निरवयवमक्कियं सव्वगं च सामन्नं निस्सामन्नत्ताओ नत्थि विसेसो खपुप्फंव एकमद्वितीयत्वादेकसंख्योपे
तं सामान्यं एकमपि क्षणिकं स्यादत आह निच्चमनपायि नित्यमप्याकाशवत्सावयवं स्यादतः निरवयवं तत्सवितुरुदयास्तमनायोगादित्यत आह निरवयवम १

नंशपूर्वापरकोटिशून्यत्वादिति निरवयवमपि परमाणुवत्सक्रियं स्यादत आह अक्रियं क्रियारहितं परिस्पंदविनिर्मुक्तत्वादिति अक्रियमपि दिगादिवदसर्व
गतं स्यादत आह सर्वगं च सकललोकाकाशव्याप्तकं इदमित्थंभूतं सामान्यमेवास्ति न तु विशेषः कश्चनापि विद्यते कुत इत्याह निःसामान्यत्वात्सामान्यविरहि
तत्वात् खपुष्पवत् यद्धास्ति तत्सामान्यविरहितं न भवति यथा घटस्तस्मादेकस्माद्द्रव्यमंगलसामान्यादव्यतिरिक्तत्वात् तद्व्यतिरेके वा द्रव्यमंगलत्वाप्रसंगात् सामा
न्यस्य त्रिभुवनेप्येकत्वादेकमेव संग्रहनयमते द्रव्यमंगलमिति गाथार्थः ३२ अत्र विशेषवादिनयमतस्थितः कश्चिदाह ननु कथमनेकानि द्रव्यमंगलानि न संभव
ति यथा हि वनस्पतिरित्युक्ते वृक्षगुल्मलतावीरुधादयो विशेषा एव प्रतीयंते न पुनस्तदतिरिक्तः कश्चिद्वनस्पतिः एवमिहापि द्रव्यमंगलमित्युक्ते अनुपयुक्तत्वप्ररूप
कलक्षणा विशेषा एवावगम्यंते न तु तदधिकं किंचित्सामान्यमतः किं शून्य इवास्मिन् जगत्येवमभिधीयते निस्सामन्नत्ताओ नत्थि विसेसो खपुप्फंवेति इति विशे
षवादिना प्रोक्ते सामान्यवादी संग्रहः प्राह ननु यत एव वनस्पतिरित्युक्ते वृक्षादयः प्रतीयंते अत एव ते तदनर्थांतरभूताः हस्तस्येवांगुलयः इह यस्मिन्नुच्यमाने
यत्प्रतीयते तत्ततो व्यतिरिक्तं न भवति यथा हस्त इत्युक्ते अंगुल्यादयः प्रतीयमाना हस्ताव्यतिरिक्ताः प्रतीयंते च वनस्पतिरित्युक्ते वृक्षादय इत्यमी न वनस्पतिव्यति
रिक्ताः ततो न सामान्यादतिरिक्तः कोपि विशेषः समस्तीत्येकमेव सर्वत्र द्रव्यमंगलमिति अथोपपत्यंतरेणापि सामान्यवादो वृक्षादीनां सर्वेषामपि वनस्पतिसा
मान्यरूपतां समर्थयन्नाह चूअवणस्सइच्चिय मूलाइगुणोत्तिसमूहोव्व गुम्माइ विहरं मईन वणस्सइ विसिठा चूत आम्रो वनस्पतिरेव वनस्पतिसामान्यं न
व्यभिचरतीत्यर्थः इति प्रतिज्ञा मूलकंदस्कंधत्वक्शाखाप्रवालपत्रपुष्पफलबीजादिगुणत्वादिति हेतुः भूतसमूहवदिति दृष्टांतः इह यो यो मूलादिगुणः स स वनस्प
तिसामान्यरूप एव यथा चूतसमूहो मूलादिगुणश्च चूतस्तस्माद्वनस्पतिसामान्यरूप एव गुम्माइ यो येवं वाच्या स्तथा हि विशेषवादिना विशेषतयाभ्युप
गम्यमानो गुल्मोपि वनस्पतिसामान्यरूप एव मूलादिगुणत्वाद्गुल्मसमूहवदित्येवमन्येषामपि लतादिविशेषाणां वनस्पतिसामान्यादव्यतिरिक्तत्वं साधनीयं
तद्व्यतिरेके सर्वत्र मृण्मयत्वादिप्रसंगो बाधकं प्रमाणं तस्मात्सामान्यमेवास्ति न विशेषाः इति गाथार्थः ३३ किंच । सामण्णाउ विसेसो अण्णोऽणण्णो व होज्ज इअ
रो सो न अत्थि खपुप्फं पिव णण्णो सामण्णमेव मयं भो विशेषवादिन् सामान्यादिशेषोन्यो वास्यादनन्यो वेति विकल्पद्वयं यद्याद्यो विकल्पस्तर्हि नास्त्येव विशेषो
निःसामान्यत्वात्खपुष्पवत् इह यद्यत्सामान्यविनिर्मुक्तं तत्तन्नास्ति यथा गगनारविंदं सामान्यविरहितश्च विशेषवादिना विशेषोभ्युपगम्यते तस्मान्नास्त्य
वायमिति अथानन्य इति द्वितीयः पक्षः कक्षीक्रियते हंत तर्हि सामान्यमेवासौ तदनन्यत्वात्सामान्यात्मवत् यद्यस्मादनन्यत्तत्तदेव यथा सामान्यस्यैवात्मा अन
न्यश्च सामान्याद्विशेष इति सामान्यमेवायमिति यद्विवातिपक्षपातिनया सामान्येपि विशेषोपचारः क्रियते नर्हि न काचित् क्षतिर्न ह्युपचारेणोच्यमानो भेद

त्विकमेकत्वंबाधितुमलं तस्मात्सामान्यमेवास्तिनविशेषइतिसंग्रहनयमतेनसर्वत्रैकमेवद्रव्यमंगलमितिगाथार्थः। ३४। तदेवंसंग्रहेणस्वाभिमतेसा
मान्येप्रतिष्ठितेविशेषवादिनोनैगमव्यवहारावाहतुः नविसेसत्थंतरभूय मत्थिसामन्नमाहववहारो उवलंभववहाराभावाऊखरविसाणंव ननुभोःसा
मान्यवादिन्भवतापिवनस्पतिसामान्यवकुलाशोकचंपकनागपुन्नागप्रमज्जार्जुनादिविशेषेभ्योऽर्थांतरंवाऽभ्युपगम्येतानर्थांतरंवा यद्यर्थांतरंतर्हि
नास्त्येव तद्विशेषव्यतिरेकेणोपलब्धिलक्षणप्राप्तस्यतस्योपलंभव्यवहाराभावात् खरविषाणवत् एवमाहव्यवहारनय उपलक्षणत्वाद्विशेषवादीनैग
मश्च एतोहिलोकव्यवहारानुयायिनौतद्व्यवहारश्चप्रायोविशेषनिष्ठएवेति विशेषानेवसमर्थयतइतिभावः अथानुपलब्धिलक्षणप्राप्तंतदभ्युपगम्यते तथापि
नास्तिविशेषेभ्यःसर्वथाऽन्यत्वाद्गगनकुसुमवदिति अथविशेषेभ्योऽनर्थांतरंतदितिद्वितीयपक्षस्तर्हिविशेषाएवतेभ्योऽनर्थांतरभूतत्वाद्विशेषाणामात्मस्वरू
पवदिति यदिवविशेषेष्वपिसामान्योपचारःक्रियते तर्हिनकाचित्क्षतिर्नत्वौपचारिकमेकत्वंतात्त्विकमनेकत्वंबाधत इतिगाथार्थः ३५ एतदेवसमर्थयति
चूयाईएहिंतो कोसोअण्णोवणस्सईनाम नत्थिविसेसत्थंतर भावाऊसोखपुप्फंव चूतादिभ्योविशेषेभ्योऽन्यःकोनामवनस्पतिर्योव्रणपिंडीपादलेपादिकेलो
कव्यवहारेउपयुज्यतेनकोपीत्यर्थः तस्मात्समस्तलोकसंव्यवहारानुपयोगित्वान्नास्तिसामान्यंखपुष्पवदिति पूर्वोक्तमेवार्थंनिगमनद्वारेणाह नत्थीत्या
दिनस्मान्नास्त्यसौसामान्यवादिनाऽभ्युपगम्यमानोवनस्पतिः संक्षेपतोविशेषेभ्योऽर्थांतरभावात्खपुष्पवत् संक्षेपेणहिविशेषेभ्योऽर्थांतरंभवदसद्रूपमेव
भवतितथाभूतंवनास्त्येव खपुष्पवदितिगाथार्थः ३६ किंपुनःकारणंयेननैगमव्यवहारौविशेषान्समर्थयतइत्याह जंनेगमववहारा लोयववहारतप्परा पा
य पाएणविसेसमऊ तोतेनग्गाहिणोदिवि यद्यस्मान्नैगमव्यवहारौलोकव्यवहारतत्परौसचलोकव्यवहारस्तावद्दानादिकःप्रायेणविशेषमयस्तान्विषु
एवहश्यते सामान्यस्यव्रणपिंडादौलोकेऽनुपयोगादन्नेनेत्यादौकश्चित्कथंचित्सामान्यस्यापिदृश्यतेऽपयोगइतिप्रायोग्रहणं यतएवंतस्मात्तौनैगमव्यवहारौ
तदर्पितद्ग्राहिणौविशेषाभ्युपगमपरावितिगाथार्थः ३७ अत्रपरःप्राह तेसिंतुल्लमयत्ते कोणुविसेसोऽभिहाणऊअन्नो तुल्लत्तेविइह नेगमसववहारेभेऊ
तयोर्नैगमव्यवहारयोस्तुल्यमतत्वेउक्तन्यायेनविशेषवादितयासदृशाभिप्रायत्वेसतिकोनुविशेषोऽभिधानंनामततोऽन्यस्तर्हिजल्पितोऽपरःकोविशेषोनकश्चि
दित्यर्थः एकोनैगमोऽपरस्तुव्यवहारइत्येवमनयोर्नाममेवभिद्यतेनत्वभिप्रायइतिभावः आचार्यआह तुल्लत्तेइत्यादि इहविशेषाभ्युपगमे यद्यपिनैगमस्यव्य १०
वहारेणसहतुल्यंसदृशाभिप्रायित्वं तथापितस्मिन्सत्यपिवस्त्वंतरेसामान्यादिकेभेदे नानात्वमस्त्येवेतिगाथार्थः ३८ अथवानैगमव्यवहारयोरनेनतुल्यमतत्वव
व्यापनेनसामान्यविशेषग्राहकस्यनैगमस्यसंग्रहव्यवहारनयद्वयेंऽतर्भावःसूचितोद्रष्टव्य इतिदर्शयन्नाह जोसामन्नग्गाही सनेगमोसंगहंगऊअहवा इ

यरोववहारमिऊ जोतेणसमाणनिद्देसो अथवेतिप्रकारांतरेणसमाधानमुच्यतइत्यर्थः तत्रनैगमस्तावत्सामान्यंमन्यते विशेषांश्चततोयःसामान्यग्रा
हीनैगमःससंग्रहंगतःप्राप्तोंऽतर्भूतइतियावत् इतरस्तुविशेषग्राहीसव्यवहारंगमितःप्राप्तोंऽतर्गतोयोनैगमनयस्तेनसहव्यवहारनयस्यायंसमानानिर्देशः
जंनेगमव्ववहार इत्यादिनातुल्यनिर्देशः ततश्चतेसिंतुल्लमयत्ते कोणुविसासोइत्यादिनायदेकत्वंपरेणप्रेरितं तदस्माकंनक्षतिमावहति नैगमस्यसंग्रह
व्यवहारनयद्वयेंऽतर्भावस्येष्टत्वेनसिद्धसाधनादितिभावःयद्येवंनैगमःसंख्यायास्तुत्यतितथाचसप्तैवनयाःप्रसज्यंतीतिचेन्मोक्षकंभजस्व स्वयमभ्यर्थेषु
त्वात्इष्टापत्तिरितिगाथार्थः ३९ अथऋजुसूत्रनयमतेनद्रव्यमंगलंविचारयितुमाह उज्जुसुयस्ससयंसंपयंचजंमंगलंतयंएक्कं नातीतमणुप्पन्नंमंगलमिट्ठंपर
कीयं वा अतीतानागतपरिहारेणपरकीयपरिहारेणचाकुटिलंवस्तुसूत्रयतीतिऋजुसूत्रोनयस्तस्यस्वकमात्मीयमेवतथासांप्रतंवर्तमानक्षणभा
व्येवयद्द्रव्यमंगलंतदेवैकमभिमतंअनभिमतप्रतिषेधमाह नातीतमित्यतीतसमयभाविनाप्यनुत्पन्नंभविष्यत्समयभाविद्रव्यमंगलमस्येष्टंपराक्किंवाप
रकीयंवाद्रव्यमंगलं तदप्यस्यनेष्टंविवक्षितैकप्रज्ञापकस्यवर्त्मात्मानंविहायपरस्मिन्वर्तते तदपिद्रव्यमंगलमसौनेच्छतीत्यर्थः मंदमतिशिक्षावबो
धार्थंश्चानभिमतप्रतिषेधोऽन्यथात्वभिमतेकथितेऽनभिमतमर्थापत्तितोगम्यतएवेतिगाथार्थः ४० अमुमेवार्थंप्रयोगोपदर्शनद्वारेणसमर्थयन्नाह ना
तीतमणुप्पन्नं परकीयंवापऊयणाभावा दिट्ठंतोखरसिंगं परधणमहवाजहाविफलं ४१ अतीतमनुत्पन्नंचवस्तुनास्तीतिप्रतिज्ञा प्रयोजनस्यविवक्षितफ
लस्यतत्राभावात् सर्वप्रयोजनाकरणादित्यर्थः इत्ययंहेतुःदृष्टांतस्तुखरशृंगंअसत्वेवातीतानागतयोर्द्रव्यमंगलतादृशोरसाधितेवधर्मिसत्वएव धर्मा
णामुपपद्यमानत्वादितिद्वितीयप्रयोगःक्रियते परकीयमपियज्ञदत्तसंबंध्यपिवस्तुदेवदत्तापेक्षयानास्त्येव प्रयोजनाकरणात् खरविषाणवदिति
दृष्टांतोताथेव अथवायथापरस्ययज्ञदत्तस्यधनंदेवदत्तापेक्षयाविफलंप्रयोजनासाधकंसन्नास्ति तथासर्वमपिपरकीयंनास्तीतिद्वितीयोदृष्टांतइतिकृ
तःपरकीयस्यापिद्रव्यमंगलत्वमितिगाथार्थः ४१ शब्दसमभिरूढैवंभूतास्तुविशुद्धनयत्वादागमतोद्रव्यमंगलमितिनेच्छंत्येवयस्मादित्याह जाणं
नाणवउत्तो णुवउत्तोयेनयाणइजह्मा जाणंतोणुवउत्तोत्ति विंतिसद्दादऊवत्थुं जम्हाइतियस्माज्ज्ञानवन्बुध्यमानोमंगलमितिगम्यते नानुपयुक्तो
नतद्ज्ञानोपयोगशून्योभवति ज्ञायकस्यज्ञानोपयोगानतिरेकत्वात् अनुपयुक्तोवा तत्ततज्ञानीते नतस्यज्ञायकोऽसौव्यपदिश्यते ज्ञायकत्वाभि
मतकाष्ठादिवद्इत्यर्थः तस्माज्ज्ञानन्ननुपयुक्तश्चेत्येतदप्यवस्तुअसद्भावइतियावत्एतद्ब्रुवतेशब्दादयःशब्दसमभिरूढैवंभूतनयाः इतिगाथा
र्थः ४२ अमुमेवार्थंउपपत्तिमाह हेऊविरुद्धमत्तणंहिजीवोववेयणारहिऊनयसोमंगलमिटं नयस्मात्कुणोत्तिपावंच नानन्ननुपयुक्तश्चेत्येतदवस्ति

यस्यामनंतरातिक्रांतगाथापर्यंतकृतप्रतिज्ञायामयं हेतुः क इत्याह विरुद्धधम्मत्तणाहिन्ति विरुद्धो धर्मो यस्य तत्तथा तद्भावस्तस्माद्विरुद्धधर्मत्वादिति इदं
समाह यथाजीवश्चेतनारहितः इदमुक्तं भवति यथाजीवश्चेतनारहितश्च मातापि च वंध्या वेत्यादि विरुद्धधर्माध्यासादवस्त्वेवं ज्ञायकश्चानुपयुक्तश्चेत्येतदप्य
वस्त्वेव भवतु वा ज्ञायकोऽनुपयुक्तश्च तथापि नास्माकममीभिर्मंगलत्वेनेष्टस्तदर्थशून्यत्वात् मंगलार्थशून्यत्वात्वाप्यर्वादिनिभावमंगलग्राहिणोत्यमीकथं द्रव्यमंग
लग्राहिणोत्यमीकथं द्रव्यमंगलमिष्यंतीति भाव इति गाथार्थः ४३ तदेवं विचारितं नयैर्द्रव्यमंगलं तथा च समर्थितमागमतो द्रव्यमंगलं अथ नोआग
मतस्तदभिधीयते तच्च ज्ञशरीरभव्यशरीरतद्व्यतिरिक्तभेदात्त्रिधा तत्र ज्ञशरीरभव्यशरीरलक्षणभेदद्वयमाह मंगलपयत्थजाणय देहो भव्वस्सवासजी
वोत्ति नोआगमओ दव्वं आगमरहिओत्ति जं भणियं नोआगमओ दव्वंति नोआगमतो ज्ञशरीरद्रव्यमंगलमित्यर्थः क इत्याह मंगलपदार्थज्ञस्य देहः इदमुक्तं भव
ति इह मंगलपदार्थः पूर्वं येन स्वयं सम्यग्विज्ञातः परेभ्यश्च प्ररूपितस्तस्य संबंधी जीवविप्रमुक्तः शिलासिद्धतलादिगतो देहोऽतीतकालनयानुवृत्त्या अतीत
मंगलपदार्थज्ञानाधारत्वात् नोआगमतो द्रव्यमंगलमुच्यते नोशब्दस्येह सर्वनिषेधवचनत्वादागमस्य च सर्वथात्राभावान्नोआगमता द्रष्टव्याऽतीतमंगल
पदार्थज्ञानलक्षणागमपर्यायकारणत्वात्तु द्रव्यमंगलता यथातीतघृताधारपर्यायकारणत्वाद्रिक्तघृतकुंभे घृतघट इति भव्वस्सवत्ति चशब्दो द्वितीयप
क्षसमुच्चये भव्यस्य च मंगलपदार्थज्ञानयोग्यस्य यः संबंधी देह इति वर्तते सजीवः सचेतनो नोआगमतो भव्यशरीरद्रव्यमंगलमित्यर्थः इदमत्र हृदयं
य इदानीं मंगलपदार्थं न जानीते भविष्यति तु काले ज्ञास्यति तस्य संबंधी सचेतनो देहो भविष्यत्कालनयानुवृत्त्या भविष्यन्मंगलपदार्थज्ञानाधारत्वान्नो
आगमतो भव्यशरीरद्रव्यमंगलमिति अत्रापि नोशब्दस्य सर्वनिषेधपरत्वादागमस्य चेदानीमभावान्नोआगमता समवसेया भविष्यत्कालिमंगलपदा
र्थज्ञानलक्षणस्यागमस्य कारणत्वात्तु द्रव्यमंगलता यथा भविष्यघृताधारपर्यायकारणत्वाद्रिक्तघृतकुंभे घृतघटत्वा नोआगमत इत्येतद्विवृण्वन्नाह
आगमरहिओ इत्यादिना नोशब्दस्य सर्वनिषेधवचनत्वान्नोआगमत इत्यनेनैतदुक्तं भवतीति किमित्याह मंगलपदार्थज्ञस्य भव्यस्य च संबंधी अचेतनः सचेतन
श्च देहो वर्तमानकाले सर्वथैवागमरहित इति गाथार्थः ४४ तदेवं सर्वनिषेधवचनत्वेन नोशब्दस्यैवमुदाहरणमुपदर्शितं यदि वा देशनिषेधप
रोपि नोशब्दः एतत्संबंधतयैवेति दर्शयन्नाह अहवा नो देसम्मी नोआगमओ तदेगदेसाओ भूयस्स भाविणो वा आगमस्स जं कारणं देहो अथवा नोइति नोशब्दो दे ११
शमिति देशनिषेधवचनो विवक्ष्यत इत्यर्थस्ततश्च नोआगमत इति कोर्थ इत्याह तदेकदेशादागमैकदेशमाश्रित्य द्रव्यमंगलमित्यर्थः किं पुनस्तदिति चे
मंगलपदार्थज्ञस्याचेतनो भव्यस्य तु सचेतनो देह इत्यनुवर्तमानं संबध्यते कः पुनरिहागमस्यैकदेशो यमाश्रित्य नोआगमतो द्रव्यमंगलमिदं स्यादित्य

शंक्यते यथोक्तो ज्ञभव्यशरीररूपो देह एवागमैकदेशः ननु जडस्य देहस्य कथमागमैकदेशतेत्याह भूयस्सेत्यादि यस्मादचेतनो देहो भूतस्यातीत
स्य मंगलपदार्थज्ञानलक्षणस्यागमस्य कारणं हेतुः सचेतनस्तु भव्यदेहो भाविनो यथोक्तस्यागमस्य कारणं तस्मान्निजकार्यस्यागमस्यैकदेशे वर्तत एव कार
णं हि कार्यस्यैकदेशे वर्तत एव यथा मृत्तिका घटस्य अभेद एव घटमृत्तिकयोरिति चेन्नैवं भेदाभेदयोरेव जैनैरिष्टत्वात् इष्यति नह्यपि पुढवी विभिन्नो घडो
त्ति जं तेण जुज्जइ अणण्णो जं पुण घडोत्ति पुव्वं नासी पुढवी तओ अण्णो आह ननु मंगलपदार्थज्ञानस्य परिणामिकारणं जीव एव ततस्तस्य स्वकार्यैकदेशे
वृत्तिरस्तु यथा मृत्तिकायाः शरीरं त्वागमस्य परिणामिकारणं न भवत्यतः कथं तस्य तदेकदेशवृत्तिता सत्यं किंतु अण्णोण्णाणुगयाणं इमं च तं चत्ति विभय
णमजुत्तं जह खीरपाणियाणमित्यादिवचनात् संसारिणो जीवस्य शरीरेण सहाभेद एव व्यवह्रियते अतो जीवस्य परिणामिकारणत्वे शरीरस्यापि तद्विवक्ष्यत
इत्यस्यागमैकदेशता न विरुध्यते भवत्वेवं तथाप्यागमतो द्रव्यमंगले माश्रयद्वक्तं तेन सहास्य को भेदस्तत्रापि ह्यागमकारणमात्मा देहो सह्यो यद्नि वचना
च्छरीरमेव द्रव्यमंगलमुक्तं अत्रापि चेतदेवेति कथं नैकत्वं सत्यं किंतु प्रागुपयोगरूप एवागमो नास्ति लब्धिस्तस्त्वस्त्येव अत्र तूभयरूपोपि नास्ति
कारणमात्रस्यैव सत्वादिति विशेष इति गाथार्थः ४५ तदेवं दर्शितं ज्ञशरीरभव्यशरीरलक्षणं नोआगमतो द्रव्यमंगलद्वयं सांप्रतं ज्ञशरीरभव्यशरीर
भव्यशरीरव्यतिरिक्तस्वरूपं तृतीयभेदमुपदर्शयन्नाह जाणगभव्वसरीराइरित्तमिह दव्वमंगलं होइ आमंगलकिरिया तं कुणमाणो अणुवउत्तो इह तावज्ज्ञा
वतः परमार्थतो मंगलं द्विविधं जिनप्रणीत आगमस्तत्प्रणीता मंगलप्रत्युपेक्षणादिक्रिया च इतश्च पूर्वमागमतो नोआगमतश्च यद् द्रव्यमंगलमुक्तं तत्स
र्वमागममंगलापेक्षमेव ज्ञशरीरभव्यशरीरव्यतिरिक्तं तु द्रव्यमंगलं मंगलक्रियामेवाश्रित्य भणिष्यत इति परिभावनीयं अथ गाथार्थो व्याख्यायते तत्र ज्ञ
शरीरभव्यशरीराभ्यां व्यतिरिक्तमिह द्रव्यमंगलं भवति क इत्याह अनुपयुक्तस्तां कुर्वाणस्तां कामित्याह यां प्रत्युपेक्षणाप्रमार्जनादिकां मंगलक्रिया
इदमुक्तं भवति योऽनुपयुक्तो जिनप्रणीतां मंगलरूपां प्रत्युपेक्षणादिक्रियां करोति स नोआगमतो ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यमंगलं उपयोगरूप
आगमो नास्तीति नोआगमता ज्ञशरीरभव्यशरीरयोर्ज्ञानापेक्षया द्रव्यमंगलता अत्र तु क्रियापेक्षया तद्व्यतिरिक्तं अनुपयुक्तस्य क्रियाकरणात्तु द्रव्यमंगल
ता भावनीया उपयुक्तस्य तु क्रियापि दृश्यते तदा भावमंगलत्वे च स्यादिति भाव इति गाथार्थः ४६ अथ प्रकारांतरेण प्रस्तुतमंगलमाह जं भूयभावमंगल परिण
मंतस्स दोसवपडिमेहो नोआगमतो ज्ञशरीरभव्यशरीरतद्व्यतिरिक्तं द्रव्यं द्रव्यमंगलमित्यर्थः इति द्वितीयगाथोत्तरार्द्धसंबंधः किं तदित्याह यद्भूत
भावमंगलपरिणामं इह भावमंगलशब्देन चरणकरणक्रियाकलापोऽभिप्रेतस्तस्य परिणमनं परिणतिः प्रवृत्तिर्भावमंगलपरिणामः भूतः पूर्वं से

MEMORIAL

ज्ञानी भावमंगलपरिणामं संप्रतं तत्छून्यं तु तत्पुनः कस्यापि शरीरं जीवद्द्रव्यं वा तन्नो आगमतो ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यमंगलं बोद्धव्यं तस्स वा जयं जोग्गं
ति अथवा तस्य यत्नोक्तस्य भावमंगलपरिणामस्य यद्योग्यमर्हं शरीरं जीवद्द्रव्यं वा तन्नो आगमतो ज्ञभव्यशरीरद्रव्यमंगलं अथवा यत्स्वभावत एव द्रव्यं भनवर्ण
दिगुणं स्रकवर्णादिकं वस्त्रादि दध्यक्षतकुसुममंगलकलशादिपरिग्रहलक्षणं तदस्य भव्यशरीरातिरिक्तं द्रव्यमंगलं ननु कथं तन्मंगलमित्याह तं पीत्या
दि हु यस्मात्तदपि स्रकवर्णादिकं कस्यापि भावमंगलकारणत्वात् मंगलं निर्दिष्टं यच्च कारणं तद्भूतस्य भाविनो वा भावस्य हि कारणं तु यस्तोकेन द्रव्यमित्या
र्थान्मन्यतेऽर्थाअनेनेतिवामनइतिसान्वर्थाभिधेयत्वात् किंच यदिव्यंजनावग्रहकालेमनसोव्यापारः स्यात्तदातस्यापिव्यंजनावग्रहसद्भावादष्टाविंशतिभेदभिन्नता
मतेर्विशीर्येत तस्मात्प्रथमसमयादेवतस्यार्थग्रहणमेष्टव्यं अन्यथाकिमत्रबाधकमित्याह तदन्नहानप्पवत्तिज्जत्ति यदिहि प्रथमसमयादेवमनसोऽर्थावग्रहोनेष्य
ते तदातस्यमनस्त्वेनप्रवृत्तिरेवनस्यादित्यर्थः यथाहि स्वाभिधेयानर्थान्भाषमाणेवभाषाभवति नान्यथा यथावास्वविषयभूतानर्थानवबुध्यमानान्येवत्रव
ध्यादिज्ञानान्यात्मलाभंकुर्वंति अन्यथातेषामप्रवृत्तिरेवस्यादिति एवंस्वविषयभूतानर्थान्प्रथमसमयादारभ्यमन्वानमेवमनोभवेत्नान्यथाऽवध्यादिवत्तस्यप्रव
त्तिरेवनस्यात्तस्मात्तस्यानुपलब्धिकालोनास्ति तथाचनव्यंजनावग्रहइतिस्थितं नचैतत्स्वमनीषिकयायुक्तिमात्रमुच्यते आगमेपिव्यंजनावग्रहेऽतीतेएवें
द्रियोपयोगेमनसोव्यापाराभिधानात्तथाचोक्तंकल्पभाष्ये अत्थाणंतरचारि चित्तंनियमेतिकालविसयंति अत्थेयपडुप्पण्णे वेणिंगहदियंतइहई अत्रव्याख्या
अर्थग्राह्यादीश्रोत्रादींद्रियेव्यंजनावग्रहेणगृहीतेऽनंतरमर्थावग्रहोदारभ्यचरतिप्रवर्तते इत्यर्थानंतरचारिमनोनतुव्यंजनावग्रहकालेतस्यप्रवृत्तिरितिभावः
त्रिकालविषयंचित्तंसांप्रतकालविषयंत्विंद्रियमित्यर्थविस्तरेणेतिगाथार्थः ॥२०७॥ अनुभवमनसोऽनुपलब्धिकालासंभवसयुक्तिकंभावयन्नाह नेयाऊम्मि
यतंमी लहइसरूवंपईवसहव्व तेणान्नुस्तेनस्स संकप्पियवंजणग्गहणं प्रतिसमयंमनोद्रव्योपादानेज्ञेयार्थावगमश्चमनसोभवत्येव नपुनरन्यस्यानुप

विशेषा० वृ०
५३

लब्धिकालः संभवति कुत इत्याह यद्यस्मात्कारणात्सदिति प्राकृतत्वेन सन्मानपुंसकत्वमिति मनः संबध्यते ज्ञायत इति ज्ञेयं चिंतनीयं वस्तु तस्मात्तदेव स्वरूपमात्मसत्तालाभा
वं लभते नान्यत्रततो यदि तदेव ज्ञेयं नावगच्छे तर्हि तस्मादुत्पत्तिरप्यस्य कथं स्यादिदमुक्तं भवति सान्वर्थक्रियावाचकशब्दाभिधेयानि हि मनःप्रभृतयः स्तद्यथा
मनुते मन्यते वा मनः प्रदीपयतीति प्रदीपः शाद्वयतीत्याशयनदतिशाद्वः दहतीति दहनः तपतीति तपनः एतानि च विशिष्टक्रियाकर्तृत्वप्रधानानि मनःप्रभृतिवस्तू
नि यदि तामेवार्थमननप्रदीपनशापणादिकामर्थक्रियां न कुर्युः तदा तेषां स्वरूपहानिरेव स्यात् तस्मात्प्रदीपनीयग्राहनीयवस्त्वपेक्षया प्रदीपशाद्वाभि
धानप्रवृत्तेः प्रदीपशाद्वयोरर्थयोः प्रदीपनशाद्वनं वा युक्तं तथा मनसोऽपि मननीयवस्तुमननादेव मनोऽभिधानप्रवृत्तेस्तदमननं न युक्तं ततः किमित्याह
येनैवं तेन स्वप्नं तं बकल्पितानि श्वनालोचितानि अनयगतानीत्यावत् असंकल्पितानि वस्तूनि शब्दादिविषयभावेन परिणतद्रव्यरूपाणि व्यंजनानि च तेषां
ग्रहणमसंकल्पितव्यंजनग्रहणं तस्य मनसोऽयुक्तं किंतु संकल्पितानामेव अर्थावग्रहद्वारेण चिन्तितानामेव तेषां शब्दादिद्रव्याणां ग्रहणं युक्तं तस्मान्मनसोऽनुप
लब्धिकालोऽस्ति तथा च न व्यंजनावग्रहसंभव इति स्थितमिति गाथार्थः तदेवं नयनमनसोर्विस्तरेणाप्राप्यकारितायां साधितायां नयनपक्षे द्वयोरपि दूषणयोरुत्पन्नयोर
परःप्राह ननु नयनेन्द्रियमप्राप्तकारित्वे सर्वेनापि गृह्णातु कस्मात् ग्रहणाग्रहणे किंचिदियमपर्यवसिताविवयपतनसामान्ये यथा कथंचिदप्रानयनेन्द्रियमप्राप्तकारितासर्वमपि
त्रिभुवनान्तर्वर्त्तिवस्तुनिकुरंबकमात्मगृह्णाति अप्राप्तत्वाविशेषादेतदेव व्यक्तीकरोति अप्राप्तो विषयो यस्य नदप्राप्तविषयं तद्भावोऽप्राप्तविषयत्वं तस्मिन्सामान्यः
विशिष्टेऽपि सति यदि दंकस्यचिदर्थस्याग्रहणं कस्यचिदग्रहणं तत्कृतं किंनिबंधनं नेह किंचिन्निबंधनमुत्पश्यामइति भावः इति गाथार्थः तस्माद्यद्याप्राप्यकारितस्य
चक्षुषो विषयपरिमाणो नियतमात्रतीतत्वं तदेवाह विसमपरिमाणमनियमपर्यवसितं तस्समणसोविमणसोविविसयनियमो नकमइ जङ्मस
स्सविषयस्याप्राप्तस्य परिमाणमनियतमपरिमितं प्राप्नोति तस्य चक्षुष इति प्रतिज्ञा हेतुमाह अप्राप्तविषयत्वादिति कुत्सामनसइवेति दृष्टांतः प्रयोगः यद
प्राप्तमपि विषयं परिच्छिनत्ति तेन तस्य तत्परिमाणायुक्तं यथा मनसः अप्राप्तविषयमनुगच्छति चक्षुस्तस्मान्मनस्यतत्परिमाणायुक्तमिति अथेह प्रमाण
दृष्टांतस्य साध्यविकलत्वं परिहरन्नुपदर्शयति मनसो दृष्टांतीकृतस्य प्राप्यकारिणो विषयनियमोऽस्त्येवेति शेषः कुत इत्याह यतः सन्ति तदपि मनःसंबंध
स्यर्थेषु नकामतिनपुंसरतीतिगाथार्थः तथाहि अवग्रहणं स्कंदरूपेव तेष्वकुविकेवलागमिस्सु तर्किं यत्प्रग्रहणं अपत्तकारित्तसामण्णे अर्थाएवमर्तर्दुः
मवेज्ञात्वाद्गहनानि तेषु च नतेषु सत्स्वपि विद्यमानेष्वपि कथंभूतेष्वित्याह केवलैककेवलज्ञानमादिर्येषामवधिज्ञानागमादीनां तानि केवलादीनि तैर्गम्यंते ५३
ज्ञायंते केवलादिगम्यानि तेष्वेवंभूतेष्वर्थगहनेषु सत्स्वपि कस्यचिन्मंदमतेर्जंतोर्मनो नामुत्पद्यति कुंठीभवति तदवगमायतनप्रभवति तान्गहनभूतान्के

वलादिगम्यान्वस्तुतोऽप्यर्थान्नगृह्णातीति तात्पर्यं तदप्याहमपि भवंतं पृच्छामि तदेतन्मनसोऽग्रहणमर्थानां किंकृतं किंनिबंधनमप्राप्तकारित्वसामान्येऽप्राप्त
कारित्वेतुल्येऽपीत्यर्थः तस्मान्मनसोऽपि विषयपरिमाणासद्भावात् तदंतरगाथोक्तसाध्यविकल्पः दृष्टांत इति स्थितमिति गाथार्थः ननु किंकृतमग्रहणम
र्थानामपीत्यत्र पराभिप्रायमाशंकमानः प्राह कम्मोदउच्चसाहा चउछ्नणुक्खोयणेविस्तंतुद्धं तुच्छोवकुबालोपायसोसंवन्नावसएवि यत्केवाविदुर्था
नांमनसोऽग्रहणं तत्तदावरणकर्मोदयाद्वा परोक्षत्वान्नैतदौ नने पितुल्यं यतस्तदप्यप्राप्यकारित्वतुल्योपिकर्मोदयान्न तत्त्वा आप्यद्वा काश्चिदर्थाना
न्गृह्णाति न सर्वानिति तदेवं न यनस्याप्राप्यकारित्वेऽतिप्रसंगलक्षणं प्रागुक्तपूर्वादिनाप्यदूषणमुक्तं परिहृतं अथवा नयनमनसोः प्राप्यकारित्वमाशु
पगच्छति तस्यापि तदूषणं आपत्त्येव यद्वा इयं दूषणं न तदेकस्य दातुमुचितमित्येतद्युक्तमिति निधाय प्राह तुल्लोवेत्यादि वाइत्यभयाएपोऽतिप्रसंगलक्ष
णदूषणे भस्तुल्यः समानः केत्याह संप्राप्तविषयत्वेऽपि नयनमनसोरभ्युपगम्यमाने तथात्मा अपि प्राप्तानेनफ पुद्गलप्राप्तमर्थं गृह्णाति चक्षुस्तद्वति
संप्राप्तानत्यंजनराशिमलशलाकादीन्कस्मान्न गृह्णाति मनोऽपि प्राप्तान्सर्वानपि किं मितिन गृह्णाति गृह्णात्येवेति चेत् गहणेऽनवस्थानप्रसंगात् या
वद्धि घटं गृह्णाति तावत्पटं शंखशुक्तिकादीन्त्वा किमितिन गृह्णाति घटप्राप्तिकाले पटादयोऽनभिप्राप्ता एवेति चेत् तदप्राप्तिहेतुरभावात् तथाहि तत्तावत्कुट
कुड्यादय स्तत्प्राप्त्यावारकाः संनिहितानामपि मेर्वादीनां मनसापरिच्छेदानुभवात् कर्मोदयात्त्वभावाद्वा प्रतिनियतमेव मनः प्राप्नोतीति चेन्नन्वेवं तदप्राप्यकारिणो
नयनस्यापि समानमिति गाथार्थः तस्मात्किमिहास्थितमित्याह सामर्थ्याभावाउ मयणाण्णविसयपरकमगिण्हइ कम्मक्कउवसमउ सामुग्गहउपसामत्थं च
सुः सिद्धांतनिर्दिष्टं नियतविषयपरिमाणात्परतोऽनगृह्णातीति प्रतिज्ञा चक्षुपश्चेहवार्तलप्रकम्यादूमर्षं सामर्थ्याभावादिति हेतुर्मनोवदिति दृष्टांतः स
मर्थ्याभावान्नयनस्यकुतइत्याह कम्मस्कउवइत्यादि तदावरणकर्मक्षयोपशमात् सामुग्रहतश्चाऽप्राप्तेऽपि केषुचिद्विषयप्रदेशावधिनिश्चयेषु परिच्छेदकर्तृ
त्वेलोचनस्य सामर्थ्यं भवति इदमुक्तं भवति अप्राप्तत्वे समानेऽपि येष्वर्थेषु ग्रहणविषयकर्मक्षयोपशमो भवति तथाविधस्यात्मनोऽस्त्यालोकनमनस्कारादि
सामग्र्याः सकाशादनुग्रहो भवति तेष्वर्थेषु कर्मक्षयोपशमसद्भावात् चक्षुषसामग्र्यनुग्रहाच्च चक्षुषो ग्रहणसामर्थ्यं भवति येषु त्वर्थेषु ग्रहणविषयकर्मक्षयो
पशमः शेषसामग्र्यनुग्रहश्च नास्ति तेषु तस्य सामर्थ्याभावादप्यर्थापत्तित एव गम्यते तस्मादवस्थितमप्राप्यकारित्वं नयनमनसोस्तत श्च स्पर्शनरसन
घ्राणश्रोत्रभेदाच्चतुर्विध एव व्यंजनावग्रह इति स्थितमिति गाथार्थः ॥४८॥ तदेवं नयणमणावज्जिंदियभेयाउ वंजणोग्गहो चउहा इत्येतत्समर्थितमथप्र
कृतमुच्यते तत्राग्रहोदुभेउ गहणं तदोऽक्खयं तणऽक्खाणं वंजणउप्पन्नमत्थो तत्थाइ एतयं वोच्छमित्यादिना ग्रंथेन प्रतिज्ञातं व्यंजनावग्रहस्वरूपप्रतिपादने

५३

चेह प्रकृतं तस्य च व्यंजनावग्रहस्य स्वरूपं नंद्यध्ययनागमसूत्रे प्रतिबोधकमल्लकोदाहरणाभ्यां प्रतिपादितं तद्यथा वंजणोग्गहस्स परूवणं करिस्सामि पडिबो
हगदिट्ठंतेणं मल्लगदिट्ठंतेणय से किं तं पडिबोहगदिट्ठंतेणं २ से जहानामए केई पुरिसे कंचि पुरिसं सुत्तं पडिबोहेज्जा अमुगा अमुगत्ति तत्थ चोयए पन्नवगं एवं
वयासी किं एगसमयपविट्ठा पोग्गला गहणमागच्छंति जाव संखेज्जसमयपविट्ठा पोग्गला गहणमागच्छंति एवं वयंतं चोयगं पन्नवए एवं वयासी
नो एगसमयपविट्ठा पोग्गला गहणमागच्छंति जाव नो संखेज्जसमयपविट्ठा पोग्गला गहणमागच्छंति असंखेज्जसमयपविट्ठा पोग्गला गहणमागच्छंति सेत्तं पडि
बोहगदिट्ठंतेणं से किं तं मल्लगदिट्ठंतेणं ॥२॥ से जहानामए केई पुरिसे आवागसीसाओ मल्लगं गहाय तत्थेगं उदगबिंदुं पक्खिविज्जा से नट्ठे अन्नेवि पक्खित्ते सेवि
नट्ठे एवं पक्खिप्पमाणेसु २ होही से उदगबिंदू जेणं तं मल्लगं रावेहिति होही से उदगबिंदू जेणं तंसि मल्लगंसि ठाहिति होही से उदगबिंदू जेणं तं मल्लगं भरेहिति
होही से उदगबिंदू जेणं तंसि मल्लगंसि न ठाहिति होही से उदगबिंदू जेणं तं मल्लगं पवाहेहित्ति एवामेव पक्खिप्पमाणेहिं २ अणंतेहिं पोग्गलेहिं जाहे तं वंजणं पूरि
यं तिहोइ ताहे हुंत्ति करेइ नो चेव णं जाणइ केवि एस सद्दाई इत्यादि इदं च सूत्रं नंद्यादिविवरणे एवं व्याख्यातं तद्यथा प्रतिबोधकमल्लकदृष्टांताभ्यां व्यंजनावग्रह
स्य प्ररूपणां करिष्यामि तत्र प्रतिबोधयतीति प्रतिबोधकः स एव दृष्टांतस्तेन तद्यथानाम कश्चिदनिर्दिष्टस्वरूपः पुरुषः कंचिदन्यमनिर्दिष्टस्वरूपमेव पुरुषं सु
प्तं संतं प्रतिबोधयेत्कथमित्याह अमुक अमुकेति तत्र प्रेरकः प्रज्ञापकमेवं समयवादी किमेकसमयप्रविष्टा इत्यादि एवं वदंतं प्रेरकं प्रज्ञापक एवमुक्तवान् नो एक
समयप्रविष्टा इत्यादि प्रकटार्थं यावन्नो संख्येयसमयप्रविष्टाः पुद्गला ग्रहणमागच्छंति नवरं समयं प्रतिबुद्धाद्विज्ञानमाश्रित्य तामधिकृत्यैवेरितव्यः ग्राह्यं वि
ज्ञानजनकत्वेनेत्यर्थः अन्यथा संबंधमात्रमधिकृत्य प्रथमसमयादारभ्य पुद्गला ग्रहणमागच्छंत्येव असंख्येयसमयप्रविष्टा इत्यादि प्रतिसमयप्रवेशान्वादितस्मादसं
ख्येयसमयैः प्रविष्टाः असंख्येयसमयप्रविष्टाः पुद्गलाः शब्दद्रव्यविशेषा ग्रहणमागच्छंति अर्थावग्रहज्ञानहेतवो भवंतीति भावः इह च चरमसमयप्रवि
ष्टा एव विज्ञानजनकत्वेन ग्रहणमागच्छंति तदन्ये तु इंद्रियस्योपकारमात्रकारित्वादिति सर्वेषामान्यमेन ग्रहणमुक्तं सेयं प्रतिबोधकदृष्टांतेन व्यंजनाव
ग्रहप्ररूपणेति वाक्यशेषः अथ केयं मल्लकदृष्टांतेन प्ररूपणा । तद्यथा । नाम कश्चित्पुरुषः आपाकशिरसो मल्लकं शरावं गृहीत्वा तच्छराव उदकबिंदुमस्य
प्रक्षिपेत् तत्र मल्लके एकं बिंदुं प्रक्षिप्तं स नष्टस्तत्रैव तद्भावपरिणतिमापन्न इत्यर्थः शोषमवाप्त यावज्ज्येष्ठं मल्लगं पवाहेहित्ति आर्द्रतां नेष्यति शेषं सुबोधं ५३
नवरं पवाहेहित्ति प्रवाहयिष्यति एवमेवेत्यादि अनिबद्धत्वाद्भूतिसमयमनंतैः शब्दपुद्गलैः यदा तद्व्यंजनं पूरितं भवति तदा हुंमिति करोति तमर्थं गृह्णातीत्य
र्थः भवति किं विशिष्टं नामजात्यादियोजनारहितं अतएवाह नो चेव णं जाणइ केवि एस सद्दाइत्ति नपुनरेवं जानाति क एष शब्दादिरित्याह एवं च सति सामर्थ्या

त्स्यादर्थावग्रह एव अर्थावग्रहात्पूर्वं सर्वो व्यंजनावग्रहः तदेवमस्य व्यंजनावग्रहस्वरूपप्रतिपादकस्य नंद्यादिसूत्रस्य शेषभाष्यकारो गतार्थमिति मन्यमानो भाष्य
कारः जाहे तं वंजणं पूरियं होई इत्येतद्व्याचिख्यासुराह तोएणमल्लगं पिव वंजणमापूरियंति जो भणियं तं दव्वमिंदियं वा तस्स जोगोवन विरुद्धं जं भणियं पुव्वुत्तं
दि सूत्रकारेण किं तदित्याह व्यंजनमापूरितमिति केन किंवदित्याह तोयेन जलेन मल्लकं शरावं तद्वदिति तस्मिन्नवसरे कारशब्देन भणितं व्यंजनं द्रव्यमुक्तं इंद्रि
यं वा तयोर्वा द्रव्येंद्रिययोः संयोगः संबंधः इति सर्वथाप्यविरोधः इदमुक्तं भवति व्यंजनं शब्दादिपरिणतपुद्गलसमूहरूपं द्रव्यं श्रोत्रादींद्रियं वा द्र
व्येंद्रिययोः संबंधो वा यस्मात्त्रितयमपि व्यंजनमभिधीयते सर्वमविवक्षितोऽर्थोऽनेनेति व्यंजनमिति तस्य प्राप्तत्वात् व्यंजनादितिगाथार्थः केवलं द्रव्यादिपुनरिह
पि व्यंजनशब्दवाच्यपुद्गलप्रत्ययकमापूरितत्वविशेषाद्द्रव्यः कः पुनरसावित्याह दव्वमाणपूरियं मिंदियमापूरियं तहा दोण्हं अवरोप्परसंसग्गो अपात्तमाणं हुद्दूलम
त्थं दव्वत्ति यदा द्रव्यं व्यंजनमधिक्रियते तदा जाहे तं वंजणं पूरियं होइत्ति कोर्थ इत्याह माणपूरियंति मानेन स्वग्राह्यादिद्रव्यस्य तत्प्रमाणं भावितसमयप्रवेशान्प्र
तीतीकृतत्वा स्वप्रमाणमानीतप्रकर्षमुपनीत स्वग्राहकज्ञानजनने समर्थीकृतमिति यावत्तदा लिप्तं मपिभूत इंद्रियव्यंजनमधिक्रियते तदा जाहे तं वंजणं पू
रियं होइत्ति किमुक्तं भवतीत्याह आपूरियंति आपूरितं व्याप्तं भृतं वासितमित्यर्थः तद्याह्यप्रवर्तते द्रव्यः भावादी पद्म यद्वा भावादिपरिपातद्रव्ययोः संबंधा यदि
व्यंजनमधिक्रियते तदा जाहे तं वंजणं पूरियं होइत्ति किमुक्तं भवतीत्याह अवरोप्परसंसग्गोत्ति सम्यग् सुगोचरा यानः सामग्री सम्यक् संबंध इत्यर्थः इदमत्र हृदयं
अभिन्नस्थे यदा तयोरपि द्विपद्द्रव्ययोः परस्परमतीव संपृक्ततांऽगांगिभावेन परिणामो भवति तदा प्रस्तुतसंबंधलक्षणं व्यंजनमापूरितं भवतीत्युच्यते इंद्रियज्ञ
यातत्याणिद्धहरत्तमत्थंत्ति एवं यदा त्रिविधमपि व्यंजनं प्रकारत्रयेणापूरितं भवति तदानंतं विवक्षितं शब्दादिकमर्थमव्यक्तनामजात्यादिकल्पनारहितं गृह्णाति ए
तत्तताहे हुंति करेइ इत्यस्य व्याख्यानं अर्थावग्रहश्चायमेकसामायिकोविज्ञेय इत्यस्तु पूर्वमेतमुक्तं तत्पूर्वमव्यक्तनामरूपव्यंजनावग्रहः स्तोकरूप इतिगाथार्थः
॥८०॥ किं विशिष्टं पुनस्तमर्थं गृह्णातीत्याशंक्य स्वतएव भाष्यकारस्तत्स्वरूपमाह सामण्णमणिद्देसं सरूवनामाइकप्पणारहियं जइ एवं जं तेणं गहिये एस
द्दित्ति तं किह णु ग्राह्यवस्तुनः सामान्यविशेषात्मकत्वात् तत्पर्थावग्रहेण सामान्यरूपमेवार्थं गृह्णाति न विशेषरूपं अर्थावग्रहस्यैकसामायिकत्वात् समयेन
न च विशेषग्रहणायोगादिति सामान्यमर्थं च कथमित्याह मनागरवनसैन्यादिशब्दैर्न निर्देश्यः अनिर्देश्य इति तद्व्यवच्छेदार्थमाह अनिर्देश्यकेनापि शब्देनानभि
लप्य कुतः पुनरेतदित्याह यतः स्वरूपनामादिकल्पनारहितं आदिशब्दाज्जातिक्रियागुणद्रव्यपरिग्रहः न च रूपरसाद्यर्थानायप्यालोचासत्वसंसुदाहरणाम्यः
प्रतिनियतः स्वभावस्तत्स्वरूपं रूपरसादिकं तु तदभिधायको ध्वनिर्नाम रूपत्वरसत्वादिका तु जातिः प्रीतिकरमिदं रूपं पुष्टिकारी यं रस इत्यादिकस्तु शब्दः

विशेषावश्यक
५४

क्रिया प्रधानत्वात्क्रियायाः रूपनीलादिकस्तु गुणः पृथिव्यादिकं पुनर्द्रव्यं एषां स्वरूपनामजात्यादीनां कल्पना अंतर्जल्पारूषितज्ञानस्वरूपा तया रहि
तमेवार्थमर्थावग्रहेण गृह्णाति यतोऽसावस्मादनिर्देश्य इत्ययमर्थः प्रोक्तः तत्कल्पनारहितत्वेन स्वरूपनामजात्यादिप्रकारेणापि निर्देष्टुमशक्यत्वादिति
एवमुक्ते सत्यपरः प्राह जइ एवमित्यादि यदि स्वरूपनामादिकल्पनारहितोऽर्थोऽर्थावग्रहस्य विषय इत्येवं व्याख्यायते भवद्भिस्तर्हि सिद्धान्तप्रधमन
सूत्रे प्रोक्तं किमित्याह तेणं सद्दे इति तस्योपलक्षणत्वादिदं संपूर्णं द्रष्टव्यं से जहानामए केइ पुरिसे अव्वत्तं सद्दं सुणेज्जा तेणं सद्दे इति उग्गहिए नउ णं जाण
इ के वेस सद्दे इति तत्किं शृणोति तदेतत्कथमविरोधेन नीयते सूत्रव्याख्यानेन सह विरुध्यत एवेदमित्यर्थः तथाहि शब्दोऽयमिति समर्थः सर्वोऽपि यथा
तेन प्रतिपत्त्रार्थावग्रहेण शब्दोऽवगृहीत इति भवतां तु शब्दाद्युल्लेखरहितं सर्वथा न तु प्रतिपादयति ततः कथं न विरोध इति गाथार्थः अत्रोत्तर
माह सद्देत्ति भणइ वत्ता तम्मत्तं वा न सद्दबुद्धीए अह होज्ज सद्दबुद्धी तो वाओ चेव सो होज्जा शब्दस्तेनावगृहीत इति यदुक्तं तत्र शब्द इति वक्ता प्रज्ञापक
स्तत्कालीनो भणति प्रतिपादयति अभाषात्मा शब्दमात्ररूपरसादिविशेषव्यावृत्त्या नवधारितत्वाच्छब्दतया निश्चितं गृहीतमित्यर्थः न च तेनावगृहीतदृश्यः शब्द
स्तेनावगृहीत इत्युक्तं नपुनः शब्दबुद्ध्या शब्दोऽयमित्यध्यवसायेन तच्छब्दवस्तु तेनावगृहीतं शब्दोल्लेखस्यान्तर्मुहूर्तिकत्वात् इत्यादि पूर्वोत्तरमाह जइ इत्या
दि यदि पुनरर्थावग्रहे शब्दबुद्धिः शब्दनिश्चयः स्यात्तदा पायः एवासौ स्यात्तत्स्थानावग्रहो निश्चयस्यापायरूपत्वात् न तत्रार्थावग्रहे हा भावः एवं स्यात्
चैतदृष्टमिष्टं चेति गाथार्थः अत्राह परः ननु प्रथमसमय एव रूपादिव्यवच्छेदेन शब्दोऽयमिति प्रत्ययोऽर्थावग्रहत्वेनाभ्युपगम्यतां शब्दमात्रत्वेन सामान्य
त्वादुत्तरकालं त्वपायो माधुर्यादयः शंखशब्दधर्मा घटन्ते नतु शार्ङ्गधर्माः खरकर्कशत्वादय इति विमर्शबुद्धिरीहा तस्मादिह एवायं शब्द इति
द्विशब्दस्यापायोऽस्तु तथा च सति तेणं सद्दे उग्गहिए इदं यथाश्रुतमेव व्याख्यायते नच वेर्णं जाणइ के वेस सद्दे नउ इदं पि सद्देत्यवापि सर्वम
विरोधेन गच्छतीति तदेतदसंगतं यतः कस्तु भाष्य इदं वयति तद्यथा इदं सद्दबुद्धिमेत्तयं अवग्गहो तम्मि सेसमत्ता उ नन्नुसद्दोत्ति सद्दो न य सत्ता
ई विसेसेवा भो भोः पर यदि शब्दबुद्धिमात्रं शब्दोऽयमिति निश्चयज्ञानमपि भवता अवग्रहोऽभ्युपगम्यते तर्हि अस्य शब्दस्य शंखशब्दविशेषः
शांख एवायं शब्द इत्यादि विशेषस्य निश्चयः अपायोऽस्तु तदानन्तरीयभेदोऽङ्गीक्रियते तत्तर्हि अवग्रहः सर्वशब्दस्तदा ज्ञातापि स्यादवप्रसंगः
प्रथमत एवावग्रहमति क्रम्यापायाभ्युपगमात् अथ पुनः शब्दज्ञानमपायं इत्यस्यापि विशेषग्राहकत्वाद्विशेषज्ञानस्यावग्रहत्वाभ्युपगमे ५४
५ नाभ्युपगमत्वात् न तु शांख एवायं शब्द इत्यादिकं मेक तदुत्तरकालभावि ज्ञानं विशेषग्राहकत्वादपायः शब्दज्ञानं तु शब्दसामान्यस्यैव प्रतिभासनात् कथं

विशेषप्रतिभासो येनापायप्रसंगः स्यादित्याह नच्छई इत्यादि नन्वित्यक्षमायां परमतेत्र येवानन्तु शब्दोऽयं नाशब्द इति विशेषोऽयं विशेषप्रतिभास एवायमित्यर्थः
कथं पुनर्नाशब्द इति निश्चीयत इत्याह नवरूवाइत्यादि नवरूपादिर्येन ज्ञानोऽयं शब्दादिसाधारणसर्वस्पर्शपरिग्रहः तत्र चेदमुक्तं भवति यस्माद्रूपादिरयं तेभ्यो व्यावृत्त
त्वेन गृहीतस्तेन शब्दोऽयमिति निश्चीयते यदि तु रूपादिभ्यो व्यावृत्तिर्नगृहीता नानस्यात् सदा शब्दोऽयमिति निश्चयोऽपि नस्यादिति भावः तस्माच्छब्दोऽयं नाशब्द इति वि
शेषप्रतिभास एवायं तथा च सत्यपायप्रसंगात् अवग्रहाभावप्रसंग इति स्थितमिति गाथार्थः अत्र परो अवग्रहापायोर्विषयविभागं दर्शयन्नाह थोवमियं
नाओ संखाइ विसेसणं अवायोत्ति तत्र यो विकार णणु थोवमियं पि नाओ इदं शब्द बुद्धिमात्रकं शब्द स्वामात्रलोकविशेषावसायित्वात् लोकालोकविशेषपा
हकं अतो ह्यपायो भवतु तद्विकल्पोऽवग्रहस्त्वयमिति भावः कथं पुनस्तत्रापायः इत्याह संखाइत्यादि शांख एवायं शब्द इत्यादि विशेषणविशिष्टं यद् ज्ञानं तदपायोऽस्तु
हि शेषावग्रहामित्वादिनिहृदय इतयस्तोकं न तत्रापायः तर्हि निकला सांप्रतमपायज्ञानकथा उ नपी तत्र विशेषग्रहणापेक्षया पूर्वापूर्वार्थविशेषाव
गायस्य तोकत्वादेव दोषाह नत्ती इत्यादि नच शांख एव शब्दस्येतरेतर भेदाः मंद्रमधुरत्वादयः तरुणमध्यवृद्धस्त्रीपुरुषप्रभवत्वादयश्च न दर्पेक्षायां सत्या
मिदमपि शांख एवायं शब्द इत्यादि ज्ञानं ननु स्तोकं स्तोकविशेषग्राहकमेवेति नापायः स्यादेवमुत्तरोत्तरविशेषग्राहिणामपि ज्ञानानां तदुत्तरोत्तरभेदापेक्ष
या स्तोकत्वादपायत्वाभावो भावनीय इति गाथार्थः नमिवापाय्याभावं स्फुटीकुर्वन्नाह इदूसकबहूणा वित्तपेयातन्न भावपहाणमसद्धं जमिह वेद्यअवा
सद्दोत्तिवि उग्गहो नाम इति शब्द उपदर्शनार्थं स्तत्र चेदमुक्तं भवति यथा शांख एवायं शब्द इत्यत्र शब्दगतभेदावधारणं सांप्रतमसाध्यं मंद्रमधुरत्वा
दितउत्तरोत्तरभेदावधारणमसाध्यं नाभावप्रसक्ति स्तोकत्वान्नेयबुद्धिरपायः किंत्वर्थावग्रह इत्येवं बहूनामपि कालेन सर्वेष्वपि पुरुषाणामुपेक्ष्य शब्दगतम
दन्तरूपत्वान्तरोत्तरभेदावधारणमसाध्यं न इदानीमनंतत्वादपायाभावः इत्यर्थः यस्मिन्नप्यंतरावधारणे किमित्याह यस्मिन्नर्थावयवे दत्ता कारा
निवर्तते यस्मिन्भेदावधारणे ज्ञानं पायलयं व्यवस्थाप्यतयत इति भावः तस्मात्तत्र पिभेदप्रत्ययउत्तरोत्तरापेक्षत्वात् अभिप्रायेण स्तोकत्वादर्थावग्रहएवप्र
प्नोति नापायः शब्दत्वा नवदितिगाथार्थः किंच शब्द एवायमिति ज्ञानं स्तोकत्वाद्यर्थावग्रह इत्येवं भवतोऽभिमतं ततः पूर्वमीहा मंतरेण न संभवति तत्पूर्वत्वं
च तस्यार्थावग्रहत्वासंभव इति दर्शयन्नाह किं सद्दोकिमसद्दो अगहीए सद्दएव किंजुत्तं अहपुव्वमीहिऊणं सद्दोति मयं तई पुव्वं किं शब्दोऽयमाहोस्विदश
ब्दो रूपादिरित्येवं पूर्वमनीहितेऽयं शब्द एवेति निश्चयज्ञानं तदकस्मादेव जायमानं कथं युक्तं विमर्शपूर्वकत्वमंतरेणानैवं घटत इत्यर्थः इदमुक्तं भवति
शब्दगतान्वयधर्मेषु रूपादिभ्यो व्यावृत्तौ चागृहीतायां शब्द एवेति निश्चयज्ञानं युज्यते तद्ग्रहणं च विमर्शमंतरेणानोपपद्यते विमर्शश्चेहा तस्मादीहाम

शास्त्र...
MEMORIAL

विशेषा० वृ० तदेव्याद्युक्तमेव ग्राह्य एवैतिनिश्चयज्ञानं अथ निश्चयकालात्पूर्वमीहित्वा भवतापि शब्द एवायमिति निश्चयज्ञानमभिहितं हंत तर्हि निश्चयज्ञानात्पूर्वं तर्हि
५५ असौ ईहा भवदुक्तनीत्यापि सिद्धेति गाथार्थः यदि नाम निश्चयज्ञानात्पूर्वमीहा सिद्धा ततः किमित्याह किंतं मुत्तूण गहियं जमीहए सद्द एव विण्णाणे अहपुव्वमा
मण्णं जमीहमाणस्स सद्दोत्ति हंत यदि निश्चयज्ञानमीहापूर्वकं त्वयाभ्युपगम्यते तर्हि प्रष्टव्योसि नन्वीहायाः पूर्वं किं तद्वस्तु प्रमात्रागृहीतं यदीहमानस्य
तस्य शब्द एवायमिति निश्चयज्ञानमुपजायते नहि कश्चिद्वस्त्वगृहीतं कस्मात् अथ मत एव ईहा कुरुत इति भावः क्षुभितस्य परस्योत्तरप्रदानासामर्थ्य
मालोच्य स्वयमेव तन्मतमाशंकते अथ ब्रूयात्परः सामान्यं नाम जात्यादिकल्पनारहितं वस्तुमात्रमीहायाः पूर्वं गृहीतं यदीहमानस्य शब्द इति निश्चयज्ञा
नमुत्पद्यत इति गाथार्थः अथ हायाः पूर्वं सामान्यग्रहं योपरेणेष्यमाणे सूरिः स्वसुमीहितसिद्धिमुपदर्शयन्नाह अत्थोग्गहओ पुव्वं होयव्वं तेन सग्गहण
कालेणं पुव्वं च तस्स वंजण कालो सो अत्थपरिसुण्णो नन्वीहायाः पूर्वं सामान्यग्रहणं तस्य तावद्ग्रहणकालेनाभवितव्यं स चास्मदभ्युपगतसामायिका
र्थावग्रहकालरूपो न भवति अस्मदभ्युपगतागोचरप्रसंगात् किंतर्हि अस्मदभ्युपगतार्थावग्रहात्पूर्वमेव भवदभिप्रायेण तस्य सामान्यस्य ग्रह
णकालेन भवितव्यं पूर्वं च तस्मादस्मदभ्युपगतार्थावग्रहस्य व्यंजनकाल एव वर्तते व्यंजनानां शब्दादिद्रव्याणामिंद्रियमात्रेणादानकालो मध्यपद
लोपाद्व्यंजनकालः भवत्वेवं तथापि तत्र सामान्यार्थग्रहणं भविष्यतीत्याशंक्याह स च व्यंजनकालोऽर्थपरिशून्यः नहि तत्र सामान्यरूपो विशेषरूपो
वा कश्चनाप्यर्थः प्रतिभासते तदा मनोरहितेंद्रियमात्रव्यापारात्तेन चार्थप्रतिभासयोगात् तस्मात्सारिशेष्यादस्मदभ्युपगतार्थावग्रह एव सामान्यग्रहण
मिति गाथायामनुक्तमपि स्वयमेव द्रष्टव्यं तदनंतरं चान्वयव्यतिरेकधर्मपर्यालोचनरूपा ईहा तदनंतरं च शब्द एवायमिति निश्चयज्ञानमपाय इति सि
द्धं स्वस्थं भवतीति गाथार्थः अथ प्रथममेवार्थावग्रहज्ञानेन शब्दग्रहणं परः पुनरपि दोषमाह जइ सद्दोत्ति न गहियं न कुणइ जं कए ससद्दोत्ति तम
जुत्तं सामण्णग्गहिए मग्गिज्जइ विसेसो यद्यर्थावबोधसमये प्रथममेव शब्दोयमिति एवं तद्वस्तु न गृहीतं तर्हि न कुणइ जाणइ के वसे सद्दो त्ति जे तियत्तं त्रि
दिष्टं तदयुक्तं प्राप्नोति यस्मात्शब्दसामान्यरूपादिव्यावृत्तेन गृहीते सति पश्चात्स्वरूपतः किंविषयं विशेषः किम यं शब्दः शांखः उत शार्ङ्ग इति इदमुक्तं भव
ति न उ णं जाणइ केवेस सद्दोत्ति अस्मिन्नंदिसूत्रे न पुनर्जानाति किमेषु शांखः शार्ङ्गो वान्यतरः शब्दः इति विशेषस्यैवापरिज्ञानमुक्तं शब्दसामान्य
मात्रग्रहणं त्वनुज्ञातमेव तद्ग्रहणे तु बलात्प्रथमं शब्दः किं शांखः शार्ङ्गो वेत्येवं विशेषमार्गणमसंगतमेव स्यात् विशेषजिज्ञासायाः सामान्यज्ञानपूर्वकत्वा ५५
च्छब्दसामान्याग्रहीतेन च नहि विशेषमार्गणमस्य युज्यमानत्वादिति गाथार्थः अत्रोत्तरमाह सद्दोत्ति सद्दो इति भाससंवाणइ इयरानसेमयमि

ते सद्दोत्ति विसेसणं जुत्तं सूरिर्वक्ति पूर्वस्मिन्नर्थावग्रहस्वरूपं भदेश्यन्स्वरूपेण न शब्द इति भाषकः प्रज्ञापक एव वदति न तु तत्र ज्ञाने शब्दप्रतिभासोस्ति इ
त्थं चैव दन्यथा न समयमात्रोऽर्थावग्रहकाले शब्द इति विशेषणयुक्तं आंतर्मुहूर्तिकत्वाद्धि निश्चयस्येति प्रागेवोक्तं सांव्यवहारिकार्थावग्रहापेक्षं वा सूत्रमिदं व्या
ख्यास्यत इति मात्वरिष्टा इति गाथार्थः अथ मत्वावष्टंभवादिनं परं दृष्ट्वा सोत्रमेव परिहारमाह अहवा सद्दे एव सुमणियं जह कोइ कण्णेज्ज सद्दमव्वत्तं अव्वत्तम
णिद्देसं सामण्णं कप्पणारहियं अथवा यदि तवगाढः श्रुतावष्टंभस्तथा तत्रोत्पत्तिसूत्राणि यदुत प्रथमं अव्वत्तरूप एव शब्दोल्लेखरहितस्य शब्दमात्रस्य ग्रहणं केन
पुनः सूत्रावयवेन तदुक्तमित्याह जह वा कोइ कण्णेज्ज सद्दमव्वत्तंति अयं च सूत्रावयवो नंद्यध्ययन इत्थं द्रष्टव्यः से जहा नामए केइ पुरिसे अव्वत्तं सद्दं सुणेज्जत्ति
अत्राव्यक्तमिति कोऽर्थ इत्याह अनिर्देश्यं शब्दोयं रूपादिर्वा इत्यादिना प्रकारेणावक्तव्यमित्यर्थः ननु यदि शब्दादिरूपेणानिर्देश्यं तर्हि किं तदित्याह सामा
न्यं किमुक्तं भवतीत्याह नामजात्यादिकल्पनारहितं न च वक्तव्यं शांखशार्ङ्गभेदापेक्षयाशब्दोल्लेखस्याप्यव्यक्तत्वे घटमानत्वादिदं व्याख्यानं लभत इति
अत एवावग्रहस्यानाकारोपयोगरूपतयासिद्धेः सोतत्वादनाकारोपयोगस्य च सामान्यमात्रविषयत्वात्प्रथममेवापायप्रसक्त्यावग्रहेहाभावप्रसंग इत्याद्युक्त
त्वाद्वेति गाथार्थः अथ स्वपरिच परा भिप्रायमाशिशंकयिषुराह अहवमई पुव्वंपि य सोऽवग्गहो वंजणोग्गहेतेण अवंजणोग्गहमिवि भणियं विण्णाणमव्वत्तं अ
थवा परस्य मतिः स्यात् कोयमित्याह सोऽव्यक्तोऽनिर्देश्यादिरूपः शब्दोऽर्थावग्रहात्पूर्वमेव व्यंजनावग्रहे तेन श्रोत्रा गृहीतस्तत्किमित्यव ग्रहे पि तद्ग्रहणमुद्घुष्य
ते कथमिदं पुनर्ज्ञायते यदुतासौ व्यंजनावग्रहेऽपि गृहीत इत्याह जमित्यादि यद्यस्माद्व्यंजनावग्रहेपि भवद्भिरव्यक्तं विज्ञानमुक्तं अव्यक्तविषयग्रहणं एवाव्य
क्तत्वं तस्योपपद्यत इति गाथार्थः अत्रोत्तरमाह अस्थितयं अवत्तं नउनं मिल्लइ सयपि सो भणियं न उ अणिगहऽमियम्मिइ सद्दोत्ति विसेसणबुद्धी अस्ति
तदव्यक्तं श्रोतुर्व्यंजनावग्रहे ज्ञानं न तस्यास्माभिरपलापः क्रियते न तु पुनरसौ श्रोता प्रतिसीमस्य तत्स्वयमपि न लभतिसंवेदनेन एतत्पाक् प्रागपि भणितं
सामान्यमत्ता इसंकुम बोहावत्ति वचना तथा सत्तादयोपि यंद्रियविण्णाणणावबुज्झंतित्ति वचनाच्च तस्माद्व्यंजनमात्रस्यैव तत्र ग्रहणं न शब्दस्य व्यंजनाव
ग्रहत्वान्यथानुपपत्तेरेवेति ननु सामान्यरूपतयाव्यक्तेर्वा शब्दे गृहीते कस्मादेव शब्द इति विशेषणबुद्धिर्नुत्पद्यते नुस्वारस्यालाक्षणिकत्वाद्विशेषबु
द्धिरित्यर्थः अस्यां च विशेषबुद्धौ प्रथममेवेष्यमाणायामादावेवार्थावग्रहकालेप्यपायप्रसंग इत्यसकृदेवोक्तमिति गाथार्थः ननु यदि व्यंजनावग्रहे
प्यव्यक्तशब्दग्रहणं भवेत्तदा को दोषः स्यादित्याह अत्थोत्ति विसयग्गहणं अइतम्मि विसेसानवंजणं नाम अत्थोग्गहोत्ति य न तो अविसेसेसं कओ वावि अर्था
ग्रहेऽर्थ इत्यनेन तावद्विषयग्रहणमभिप्रेतं रूपादिभेदेनानिर्धारितस्याव्यक्तस्य शब्दादिर्विषयस्य ग्रहणं न चाभिप्रेतमित्यर्थः यदि च तस्मिन्नपि व्यंज

विशेषा०वृ० ५६

नावग्रहेऽसाव्यक्तशब्दः प्रतिभासत इत्यभ्युपगम्यते तदानव्यंजनं नाम व्यंजनावग्रहो न प्राप्नोतीत्यर्थः ततश्चेदानीं नियतत्वात्कथं व्यंजनमात्रसंबंधस्य
वतश्चोक्तत्वाद्वचनात्वतदतिक्रांतस्याव्यक्तार्थग्रहणस्येहाभिधीयमानत्वादिति नत्थं व्यक्तार्थग्रहणे किमसौ स्यादित्याह अर्थावग्रह एवासौ अव्यक्तार्था
वग्रहणात्ततश्च नास्ति व्यंजनावग्रहः अथास्यापि सूत्रे प्रोक्तत्वादस्तित्वं न परिह्रियते तर्हि द्वयोरप्यविशेषः सोऽप्यर्थावग्रहः सोऽपि व्यंजनावग्रहः प्राप्नो
तीति भावः मेचकमणिप्रभावत्संकरो वास्यादिदृष्टदिति गाथार्थः तदेवं व्यंजनावग्रहे व्यंजनसंबंधमात्रमेव अर्थावग्रहे त्वव्यक्तशब्दाद्यर्थग्रहणं न व्यक्तशब्दाद्यर्थ
संवेदनमिति प्रतिपादितं सांप्रतमुपपत्त्यंतरेणाप्यर्थावग्रहे व्यक्तशब्दार्थसंवेदनं निराचिकीर्षुराह जेणग्गहकालम्मि गहणेहावायसंभवो नत्थि तो नत्थि सद्दबुद्धी
अहत्थिनावग्गहो नाम पूर्वं तावदर्थस्य ग्रहणमात्रं ततश्चेहा तदनंतरं त्वपाय इत्येवं मतिज्ञानस्योत्पत्तिक्रमः नचैतत्त्रितयं प्रथममेव शब्दार्थावग्रहीतसमस्ती
त्येतदेवाह येनार्थावग्रहकालेऽर्थग्रहणेहापायानां संभवो नास्ति ततोऽर्थावग्रहे नास्ति शब्द इति विशेषबुद्धिः अर्थग्रहणेहापूर्वकत्वात्तस्याः अथास्त्यसौ
तत्र तर्हि नायमर्थावग्रहः किंत्वपाय एव स्यादिति कल्प्यते तदभ्युपगमेऽर्थावग्रहेहयोरभावप्रसंगादिति गाथार्थः अविचार्यैवाऽवग्रहे शब्द इति विशेषबुद्धा
विष्यमाणं यदा दोषांतरमप्यस्ति किं तदित्याह सामन्नमन्नविसेसेहावज्जणपरिग्गहणओ से अत्थोग्गहो समऊ बहुतगवाउलत्तमावण्णं। इह यदि अर्थावग्रहैक
समये शब्द इति विशेषबुद्धिर्भवताभ्युपगम्यते सा तावन्निश्चयस्वरूपा निश्चयश्चाकस्मादेव नोपजायते किंतु क्रमेण तथाहि प्रथमं तावद्रूपादिभ्यो व्यावृ
त्तमव्यक्तशब्दसामान्यं गृहीतव्यं ततस्तद्विशेषविषयाद्रूपादिविशेषविपक्षव्यापाद्य एतेश्च धर्माः किमयं शब्द आहोस्विद्रूपादिरित्येवंरूपा ईहा तदनंत
रं चागृहीतशब्दसामान्यविशेषाणां ग्रहणं अन्येषां तु रूपादिविशेषाणां तत्राविद्यमानानां परिवर्जनमित्येवंभूतेन क्रमेण निश्चयोत्पत्तिः तथा च सति श्रोतुरर्थाव
ग्रहैकसमयेऽपि सामान्यग्रहणादिभिः प्रकारैरुपयोगबहुत्वमापद्यते एकस्मिंश्च समये बहव उपयोगाः सिद्धांते निषिद्धा इति नार्थावग्रहे शब्दादिविशेषबुद्धि
रिति गाथाभावार्थः अक्षरार्थस्तूच्यते सामान्यमिह श्रूयमाणं शब्दसामान्यं गृह्यते तयणविसेसेहत्ति तच्छब्दोऽनंतरोक्तशब्दसामान्यमनुकर्षति अन्यशब्देन तु तत्रा
विद्यमानरूपादयः परिगृह्यंते ततश्च तस्मादन्ये तदन्ये शब्दसामान्याद्रूपादयश्चेत्यर्थः तेषां विशेषा धर्माः श्रोत्रग्राह्यत्वादयः चक्षुरादिवेद्यत्वादयश्च त
द्विषया ईहा तदन्यविशेषेहा किमत्र श्रोत्रग्राह्यत्वादयो धर्मा उपलभ्यंते आहोस्विच्चक्षुरादिवेद्यत्वादय इत्येवंरूपो विमर्श इत्यर्थः तदनंतरं तु वर्जनेन च त
त्राविद्यमानरूपादिगतानां हेयधर्माणां चक्षुर्वेद्यत्वादीनां परिग्रहणं च तत्र गृहीतशब्दसामान्यगतानामुपादेयधर्माणां श्रोत्रग्राह्यत्वादीनामिति वर्जनपरि ५६
ग्रहणं त्यागादाने सामान्यं च तदन्यविशेषेहा च वर्जनपरिग्रहणं च सामान्यतदन्यविशेषेहावर्जनपरिग्रहणानि तेभ्यस्ततः से तस्य श्रोतुरर्थावग्रहैकसमयेषु

प्युपयोगबाहुल्यमापन्नं प्राप्तं तथाहि प्रथमः सामान्यग्रहणोपयोगोऽयथान्येहोपयोगस्तु द्वितीयः हेयधर्मवर्जनोपयोगस्तृतीयः उपादेयधर्मपरिग्रहणोपयोग
श्चतुर्थ इत्येवमर्थावग्रहैकसमयमात्रेऽपि बहव उपयोगाः प्राप्नुवंति न चैतद्युक्तं समयविरुद्धत्वात्तस्मान्नार्थावग्रहे शब्दविशेषबुद्धिः किंतु सद्दोत्ति भणई वत्ता इत्यादि
स्थितमिति गाथार्थः अथास्मिन्नेवार्थावग्रहे परस्याभिप्रायं निराचिकीर्षुराह अण्णे सामण्णग्गहणं माइं बालस्स जायमेत्तस्स समयम्मि चेव परिचिय विसयस्स
विसेसविन्नाणं अन्ये वादिनः केचिदेवमाहुर्यदेतत्सर्वविशेषविमुखस्याव्यक्तस्य सामान्यमात्रस्य वस्तुनो ग्रहणमालोचनं तद्बालस्य शिशोस्तत्क्षणजातमा
त्रस्य भवति नात्र विप्रतिपत्तिः स्वव्यक्तोऽत्यसौ संकेतादिविकलत्वात् परिचितविषयो यस्तर्हि परिचितविषयस्तस्य किमित्याह समयमाद्यशब्दश्रवणसमय एव विशे
षविज्ञानं जायते स्पष्टत्वात्तस्य ततश्चामुमाश्रित्य तेषां सद्दोत्ति भणइ वत्ता इत्यादि यथाश्रुतमेव व्याख्यायते तेन न कश्चिद्दोष इति भावः इति गाथार्थः अत्रोत्तर
माह तदवत्थमेव तं पुव्वदोसओ लिंगमिव वा समए संखमहुराइसद्दबहुय विसेसगहणं पसज्जेज्जा जेणात्थोग्गहकाले इत्यादिना ग्रंथेन सामण्णतयण्णविसेसेहा
इत्यादिना ग्रंथेन यद्दूषितं यानस्थावस्था पुनस्य रूपं समयम्मि चेव परिचिय विसयस्स विसेसविण्णाणमिति तदेतत्परोक्तमपि तदवस्थमेव न पुनः किंचिद्बाधि
तावस्थं कृतमित्याह पुव्वदोसओ त्ति जेणोग्गहकाले इत्यादिना सामण्णतयण्ण इत्यादिना च यः पूर्वं च दोषोऽभिहितस्तस्मात्पूर्वदोषान्निवृत्तमेतदुत्तरोक्तं तदव
स्थमेवेति नान्यद्दूषणाभिधानप्रयासो विधीयते इति भावः अथवा पूर्वमपि दूषणमुच्यते किं तदित्याह लिंगमिवे वा इत्यादि वा इत्यथवा न केवलं पूर्वदोषाद्विज्ञान
स्याव्यक्तस्य जंतोर्विशेषग्राहिणि समये प्रसज्येत अपि तु लिंगतो वा प्रत्यक्षेः स्निग्धो मधुरः कोमलः स्त्रीपुरुषाद्यन्यतरवाद्य इत्यादि सबहुकविशेषग्रहणं प्रसज्येत इदमुक्तं
भवति यदि व्यक्तस्य परिचितविषयस्य जंतोः व्यक्तशब्दज्ञानमुच्यते तर्हि तत्रार्थावग्रहैकसमयमात्रे शब्दनिश्चयज्ञानं भवति तदन्यस्य कस्यचित्परिचिततरवि
षयस्य पटुतरावबोधस्य तस्मिन्नेव समये व्यक्तशब्दज्ञानमपि प्रसज्यते कस्मात् शंखस्यायं शब्द इत्यादि संख्यातीतविशेषग्राहकमपि ज्ञानं भवेदभिप्रायेण स्याह
श्येत च पुरुषशक्तीनां तारतम्याद्विशेषाः एवं स्यादेवं कस्यचित्प्रथमसमये कबहुविशेषग्राहकमपि ज्ञानमिति निश्च न उ ण जाणइ केवसमिद्द इ सस्सयस
न्यायव्यवस्थानागमिकत्वप्रसंगादिभिर्ध्यवसायाक्तिपुरुषविषयमेतत्सकलमितिचेन्न अविशेषितानां कत्वानुवर्तिविशेषविषयतस्य वस्तुनोऽनुपपन्नत्वान्नहि प्रकृ
ष्टमतेरपि शब्दधर्मिणामगृहीतत्वे दुत्तरोत्तरसत्बहुधर्मग्रहणसंभवोऽस्ति निराधारधर्माणामनुपपन्नत्वादिति गाथार्थः किंच समयमात्रेऽपि शब्द इति विशे
षविज्ञानमभ्युपगच्छताऽन्येऽपि समयविरोधादयो दोषाः के पुनस्ते इत्याह अत्थोग्गहातो समये अहवा समयऽवग्गहाउ सव्वावि समयग्गहणं सव्वमइवग
होगज्जा एगो वावाउ च्चिय अहवा सा अहियवण्णा हिंपत्तो इक्कमवइक्कमाओ पत्ताधुवमोग्गहादिहेण सामण्णविसेसा साहसामयमगयमुभयं वा

विशेषा० वृ०
९७

नयत्तुत्तसद्भुमियं सामणालंबणमोत्तुं ॥१००॥ व्याख्या ॥ उग्रहो एकं समयमित्यादिवचनादर्थावग्रहः सिद्धान्ते सामयिकोनिर्दिष्टः यदि वार्थावग्रहे विशेषविज्ञानम
भ्युपगम्यते तदसामयिकोसौ न प्राप्नोति विशेषज्ञानस्यासंख्येयसामयिकत्वादथ समय मात्रेप्यस्मिन्विशेषज्ञानमिष्यते नहि सामणतयण्णो विसेसाइत्या
दिनाप्रागुक्तं समयोपयोगबाहुल्यं प्राप्नोति अथचैत्यत्रेनाप्यनुवर्तते ततश्च अथवा पूर्वचिन्तितविषयस्य विशेषज्ञाने ऽभ्युपगम्यमाने पर्यालोचनरविषयस्य तस्मि
न्नेव समये सर्वविशेषग्रहणमनंतरोक्तं प्राप्नोति अर्थावग्रहमात्रादपि विशेषपरिच्छेदेऽङ्गीक्रियमाणे ईहादीनामनुत्थानमेव ततश्च सर्वापि मतिरवग्रहो प्रा
प्नः सर्वस्यापि मतेरवग्रहरूपतैव प्राप्नोतीत्यर्थः अथवा सर्वापि मतिरपाय एवैकः प्राप्नोति अर्थावग्रहे विशेषज्ञानस्याश्रमणा यस्य तु निश्चयरूपत्वान्निश्चय
स्य चापायत्वादिति मम चेगांत्र चाभिन्नपर्यायसिद्धेरीहावायामुक्तमित्यर्थिता विरुद्ध्यते अथार्थावग्रहानंतरापायमित्याहोतिनिर्दिश्यते उग्गहो ईह अवाऊय इ
तिक्रमनिर्देशाद्यदि वाद्यसमयेपि विशेषज्ञानाभ्युपगमाद्यावदिष्यते तर्हीनवगृहीत अनीहितं च न क्रमिन्न मीमांसः वाईसथवा यदि न तीपस्थाननिर्दिष्टाप
वायः समयमेवं च परिच्छिन्नवस्तु यस्त्वि मम विज्ञानामितिवचनात्पटुत्वं च विशेषणप्रथममभ्युपगम्यते तर्हि तस्मादेव पाटुर्वे वन्ध्यादवग्रहेहापायधारणा
नां ध्रुवं निश्चितमुत्क्रमव्यतिक्रमौ स्याता नत्र पश्चानुपूर्वीभवनमुत्क्रमः अनानुपूर्वीभावस्तु व्यतिक्रमः तथाहि यथाशक्ति वैचित्र्यात्कस्यचित्क्वचिदप्रथममपाया
यो भवता अभ्युपगम्यते तथा तत्र एव कस्यापि प्रथमं धारणाप्यनंतरापायस्ततो पीहा ० तदनंतरं त्ववग्रह इत्युत्क्रमः अन्यस्य कस्यचित्पुनरवग्रहमुल्लंघ्य प्रथम
मेवेहा समुत्पद्यते अपरस्य तु नामपत्ति कस्याप्यपायो अन्यस्य तु तमपत्ति इत्यस्य धारणास्यादित्यादिव्यतिक्रमः न चैहवयं ज्ञाक्रमा प्रच्छनीया भवदभ्युपगतस्य
शक्तिवैचित्र्यस्यैव पुष्टहेतोः सद्भावान्न चैतावुत्क्रमव्यतिक्रमौ युक्तौ उग्गहो ईह अवाऊ य धारणा एव हौति चत्तारीति परममुनिनिर्दिष्टक्रमस्यान्यथाकर्तुमशक्
यत्वादिति तथा यदि प्रथमसमये यच्छूयते सविशेषस्तर्हि सामण्णं च विसेसाति यत्सामान्यं तदपि विशेषः प्राप्तः प्रथमसमये हि सर्वस्यापि वस्तुनो ऽव्यक्तं सामा
न्यमेव रूपं गृह्यते तं नानि तत्र पर्यावग्रहसमये सामान्यमेवग्रस्थतदेतत्परमार्थः यदि वा ऽत्र विशेषबुद्धिर्भवता ऽभ्युपगम्यते तर्हि यदि वस्तु स्थित्या सामा
न्यं स्थितं तदपि भवदभिप्रायेण विशेषः प्राप्तः चशब्दो दूषणसमुच्चयार्थः सोवा सामण्णंति स वा भवदभिप्रेतो विशेषो वस्तुस्थित्या सामान्यं प्राप्नो
तीति उभयमुभयं वेति अथवा सामान्यविशेषलक्षणमुभयमपि तत्र एकमुभयं प्राप्नोति एकैकमुभयरूपं स्यादित्यर्थः तथाहि अर्थावग्रहसामान्यं गृह्णाती
त्यवग्रह इति वस्तुस्थित्या वस्तुस्थितिसमायातं तत्सामान्यं तत्स्वरूपेण तावत्सामान्यं भवदभ्युपगमेन तु विशेष इत्येकस्यापि सामान्यस्योभयरूपता तथा योपि ९७
भवदभ्युपगतो विशेषः सोपि त्वदभिप्रायेण विशेषः वस्तुस्थित्या तु सामान्यमिति विशेषस्याप्येकस्योभयस्वभावता भवत्येवमिति चेदित्याह नचयुक्तं

सर्वमिदं किं त्विसेत्याह सामान्यमालंबनं ग्राह्यमुक्तार्थावग्रहस्यैव विशेषः इदमुक्तं भवति अर्थावग्रहस्याव्यक्तं सामान्यमात्रमालंबनं परित्यज्य पदन्यविशे
षरूपमालंबनमिष्यते तदभ्युपगमे च सामण्णं च विसेसो सो वा सामण्णमित्यादि पदापतति ततश्च यमुक्तमघटमानकत्वादिह चगाथात्रये बहु दूषण
मुक्तं यत्प्रागुक्तमपि किंचिद्दूषणमुक्तं तत्सर्वं गाथायां तत्वादिति नैवानरुक्तमाशंकनीयमितिगाथात्रयार्थः अत्र नववार्थेपरमपि मतांतरमुपन्यस्य निराकुर्वन्ना
ह केई दिहालोयणं पुव्वमोग्गहो विंति तग्गसामण्णं गहियमहत्थावग्गह कालेसद्दितिनिच्छिएणं केचिदीहादिन इहा इत्येन्यक्रमेण उग्रहं ब्रुवते ऽर्थावग्रहं व्याचक्ष
ते किंविशिष्टमित्याह आलोचनपूर्वं सामान्यवस्तुग्राहिज्ञानमालोचनं तत्पूर्वं प्रथमं यतः मत प्रथमालोचनज्ञानं ततो ऽर्थावग्रह इत्यर्थः तथा हि रूक्षं
अस्तित्यालोचनाज्ञानं प्रथमं निर्विकल्पकं बालमूकादिविज्ञानसदृशं शुद्धवस्तुजमिति किंतु न तत्र लोचनज्ञाने ग्रहणमित्याह तमित्यादि तत्रालोचन
ज्ञाने सामान्यमव्यक्तं वस्तु गृहीतं न तु विपरीतगम्यते अथानंतरमर्थावग्रहकाले तदेव गृहीतमित्यनुवर्तते कथंभूतं सदित्याह निश्चिते शब्दकृतं रूपादिव्याप्तं
मित्यर्थः केनेत्याह इत्येनागृहीतमित्याह सद्दोति निरूप्यते विशेषणविशिष्टमित्यर्थः ततश्च तन्मतेनाम एकं पुरिसं उवंतं सद्दो सणेइ इति एतदालोचनज्ञा
नापेक्षया नीयते तेन च हन्ति अग्रहिणेऽनर्थावग्रहापेक्षयेति सर्वमपि समंजसमापतति न चानेन परोपन्यस्तापाचार्य किंचिद्दूषणमस्ति यदि पुनस्त्वन्मतेऽस
द्वेनार्थेन सर्वत्र विषय विभाग व्यवस्थापति सर्वदाज्ञपनमापतति तदा तथा भवतु विपश्चितो विचारस्य योमार्गस्य वाग्रहतत्परिणतु पर्वकमित्यादिति
गाथार्थः तदयुक्तमेव पर्यवग्रहपंजुविहामं सामण्णालोकमनागयि तारेणायविकल्पमयन्नाह तं वंजणोग्गहाओ पुव्वं पच्छा स एव वा होज्जा पुव्वं तदत्थवंज
णामेवं घाभावाउ नपि यद्य च तु पहल अरुण पातु नामतानु त्तदार्थानुपुरालूर्धे व्यंजनावग्रहो भवतीति यदृक्तं प्राक् इत्यानुपिस्तरत्तत नत किमितिविदुच्य
ते यदेतद्गुवदुक्तं खिते सामान्यग्राहकमालोचनं नतस्माद्व्यंजनावग्रहात्पूर्वेवा भवेत् तस्माद्वा स एव वा व्यंजनावग्रहो स्यालोचनं भवेदिति त्रयी गति रन्यत्रस्थानाभा
वात्किंचातः इत्याह पूर्वं तन्नासीतिशेषः कुतइत्याह अर्थव्यंजनसंबंधाभावादिति अर्थः शब्दादिविषयभावेन परिणतद्रव्यसमूहः व्यंजनं तु श्रोत्रादि ऽर्थश्च
व्यंजनं चार्थव्यंजनेतयोः संबंधं एव स्याद्व्यंजनं व्यंजनमंबंधिसामान्यार्थी लोचनं स्यादन्यथा सर्वत्र सर्वदा ज्ञानप्रसंगात् व्यंजनावग्रहात्पूर्वमर्थव्यंजनसं
बंधो नास्ति तत्र इन्द्रियस्तु व्यंजनावग्रह एव उत्तराकालपूर्वकाले तेनास्त्यालोचनं इति गाथार्थः द्वितीयविकल्पं निरोधयन्नाह अत्थोग्गहाभिवंजणोग्गहस्सा पचर
मसमयंमि पच्छा वि तेण जुत्तं पारसेज्जं वंजणोग्गहोच्चा तथा अर्थावग्रहोपि युक्तस्माद्व्यंजनावग्रहस्यैव चरमसमये भवतीति प्राग्विहापि निर्णीतं तस्मात्पश्चादपि
व्यंजनावग्रहादालोचनज्ञानं न युक्तं निरवकाशत्वात्तथाहि व्यंजनार्थावग्रहयोरंतरकालः समस्ति यत्र त्वदीयमालोचनज्ञानं स्याद्व्यंजनावग्रहानंतरसमय एवा

र्थावग्रहसद्भावा तस्मात्पूर्वं पश्चात्कालयोर्निरुद्धत्वा यदि शेष्यान्मध्यकालवर्तीत्ति तृतीयविकल्पोऽपन्यस्तो व्यंजनावग्रहस्य भवताऽऽलोचनज्ञाने नाभ्युपगतो भवे
देवं चनकश्चिद्दोषो नामगाम एवंविधाद्वादिति गाथार्थः क्रियतां तर्हि त्रैरूप्येण वर्द्धापनकं तदभिप्रायाविसंवादत्वादिति चेन्नैवं विकल्पद्वयस्येह सद्भावा तथा
हि तद्यं जनावग्रहकालेऽभ्युपगम्यमानमालोचनं किमर्थस्यालोचनं व्यंजनानां वा इति विकल्पद्वयं तत्र प्रथमविकल्पमनूद्य दूषयन्नाह तं च समालोचयणामसदी
सणं जइ न वंजणोत्तीनं अहवंजणास्सत्तोफह मालोयणमश्चरूवास तत्रमालोचनं यदि सामान्यरूपस्यार्थस्य दर्शनमिष्यते तर्हि न व्यंजनं न व्यंजनावग्रहात्म
कं भवति व्यंजनावग्रहस्याव्यंजनसंबंधमात्ररूपत्वेनार्थशून्यत्वात् तथा च प्रागपि युक्तं व्यंजनावग्रहकाले सोऽर्थ्यपरिकल्प्या इत्यादिना साधितमेवेदं ऽतोऽर्थद
र्शनरूपालोचनं कथमर्थशून्यव्यंजनावग्रहात्मकं भवितुमर्हति विरोधादथ द्वितीयविकल्पमंगीकृत्याह अथ व्यंजनस्य श्रोत्रादिविषयपरिणतद्रव्यसंबंध
मात्रस्य तत्समालोचनमिष्यते तर्हि कथमालोचकत्वं तस्य घटत इत्यर्थः कथं हतस्य सन इत्याह अर्थशून्यमपि व्यंजनसंबंधमात्रावस्थितत्वेन सामान्यार्थालोच
कत्वानुपपत्तेरित्यर्थः इति गाथार्थः ननु चान्यत्रान्तरप्रसिद्धस्यालोचनज्ञानस्य व्यवस्थापकत्वं तर्हि कायातिरित्याह आलोयणं तिनामं हविज्जतं वंजणावग्गहस्सेव हो
ज्ज कहं सामण्णग्गहणं तस्य अस्सुण्णंमि तस्मादालोचनमिति यन्नाम तदन्यत्र निर्गत्ति किं तस्यारिशेष्या व्यंजनावग्रहस्यैव द्वितीयेनामभवेत न चैवं सामा
न्यग्रहणं तेषु वस्तूनां बहुशब्देनापि नाम कल्प्यमानेषु कोऽपि विवादमात्र एव गत्यन्तराण्यपि तदपि नामांतर भवतु को दोष इति नैतदेवं यस्मादिदं सामान्यग्राहकमालोचनज्ञा
नं भविष्यति अर्थावग्रहस्तु विशेषग्राहक इत्येवमुपन्यस्तं समीहितसिद्धिर्भविष्यतीति चेदित्याह होज्जेत्यादि व्यंजनावग्रहस्यैवापरिदृष्टोपादालोचनज्ञानं नामप
त्नं तत्र च मा तुष्यत्सुखिनार्थशून्ये कथं सामान्यग्रहणं विधेनं भवतः समीहितसिद्धिः प्रमोद इति तस्मादर्थावग्रह एव सामान्यार्थग्राहको न पुनस्तस्मादपरमालो
चनज्ञानं अत एव यदुक्तमस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकमित्यादि तदप्यर्थावग्रहात्मकमेव यदि घटते नान्यविषयमिति गाथार्थः अथ दुर्बलत्वादि
नं दृष्ट्वाभ्युपगमोऽपि वक्तव्य इति न्यायप्रदर्शनार्थमाह महियं वहो जलहिए सामण्णं कह मणीहि एतंमि अत्थावग्गहकाले विसेसणं एस सद्दोत्ति अथ भवतु
मिन्व्यंजनावग्रहे सामान्यं गृहीतं तथापि कथमनीहितेविमर्शितेतस्मिन्नकस्मादेवार्थावग्रहकाले शब्द एष इति विशेषणं विशेषज्ञानं युक्तं शब्द एवैष इत्ययं
हि निश्चयो न्यायमीहामंतरेणाप्युपगत्यैव मुज्यत इत्यसकृदेवोक्तप्रायमतो नार्थावग्रहे शब्द इत्यादि [illegible] विशेषबुद्धिर्युज्यत इति गाथार्थः अथार्थावग्रह
समये ग्राह्यग्राहकयोगेन सहैवेहा भविष्यतीति मन्यसे तत्राह अत्थावग्गहसमये वीसग्गसंखिज्जसमइयादोवि तल्लावगमसहावा ईहावायाकहं जुत्ता श्री
र्थावग्रहसंबंधिन्येकस्मिन्समये कथमाहापायौ युक्तौ इति संबंधः कथंभूतावित्याह तर्कावगमस्वभावौ तर्काविगशक्तत्स्वभावईहा अवगमो नि

श्चयस्तत्स्वभावोऽपायः ध्दावपि चत्तौ पृथगसंख्येयसमयनिष्पन्नौ एतदुक्तं भवति यदिदमर्थावग्रहे विशेषज्ञानं त्वयेष्यते सोऽपायः स चावगमस्वभावो निश्चय
स्वरूप इत्यर्थः यावत्समकालमीहाऽभ्युपेयते सा तर्कस्वभावा अनिश्चयात्मिकेत्यर्थः ततः एतौ ईहापायौ अनिश्चयेतरभावौ कथमर्थावग्रहे युगपदेव युक्तौ निश्चया
निश्चययोः परस्परपरिहारेणाव्यवस्थितत्वा देकस्मिन्कदाऽवस्थानाभावेन सहोदयानुपपत्तेरित्येषा तावद्विशेषावगमेहयोः सहभावे एकानुपपत्तिः अपरं चासम
यमात्रकालो ऽर्थावग्रह ईहापायौ तु ईहावायाऽमुहुत्तमंतंतुत्ति वचनादसंख्येयसमयनिष्पन्नौ कथमेकस्मिन्नर्थावग्रहसमये स्याता गत्यंतरानुपपन्न
दितिद्वितीयानुपपत्तिः तस्मादर्पितासंबंधत्वा द्यल्किंचिदेतदित्युपेक्षणीयमिति गाथार्थः तदेवं युक्तिशतैर्निराकृतानामपि परकीयानिःसंस्थत्वाके पाविता
र्थशेषमर्थापि परिशंकते स्विप्रद्धरं गेऊ नम्पहोत्तो विंससमाणं भुम्मद्दविगप्पप सइ सद्दोत्तिसक्यमिज्जंकेइ केइत्ति ईहार्थावग्रहे विशेषज्ञानसमर्थनाग्रह
ग्रगुरुस्तयो अथापि नंकेपि द्वादिनाभन्ये तेकिमित्याह क्षिप्रेतरादिभेदो यस्मादवग्रहोऽपि प्रथाने रनाविता ऽआपि च विस्तरेण भविष्यतइति गम्यते ततः शब्द इति वि
शेषविज्ञानं युज्यते घटते ऽर्थावग्रहे इति प्रस्तावादेव गम्यते मलिकमित्याह कयम्भि ज्ञानिनेण सहन्ति ऽवग्रहे इत्यादिवचनाद्यस्तु अनिर्दिष्टमिति शेषः कुतः पुनरि
दं विशेषविज्ञानं युज्यत इत्याह विकल्पभावात्तोऽन्यथोक्तनानात्ववत्त्वात इत्यक्षरघटना एतद्धायहृदयं क्षिप्रमवगृण्हाति चिरेणावगृण्हाति बहु अवगृण्हाति अबहु
अवगृण्हाति बहुविधमवगृण्हाति अबहुविधमवगृण्हाति एवमनिश्रितं निश्रितं असंदिग्धं संदिग्धं ध्रुवं अध्रुवं गृण्हातीत्यादिना ग्रंथेनावग्रहादयः शास्त्रांतरेहादय
भिर्विशेषणैर्विशेषिताः अत्रापि च पुरस्तादयमर्थो वक्ष्यते ततः क्षिप्रं चिरेण वावगृण्हातीति विशेषणान्यथानुपपत्त्या ज्ञायते नैकसमयमात्रमानएवार्थावग्रहः
किंतु चिरकालिकोऽपि न हि समयमात्रेमानेन मात्रएकरूपेतस्मिन्क्षिप्रं चिरं ग्रहणविशेषणानुपपद्यतइतिभावः तस्मादेन द्विशेषणबलादसंख्येयसमयमा
नोऽप्यर्थावग्रहोऽयुज्यते तथा बहूनां श्रोतॄणामविशेषेणाप्तिविषयस्थे शंखभेर्यादि बहुतूर्यनिर्घोषे क्षयोपशमवैचित्र्यात्कोऽप्यबहु अवगृण्हाति सामान्यसमुदितं तूर्यशब्द
मात्रमवगृण्हातीत्यर्थः अपरस्तु बहु अवगृण्हाति शंखभेर्यादिततूर्यशब्दान्भिन्नान्बहून्गृण्हातीत्यर्थः अन्यस्तु स्निग्धगुरुत्वादिबाह्यत्वं स्निग्धमधुरत्वादिबहुविधविशेष
विशिष्टत्वेन बहुविधमवगृण्हाति परस्तु बहुविधविशेषविशिष्टत्वाद्बहुविधमवगृण्हाति एतस्माद्बहुविधाद्यनेकविकल्पनानात्वदर्शनादवग्रहस्यासंख्येयत्वा
मान्यग्रहणे कश्चित्तु विशेषग्रहणमित्यर्थः यगत्यविरुद्धमतोऽयं संशये नैवं सति ग्रहणे एव इति वचनात् क्षिप्रादिविशेषविज्ञानमुपादिष्टं तदप्यर्थावग्रहे युज्यत एवेति केचि
दिति गाथार्थः २८९ अथोत्तरमाह सकिमवग्गहोत्ति भण्णइ गेहण्णईहावायरूवकणतोवि अहउवचारा पीरइ तोकण्णमहन्तुष्पण्णोत्ति इहपूर्वमनेकधाप्रतिपादितमप
र्थपुनः २ परमंतंप्रेरकमवलोक्यांतर्विस्फुरद्युक्तयाचार्याः क्षेपं काकास्वरैः पृच्छति किमवग्रहोत्ति किमाह ईषयोः बहु २ विधादि विशेषणवत्त्वा विशेषावगमः स

विशेषा॰ वृ॰
५९

सकिमवग्रहचक्रवर्त्तित्वग्रहो भण्यते कस्मात् पीत्याह ग्रहणमित्यादि ग्रहणं च सामान्यार्थस्य ईहावगृहीतस्य अपायश्च ईहितार्थस्य ग्रहणेहापायैरिति लक्ष्यते अत्र
टीकियते यः सन्नथा तद्भाव स्तत्त्वं तस्मिन्सत्यपि बहु॰ विधादिग्राहकादि विशेषावगमो निश्चयः स च सामान्यार्थग्रहणमीहां च विना न भवति यश्च तदविनाभावी सोऽपा
य एव कथमर्थावग्रह इति भण्यते इत्येतत्पूर्वमस्मदेवान्यथापि हंत विस्मरणशीलस्तथा[illegible]पुनरस्माभिः भणायसीति किंपुनः पुनरु
क्तमपि उक्तो यद्यस्मादायासेनापि कश्चिन्मार्गमासादयतीति ननु ग्रहणमीहा च विशेषावगमस्य लक्षणं भवतु ताभ्यां विना तदभावाद्यपायस्तु कथं तल्लक्षणं तत्स्वरू
पत्वादेवास्य सत्यं किंतु स्वरूपमपि भेदविवक्षया लक्षणं भवत्येव यदाह विषाणैः स्वरूपेण लक्ष्यते कलङ्कादिवत् एवं च स्वस्वभावाभ्यां व्यज्यते स्वलक्षणो आह न
नु बहु२ विधा२ विधादिग्राहको ऽपाय एव भवति तर्हि कथमन्यत्रावग्रहादीनामपि बह्वादिग्रहणमुक्तं सत्यं किंत्वपायस्य कारणमवग्रहादयः कारणे च कार्योपचारात्
यस्य रूपमस्तीत्युपचारात्तेऽपि बह्वादिग्राहकाः प्रोच्यंत इत्यदोषः यद्येवं तर्हि व्यवहारापाय[illegible]विशेषज्ञानमर्थावग्रहस्योपचारात् स्याम इत्यनदेवाह अहेत्यादि अथोक्त
न्यायेनोपचारात्स्वयात् विशेषग्राहकोऽर्थावग्रहः प्रोच्यते नैतदेवं यतो मुख्याभावे सति प्रयोजने निमित्ते चोपचारः प्रवर्तते न चेह मुख्यार्थाविघातादि प्रयोजनमस्ति तेन सह
निरवग्रहेण इत्यादि[illegible]यथाश्रुतार्थनिगमने प्रयोजनमभिनिबन्ध सति निभणाद्व चाइत्यादिप्रकारेणापि तस्य निर्गमितत्वात्सामर्थ्यव्याख्यानमिदं न यथाश्रुतार्थव्या
ख्यातिचेत्तर्हि यदुपचारेणापि श्रोत्रो ऽर्थः सूत्रस्य व्याख्यायत इति न वाभिप्राय स्तर्हि यथाश्रुतेऽपि तदुपचारस्तथा कुरु न चैवं क्रियमाणो दोष उच्यते यत सिद्धमाणवकः स
मुद्रस्तडाग इत्यादावेवं किंचित्साम्ये सत्येव विधीयमानः शोभते न चैतत्सामयिकोऽर्थावग्रहः संख्येय सामायिकं विशेषग्रहणं कथमप्युपपद्यते तर्हि कथमुपचारः
त्रिप्रमाणाघटत इत्येवं चेदहो सच्चिदुपचारोऽसि ततः शृणु समाकर्ण्यावहितेन मनसा सोऽपि यथा युज्यते तथा कथयामि तर्हि तत्त्वगणइत्यादिप्रकारेणेत्याह॥
ख्यातं सूत्रं यदि चोपचारेणार्थं न भवतः प्रयोजनं तर्हि सोऽपि कथाघटमानः कस्तथा कथ्यत इत्यपि शङ्काभिप्राय इति गाथार्थः॥८०॥ यथा[illegible]संपादयन्ना
ह सामान्यमेतद्ग्रहणं नैश्चयिकः समयमवग्रहो यत्तमेनंतरमीहितवस्तुविशेषस्यापायः सोऽपुनरीहावाप्या विवक्षयोऽवग्रहोऽत्रोपचरितः[illegible]सा
मणमित्ये[illegible]तरमीहा तदावायमनवृत्तिसेसस्य इय सामण्णं विसेसा विवक्खावग्गहो भेद व्याख्या इहैकसमयमात्रमानो नैश्चयिकोऽवग्रहः उपचरितः प्रथमो
ऽर्थावग्रहः कथंभूत इत्याह सामान्यमात्रस्याव्यक्तनिर्देशस्य वस्तुनो ग्रहणं सामान्यवस्तुमात्रग्राहक इत्यर्थः सामायिकानिहि ज्ञानादिवक्तुमपरमयोगिनामेव निश्च
यवेदिनो गच्छतीति यथा यं४०००नैश्चयिकोऽयमुच्यते अथ[illegible]व्यवहारिभिरपरैरर्थाव्यवह्रियते तत्र व्यवहारिकमुपचरितमर्थावग्रहं दर्शयति त
तो इत्यादि ततो नैश्चयिकार्थावग्रहादनंतरमीहितस्य वस्तुविशेषस्योऽपायः स पुनर्भाविनीमीहामपायं चापेक्ष्योपचरितो ऽवग्रहोऽर्थावग्रहः इति द्वितीयगा

थायां संबंधः उपचारस्यैवास्य निमित्तांतरमाह एसमित्यादि एष्यो भावी योऽन्यो विशेषस्तदपेक्षया येन कारणेनायमपायोऽपि सन्सामान्यं गृह्णाति यश्च सामान्यं
गृह्णाति सोऽर्थावग्रहो यथा प्रथमो नैश्चयिकः एतदिह तात्पर्यं प्रथमो नैश्चयिकोऽर्थावग्रहरूपादिभ्यो व्यावृत्तमव्यक्तं शब्दादिवस्तुसामान्यं गृहीतं तत्रश्चेमी
हिते सति शब्द एवायमित्यादि निश्चयरूपोऽपायो भवति तदनंतरं तु शब्दोऽयं किं शाङ्खः शार्ङ्गो वा इत्यादि शब्दविशेषविषया पुनरीहा प्रवर्त्तिष्यते शाङ्ख एवायं शब्द इ
त्यादि शब्दविशेषविषयोऽपायश्च भविष्यति तदपेक्षया शब्द एवायमिति निश्चयः प्रथमोऽपायोऽपि सन्नुपचारादर्थावग्रहो भण्यते ईहापायापेक्षया तु इत्यनेन
चोपचारस्यैकं निमित्तं सूचितं शाङ्खोऽयं शब्द इत्याद्यविशेषापेक्षया येनासौ सामान्यशब्दरूपं सामान्यं गृह्णातीत्यनेनोपचारस्य द्वितीयनिमित्तमावेदितं तथा
हि यदनंतरमीहापायौ वर्त्तेते यश्च सामान्यं गृह्णाति सोऽर्थावग्रहो यथाद्यो नैश्चयिकः प्रवर्तेते च शब्द एवायमित्याद्यपायानंतरमीहापायौ गृह्णाति च शाङ्खो
यमित्यादिभाविविशेषापेक्षया सामान्यं तस्मादर्थावग्रहः एष्यविशेषापेक्षया सामान्यं गृह्णातीत्युक्तं, ततस्तदनंतरं किं भवतीत्याह तृतीयगाथायां ततोऽण
तरमित्यादि तत्सामान्येन शब्दनिश्चयरूपात्प्रथमापायादनंतरं किमयं शब्दः शाङ्खः शार्ङ्गो वेत्यादिरूपा ईहा प्रवर्त्तते ततस्तद्विशेषस्य शाङ्खस्य[illegible]शब्द इति
विशेषस्य शाङ्ख एवायमित्यादि रूपो पायश्च निश्चयरूपो भवति अयमपि च यो ऽन्यतमविशेषाकांक्षावतः प्रमातुर्भाविनीमीहामपायं चापेक्ष्योपचर्यते विशेषा
पेक्षया सामान्यालंबनत्वाच्चार्थावग्रह इत्युपचर्यते इयमत्र सामान्यविशेषापेक्षाकर्त्तव्या तावद्यावदंत्यो वस्तुनो भेदो विशेषः यस्माद्विशेषापरतो वस्तुनोऽन्य
विशेषा न संभवंति सोऽन्त्यः अथवा सामवल्येऽपि अन्यतमविशेषेषु पतो विशेषात्परतः प्रमातुरुपजिज्ञासा निवर्त्तते सोऽन्त्यस्तद्विशेषं यावदव्यावहारिकोऽर्थावग्रहेहा
पायार्थे सामान्यविशेषापेक्षा कर्त्तव्येति गाथार्थः इह च गाथाद्वयेऽपि यः पर्यवसितोऽर्थो भवति तमाह सद्भेदैहावायानित्यमसामान्यमादसामण्णं संववहरणं
सद्धत्थावग्रहोऽवाउ सर्वत्रविषयपरिच्छेदनिश्चयतः परमार्थत ईहापायो भवतः ईहा पुनरपायः पुनरीहा पुनस्त्यपायश्चेत्येवं क्रमेणायावदत्र ईत्योविशेष स्तावदीहापा
यावेव भवतोऽनार्थावग्रह इत्यर्थः विशेषं वाण्ये[illegible]नेत्याह सामणमाद सामण्णंति आद्यमव्यक्तसामान्यमात्रालंबनमेकं सामायिकं मुक्त्वाऽन्यत्रेहापायौ भवतः इदं पुनर्न
हानाप्यपायः किंत्वर्थावग्रह एवेति भावः संव्यवहारार्थं व्यावहारिकजनप्रतीत्यपेक्षया पुनर्सर्वत्र योयोऽपायः स स उत्तरोत्तरेहापायापेक्षया एष्यविशेषापेक्षया
सामोपचारतोऽर्थावग्रहः एवं च तावन्नेयं यावत्तारतम्येनोत्तरोत्तरविशेषाकांक्षा प्रवर्त्तते इति गाथार्थः तरतमयोगाभावे तु किं भवतीत्याह तरतमजोगाभावे वा
उच्चिय धारणा न दंत मि सव्वत्थ वासणा पुण भणिया कालंतरे सिमई॥२८५॥ तरतमयोगाभावे उत्तरोत्तरविशेषाकांक्षानिवृत्तावपाय एव भवति न पुनस्तस्यावग्रह
त्वमिति भावः तन्निमित्ताभावो पुनरीहादीनामभावादिति यद्यपि न ईहादयो न भवंति तर्हि किं भवतीत्याह तदंते तस्यापायस्यान्ते धारणा दर्शोपयोगात्प्रच्युतिरूपा भवति शेष

६० स्यवासनास्मृतिरूपस्य धारणाभेदस्याद्वयस्य संभव इत्याह सव्वत्थवासणापुव्वेत्यादि वासना वक्ष्यमाणरूपा तथा कालांतरे स्मृतिः सा च सर्वत्र भणिता अयमर्थः
अविच्युतिरूपा धारणा अपायपर्यंत एव भवति वासनास्मृती तु सर्वत्र कालांतरेप्यविरुद्धे इति गाथार्थः एवं चाभिहितस्वरूपव्यावहारिकार्थावग्रहापेक्षया यथाश्रुता
र्थव्याख्यानमपि सूत्रस्याविरुद्धमेवेति दर्शयन्नाह सद्दोत्तिवक्रूपभणियं विगप्पऊ जइ विसेसविण्णाणं खिप्पजोतंपि जुज्जइ संववहारोग्गहे सव्वं वा शब्दोऽथवार्थे
ततश्चायमभिप्रायः सद्दोत्ति भणइ वत्ताइ वंत्ता इत्यादिप्रकारेण नावव्याख्यातेनेणं सद्दोत्ति उग्गहिए इत्यादिसूत्रं अथवा शब्द इति यत्सूत्रे भणितं शब्दे नावगृहीत इति
यत्सूत्रे प्रतिपादितं तद्यदि विकल्पेनौविवक्षावशेनो विशेषविज्ञानं गृह्येत तदपि सर्वं युज्यते कस्मिन्नित्याह यथोक्त औपचारिकसांव्यवहारिकार्थावग्रहे गृह्यमाणे स
ति अत्राह सद्द इति विशेषविज्ञानं युज्यते सर्वग्रहणात्तदनंतरमीहादयश्चोपपद्यंते पूर्वोक्तयुक्तेः ततश्च से जहानामए केइ पुरिसे अव्वत्तं सद्दं सुणेज्जा तेणं सद्देत्ति
उग्गहिए नउणं जाणइ के वेस सद्दे तओ ईहं पविसइ तओ जाणइ अमुगे एस सद्दे इत्यादि सर्वं सुस्थं भवति यद्येवमयमेवार्थावग्रहः कस्मान्न गृह्यते येन सर्वोपि विवादः उपा
रमतीति चेन्नैवं शब्द एवायमित्याद्यपायरूपोयमर्थावग्रहो अपायश्च सामान्यग्रहणेहाभ्यामंतरेण न संभवतीत्याद्यसकृत्पूर्वमभिहितमेवातः प्राक्तनमेव व्याख्या
नं मुख्यमित्यलं विस्तरेणेति गाथार्थः व्यावहारिकार्थावग्रहाभ्युपगमे यदागुणमसावेव प्रदर्शयन्नाह खिप्पेयराइभेउ उवचारइय दोसजालपरिहारं जुज्जइ
संताणो य सामण्णविसेसववहारे क्षिप्रेतरादिभेदं यत्पूर्वोदितदोषजालं तस्य परिहारो युज्यते भिन्नव्यावहारिकेऽर्थावग्रहे मतीति प्रक्रमाद्गम्यते इदमुक्तं भवति
एकसामायिके नैश्चयिकार्थावग्रहव्याख्यानारं प्रति प्राग्यदुक्तं यद्यसावेकसामयिकः तर्हि कथं क्षिप्रचिरग्रहणविशेषणमस्योपपद्यते तथा यद्यसौ सामान्य
मात्रग्राहकस्तर्हि बहुबहुविधादिविशेषणोपेतविशेषग्रहणं कथं घटते तथार्थावग्रहस्य विशेषग्राहकत्वे युक्तिगयोपयोगबाहुल्यमुक्तमित्यादिकस्य दोषजा
लस्य परिहारो व्यावहारिकेऽर्थावग्रहे सति युज्यते तथाहि नैश्चयिकावग्रहवादिना इदानीं शक्यमिदं वक्तुं यदुत क्षिप्रेतरादिविशेषणानि व्यावहारिकाव
ग्रहविषयाण्येतानि असंख्येयसमयनिष्पन्नत्वेनास्य क्षिप्रचिरग्रहणस्य युज्यमानत्वाद्विशेषग्राहकत्वेन बहुबहुविधादिग्रहणस्यापि घटमानत्वादिति सा
मण्णमणंतरविसेसे इत्यादिना प्रागभिहितं समययोपयोगबाहुल्यमप्यस्मिन्निरास्पदमेव सामान्यग्रहणेहापूर्वकत्वेनास्यासंख्येयसामयिकत्वेन नैकसम
योपयोगबाहुल्यस्यात्रासंबध्यमानत्वादिति ननु नैश्चयिकावग्रहे किं क्षिप्रेतरादिविशेषणकलापो न घटते येन व्यावहारिकावग्रहविषयोसौ प्रोच्यते सत्यं
मुख्यतया व्यावहारिकावग्रह एव घटते कारणे कार्यधर्मोपचारात् पुनर्नैश्चयिकावग्रहेपि युज्यते इति प्रागप्युक्तं वक्ष्यते च विशिष्टादेव हि कारणात्कार्यस्य वैशि ६०
ष्ट्यं युज्यते अन्यथा त्रिभुवनस्याप्यैश्वर्यादिप्रसंगः काष्ठखंडादेरपि रत्नादिनिचयावाप्तिरित्यलं प्रसंगेन प्रकृतमुच्यते संताणेनन्त्ययोसौ सामान्यविशेषव्य

MEMORIAL

व्यवहारो लोकरूढः सोपि व्यवहारावग्रहे सति युज्यते इति हार्दमपि संबंध्यंते लोके पि हि यो विशेषः सोप्यपेक्षया सामान्यं यत्सामान्यं तदप्यपेक्षया विशेष इति व्यपदि
श्यते तथाहि शब्द एवायमित्येवमध्यवसितोऽर्थः पूर्वसामान्यापेक्षया विशेषः शांखोयमित्युत्तरविशेषापेक्षया तु सामान्यमित्येवं यावदंत्यो विशेष इति प्रागप्युक्तं अयं चोप
र्युपरिज्ञानप्रवृत्तिरूपेण संतानेन लोकरूढः सामान्यविशेषव्यवहार औपचारिकावग्रहे सत्येव घटते नान्यथा तदनभ्युपगमे हि प्रथमापायानंतरमीहाप्रवृत्तानुत्तरवि
शेषाग्रहणे चाभ्युपगतं भवति उत्तरविशेषाग्रहणे च प्रथमापायाध्यवसितार्थस्य विशेषत्वमेव न सामान्यत्वमिति पूर्वोक्तरूपो लोकप्रतीतः सामान्यविशेषव्यवहारः समुच्छि
द्येत अथ प्रथमापायानंतरमभ्युपगम्यंते ईहादय उत्तरविशेषग्रहणं च तर्हि सिद्धं तदपेक्षया प्रथमापायाध्यवसितार्थस्य सामान्यत्वं सामान्यग्राहको [illegible] ईहादिप्र
वृत्तिः सोर्थावग्रहो नैश्चयिकार्थावग्रहवदिष्टफलमेवेति सिद्धो व्यावहारिकार्थावग्रह स्तत्सिद्धौ च संतानक्रमेणोत्पद्यमानविशेषैरर्थापत्तिसिद्धः सामान्यविशेषव्यवहार इ
ति गाथार्थः ॥२८२॥ इति मतिज्ञानाद्यभेदलक्षणोऽर्थावग्रहः समाप्तेति ॥ ७ ॥ अथ तद्द्वितीयभेदलक्षणामीहां व्याचिख्यासुराह इयसा इयसामण्णग्गहणा
णंतरमीहा सदत्थवीमंसा किमिदं सद्दोऽसंको होज्जव संस्थ संखाणं ॥ इति शब्द उपदर्शने इत्येवं प्रागुक्तेन प्रकारेण नैश्चयिकार्थावग्रहे यत्सामान्यग्रहणं रूपाद्यव्यप
त्याव्यक्तवस्तुमात्रग्रहणमुक्तं तथा व्यावहारार्थावग्रहेपि यदुत्तरविशेषापेक्षया शब्दादिसामान्यस्य ग्रहणमभिहितं तस्मादनंतरमीहा प्रवर्त्तते कथंभूतेयमित्याह स
त स्त्वविद्यमानस्य गृहीतार्थस्य विशेषविमर्शद्वारेण मीमांसा विचारणा ईहेत्वेनेत्याह किमिदं खलु मया गृहीतं शब्दः अशब्दो वा रूपरसगंधस्पर्शरूपः इदं च नैश्चयि
कार्थावग्रहादनंतरभाविन्या ईहायाः स्वरूपमुक्तं अथ व्यवहारार्थावग्रहादनंतरं संभाविन्याः स्वरूपमाह कोहीऽयमित्यादि [illegible] व्यवहारार्थावग्रहेण शब्दे
गृहीते [illegible] ईहा प्रवर्त्तते शांखः शार्ङ्गो वायमित्येवंरूपः शंखशार्ङ्गौ वेति ननु किं शांखः शार्ङ्गो वेत्यादि [illegible] संशयज्ञानमेव कथमीहा भवितुमर्हति सत्यं किंतु
दिग्भावमेवेदमिह दर्शितं परमार्थतस्तु व्यतिरेकधर्मनिराकरणपरोऽन्वयधर्मघटनप्रवृत्तश्चापायाभिमुखः प्रबोध ईहा द्रष्टव्या तद्यथा अरण्यमेतत् सविता अस्त
मागतो न चाधुना संभवतीह मानवः प्रायस्तदेतेन स्थाण्वादिभाजा भाव्यं रतिप्रियसमारिसमाननाम्नेति एतच्चाग्रे प्रागुक्तं [illegible] पुनरप्युक्तमिति गाथार्थः अथ
मतिज्ञानतृतीयभेदस्यापायस्य स्वरूपमाह महुराइगुणत्तणओ संखसद्दोत्ति जं न संगत्त विण्णाणं सोवाओ अणुगमवइरेगभावाओ मधुरस्निग्धादिगुणत्वात् शांख एवायं
शब्दो न शार्ङ्ग इत्यादि यद्विशेषविज्ञानं सोऽपायो निश्चयज्ञानरूपः कुत इत्याह पुरोवर्त्यर्थधर्माणामनुगमभावादस्तित्वनिश्चयसद्भावात् तथाविद्यमानार्थधर्माणां व्यति
रेकाभावान्नास्तित्वनिश्चयसत्त्वादयं च व्यवहारार्थावग्रहानंतरभावी अपाय उक्तः निश्चयादवग्रहानंतरभावी तु स्वयमपि द्रष्टव्यस्तद्यथा श्रोत्रानुपात्त्वादिगुणतः शब्द

विशेषा० वृ०
६३

धार्यं नरूपादीनिति दृढ़ापायविषयाव्यक्तिपतिपत्तयः प्रागपि निराकृताइति नेहोक्ताइतिगाथार्थः अथ चतुर्थमतिज्ञानभेदो धारणा इयं चाविच्युतिवासनास्मृतिभेदात्त्रिधा
भवत्यत [illegible]दामपि तामाह तयणंतरं तयत्थो विच्चवणं जो य वासणाजोगो कालंतरे य जं पुण अणुसरणं धारणा सा उ तस्मादपायादनंतरं तदनंतरं यत्तदर्थादवि
च्यवनमुपयोगमाश्रित्याभिन्नो यश्च वासनया जीवेन सह योगः संबंधः यच्च तस्यार्थस्य कालांतरे पुनरिंद्रियरूपलब्धस्यानुपलब्धस्य वा एवमेव मनसानुस्मरणं स्मृ
तिर्भवति सैषा पुनरपि त्रिविधाप्यर्थस्यावधारणरूपा धारणा विज्ञेयेतिगाथाक्षरघटना भावार्थस्त्वयं अपायेन निश्चितेर्थे तदनंतरं यावदद्यापि तदर्थोपयोगसातत्येन व
र्तते न तु तस्मान्निवर्तते तावत्तदर्थोपयोगादविच्युतिर्नाम धारणाया प्रथमो भेदो भवति ततस्तस्यार्थोपयोगस्य यदावरणकर्मणः क्षयोपशमेन जीवो युज्यते येन
कालांतरे इंद्रियव्यापारादिसामग्रीवशात्पुनरपि तदर्थोपयोगः स्मृतिरूपेण समुन्मीलति सा चेयं तदावरणक्षयोपशमरूपा वासनानाम द्वितीयस्तद्भेदो भवति कालांतरे च वा
सनावशात्तदर्थस्येंद्रियरुपलब्धस्याथवा तैरनुपलब्धस्यापि मनसि या स्मृतिराविर्भवति सा तृतीयस्तद्भेद इत्येवं त्रिभेदा धारणा विज्ञेया तु शब्दोवग्रहादिभ्यो विशेषद्योतना
र्थः अप्रतिपत्तय [illegible] तद्धि यथापि प्रागेव निराकृता इतिगाथार्थः ॥२९१॥ तदेवं से जहा नामए केइ पुरिसे अव्वत्तं सद्दं सुणेज्जा इत्यादि सूत्रानुसारेण [illegible] मतिश्रुतावग्रहा
त्रास्यैवचारित्रस्यासेवकाःसाधवोनिर्विशमानाउच्यंते तदव्यतिरेकादिदमपिचारित्रंनिर्विशमानकंमप्युच्यते आसेवितंतच्चारित्रंकायायैस्तेमुनयोनिर्वि
ष्टकायास्तएवस्वार्थिकप्रत्ययोपादानान्निर्विष्टकायिकास्तदभेदादिदमपिचारित्रंनिर्विष्टकायिकमेतत्स्वरूपंचविस्तरतोभाष्येभिधास्यतइति त
थेत्यानंतर्यद्वाभाग्भयाथवहितस्यापेक्ष्यन्यासःसूक्ष्ममित्यनुस्वारोप्यलाक्षणिकः सूक्ष्मसंपरायंचतुर्थंचारित्रंतत्रसंपर्ययेतेभिःसंसारमितिसं
परायाःकषायाःसूक्ष्मालोभांशावशेषत्वात्संपरायायत्रतत्सूक्ष्मसंपरायं इदमपिद्विविधंविशुध्यमानकंसंक्लिश्यमानकंच तत्रविशुध्यमानकं
क्षपकोपशमश्रेणिद्वयमारोहतोभवति संक्लिश्यमानकंतूपशमश्रेणेःप्रच्यवमानस्यप्राप्यतेचःसमुच्चये ततस्तस्मात्सूक्ष्मसंपरायादनंतरंसर्वत्रसाधुजीव
लोकेख्यातंप्रसिद्धं यथाख्यातंपंचमंसर्वविशुद्धंचारित्रंभवतितत्कथंभूतमित्याह यच्चरित्वाआसेव्यशोभनंविहितमनुष्ठानंयैस्तेसुविहिताःसुसा
धवोगच्छंत्यजरामरंमोक्षलक्षणंस्थानंतत्रमरणंमरस्ततश्चरांतत्वादयत्ययःनविद्यतेजरामरोयत्रतदजरामरं इदंचकर्मापिइत्वरहितत्वात्क्षीणमो

ह क्षायस्य छद्मस्थवीतरागस्य सयोग्ययोगिकेवलिनश्च भवतीति निर्युक्तिगाथाद्वयसंक्षेपार्थः २६२ विस्तरार्थं तु भाष्यकृदाह सव्वमिणं सामइयं छेयाइ
विसेसउ पुणो भिन्नं अविसेसियमाइमयं ठियमिह सामण्णसन्नाए सावज्जजोगविरइत्ति तत्थ सामाइयं दुहा तं च इत्तरमावकहं ति य पढमं २ तिमजिणाणं ति
त्थेसु मणारोविय वयस्स सेहस्स थोवकालीयं सेसाण मावकहियं तित्थेसु विदेहयाणं च ॥ सर्वमप्येतच्चारित्रमविशेषतः सामायिकमेव एतदेव छेदादि
विशेषैर्विशेष्यमाणमर्थतः संज्ञातश्च नानात्वं प्रतिपद्यते तत्राद्यं विशेषणाभावात् सामान्यसंज्ञायामेवावतिष्ठते सामायिकमिति तच्च सावद्ययोगविर
तिस्वरूपमेतत्सामायिकं तच्च द्विधा इत्वरं यावत्कथिकं च तत्रेत्वरं स्वल्पकालीनं भरतैरावतयोः प्रथमचरमतीर्थकरतीर्थयोरेवानारोपितमहाव्रतस्य शिष्यकस्य
द्रष्टव्यं यावत्कथितं यावज्जीविकं भरतैरावतमध्यमद्वाविंशतितीर्थसाधूनां महाविदेहसाधूनां चावसेयमिति अथ परः प्राह णणु जावज्जीवाए
इत्तरियं मिगाहियं सामइयं तस्स होइ पइन्नालोवो जह जावकहियं सामइयं तस्स आहन्नु करेमि भंते सामायिकं यावज्जीवमित्येवं व्रतग्रहणकाले इत्वरमपि
सामायिकं गृहीतमुपस्थापनायां मुंचतः प्रतिज्ञालोपः प्राप्नोति यावत्कथिकपरित्यागश्च अत्रोत्तरं भण्णइ पणियं सव्वं चिय सामाइयमिणं विसुद्धि
सिणं सावज्जविरइमाइयं कोवयलोवो सुद्धिए ननु सर्वमेवेदं चारित्रमविशेषतः सावद्ययोगविरति सामान्यात्सामायिकमेव छेदादिविशुद्धिवि
शेषैर्विशिष्यमाणमन्यान्यत्वं प्रतिपद्यते ततः कोनामविशिष्टतरायां विशुद्धौ प्रतिपद्यमानायां व्रतलोपो न कश्चिद्बाधितोर्थः कुत इत्याह उज्झि
ऊण मउ भंगो जो पुण तं चिय करेइ सुद्धयरं सन्नामित्तविसुद्धं सुहुमं पि व तस्स को भंगो ॥ उज्झिः कामतः प्रव्रज्यात्यागमेव कुर्वतो व्रतभंगो भ
वति किंतु शुद्धतरमेव व्रतं निर्मलयंसं पद्यते यथा सामायिकसंयतस्य सुहुमंति॥ सूक्ष्मसंपरायचारित्रं प्रतिपद्यमानस्य छेदोपस्थानीयस्य
परिहारविशुद्धिं मार्गो कुर्वतो व्रतनिर्मलत्वमिति छेदोपस्थापनीयस्य व्याख्यामाह परियस्स य छेउ जत्थोवट्ठावणं वए सुं च छेउवट्ठावणमि
ह तमणइयारं च यं सेहस्स निरयारं तित्थं तरसंकमे व तं होघामूलगुणघाइणो साइयारमुभयं च ठियकप्पे ॥ जत्थत्ति यत्र चारित्रे पू १८१
र्वपर्यायस्य छेदो व्रतेषु चोपस्थापनं विधीयते तदिह छेदोपस्थापनं तच्च द्विधा सातिचारमनतिचारं च तत्र शिष्यकस्योपस्थापनायां तीर्थान्त
रसंक्रांतौ वा यदारोप्यते तन्निरतिचारं सवद्यत्तु मूलगुणघातिनः पुनरपिसमारोप्यते तन्निरतिचारं सवद्यतु मूलगुणघातिनः पुनरपि सा
मारोप्यते तत्सातिचारं एतच्चोभयमपि स्थितकल्प एव भवति नास्थितास्थितकल्पे तत्र भरतैरावतप्रथमचरमतीर्थकरसाधूनां स्थित
कल्पः आचेल १ कुद्देसिय २ सिज्जायरे य ३ रायपिंड ४ किइकम्मे ५ वय ६ जिठ ७ पडिक्कमणे ८ मासं ९ पज्जोसवणकप्प १० इत्येतस्मिन्दश

विधयिकल्पे॥ तेषास्थितत्वात् भरतैरावतशेषद्वाविंशतितीर्थकरसाधूनां महाविदेहार्हत्साधूनां चास्थितास्थितकल्पः सिज्जायरपिंडमीचाउज्जामेय
पुरिसजिट्ठय किइकम्मस्स य करणं चत्तारि अवट्ठिया कप्पा एतेषु चतुर्षु नियमेन तेषामपि स्थितत्वात् शेषेषु षट्सु नियमाभावेनास्थितत्वादिति
अथ परिहारविशुद्धिकं व्रूणाति परिहारेण विसुद्धं सुद्धो व तउ जहिं विसेसेण तं परिहारविसुद्धं परिहारविसुद्धियं नाम तं दुविगप्पं निव्विस
नि माणं विट्ठकाइयवसेण परिहारियाणुपरिहारियस्स कप्पट्ठियस्स विया ॥ परिहारस्तपोविशेषस्तेन विशुद्धं परिहारविशुद्धं अथवा तकोसौ परिहा
रो विशेषेण शुद्धो यत्र तत्परिहारविशुद्धं तदेव स्वार्थिककप्रत्ययोपादानात् परिहारविशुद्धिकं नामेति एतच्च निर्विशमाना निर्विष्टकायिकभेदाद्द्विविधं कस्य
पुनरिदं चारित्रं भवतीत्याह परिहारइत्यादि इदमुक्तं भवति नवको गणइदं प्रतिपद्यते तद्यथा चत्वारः परिहारिकाश्चत्वारश्चानुपरिहारिकाः एकः कल्पस्थितस्तत्र
परिहारिकाणां तदासेवकत्वादिदं निर्विशमानकमुच्यते अनुपरिहारिकाणां कल्पस्थितस्य च विहितवक्ष्यमाणतपसां निर्विष्टकायिकमभिधीयते इति परिहारेण
तपसा विशुद्धमित्युक्तं किं पुनरिदं तपइत्याह परिहारो पुण परिहारियाण सो गिम्हसिसिरवासासु पत्तेयं तिविगप्पो चउत्थाईत उत्ते उ गिम्हसिसिरवासासु चउत्थ
याईण वारसंताइं अट्ठापकतीए जहन्नमज्झिमुक्कोसयतवाणं सप परिहारस्तपः पुनः परिहारिकाणां प्रत्येकं चतुर्थादि ततयो वोद्धव्यं ग्रीष्मशिशिरवर्षासु प्र
त्येकं जघन्यादि त्रिविकल्पः चतुर्थादि तपोरूपो ज्ञेय इति एतदेव व्यक्तीकरोति गिम्हेत्यादि ग्रीष्म शिशिरवर्षासु चतुर्थादीनि द्वादशांतानि तपांसि विज्ञेयानि
कया अर्थापत्त्या केषां याथापकत्वानि इत्याह जघन्यमध्यमोत्कृष्टतपसां इदमुक्तं भवति ग्रीष्मे सामान्येनैवोष्णकाले जघन्यं तपश्चतुर्थं कुर्वंति मध्यमं चतु
उत्कृष्टं पुनरष्टमं स्थापना १२३ एतदेवाद्यापत्त्या शिशिरे कुर्वंति तत्राद्यस्यासमप्रविभागरूपस्य एकदेशस्य वा एकादिपदात्मकस्याप्रक्रमणमवस्थानं शेषस्य
तु स्यादिपदसंघातरूपस्यैकदेशस्योद्गमनं यस्यां रचनायां सा समयपरिभाषया उद्भापक्रांतिरुच्यते तत्र चतुर्थषष्ठाष्टमानि ग्रीष्मे प्रोक्तान्येषां मध्यादेकदे
शश्चतुर्थलक्षणोपक्रमत्यवतिष्ठते शेषं तु षष्ठाष्टमपदद्वयमूर्द्धं शिशिरे गच्छति तृतीयं तु दशमलक्षणं पदं मील्यते ततश्च जघन्यतः षष्ठं मध्यमतोऽष्टमं उत्कृष्टतस्तु दश
मशिशिरे कुर्वंतीति सिद्धं भवति २३४ एतेषामप्याद्यैकदेशः षष्ठलक्षणोपक्रामति अष्टमदशमे तु ऊर्द्धं वर्षासु गच्छतः तृतीयं तु द्वादशं मील्यते ततश्च जघन्यतो
ऽष्टमं मध्यमतश्च दशमं उत्कृष्टतस्तु द्वादशं तपो वर्षासु कुर्वंति अनुपरिहारिककल्पस्थितानां तु कार्यमित्याह सेसा उ नियय भत्ता पायं भत्तं च ताण मायामं होइ तण
नियमात कप्पए सेसयं सव्वं॥ शेषाः पुनरनुपरिहारिककल्पस्थितपंचाभिमा वोनियत भक्तानित्यतां जिनो संवंति भायो ग्रहणान्निर्छज ख्या कदाचिदुपवासम
कुर्वंति विभक्तं च तेषां सर्वदैवानुपरिहारिककल्पस्थितानां पारणके परिहारिकाणां च सर्वथा माचाम्ल स्याचति शेषं तु विकृतिलेपकृदादिकं वस्तु सर्वं न तानामपि नि

यमान्न कल्पतइति कियंति दिनानि केनेदं तपः कर्तव्यमित्याह परिहारियाणपरिहारि याणकप्पढिय स्सावियभत्तं बछम्मासाउतवो अठारसमासिउकप्पो॥एवमु
क्तेन कारेण परिहारिका णामनुपरिहारिकाणां कल्पस्थितस्यापि च भक्तं भोजनमाचाम्लमेव भवतीति शेषः षण्मासान्यथोक्तरूपं तपश्च यथायोग्यं वक्तव्यं तत्र प
रिहारिकाणां चतुर्थषष्ठादिषु पारणके आचाम्लपरिगृहीतचतुर्थादिक्रमेण षण्मासान्यावत्तपः कुर्वंति परिहारिकाश्च विहितं तपसंलेपामनुपरिहारिकत्वमनुचरतं
प्रतिपद्यंते स्तत्स्थ कल्पस्थित एक एव परिहारिकत्वं प्रतिपद्य षण्मेव षण्मासान् यावत्तपः करोति एकस्तितरेषां मध्यात्कल्पस्थितो वाचनाचार्यो भवति शेषास्तु
सप्तानुचराभवंत्येवमयं परिहारविशुद्धिककल्पो ष्टादशभिर्मासैः समर्थ्यते कल्पसमाप्तौ ते किं कुर्वंतीत्याह कप्पसम्मत्तीएतयं जिणकप्पंवाउवितिगछंवा थियकप्प
चिथनियमा होइपुरिस्सजुगाइंतेहोंति॥ कल्पसमाप्तौ एषां त्रयी गतिस्तद्यथा कदाचित्पुनरपि तयंति तमेव परिहारविशुद्धिकानियमं नुस्थितकल्पं भरतेरावतमध्य
मोति मजिननीर्थ एव पुरुषयुगेयावद्भवंति तीर्थकर समीपे वा ऽमुं कल्पं प्रतिपद्यंते तीर्थकरसमीपप्रतिपन्नान्य समीपे वा नान्य त्रेत्यर्थः तदेवमभिहितं परिहारवि
शुद्धिकचारित्रमाह कोहाइसंपराउ तेणजउ संपरीइसंसारं तस्सुहुमसंपरायं सुहुमोजछावसेसोसो सेढिविलग्गहुउ तंविसुज्झमाणे ततोचयंतस्स
तह संकिलिस्समाणं परिणामववसेणविणेयं कोधादिकषायवर्गः संपराय उच्यते कुत इत्याह यतः संपरैति पर्यटति संसारमनेनेति ससंपरायः सूक्ष्मावशेषो य
त्र तत्सूक्ष्मसंपरायं तच्च श्रेणिविलग्न आरोहतो विशुद्ध्यमानकं भवति तथा तस्याः प्रच्यवमानस्य संक्लिश्यमानपरिणामवशात्तद्वितयमिति अथ यथाख्यातं
विवृण्वन्नाह अहसद्दो जहत्थे आडाभिविही एकट्ठियमरकायं चरणमकसायमुदितं तमहक्खायं जहक्खायं॥ अथेत्ययं यथार्थे आङ् अभिविधौ ततश्च
यथातथेनाभिविधिना ख्यातं कथितं यदकषायं चरणं तदथाख्यातं यथाख्यातं यथाख्याताख्यातमिति एतच्चकतिविधमित्याह तंदुवियप्पं छउमत्थकेवलि
विहाणउपुणेक्किक्कं खयसमजसजोगाजोगिकेवलिविहाणउ दुविहं॥ तच्च यथाख्यातचारित्रं छद्मस्थकेवलिस्वामिभेदात् द्विविधं छद्मस्थस्य द्विधिपुरुपि
द्विविधं मोहक्षयसमुत्थं तदुपशमप्रभवं च केवलिनोप्यपि सयोग्ययोगिकेवलिभेदात् द्विविधमेवेति अथ पूर्वोक्तनिगमयन्नुत्तरां निर्युक्तिगाथां संबध
यन्नाह॥ भणियं खउवसमउ अहुणोवसमेणलहइ जह जीवो सामइयंतंभणइ सोऽणंत्रवखउवसमपुव्वो तदेवं सत्तण्हं पयडीणं अभिंतरउ यकोडिकोए
इत्यादिना भणितः क्षयोपशमात्सामायिकलाभः अधुनातु अणदंसनपुंसिछी इत्यादिना वक्ष्यमाणेन यथा मोहोपशमात्सामायिकं लभ्यते यच्चा
चोपशमश्रेणिरतोऽनेनैव क्रमेणोत्तराभिधानमित्येका पातना अथ पातनांतरमाह अहवा खउवसमोउ चरणतियं उवसमेण भण्णेले खयउवा
सुहुमाहरकायाईतेणोवसमरकयाक्कमसो अथवा आद्यचारित्रत्रयं कषायाणां क्षयोपशमाद्भवति उपलक्षणत्वाद्यथा उपशमाच्चेति सूक्ष्मसं
पराय यथाख्यातचारित्रद्वयं यस्मादुपशमेनाक्षयेण वा लभ्यत इत्युक्तं तेन तस्मात्कारणात्तावेवोपशमक्षयौ क्रमेण भण्येते योहि श्रेणिद

य मुपलभ्येत सत्रूर्व मुपशमश्रेणिं करोति पश्चात्तु क्षपकश्रेणिमित्यमुं क्रमाश्रित्य युगपद्द्वयाभिधाने प्राप्तेपि प्रथमं तत्रोपशमश्रेण्यां पश्चात्तु क्षपकश्रेणिं
वक्ष्यत इति भावः अथ तृतीयामपि पातनामाह सेढिगयस्स विहेसकमं सेढीउ निग्गहरस्स अहक्खायं सोउवसमक्खयउ पदमंततोवसमसेढी॥ वाइत्य
थवा श्रेण्यंतर्भाविनः सूक्ष्मसंपरायमुक्तं तद्विनिर्गतस्य तु यथाख्यातमतः श्रेणिद्वयं भणनीयमायातं उभयश्रेणिलाभे चोपशमश्रेणिमेवादौ करोतइ
इति सैव तावत्प्रथममुच्यते इति द्वाविंशतिगाथार्थः २४७ तामियविहित प्रस्तावनामुपशमश्रेणिमाह॥ अणदंसनपुंसिछी वेयछक्कं च पुरिस
वेदोय दोदोएगंतरिए सरिसेसरिसंउवसमेइ॥ इह उपशमश्रेणि प्रारंभको प्रमत्तसंयतो भवतीति केचित् अविरतदेशविरतप्रमत्ताप्रमत्तसंयतानां
मन्यत इत्यन्ये श्रेणिसमाप्तौ च निवृत्तो ऽप्रमत्तगुणस्थाने प्रमत्तगुणस्थाने वा ऽवतिष्ठते कालगतस्तु देवेषु विरतो वा भवति कार्मग्रंथिकाभिप्रा
येण तु प्रतिपतितो ऽसौ मिथ्यादृष्टिगुणस्थानकमपि यावद्गच्छति तत्रेच्छमेनामारभ्यते॥ अणत्ति अणत्यादिदंडकधातुः अणंतीवा विकलहेतुत्वेनासात
वेद्यं नारकाद्यायुश्चेति शब्दयंत्याकारयंतीत्यणा आद्याः क्रोधादयश्चत्वारः कषायाः अथवा अणत्ति प्राकृतत्वेन अनाः एकदेशेन एकदेशेन समु
दायस्य गम्यमानत्वात् अनंतानुबंधिनस्त एवाद्याः क्रोधादयश्चत्वारः कषाया इत्यर्थः तत्रासौ प्रतिपत्ता प्रशस्ते ध्यवसायस्थानेषु वर्तमानः प्रथ
मं युगपदंतर्मुहूर्तमात्रेण कालेनानंतानुबंधिनः क्रोधादीनुपशमयति दंसनि दर्शनं दर्शः ततश्च दर्शनं मिथ्यात्वमिश्रसम्यक्त्वभेदात्त्रिविधं॥ ततो
नंतानुबंध्युपशमानंतरमेतदपि युगपदंतर्मुहूर्तेनैवोपशमयति ततो यदा पुरुषः श्रेणिसमारंभको भवति तदानुदीर्णमपि नपुंसकेति नपुंस
कवेदमंतर्मुहूर्तेनोपशमयति ततः स्त्रीवेदमंतर्मुहूर्तेन ततो हास्यारत्यरतिशोकभयजुगुप्सालक्षणं हास्यादिषट्कं युगपदंतर्मुहूर्ते
न ततः पुरुषवेदमंतर्मुहूर्तेन अथ स्त्री प्रारंभिका ततः प्रथमं नपुंसकवेदं ततः पुरुषवेदं ततो हास्यादिषट्कं ततः स्त्रीवेदमुपशमयतीत्येवं द्रष्ट
व्यं अथ नपुंसकः प्रारंभकस्ततोसावनुदीर्णमपि प्रथमं स्त्रीवेदमुपशमयति ततः पुरुषवेदं ततः षट्कं ततो नपुंसकवेदमित्येष क्रमः अतउर्द्धं दो
द्दो क्रोधाद्येकांतरितौ संज्वलनक्रोधादिव्यवहितौ सदृशौ क्रोधादित्वेन परस्परं तुल्यौ सदृशौ युगपदेव प्रत्येकमंतर्मुहूर्तेनोपशमयति॥ एतदु
क्तं भवति अप्रत्याख्यानप्रत्याख्यानावरणौ क्रोधौ क्रोधरूपतया सदृशौ सदृशौ सदृशौ युगपदंतर्मुहूर्तेनोपशमयति ततः संज्वलनं क्रोधमेका
किनमेवांतर्मुहूर्तेनोपशमयति ततो प्रत्याख्यानप्रत्याख्यानावरणमायाद्वयं मायारूपतया सदृशं ततः संज्वलनामायामो ततो प्रत्याख्याना
प्रत्याख्यानावरणमायाद्वयं मायारूपतया सदृशं ततः संज्वलनामायां ततो प्रत्याख्यानप्रत्याख्यानावरणलोभरूपतया सदृशौ युगपद्

दुपशमयति ततः संज्वलनं लोभं अमुं चापशमयं स्त्रिधा करोति द्वौ भागौ युगपदुपशमयति तृतीयं तु भागं संख्येयानि खंडानि करोति ता
न्यपि पृथक् पृथक्काल भेदेनोपशमयति ततस्तेषां संख्येयखंडानां यच्चरमसंख्येयतमं खंडं तदसंख्येयानि खंडानि करोति ततः समये समये एकैकं खं
डमुपशमयति ॥ इह च दर्शनसप्तके उपक्रांतप्रथमकरणो निवर्तिबादरोभिधीयते ततऊर्ध्वमनिवृत्तिबादरोयावत्संख्येयखंडानां चरखंडं चरमसंख्येयखंड
नि पश्चाविलसंख्येयखंडान्युपशमयन् सूक्ष्मसंपरायस्तदेवमंतर्मुहूर्तेन समर्थ्यते अस्याश्च श्रेणेरनंतानुबंधिचतुष्टयादीनां प्रत्येकं शून्यस्थापनयावस्त
रूपं भावनीयं तत्रानंतानुबंधिचतुष्टयस्थाने चत्वारि शून्यानि तिर्यक् व्यवस्थाप्यंते तद्यथा ००००। एषामुपशमस्य प्रारंभो निष्ठा च समकालं भवति तिर्य
क् समस्थापनायां भावार्थविशेषः एतदुपरि तिर्यक् समशून्यत्रयेण दर्शनत्रयं स्थाप्यते ०००एतदुपरि एकस्य वेदस्यैकं शून्यं एतदुपरि द्वितीयं (४) तद
परिहास्यादिषट्कं समश्रेण्या तिर्यक् स्थाप्यते ०००००० तदुपरि तृतीयवेदशून्यं तदुपर्यपि तिर्यक् क्रोधद्वयशून्यद्वयं ४ एतदुपरि संज्वलनक्रोधस्य शून्यं
तदुपरि तिर्यक्मानद्वयस्य शून्यद्वयं ०० तदुपरि संज्वलनस्य लोभस्यैकं शून्यं एवमूर्ध्वस्थापनां विधाय सर्वं भावनीयमिति निर्युक्तिगाथासंक्षेपार्थः विस्तरार्थस्त्व
यं प्रकार आह उवसामगसेढीए पट्ठवउ अप्पमत्तविरउ उ पज्जवसाणे सो वा होइ पमत्तो अविरउ वा अणेसमणं ति अविरत देशविरत प्रमत्ताप्रमत्तविरतानामन्यतमः अण
परोपडिवज्जइ दंसणसमणंमि उ नियट्टी ॥ ह्य भिगतार्थं नवरं भविरताद्य समानानां मध्यात् केनापि दर्शनसप्तकेउपशमिते ततोनियट्टी निवृत्तिबाद
रो भवति अणानिएत्युक्तं व्याख्यातुमाह भवमणुबंधंति जतोणंतमणंताणुबंधिणो अणंति तेच चत्तारिविसमयं समेइ अंतोमुहुत्तेणं ॥ गाथा पूर्वार्धस्यानेण ति
एवं कृहणावाक्ये सती व्याख्यानयति नवमित्यादि भवं संसारमनुबध्नंतीत्येवंशीला अनंतानुबंधिनस्तान् प्रशस्तध्यानेनांतर्मुहूर्तेन युगपदुपशमय
उदयावर्तनादिकरणायोग्यान् करोतीति शेषा वय व्याख्यानमाह ततो दंसणतिगं तउ एगवेयं जहन्नवेयं ततो बीयवेयं तउ यवेयं य
समउदिन्नं न तस्यानंतानुबंध्युपशमानंतरं मिथ्यात्वादिदर्शनत्रिकं ततोनुदीर्णस्य वेदद्वयस्य मध्ये योजघन्यो वेदस्तमुपशमयति ततो द्वितीयं ततः षड
कं ततो यः कश्चिद् उदये वर्तते वेदस्तमुपशमयति इदमुक्तं भवति ॥ यदि पुरुषः श्रेणिप्रारंभकस्तदा पुरुषवेदस्योदये वर्तते स्त्रीनपुंसकवेदौ त्व
नुदीर्णौ तयोश्च मध्ये नपुंसकवेदो जघन्यतरस्ततो दर्शनत्रिकादुपरि प्रथमं तमुपशमयति ततः स्त्रीवेदं उदीर्णं तु पुंवेदं षट्कादुपरि पश्चादुप
शमयति अनुदीर्णं तु स्त्रीवेदं जघन्यं अथ स्त्री प्रारंभिका तदा स्त्रीवेदस्तस्या उदये पुनर्नपुंसकवेदोनुदयावस्थौ अनयोरपि नपुंसकवे
दो जघन्यतर इति प्रथममुपशमयति ततः पुंवेदं उदीर्णं तु स्त्रीवेदं जघन्यतरत्वाद्दर्शनत्रिकादुपर्युपशमयति यदा तु नपुंसकः

प्रारंभकस्तदा उदीर्णं नपुंसकवेदं षट्कादुपर्युपशमयति अनुदीर्णं तु स्त्रीवेदं जघन्यतरत्वाद्दर्शनत्रिकादुपरि प्रथमं तमुपशमयति ततः पुरुष
वेदमिति ततः किमित्याह मज्झिल्लकसायाणं कोहाइ समाणजाइ दोदो एक्केक्केणं तरिए संजलणेणं उवसमेइ ॥ अनंतानुबंध्युपशमस्योक्तत्वा
त्संज्वलनानां रूपशमस्यानंतरं वक्ष्यमाणत्वाद्यथा मध्यमकषाया अप्रत्याख्यानप्रत्याख्यानावरणाख्या विशिष्यंते तेषां मध्यात् क्रोधादि समानजा
तीयाद्वौ द्वौ एकैकेन क्रोधादिसंज्वलनेनांतरितौ उपशमयतीति अत्र प्रेरकः प्राह संजलणाईणासमो जुत्तो संजोयणाइउवेउ तेपुव्वंचियसमयानणुस
म्मत्ता इलाभंमि ननु संज्वलनकषायहास्यादीनामुदयवर्तित्वाच्छमो युक्तः येतु संयोजनादयः कषायास्ते पूर्वमेव सम्यक्त्वादिगुणप्राप्तिकाल उपशामि
ता एव सम्यक्त्वादिलाभान्यथानुपपत्तेः अतस्तेषामुपशमाभिधानमलमिति भावः अत्रोत्तरमाह आसिखउवसमो सिं समोहणइ भीणाउ
इकोविसेसोसिं नणु खीणंमिउइणेसेसोवसमेखउवसमे ॥ हंत सम्यक्त्वादिलाभकाले आसीदेषां संयोजनादिकषायाणां क्षयोपशमः अतइदानीं ते
षामुपशमोऽभिधातव्य एव अथ प्रेरको भणति ननु क्षयोपशमउपशमयोः कः किल विशेषः सूरिराह ननु उदीर्णउदयप्राप्ते कर्मणि क्षीणे नुदिते
रूपशांते भवति अत्रोत्तरमाह ननु मिश्रे क्षयोपशमे सूक्ष्मादयना अस्ति प्रदेशोदयेन सत्कर्मवेदनमस्तीत्यर्थः उपशामिते तु कर्मणि तदपिना
स्तीत्युपशमनयोर्विशेष इति तदेवाह वेएइसंतकम्मं खउवसमिएसु नाणुभावंसो उवसंतकसाउ पुण वेएइन संतकम्मंपि ॥ सक्षयोपशमावस्थ
कषायं वाम्बजीवः क्षायोपशमिकेषु अनंतानुबंध्यादिषु न तत्संबंधि सत्कर्म अनुभवति प्रदेशकर्म वेदयति न पुनरनुभावं विपाकं तस्य तान्न वेदयती
त्यर्थः उपशांतकषायस्तु सत्कर्मापि न वेदयतीति क्षयोपशमोपशमयोर्विशेषइति पुनरपि परः प्राह संजोयणाइयाणं न पएसउदओ संजयस्साइ सि
द्धो सम्मिहसो णुभावं पउदओनपए सकम्मं तु ननु संयतस्य संयोजनादिकषायाणां उदयो निह संजोयणाइयाणं नणूदउ संजयस्स पडिसिद्धो
सिद्धएव तदुदये संयतत्वहानिप्रसंगात् अत्रोत्तरमाह सतमनुभागं संविपाकमाश्रित्य हासौ तदुदयो निषिद्धः से यतोदीनामनुप्रदेशकर्मप्र
तीत्यनुभावविरहिता अपि प्रदेशा नियमेन वेद्यंत इत्यागमेप्यभिहितमेवेति दर्शयन्नाह भणियं च स्कए जीवो वेपइ न वाणु भावकम्मंति जं पुण ए
सकम्मं नियमा वेएइ तं सव्वं नाणुदियं निज्जीरइ नासंतमुदेइ जं न उ भवस्सं सव्वं पए सकम्मं वेएउं मुच्चए सव्वो ॥ सूत्रेपि भगवतील
क्षणे प्रोक्तं किमित्याह जीवोनुभावकर्म वेदयते नवा यत्पुनः प्रदेशकर्म तन्नियमात्सर्वं वेदयतीति अथान्योक्तं एवं खलु गोयमा दुवि

हेकम्मेपन्नत्ते तंजहा ॥ पएसकम्मेय अणुभावकम्मेय तच्छणंजंतं पएसकम्मंतंनियमावेएइ तच्छणंजं अणुभावकम्मं तंअत्थेगइयंवेएइ अत्थेगइयंणवेएत्ति यस्मात्खलु अनुदितं कर्म निर्धार्यते नवासइइति किंतुसदेवोदेति तस्मात्सर्वमपिमुमुक्षु सर्वं प्रदेशाकर्मवेदयित्वैवमुच्यते नान्यथा ततः प्रदेशविधानाम संतानानुबंध्यादीनामिदानीमुपशमोनिरूप्यइति ॰ मत्कृतंपुनरपि परः प्राह किहदंसणाइयाउ नहोइसंजोयणाइवेए यउ मंदाणुभावयाए जहाणुभावंमि विकहिंचि निच्चोदिणंपिजहासयलमउणाभिणोलदावरणं नविघाइमंदयाए पएसकम्मंतहोनियं नन्वेवंसति प्रदेशानोपि संयोजनादिकषायान्वेदयतः संयतादेः कथंसम्यग्दर्शनादिविघातोनभवति अत्रप्रतिविधानमाह मंदानुभावतयानीरसप्रदेशमात्रवेदनात्सम्यक्त्वादिघातदत्वयः यथेहकृचिदपिभावकर्मापिनाति विकुर्वाणंना तिविघातकंदृष्टं तद्यथामित्योदितमपिमतिश्रुतावधिमनःपर्यायावरणचतुष्टयंसंपूर्णचतुर्ज्ञानिनो नमत्यादिज्ञानविघातायदृष्टं मंदत्वात्तदत्र प्रदेशकर्मापि नीरसत्वा नन्दर्शनादिविघातायेति किंच किरियाइकुणइरोगमंदपोलंजहावेणघंतो किरियामेत्तं कयंचियपएसकम्मंतहानवसा ॥ यथेहरोगेभिषजादिक्रियायविधिवत्क्रियमाणो महांत्रियामात्रकृतामेवपीडांकरोतीति तथाहि नरकगत्यादिकाः कर्मप्रकृतयः तद्भवसिद्धिकानामपि मुनीनां सत्तायां विद्यमानाएव नन्वानुस्मृतास्ताः कदाचिदिप्रपरसार्यते नतुतद्भवसिद्धिकोनरकादिजन्मविपाकेनतासमनुभवति किंतु तपसाप्रदेशरूपतयासमनुभवनाः क्षपयतिन चवेदयिताकांचिद्बाधामनुभवत्यतोज्ञायते नूनमिदं कर्मवेदनं गुणविघातायबाधाकरणंवेति विज्ञाति कर्मण्युपशांतिकथंभवतीसौप्रोच्यतइत्याह दंसणमोहाईउं भणइ अणियट्टिबायरोपरउं जावउसेसो संजलणलोभसंखिज्जभागोत्ति ॥ सचदर्शनसप्तके उपशमिते तदतीतः संन्यरतः शेषनपुंसकवेदादिकं कर्मोपशमयन्ननिवृत्तिबादरोभिधीयते यावत्संज्वलनलोभस्यसंख्याततमोभागःशेषः निवृत्तिबादरस्तकिंचिदुपशमयतीति नेहासौसंगृहीतः ततःकिमसौकरोतीत्याह तहसंखेज्जइभागं समए२ समेइए केक अंतोमुहुत्तमेत्तं तस्सासंखेज्जभागंमि नेदं पिसंज्वलनलोभस्यसंख्येयभागमसंख्येयैःखंडैःकरोति ततस्तस्य लोभसंख्येयभागस्यासंख्याततमंभागं केकंभागंसमये उपशमयति तत्यचलोभसंख्यातभागस्यासंख्यातमपिभागंप्रतिसमयमुपशमयन्नंतर्मुहूर्तमात्रंकालंसूक्ष्मसंपरायोभिधीयत इत्युत्तरगाथासंबंधः इतिसप्तदशगाथार्थः ३०२ तदेवसूक्ष्मसंपरायस्वरूपंसविशेषमाह लोभाणुवेयंतोजोखलुउवसामउवरवउवासोसुहुमसंपराउ अहखायाउणउकिंचि ॥ अंतर्मुहूर्तमात्रंकालंसूक्ष्मसंपरायोभिधीयते [illegible] यः किमित्याह लोभाणुइत्यादि लोभसंख्यातभागस्यासंख्याततमांशावखंडमनुसमयतत्ततउपशामिकःक्षपकोवाभवति अयंचलोभांशमात्रयशोपशाधथाख्याताद्

किंचिदेवन्यूनइति इतिनिर्युक्तिगाथार्थः ३०३ आहनन्वपशमकाधिकारेकमितिक्षपकोनिर्दिष्टइत्याह उवसामयाहिगारेतस्ससभागोत्ति खवगनिद्देसो सुहुमसरागातीतो आहखारउहोइनियठो उपशामिकसूक्ष्मसंपरायस्याधिकारे नत्समभागइनिकृत्वाक्षपकोप्ययमत्रनिर्दिष्टः यथोपशमश्रेण्यांनवमगुणस्थानकादुपरितनभागेसूक्ष्मसंपरायस्याधिकारेतत्समभागइतिकृत्वाक्षपकोप्ययमत्रनिर्दिष्टः यथोपशमश्रेण्यांनवमगुणस्थानकादुपरितनभागेसूक्ष्मसंपरायोभवति तथाक्षपकश्रेण्यामपीति समानभागत्वादुपशमाधिकारेप्यथवायंक्षपकोपिनिर्दिष्टइत्यर्थः उपशमकसूक्ष्मसंपरायोभवति तथाक्षपकश्रेण्यामपीति श्रेणिद्वयेगुणस्थानकादतिक्रांतउपशांतमोहनिर्ग्रंथलक्षणोयथाख्यातोभवति ततःकिमित्याह वद्धाऊपडिवन्नोसेढिगउवापसंतमोहोवा जइकुणइकोइकालं वच्चइतोअणुत्तरसुरेसु अनुवद्धाउहोऊपसंतमोहोमुहुत्तमेत्तइ उइयकसाउनियमा नियत्तएसेढिपडिलोमं ॥ यदिबद्धायुरुपशमश्रेणिंप्रतिपन्नः श्रेणिमध्यगतगुणस्थानवर्तीवाउपशांतमोहोवाभूत्वाकालंकरोति तदानियमेनानुत्तरसुरेष्वेवोत्पद्यते श्रेणिप्रतिपतितस्यतुकालकरणेनियमोनानामतित्वेननानास्थानगमनादिति अथाबद्धायुस्तांप्रतिपद्यतेतदांतर्मुहूर्तमुपशांतमोहोभूत्वा ततःकुतश्चिन्निमित्तादुदितकषायः सन्नियमेनश्रेणिप्रतिलोमंपश्चान्मुखंनिवर्ततेप्रतिपततिएतावन्मात्रकालभावित्वादेवस्याइतिगाथार्थः ३०६ अनंतरमुदीरितकषायसामर्थ्यमुत्कीर्तयन्नाह उवसामपुवणीया गुणमहयाजिणचरित्तसरिसंपिपडिवायंतिकसाया किंपुणसेसेसरागत्थे उपशमनमुपशमस्तमपिशब्दात्क्षायोपशममप्युपनीताः केनोपशममुपनीताइत्याह गुणेनमहता गुणमहानुपशमकश्रेणिगुणमहता उपशमिकेनप्रतिपातयंतिकषायाः संयमादेवाकंतमेवोपशमकं कथंभूतंजिनस्यकेवलिनश्चारित्रेणतुल्यासदृशस्तुल्योजिनचारित्रसदृशःद्वयोप्युपशांतमोहकेवलिनोःकषायोदयरहितचारित्रयुक्तत्वात् जिनसामानचारित्रइत्यर्थःतमेवंभूतमपिकिंपुनःशेषात्सरागस्थान्प्रतिपातयंतीतिनिर्युक्तिगाथार्थः ३०७ माध्यंदयउम्मियंतिणइमोवारछन्नोगणिद्धपच्चयवे दोवइजहराकसाउदएमुज्जो यथाहाग्निदग्धोअंकुरःपुनरपिमत्ययनःउदकासेचनादिकारणसंसर्गादंकुरमवालपत्रपुष्पादिरूपंनिजस्वरूपंदर्शयति यथावासस्वाव छन्नोग्निःप्रत्यतस्त्रीणांदीधनकारणसहायात्पुनरपिदाहपाकादिकर्तृत्वलक्षणंनिजस्वरूपंप्रकटयति यथावाभिव्यापनीतोऽम्योःयथादिप्रत्ययतःपुनरपिनिजस्वभावमाविःकरोति तथासोप्युपशांतकषायोजीवःस्वशरीरोपध्यादिमूर्छाप्रत्ययतःपुनरपिकषायोदयंप्राप्यस्वरूपंदर्शयति तत्तोयमुपशांतमोहोन्नयरसदिवधमित्यादिवचनात्सैद्धांतिकमतेनतस्मिन्नेवभवेक्षपकश्रेणिंनकरोति ॥ तामंतरेणचनसिध्यतिउत्कृष्टतश्चदेशोनार्द्धपुद्गलपराव

Dr. BHAU DAJI MEMORIAL

र्तरूपं संसारं पर्यटति तस्माद्विहितोपशमश्रेणिरंतमुहूर्ता नियमेन प्रतिपततीति एतदेवाह तम्मिभवे निव्वाणं न लभइ उक्कोसउवसंसारं पोग्गल
परि अद्धं देसूणं कोवि इक्केखा गतार्थेति गाथाद्वयार्थः ३०९ अहमहदाश्चर्यं यदेकदेशं मोक्षप्रसादसोपानमारूढ्यापि हतजीवः पुनरपिपरिभ्रष्ट
एतावदुःखमनुभवतीति विस्मितात्मा गुरुरुपदेशमाह जइ उवसंतकसाओ लहइ अणंतं पुणोवि पडिवायं नहुमेवीससियव्वं थेवे विकसायसेसंमि
अणथोवं वणथोवं अग्गीथोवं कसायथोवं च नहुभेवीससियव्वं थोवंपि हु तं बहुं होइ गृहमणि नैवमवद्भिर्विश्वसितव्यं स्तोके विकषायशेषे किंतु
मिथ्यादुःकृतादिभिः कटितीव तत्तो निवर्तनीयमिति निर्युक्तिगाथाद्वयं ३११ द्वितीयनिर्युक्तिगाथाभावार्थमाह दासत्तं देइ रणं अइरा मरणं वणोवि
सप्पंतो सव्वस्सदहमग्गी दितिकसायाभवमणंतं स्तोकमपि क्रमुणं क्रमेण वर्धमानं दासत्वं ददाति यथा काचिद्वणिक् दुहिता गृहीत्वजस्यनिज
मातुरागतस्य प्रतिदिनं कर्षद्वयं गृह्णाति लस्य कर्षभाजी यद्दत्त वती साधुसेवाव्याक्षेपक्ष्वणिजो सोनददीव द्रुमानश्चक्रेमेण घटादि संख्यां प्रा
प्तस्तयाच कार्पास कर्तनमात्रेन जीवनादसौ दातुं न शकितस्ततः स्तस्यैव वणिजः सा कृणदासीसंजाता अन्यदा वागतेन तैनैव बंधुसाधुना वि
वितातस्तव्य तिकरः कृताचतस्य वणितो देशनामोचयित्वाचेयं ग्राहिता दीक्षामित्येवं दासत्वदायकं स्तोकमपि ऋणस्तोकोपि व्रणशोपोऽपथ्या
दिकमासाद्य विसर्प्पन्नंतर बहिश्चप्रसरन्न चिरान्मरणं प्रयच्छति अग्निश्चलवोपि मार्गादीप पतितस्तृणादिके लग्नः परंपरया क्रमेण प्रसरन्स मस्तमपि
ग्रामनगरादिकं निर्दहत्येवं स्तोकशेषा अपि कषायाः कुतश्चिन्निमित्ता द्वृद्धिमुपगच्छंतो नंतभवमुपकल्पयंतीति वक्ष्यमाणगाथाप्रस्तावनार्थमाह उव
सामं सामाइयमुदियं खाइयमउथवरकाम्मि क्रमममहरकार्यपिय खयसेदिमुस्सवं तं च ततो ब्रम्हो पशमिकं सामायिकं चारित्रमुक्तं इदानीं क्षायिकं
तदुच्यत इत्यकापातना अथवा सूक्ष्म संपराय चारित्रं यथाख्यात चारित्रं वोपशमश्रेण्याश्रितमुक्तं इदानीं क्षपक श्रेणिप्रतिपत्ता उत्तमसंहननो विर
तदेशविरत प्रमत्ताप्रमत्तानामन्यतम उत्पन्न विशुद्ध परिणामो विज्ञेयस्तत्र पूर्वधरो ऽप्रमत्तः शुक्लध्यानोपगतोप्येतां प्रतिपद्यते तदन्य दर्शनसप्तक शे
षास्त्वविरतादयो धर्मध्यानोपगता एवं क्षपक क्रमश्चायं तद्यथा प्रथममंतर्मुहूर्तेनानंतानुबंधिनश्चतुरोपि क्रोधादीन्युगपत्क्षपयति तदनंतभागं
च मिथ्यात्वे प्रक्षिप्य ततो मिथ्यात्वं सह तेन नष्टेनयुगपत्क्षपयति स्तनस्तथैव सम्य यथा गुरुत्यतिसंधो दावानलः खल्वर्द्ध दग्धं एवं शुद्धनानरया
साधाभयमपि निर्दह ज्ञेव भसावपि क्षपकस्तीव्र शुभपरिणामत्वात्सावशेष मन्यत्र प्रक्षिप्यक्षपयति ततस्तथैव सम्यग्मिथ्यात्वं ततः सम्य
क्त्वं इह च यदि बद्धायुः प्रतिपद्यते अनंतानुबंधिक्षये चव्युपरमते ततः पश्चात्कदाचिन्मिथ्यात्वोदये पुनरप्यनंतानुबंधिचतुष्टयं बध्नाति

तत्तो नपुंसकवेदं ततः स्त्रीवेदं ततो हास्यादिषट्कं ततः पुरुषवेदं खंडं त्रयं युगपत्क्षपयति तृतीयखंडं तु संज्वलन क्रोधे प्रक्षिपति

तस्याबंध्य तत्कारणात्वात् क्षीण मिथ्यात्वस्तत्तन्न बध्नाति कारणाभावात् तस्मिंश्चानंतानुबंधि चतुष्टये क्षीणे प्रतिपतितरशुभपरिणाम एव यदि म्रि
यते तदा सुरेकव्रजति एवं दर्शनसप्तक क्षयेपि वक्तव्यं प्रतिपतितस्तत्परिणाम स्तु यदि पश्चान्म्रियते तदा नानामतित्वान्नानागतिको भवति
यदा बद्धायुरिमां श्रेणीं प्रतिपद्यते तदा दर्शनसप्तकं समसमस्तमपि क्षपयित्वा नियमादुपरमत एव ततो यत्रायुर्बद्धं तत्रोत्पद्यते यः पुनरबद्धायुः प्रति
पद्यते सन्निः शेषामुप्येतां श्रेणीं समप्यत्येव तस्याश्चायं क्रमः सम्यक्त्व क्षपित शेषे स्वल्पे वर्तमाने एवाप्रत्याख्यान प्रत्याख्यानावरण कषायाष्टकं सम
कमेव क्षपयितुमारभते एतेष्वार्द्ध क्षपितेष्वेवान्याः षोडशकर्मप्रकृतीः क्षपयति तद्यथा नरकानुपूर्वी१ तिर्यगानुपूर्वी२ नरकगति३ तिर्यगगति४ लक्षणं गतिद्व
य४ पंचेंद्रियजातिवर्ज्यानस्य काद्याजातय एक द्वित्रि चतुरिंद्रियजातयः स्थावरः८ आतपो द्योतस्थावर साधारण सूक्ष्माणि१३ निद्रानिद्रा प्रचलाप्रचला
स्त्यानर्द्धि लक्षणं महानिद्रात्रयं १६ एतत्क्षपणोत्तर कालं कषायाष्टकस्य यच्छेषं तत्क्षपयति क्षपणं चयाखंडंतु संज्वलनक्रोधेप्रक्षिपति पुरुषप्रतिपन्नये यक्र
मा बोधव्यः नपुंसको हि तुंप्रतिपन्नाः रिउदितवेदस्य पश्चात्क्षपणं शेषालुदितवेद द्वयस्यतु मध्ये धमवेदस्य प्रथममितरस्य तु तदनंतरं क्षयः प्रागुक्तो परा
मवसाव्य ततः क्रोधादीश्चतुरः संज्वलनान्प्रत्येकमंतर्मुहूर्तकाले तत्क्षपयति क्षपणं चैषां खंडत्रयादि करणक्रमेण पुरुषवेदवद्दाच्यं क्रोधसत्कं च तृतीय
खंडं मानमध्ये पाति मानसत्कं मायायां मायासत्कं तु लोभे क्षपणकालश्च प्रत्येकं सर्वत्रांतर्मुहूर्तमानो मंतव्यः श्रेणिरेव्यप्यावृहतरांतर्मुहूर्तमानेव सर्वापि ए
कस्मिन्नपि बृहदंतर्मुहूर्ते लघुतरांतमुहूर्तानामसंख्ययानां प्राप्ति लोभस्य तृतीयखंडं नु संख्येयानि कृत्वा पृथक्कालभेदेन क्षपयति एषामपि संख्यातत म
चरमखंडमसंख्येयानि खंडानि करोति तान्यपि समये एकैकं क्षपयति इह च क्षीणदर्शन सप्तको निवर्तिबादरउच्यते ततऊर्ध्वं त्वनिवर्ति बादरो यावत्सं
ख्यातत्म लोभखंडत न ऊर्ध्वमसंख्येयानि खंडानि कृत्वा पृथक्कालभेदेन करोति तान्यपि समये एकैकं क्षपयति इह च क्षीणदर्शनसप्तको निवर्तिबाद
र उच्यते ततऊर्ध्वं त्वनिवर्ति बादरो यावत्संख्यातमलोभखंडं ततऊर्ध्वमसंख्येयानि तत्खंडानि क्षपयन् सूक्ष्मसंपराया भिधीयते यावच्चरमलोभांशक्षयः त
तऊर्ध्वं क्षीणमोहयथाख्यातचारित्री भवति स्थापना चेहाक्रानुसारेण विधेयेति निर्युक्तिगाथार्थः ३१४ भाष्यकारः प्राह पडिवत्तीए अविरय देसपम
त्तापमत्तविरयाणं अन्नयरो पडिवज्जइ सुद्धज्झाणोवगयचित्तो पढमकसाए समयं खवेइ अंतोमुहुत्तमेत्तेणं ततोविय मिच्छत्तं तओ य मीसं तओ सम्मं बद्धा
उ पडिवन्नो पढमकसायक्खए इम्मेरिज्जा तो मिच्छत्तोदयओ चिणेइ भुज्जो नखीणंमि तम्मि मउ ताइ इदिवं तप्परिणामोयसत्तए खीणे उवरय परिणा
मो पसत्तए खीणो उवरयपरिणामो पुण पच्छा नाणामइ गईउ चतस्रोपि व्याख्यातार्थाः परः प्राह खीणंमि दंसणतिए किंहोइ न उमिदं सणा
ईए भणइ सम्मद्दिट्ठी सम्मंन रकए कउ सम्म ननु मिथ्यात्वादिक दर्शनत्रिके क्षीणे किंतकःसौ क्षपकस्त्रिदर्शनानी तो भवति न मिथ्यादृष्टिर्मिथ्या

विशेषा०वि० त्राभावान्नापि सम्यग्मिथ्यादृष्टिः सम्यग्मिथ्यात्वाभावान्न च सम्यग्दृष्टिः सम्यक्त्वासत्वादित्येवं प्राप्नोतीत्यर्थः आचार्य आह भण्यतेऽत्रोत्तरं दर्शनत्रिके
१८६. क्षीणे विशुद्धसम्यग्दृष्टिः स वक्ष्यते सोऽपुनरपि परः प्राह ननु कथं सम्यक्त्वक्षये सति कुतोऽयं सम्यग्दृष्टिर्न घटत एवेत्यर्थः सूरिराह निव्वानियमयण
कोद्दव रूवं मिच्छत्तमेव सम्मत्तं खीणं न उ जो भावो सद्दहणालक्खणो तस्स सो तस्स विसुद्धयरो जायइ सम्मत्त पोग्गलक्खयओ दिट्ठिव्व सण्हसुद्धब्भ
पडलविगमे मणूसस्स जह सुद्धजलाणुगयं वत्थं सुद्धं जलक्खए सुतरं सम्मत्त सुद्धपोग्गल परिक्खएऽदंसणं पेवं इंनयः सम्यक्पदार्थश्रद्धानुरूपो जी
वस्य भावः परिणामः स एव भाव सम्यक्त्वमुच्यते यत्तु शोधित मिथ्यात्वपुद्गलपुंजः स तत्त्वतो मिथ्यात्वमेव केवलं सम्यक्तत्त्वश्रद्धानरूपस्य
जीवस्वभावस्याशुद्धमिथ्यात्वपुंजवदनावरकत्वादुपचारतः सम्यक्त्वमुच्यते एवं च सति य छोधितमदनकोद्रवरूपं मिथ्यात्वमेव सदुपचारतः स
म्यक्त्वं प्रसिद्धं तदेवं तस्य क्षपणे ननु यत्तत्त्वश्रद्धानलक्षणो जीवस्वभावः स च तस्य तत्त्वश्रद्धानभाव औपचारिकसम्यक्त्वपुद्गलपुंजे क्षपिते प्रत्यु
त विशुद्धतरो जायते अथ श्लक्ष्णशुद्धाभ्रपटलविगमे मनुष्यस्य लोचनद्वयरूपा दृष्टिः स च्छाभ्रपटलसदृशो हि सम्यक्त्वपुद्गलपुंजः स त्वाच्छा
दितो भ्रपटलमिव दृष्टेर्यं च यावच्चतत्त्वश्रद्धानपरिणामस्य विघातक एव ततोऽनर्थकरूपे तस्मिन् क्षपितेऽभ्रपटलविगमे लोचनद्वयीवत्तत्त्वश्रद्धान
परिणतिर्निर्मलं भवति अपरमपि दृष्टांतमाह से संन्नाणावगमे सुद्धयरं केवलं जहा नाणं तह खाइय सम्मत्तं खओवसम्मविगमम्मि यथेह शेषस्यक्षा
योपशमिकस्य मत्यादिज्ञानचतुष्टयस्यापगमे पन्यत्क्षायिक शुद्धतरं केवल ज्ञानलक्षणं ज्ञानांतरं प्रादुरस्ति न पुनरज्ञानी भवति जीवः तद्वत्क्षायोपशमि १८६
कसम्यक्त्वविगमेऽप्यपरं विशुद्धतरं क्षायिकं सम्यक्दर्शनांतरमुपजायते न त्वदर्शनी भवति जीव ननु कथं पुनः क्षायिकसम्यक्त्वं विशुद्धतरं क्षायोपश
मिकं च विरुद्धमित्याह निव्वलियम्मयणकोद्दव भत्तंतिल्लाइमीसियं मइए नउ सो वाउ निव्वलियमीसमयकोद्दवच्चाए तह सुद्धमिच्छ सम्मत्तपुग्गल
मिच्छमीसियामिच्छं होयपरिणामउ वा सो वाउ साइएनच्छि इह निर्वलिता निर्मदीकृताः शोधितायं मदनकोद्रवास्तन्निष्पन्नं यद्भक्तमोदनस्तैलादि
द्विविरुद्धाद्द्रव्यमिश्रितं भुज्यमानं मदस्य द्विषि वांतमये देव मोकारं न पुनः सोपायोऽस्ति कुसति निर्वलित मिश्रमदनकोद्रव त्यागे सति इदमुक्तं भव
ति यथा शोधिताविशुद्धाशुद्धरूपाभ्यां मदनकोद्रवाभ्यां भुक्तं तस्योक्तस्वरूपो मदनलक्षणोपायेन भवत्येव तथा तैरेव प्रकारेण शुद्धं तन्मिथ्यात्वं शु
द्धमिथ्यात्वं अपूर्वकरणाध्यवसायेनापनीतमिथ्यात्वभावमित्यर्थः तदेवोपचारतः सम्यक्त्वं शुद्धमिथ्यात्वसम्यक्त्वं तस्य पुद्गलाः शुद्धमिथ्यात्व
सम्यक्त्वपुद्गलाः शोधितमदनकोद्रवस्थानीयाः विरुद्धतैलादिद्रव्यकल्पेन मिथ्यात्वेन मिश्रिताः संतस्तत्क्षणएव मिथ्यात्वं भवति कृतार्थकं

ससर्गतद्वचः श्रवणादिजनितपरिणामहारिक्लिष्ट वद्धरसीकृतामिथ्यात्वरूपतां प्रतिपद्यंते ततस्तैश्चैव मिथ्यादृष्टिर्भूत्वा पुनः संसारनीरधिं वंभ्रमीति
संभवं त्ततोऽपायः क्षायिकसम्यक्त्वे नास्ति सर्वानर्थमूलानां शुद्धानामशुद्धानां वा मिथ्यात्वपुद्गलानां क्षपितत्वेनासत्वात् तस्माच्छुद्धतरं क्षायिकसम्यक्त्वं मत्नी
मसं च क्षायोपशमिकमत एतदपगमे पि क्षायिकसम्यक्त्वभावान्नादर्शनी जीवः किंतु प्रत्युत विशुद्धसम्यग्दर्शनीति स्थितं प्रकृतमाह बद्धाउपडिव
न्नो नियमा खीणंमि सत्तए ठाइ इयरे अणुवरउच्चिय सयलं सेढिं समाणेइ॥ गताथों यो बद्धायुः प्रतिपद्यते सद्दर्शनसप्तके क्षपिते किं करोतीत्याह
विइयंतइए एकसाए अट्ठारंभइ समयंमेसिंच खवियंमिमज्झभागे पयमाईं सोलसस्सखवेइ गताथों कास्तापुनः षोडशप्रकृतयइत्याह नरयतिरिया
पुवी२ गई एवं चत्तारि जाइ जाइ उवे ८ आयाम उज्जोयं थावर साहारणं सुहुमं१३ निद्दानिद्दा निद्दा उ १६ अह्वगसेसं नउ णुलिणाणं वेयाणलहणपरं ततोवी
यतउवट्ट नतोयनइयवेअं ह स्से कंतो कमेणसंजलणं सवत्थवसासेसो मयिल्लेलयइपुरिल्लि आरव्याताभ्यां नवूरंस खवृस्त्येत्यादि सव पूर्वल्लिके पाश्चात्येनं
तानुबंध्यादिके कर्मणि क्षपयितुमारब्धे सावशेषवेपुरिल्लिं यन्नमिथ्यात्वादिके कर्मणि लग्नतिक्षपयितुं प्रवर्तते इत्येवं तावद्वाच्यं यावन्मायायां सावशे
पायामेव लोभेलगति ततश्च मायाशेषं लोभं च युगपत्क्षपयतीति ननु कियति कर्मणि क्षीणे किं नामासौ भवतीत्याह दंसणमोहक्खवणे नियट्टिंवायरोपरउ। भनिपद्दि
जावउ सेसो संजलण लोभसंखिय भागोत्ति तह संखियइ भागं २ समएर खवेइ पक्केकं तऊ हस्कु हमसरागो लोभाणुजाणमि कोवि खीणेखवेनियट्ठो वीस
मणोहसागरंतरिउं अंतोमुहुत्तमुद्धिं तरिउं थाहेजहा पुरिसो॥ तदिसंखियपइ भागत्ति तस्य संज्वलनलोभस संखेयतनाभागस्या संख्येयतमो भागस्तद
संख्येयतमो भागस्तदसंख्येयतमो भागं खीणत्ति लोभाणुमात्रेऽपि सर्वथाक्षीणे इत्यर्थः तत्र द्विचरमसमये क्षपकनिर्ग्रंथ तामवाप्य मोहसागरं तीर्थंतर्मुहूर्तका
लं विश्राम्यति यथोदधिंग्राहत्यामुत्तीर्यस्थाग गाधपदमवाप्तलंघनीय जानुदघ्नादिके जलेप्रासः कश्चित्पुरुषो विश्राम्यति शेषं सुगमार्थं भवति ततः
क्षीणमोहः सन्नसौ किं करोतीतीत्याह छउमवच्छकालदुचरिम समएनिद्दं खवेइ पयलं च चरिमे केवलज्ञाणा खीणाएवरणं तरायस्सक्षीणमोह छद्मस्थ
कालस्यांतर्मुहूर्तमानस्य योसौ द्विचरमसमयः चरणाद्द्वितीयो द्विचरमः चरमो वा द्वितीयो यस्मात्सौ द्विचरमः असंख्यायानामेन दुस्थानकसमयोनामुपांत्य
समय इत्यर्थः तत्र द्विचरमसमये निद्रां प्रचलां च क्षपयति चरमसमये तु पंचविधं ज्ञानावरणं पंचविधमंतरायं दर्शनचतुष्टयलक्षणं चतुर्विधं शेषं दर्शनावर
णं चक्षपयित्वा केवलज्ञानसवाप्नोति अथावरणकेवल ज्ञानलाभ इत्यत्र निश्चयव्यवहारनयवादमुपदर्शयितुमाह आवरणक्खयसमए नेच्छइयस्सके
वलुप्पत्ती तत्तोणंतर समए ववहारो केवलं भणइ निश्चयनयस्यायमभिप्रायः यस्मिन्नेव समये आवरणस्य क्षयः क्षीयमाणमावरणमित्यर्थः तस्मिन्नेव स
मये केवलोत्पत्तिर्निश्चीयमानस्य क्षीणता क्रियाकाल निष्ठाकालयोरेकत्वाद् न्यदेवान्यत्र काले क्रिया अन्यत्र कार्योत्पत्तिरिति स्यादित्यायुक्तं क्रियावि

१८७

रहेऽपि कार्योत्पत्त्यभ्युपगमादिति क्रियारंभकालात्पूर्वमपि कार्योत्पत्तिप्रसंगादिति व्यवहारनयस्त्वावरणक्षयसमयादनंतरसमये केवलोत्पत्तिं म
न्यते आवरणक्षयसमये क्षीणमानत्वात् क्षीयमाणस्य च अक्षीणत्वात् क्रियाकालनिष्ठाकालयोर्भेदात् तदेकत्वे च क्रियाकालेऽपि कार्यस्य सत्त्वेन क्रियावैयर्थ्यप्रसंगा
त्समानकालभाविनोः क्रियाकार्ययोः कार्यकारणभावः युज्यते सव्येतरगोविषाणादीनामपि तत्प्रसंगादिति तथा च व्यवहारनयो निश्चयपक्षं समर्थयति ॥
नाणावरणे खिज्जमाणे क्षीणे जुत्तं जइ तदावरणे न य किरियानिट्ठाणं कालेगत्तं जउत्तुत्तं यस्मात्क्षीयमाणे न तदावरणे ज्ञानमुत्पद्यते इत्येतन्न युक्तं अस्य क्रियाकालत्वा
त्क्रियाकाले च कार्यसत्त्वाभ्युपगमस्य दूषितत्वात् किंतु क्षीणे एव तदावरणे ज्ञानं युज्यते अस्य निष्ठाकालत्वात् न च क्रियानिष्ठयोः कालैकत्वं युज्यते प्रतिविहितत्वादिति
अथ निश्चयनयः प्राह जइ किरियाए न खउ को हेउ न प्पगिरकए अन्नो अहतापए कि हकाले अन्नं उ तई सखऊण छ इत व्यवहारवादिनावरणस्य क्षये भवता केवलो
त्पत्तिरिष्यते न तु तत्र क्षीयमाणे तत्र भवंतं पृच्छामः आवरणक्षयकाले क्रिया समस्ति न वा यदि नास्ति तर्हि क्रियांतरेणावरणे क्षीणं युज्यते अन्यस्य निष्ठाकालत्वे
क्षयो कोऽन्यो हेतुरिति वक्तव्यं न कोऽपि प्राप्नोतीत्यर्थः अथास्त्यावरणक्षयकाले न द्वेतुभूता क्रिया तया च तत्क्षयो विधीयते तस्योपायातं क्रियाकालनिष्ठाकालयोरेक
त्वमिति कथमुच्यते अन्यत्र समयं क्रिया अन्यत्र च तत्परिक्षयः किंच किरियाकालंमि खउ जइ नत्थि तउ नहो अपयच्छा वि जइ वा किरियस्स खउ पढमंमि
वि कीस किरियाए यदि क्रियाकालेऽप्यावरणक्षयो नास्ति ततः पश्चादप्यसौ न भवेदक्रियत्वात्पूर्वकालवदिति अथवा यदि क्रियानिवृत्तो द्वितीयसमये क्रिय १८७
स्य सत आवरणक्षयोऽभ्युपगम्यते तर्हि क्रियान्वितप्रथमकिंक्रियया तामंतरेणाप्यावरणक्षयोपपत्तेः क्रियाविरहितद्वितीयसमयवदिति क्रियाकालनिष्ठा
कालयोश्चैकत्वमागमेऽप्युक्तमिति निश्चयः स्वपक्षं द्रढयन्नाह जं निज्जरेप्पमाणं निज्जिन्नं ति भणियसुए ज च नोकम्मं निज्जरई नावरणं गुणतस्सए यथास्मा
न चलमाणे चलिए जाव निज्जरिज्जमाणे निज्जिण्णे इति वचनात् निर्जीर्यमाणं कर्म निर्जीर्णमुक्तमतः क्षीयमाणं क्षीणं भवति नानयोः कालभेदः अपि च यस्मा
दिदं चागमे प्रोक्तं किमित्याह कम्मं वेइयइ नोकम्मं वेइज्जइ इति एतावत्सूत्रं द्रष्टव्यं वेद्यमानावस्थायां कर्म वेद्यते निर्जरावस्थायां तु कर्म अकर्मेत्यर्थः अन्य नो
श्च वेदनासमयोऽन्यश्च निर्जरासमयः ततस्तस्मात्कारणात्तत्समये आवरणक्षीयमाणतासमये आवरणस्य निर्जरणसमये इत्यर्थः नावरणं ति नास्त्यावरणं
नास्ति प्रतिबंधकं कर्म क्षीयमाणस्य क्षीणत्वादित्यर्थः प्रतिबंधकाभावाच्च तत्रैव क्षीयमाणतासमये केवलोत्पत्तिः कस्मान्निरुणद्धि अह मिति चे
दित्याह जइ नाणमणावरणे वि नत्थि तो नत्थि पच्छा वि जायंतं अकारणउ तमकारणउच्चिय पउ घा यद्यनावरणेऽप्यावरणाभावेऽपि केवलज्ञान
मुत्पन्नं न लभते ततः पश्चादप्यावरणक्षयोत्तरकालं यदा किल त्वया इष्यते तदापि तदुत्पत्तिर्न स्यात् तथावरणाविशेषेऽप्यावरणक्षयसमये के
वलज्ञानं न भवति तदुत्तरकालं पश्चाद्भवतीति यदृच्छया प्रोच्यते हंत तदर्थकारणाद्यदृच्छयैव प्रसूतिरस्य ततोऽकारणतयैव जातमकारण

तएव न तत्प्रतिपन्नेरस्त्विशेषाभावादिति स्तस्मात्किमिह स्थितमित्याह नाणस्सावरणस्स य समयं तम्हा पगासतमसोव्व उप्पायव्वयधम्मा तह भेयाण
घभावाणं तस्मात्केवलज्ञानस्य तदावरणस्य च युगपदेवोत्पादव्ययधर्मौ द्रष्टव्यौ कयोरिवेत्याह प्रकाशतमसोरिव यथा हि युगपदेव तमो निवर्तते प्रदी
पादिप्रकाशस्तूत्पद्यत इति य एव तमसो निवृत्तिसमयः एवमिहापि युगपदेवावरणं निवर्तते केवलज्ञानं तूत्पद्यते आत्मद्रव्यं त्ववतिष्ठते अत्र य ए
वावरणस्य व्ययसमयः स एव केवलज्ञानस्योत्पद्यमानस्योत्पन्नता आत्मद्रव्यस्य तु सुस्थितत्वादिति एवं सर्वेषामपि भावानां मृदंगुल्यादिपदार्थानां
घटऋजुतादिभिः पूर्वपर्यायैरुत्पादः पिंडशिवकस्थासकोशादिभिर्वक्रत्वादिभिश्च पाश्चात्यपर्यायैर्व्ययो मृदंगुल्यादिद्रव्यरूपतयात्ववस्थानं युगपद्भवतीति विज्ञा
तव्यमिति यदि च समसमये केवललाभः स्ततः किमित्याह उत यावरणाई केवलवरनाणदंसणसहावो जाणइ पासइ य जिणो नेयं सव्वं सया कालं ॥ तत
श्च सर्वमपि ज्ञेयं साद्यपर्यवसितं सदाकालं जिनः केवली जानाति केवलज्ञानेन पश्यति च केवलदर्शनेन स कथंभूतः सन् केवलवरज्ञानदर्शनस्वभावो तद्व्यति
रिक्तस्वरूपस्तर्हि पूर्वमिच्छमद्वा किमिति इदानीमेव पश्यतीत्याह यत इदानीं उपयातीतः केवलज्ञानकेवलदर्शनावरणद्व्यातीतत्वादित्यर्थः इत्यष्टाविंश
तिगाथार्थः ३५२ अत एवाह संभिन्नं पासंतो लोगमलोगं च सव्वओ सव्वं तं नत्थि जं न पासइ भूयं भव्वं भविस्सं च संभिन्नं बाह्याभ्यंतरं च भिन्नं संभिन्नं यथा बहिस्त
थान्तरप्पीत्यर्थः अथवा द्रव्यक्षेत्रकालभावलक्षणं सर्वमपि ज्ञेयं मत्र केवलज्ञानस्य विषयत्वेन दर्शितं तत्र संभिन्नमिति द्रव्यं गृह्यते कालभावौ च तत्पर्या
यत्वात् क्षेत्रे ताभ्यां च समस्ताभ्यां समंतात् अभिन्नं संभिन्नमिति कृत्वा द्रव्यं संभिन्नमुच्यते तत्पश्यन्नुपलभमानो लोकमलोकं च प्रसिद्धस्वरूपं पश्यन्ननेन
क्षेत्रं प्रतिपादितं भवति एतावदेव च द्रव्यादिचतुर्विधं ज्ञेयं नान्यदिति किमेकया दिशा पश्यन्नित्याह सर्वतः सर्वासु दिक्षु नास्ति किं किंचिद्यदि द्रव्यादुत ने
त्याह सर्वं निरवशेषं अमुमेवार्थं स्पष्टयन्नाह तन्नास्ति किमपि ज्ञेयं भूतमतीतं भवतीति भव्यं वर्तमानं च भविष्यच्चायन्न पश्यति केवलीति निर्युक्तिगाथा
र्थः ३५३ संभिन्नं परंपन्निसक्त नमसं भिन्नमिति कोऽर्थ इत्याह बाहिं जहा तहंतो तहंतो संभिन्नं सव्वपज्जवेहिं वा अतिपरनिव्विसेसं सपरप्पज्जाय उवाचि य
था बहिस्तथांतश्चेति संभिन्नं अथवा सर्वपर्यायैः संकीर्णत्वात् संभिन्नं यदि वा यथात्मानं जानाति तथा परमपि यथा परं तथात्मानमपि निर्विशे
षं जानातीत्येवं स्वपरनिर्विशेषं संभिन्नं अथवा सर्वपर्यायैर्युक्तं संभिन्नमिति अथवा संभिन्नग्रहणेन व द्रव्यमिह कालपज्जवं गहियं लोगालोगं स
व्वंति स क्षेत्रेवन परिमाणे संभिन्नग्रहणेनेह सकालपर्यायं द्रव्यं गृह्यते कालश्च पर्यायाश्च कालपर्यायाः सह तैर्वर्तत इति सकालपर्यायं संभिन्नं लोगा
लोगं च सर्वतः सर्वतमित्यनेन क्षेत्रपरिमाणं गृहीतमेतावदेव च ज्ञेयं यद्द्रव्यादिचतुष्टयमिति तच्च पश्यन्किमित्याह तं पासंतो अरिहा जं नयासइन

उत्तयन्नत्थि पंचत्थिकायपज्जयमाणंतेणंजइ हियां तच्च द्रव्यादिचतुर्विधं ज्ञेयं यस्य तं त्रिकोशीकेवली भूतादिकालविशिष्टं यत्किमपि वस्तु नास्ति यन्नप
श्यति कुतः यतो यस्मात्पंचास्तिकायपर्यायराशिप्रमाणं त्वेवज्ञेयमागमेभिहितं नान्यदेतच्च द्रव्यादिचतुष्टयेन गृहीतमेवेति भावः तदेवमियता ग्रंथेन किमु
क्तं भवतीत्याह तवनियमनाणरुक्खं आरूढोजंजिणोअमियनाणी एतो सपरंपरए एत्तोजिणपवयणुप्पत्ती तदेवमियता ग्रंथेनायं सजिनोऽमितज्ञानी प्रा
क्प्रः किमित्याह यस्तपोनियमज्ञानवृक्षमारूढो ज्ञानवृष्टिं मुंचति प्राग्निर्दिष्टः एतस्माच्च समग्रको भावपरंपरकः एतस्मादेवाचार्यपारंपर्येण सामायिका
दिश्रुतमायातमित्यर्थः एतस्माच्च जिनप्रवचनोत्पत्तिरिति अर्थोपसंहारपूर्वकं प्रकृतं स्मरयन्नाह निज्जुत्तिसमुत्थाणप्पसंगउजाव पवयणुप्पत्ती यासंगिय
गयमिदं वुच्छामि अउउवग्घायं तदेवं सामायिकनिर्युक्तिसमुत्थानप्रसंगतः तवनियमनाणरुक्खं आरूढो केवली अमियनाणीत्यादिरन्येयतो जिनप्रवच
नोत्पत्तिं यावत्प्रासंगिकमेवेदं गतं अतः प्रकृतमुपोद्घातं प्राक्प्रतिज्ञातं वक्ष्यामीति परं प्रकृतं तावत्तिष्ठतु यावत्तावदुपोद्घातः कुत इत्याह भण्णउताव उग्घाउ
कापुणजिणपवयणुप्पत्ती ते कित्तियाभिहाणं पवयणमिहकोविभागोसो एवं पसंगसेसं वुनुमुवग्घायवित्थरं तुञ्जं तोसं सद्दाराइ कमेणतस्संगहोव
मा॥ तिष्ठतु तावदुपोद्घातः कथं जिनप्रवचनोत्पत्तिः तथा जिनप्रवचनं कियदभिधानं कोवाभिधानविभागः सतस्य प्रवचनस्येति विनेयप्रश्नमाशंक्य एत
ज्जिनप्रवचनोत्पत्तिप्रवचनैकार्थिकतद्विभागलक्षणं तृतीयं प्रसंगशेषमुक्त्वाभिधाय ततउद्देसनिद्देसनियमेइत्यादिद्वारविध्युपन्यासेनोपोद्घातविस्तरं
वक्ष्यामि ततश्च नयविहीव कारणविहीअणुउगोइत्येतानि विशेषद्वाराणि क्रमेण वक्ष्यामि ततश्च नयविहीव कारणविहीअणुउगोइत्येतानि विशेषद्वारा
णि क्रमेण वक्ष्यामि एतस्य च क्षणनीयत्वेन प्रतिज्ञातस्यास्य वक्ष्यमाणसंग्रहो मंतव्य इति गाथासमकार्थः ३५० कः संग्रह इत्याह जिणपवयणउप्पत्ती पवयण
एगट्ठियाविभागोय दारविहीयनयविहीयअणुउगो इह जिनप्रवचनोत्पत्तिः प्रवचनैकार्थिकानि एकार्थिकविभागश्चेत्येतत्त्रयमपि तावत्प्रसंगशेषं धारा
ण्युद्देशनिर्देशादीनितेषांविधानं प्ररूपणं विधिर्द्वारविधिः अयंरूपोद्घातः नयविधिस्तुपक्रमादीनां मूलानुयोगद्वाराणां चतुर्थमनुयोगद्वाराणां चतुर्थ
मनुयोगद्वारं शिष्याचारपरीक्षाभिधानं व्याख्यानविधिः अनुयोगस्तु सूत्रस्पर्शिकनिर्युक्तिः सूत्रानुगमश्चेति निर्युक्तिसंग्रहार्थः ३५१ एतदेवा
ह भाष्यकारः यासंगमाइतियं दारविहित्तिविहिउउवग्घाउ अणुउगद्दारं पुण चउत्थमिह नयविहित्ति सीसायरिय पक्खिवखरकाणविहित्ति कहणमत्ता
या सुत्तफासिय निज्जुत्तीसुत्ताणुगमोयमणुउगोगाथार्थः यमपिगतार्थे अथ प्रेरकः प्राह किंपुण्णचउत्थदारं नयविधिमभिधायते णुउगोत्ति चउद्दा
रासंगहिया नन्वनुयोगोव्याख्यानरूपत्वादनुगम एव अतउपक्रमो निक्षेपोनुगमादित्यनुयोगद्वारोपन्यासक्रममाश्रित्य नयानां पूर्वमेव

१८८

अनुयोगोपन्यासो युक्तो इति कथमिह चतुर्थद्वारवर्तिनो नयानभिधाय पश्चात्तृतीयद्वारवर्त्यनुगमरूपस्यानुयोगोन्यासः कृतः अपरं च चतुरनुयो
गद्वारात्मकमेव शास्त्रं भवति यश्चायमत्र व्याख्यानविधिर्गृहीतस्तदपि रूपन्यस्तः सचतुर्णामनुयोगद्वाराणां मध्यादेकेनापि न संगृह्यते तथाहि नवात्र
द्यमुपक्रमनिक्षेपनयद्वारसंबन्धि तल्लक्षणायोगान्नाप्यनुगमे अतो न व्याख्यानविधिः सूत्रानुगमरूपोनापि सूत्रस्पर्शिकनिर्युक्त्यात्मको उतश्च
नुरनुयोगद्वारासंगृहीतत्वेनाप्रस्तुतत्वात् कथमाक्षिप्तः अव्याख्यानविधिर्गृहीत इति अत्राचार्यदेशीयस्य कस्याप्युत्तरमुपदर्शनीगाहुश्च घटमा
नकं स्वकीयमुत्तरं सूरिराह वंधाणुलोमयाए केईनजउ नइ कमेणापि नीरइ निवंधेउं तेणेयं बुद्धिपुव्विति कुचिदाचार्यदेशीयामन्यते एवमेव
वंधानुलोम्यादनुयोगनयविधि विपर्ययः एतच्च नजउनइत्ति यतः क्रमेणापि निबद्धं ग्रथितुं शक्यत एवासौ गाथा तथाद्वारविहीनरकाणवि
हि अणुउगोनयविधि विपर्ययः एतच्चनगृहीयत्ति तस्माद्बुद्धिपूर्वकमयं विपर्ययरचना कथमित्याह अंतंमिउयण सिउपुव्वमणुगमस्सतत्तुएम
याइ तेणाणेवइसमं वच्चतिनयाणुउगोय॥ उपक्रमानिक्षेपानुगमानयाइत्यनुयोगद्वाराणामंतप्रवेतयानुपद्मस्य यदिदानीमनुगमस्यानुयोग
स्यपूर्वंप्रथमं नयान भणाति तद्द्वापयति भद्रवाहुस्वामीनयानुयोगो प्रतिसूत्रं युगपदेव व्रजतः नहि नामेयैतः न दुन्यः कापि अनुयोस्ति यदि
युगपन्नयानुगमोगच्छतस्तर्हि तदुपन्यासोपि युगपदेवास्तु इति चेत्तदयुक्तं अशक्यत्वा तस्मादनुयोगद्वारे ननुगमस्यैतिउपन्यस्तानामपि नया
नोयदिहतदर्शितस्तद्गुणनतस्तयोगपद्यगमनज्ञापनार्थमिति अथ द्वितीयप्रश्नस्य परिहारमाह रकनाणुगमादरोर गुरुसीसाणुग्गहोत्ति एसउ वरकाण
विहिजेपइ सुत्तहारायणदिकयपि॥ चतुर्थकल्पानुयोगद्वारेनधि कृतमपि नेप्यनुक्रमेपि च व्याख्यानविधिं सूत्रिर्जल्पति कुत्याह इहस्त
त्रानुगमावसरेऽनुयोगस्यावित्यर्थः किमर्थमित्याह गुरुश्च शिष्यस्य गुरुशिष्यौ तयोरनुग्रहो गुरुशिष्यानुग्रहस्तदुपलक्षितउपदेशो गुरुशि
ष्यानुग्रहोपदेशस्तदर्थं इदमुक्तं भवति॥ गुणयता आचार्येण गुणवता शिष्याश्रमस्तगुणोपेतं सूत्रं व्याख्येयमित्येव गुरुशिष्यानुग्रहार्थं व्याख्या
नविधावुपदिष्टे कृतव्याख्यानं सश्रवणं च शास्त्रं प्रभवतीति गुणमर्थस्यानुयोगद्वारासंगृहीतोपि व्याख्यानविधिरुक्त इति तदेवं व्याख्यानवि
धेरनधिकृतत्वमभ्युपगम्योक्तं यदि वानेदमसिद्धमित्येतदाह अहवासाहिकयच्चियवरकाणेगत्तिजं तउणुगमो भंजंवरकाणंग तेनं राघ्घंअउणुगमो
अथवा स व्याख्यानविधिरधिकृतएवेह द्रष्टव्यः सा इतिप्राकृतत्वात्स्त्रीलिंगनिर्देशः कथं पुनरसावविधाधिकृत इत्याह यद्यस्माद्व्याख्यानांगमिति
स्तनस्तस्मादनुगमेधिकियत इति प्रक्रमः यदिनामव्याख्यानांगमसौ तथापि कथमनुगमेऽन्तर्भवतीत्याह यद्व्याख्यानांगं तत्तद्यस्मादनुगमस्तत

कारणत्वाद्व्याख्यानं गतं व्याख्यानविधिस्तस्मादनुगमेऽन्तर्भवतीति व्याख्यानगतत्वमेवास्य भावयितुमाह सुत्ताणुगमाईए वक्खाणविहीजओ तदंगंता जं
वसुत्तावसरेच्चिय सफलाइंगवाईणायाइं यतश्च सूत्रानुगमस्यादौ प्रथमं व्याख्यानविधिर्वक्तार्थकरणे ... इति शेषः तत्रापि द्वारापि पूर्वमुक्तं सुत्तं पयं पय
त्थो संभवउ विग्गहो वियारो य दूसियसिद्धी नयमय विसेसओ नेयमणुसुत्तं यच्च द्वौ निर्दिष्टौ सिसंबंधा तस्माद्व्याख्यानांगमंतो यस्य य च परस्माश्रुताक्षरो
वसूत्रानुगमप्रस्तावे एवं गोणीचंदणकं चाईउ सावए बहिरगोह इत्यादिना श्रवानन्तरं वक्ष्यमाणानि व्याख्यानविधिगतानि निगवाद्युदाहरणानि सफ
लानि भवन्ति नान्यथा इदमुक्तं भवति ॥ सूत्रव्याख्यानविधिविषयाण्येव हि गवाद्युदाहरणानि सफलानि भवन्ति नान्यानि च सफलानि ततो भवति यदा
व्याख्यानविधिरनुगमान्तर्गमो भवति तदा हि सूत्रे तत्तेनुत्तस्य तानि निरालंबनान्येव स्फुरिति अत्र परः प्राह जइ साणुगमंगं चिय द्वारविहीने एवं किमाईए
उवरिउं भणाहि उक्कमकरणगुणो कोणु यदि सव्याख्यानविधिरनुगमान्तर्गमो वर्ण्यते तत्र यतोऽनुगमादेर्वक्तव्या किमिति उद्देसे निद्देसे नियमे इत्यादि व
क्ष्यमाणद्वारविधेरादौ समस्तीयमण्यते गोणीचंदनकं या इत्यादिना किमिति द्वारविध्यादौ भणिष्यते इत्यर्थः यदि च वक्ष्यमाणसूत्रव्याख्यास्थाने तद्वर्णनार्हं व्या
ख्यानविधिर्गोणीचंदणकं इत्यादिवक्तुमुचितः किमिति उद्देसे निद्देसे निग्गमे इत्यादि द्वारविधिरर्वाग्व्यवस्थानस्थाने निर्दिष्ट इति भावः कोऽत्रैवमुत्क्रमक
रणे नकश्चिदित्यर्थः अत्रोत्तरमाह द्वारविहीवि महत्था तत्तो विवरकाणविहिविवधासा माहाधतदाइए वक्खाणविहिं निरूवेइ ॥ द्वारविधिरपि सूत्रवद्बहुत्व
त्वात् कृत्याण्हनुरपि अतस्तत्रापि व्याख्यानविधेर्विपर्ययाः विधिव्याख्यानमाश्रदतो द्वारविहीयतया विहायवक्खाणविहीय अणुओगाइत्येवं संग्रहगाथा
यामनुयोगादौ निर्दिष्टोऽपि ततोऽवतार्य तदादौ द्वारविध्यादौ व्याख्यानविधिं निरूपयति द्वारविध्यादौ निर्दिष्टस्य व्याख्यानविधेर्यत्फलं तस्य गुणदर्शनार्थम
वाह एत्थ य गुरुसीसं सीसायगुरु परिक्खिउं पच्छा वोच्छइ सो च्चिय सफलं सो छिदइव फलं दिट्ठ यथा लोएणत्ति अत्रैव द्वारविध्यादौ निर्दिष्टे व्याख्यानविधिश्रु
ता सति दिट्ठियत्ता भाति सहस्य व्याख्यानविधिपिचारो गुरुः शिष्यं शिष्याश्च गुरुं परीक्ष्य पश्चाद्गुणवते शिष्याय द्वारविधिरपरं स स एवं वक्ष्यति गुरुः गुणवदा
चार्यान्तिके श्रोष्यति वा शिष्यो मोक्ष्यति वा स्यानतिवादोऽयमतं शिष्यं गुरुः गुरुं वा न हन्तं शिष्य इति गुणमपश्य द्वारविध्यादौ व्याख्यानविधिर्निर्दिष्ट इति अत्र परः
प्राह साणुगमंगंपि इहं जं भण्णइ किन्न कीरइ इहं चेव दाणं इय यत्तनंतरं वक्खाणविहीय मुत्तंमि ननु यद्यनुगमांगमपि सन्नुपायेक्षया व्याख्यानविधिं विचारो गुरुः
शिष्यं रिह द्वारविधेरादौ भण्यते ननु सूत्रानुगमादौ तर्हि जिणपवयणउप्पत्ती इत्यादिसंग्रहगाथायामपि इहैव द्वारविधेरादौ किन्न क्रियते किन्नोपादीयते
येन वक्खाणविहीय अणुओगाइत्येवमनुगमादौ निर्दिष्टः अत्रोत्तरमाह संग्रहगाथायामिच्छमुपन्यासं कुर्वन्नेतद्दर्शयति किमित्याह प्रयत्नतरं यथा सव
त्यवसूत्रानुगमावसरे गुणवदाचार्यशिष्यपरिग्रहादिको विधिरवश्यमेव कर्तव्य इति संग्रहगाथामनुगमादौ व्याख्यानविधिरुपात्त इति भावः अन्यत्वाच

किमित्याह अणुओगाइविभागं वक्खाणविहीविनप्पसंगेण जंपंति केइ तेसिं बुद्धसीउं यकोलोग्घा संगहगाहाइपुणो अणुओगाई पविभिन्नदारत्ता ओवनिउत्तु
गो सो य वक्खाणविही च्छंति इह केचित्पुनरेवं जल्पन्ति किमुच्यते अणुओगो य निउगो भासा विभासा य वत्तियं चेव इत्यादिना ग्रन्थेन अनुयोगनियोगभाषादी
नां विभागं विशेषमभिधास्यमानो व्याख्यानविधिरपि तत्प्रसंगेन द्वारविधेरग्रे संग्रहगाथायामुक्तोऽपि पूर्वमपनिर्दिष्टः किमर्थमित्याह तेषामप्यनुयोगनियोगभा
षादीनां वक्तुः श्रोतुर्वा को योग्य इति परिज्ञानार्थं जिणपवयणउप्पत्ती इत्यादिसंग्रहगाथायां पुनः वक्खाणविहीय अणुओगाइत्येवमनुयोगस्यादौ द्वारविधिस्तथ
तो व्याख्यानविधिमुपदर्शयन्ते तद्वक्तव्यं इत्यनुयोगादिविभागावसरे द्वारविधेः पूर्वमनुयोगादिवर्णितः सोऽयं संग्रहगाथोक्त अयमत्र भावः जिणपवय
णत्यादिसंग्रहगाथायां प्रथमं द्वारविधिः १ ततो व्याख्यानविधिः २ ततोऽनुयोगउक्तः ३ इति ततः न य चैनेकार्थिकद्वारव्याख्यायां अणुओगो य निउगो इत्यादि
गाथया अनुयोग उक्तः ४ ततो गोणी चंदने इत्यादिना स्वरूपतो व्याख्यानविधिः ५ ततो उद्देसे इत्यादिना द्वारविधिः ६ ततोऽपि सूत्रानुयोग इत्ययं क्रमः अत्र च य
था द्वारविधेः पूर्वं स्वरूपतो व्याख्यानविधिरुक्तः एवं यदि संग्रहगाथायामपि द्वारविधेः पूर्वं नाममात्रेणाप्युच्यते तदा कस्यापि एवं संशयः स्यात्संग्रहगाथानोक्ता
नुयोगद्वारविध्यनन्तरोक्तसूत्रानुयोगयोस्तावदेकत्वं तथैव संग्रहगाथानोक्तानुयोगोऽन्यो नान्यो वेति यदा तु संग्रहगाथायामनुयोगप्रत्यासन्न एव व्या
नुविधिरुच्यते तदैतन्निश्चीयते अस्य अणुओगो य निउगो इति गाथानीतानुयोगस्य निमित्तं द्वारविधिरुक्तः संग्रहगाथोक्तानुयोगोऽपि स एवेति निर्दि
ष्टा यदर्थं स व्याख्यानविधिर्द्वारविधेः पूर्वं स्वरूपतः उक्तो न तु संग्रहगाथायामनुयोगस्यादौ नाममात्रेणोक्त इति तेऽस्मिन्नालोच्य नाप्रत्यवस्थाने विधायमस्कृत
जिणपवयणउप्पत्ती इत्यादिगाथाव्याख्याशेषं वक्ष्यमाणगाथाप्रस्तावनां चाह कयमिह जिणपवयणस्स उप्पत्ती पवयणेगट्ठिया जिणगणहरवयणाई
इमाइं तस्साभिहाणाइं यदुक्तं केयं जिनप्रवचनाभिव्यक्तिः सत्त्वेह जिनप्रवचनं साव छत्तमुच्यते इत्यसकृत्प्रसिद्धमेव अस्य चोत्पत्तिर्निर्युक्तिः समुत्थानम संगत
अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणमित्यादौ जिणगणधरेभ्य इति वचनात्सर्वमप्यभिहितं वयस्सु नरुक्तं तथा जिनप्रवचनं कियदभिधानं
अभिधानविभागो वा स्यकद इति तन्नेतानि तावत्तस्याभिधानानीति पंचदशगाथार्थः ३९६ साम्प्रतं अभिहएगयंपसत्थं पहाणवयणं च पवयणं तं च सा
मण्णसुयनाणं विसेसउ सुत्तमत्थो य गतार्था सूत्रशब्दस्यार्थमाह सिंचइ खरइ जमत्थं तम्हा सुत्तं निरुत्तविहिणा वा सुयइ सवइ इसुत्थइ सि
चइ सरइ एवं जेणत्थं कानि पुनस्तानीत्याह एगट्ठियाणि तिणि उ पवयणं सुत्तं तहेव अत्थो य एक्केक्कस्स य एत्तो नामा एगट्ठिया पंच एकार्थो
येषां तान्येकार्थिकानि त्रीण्येव कानि पुनस्तानि प्रवचनमुक्तार्थं वक्ष्यमाणार्थं च सामान्येन श्रुतज्ञानं सूत्रं चनाऽऽरत्रं तद्विशेष एव अर्थस्तदर्थ

विशेषा० वृ०

१९०

र्थः अयमपि तद्विशेष एवः प्रवचनसूत्रार्थानां मध्ये एकैकस्य प्रत्येकमेकार्थिकानि पंच पंच नामानि भवंतीति निर्युक्तिगाथार्थः १३८९ पिबद्दसरी
सिंचति क्षरति यस्मादर्थान् ततो निरुक्तिविधिना सूत्रं अथवा निरुक्तविधिनैव सूचयति स्रवति वार्थानिति सूत्रं श्रूयते वा इति सूत्रं सीव्यते विशेषप्र
तनामानीयत इति वा सूत्रं सरति वा ऽर्थमनुगच्छति यस्मात्ततः सूत्रमिति तथाभिविवरियं सत्तं पिव सकडिय पचिनउ वसकत्तंति जो सकत्ता सिप्पाउ सो
अच्छीअध्यएज्जस्मा॥ अर्थव्याख्यानतो यावदर्थाप्यनिवृत्तं तावत्सूत्रं सुप्तमिव सुप्तमुच्यते प्राकृतशैल्या च सुत्तमिति अथवा सुस्थितत्वात्प्र
माणाबाधितत्वात्स्थापितत्वाच्च सूक्तं प्राकृतत्वादेव च सुत्तं अर्थशब्दस्यार्थमाह यः सूत्रस्याभिप्रायः सोऽर्थः अर्थ्यते गम्यते इत्यर्थः
अथ प्रेरकः प्राह सहपवयणेण जुत्ता नसुय छेगट्ठ यापरोपरउ जं सत्तं परकेयं अत्थो तं तस्स परकाणं जुघइ च विभागउ तिण्ह विभिन्नत्थया ले
ए हरउ एगट्ठाणं पि पुणा किमिहगट्ठाभिहाणाई॥ ननु प्रवचनेन सह सूत्रार्थयोरेकार्थता युक्ता न द्विशब्दत्वात्तयोः सूत्रार्थयोः पुनः परस्परं तु
कार्थता न युज्यते तयोरत्यंतभेदात्तथाहि व्याख्येयं सूत्रं व्याख्यानं चार्थ इति महान्भेदः अथवा त्रयाणामप्येषां प्रवचनसूत्रार्थानां भिन्नार्थत्वं तु
युज्यते न त्वेतेन पुनरेकार्थतेति शेषः विभागाद्भिन्नविषयत्वात्सामान्यविषयं हि प्रवचनं विशेषविषयौ च सूत्रार्थाविति कथं तेषामेकार्थता न हि घट
शरावादीनामेकार्थता युक्तिमती इतरथा यद्येकार्थानि तानि त्रीण्यपि तर्हि एकैकस्य पंचानामेकार्थिकानामभिधानं नन्वेकैकस्य पंच पंचैकार्थिकान्य
भिधास्यते तानि न युज्यंत एव न हीन्द्रशक्रपुरंदरादिशब्दानामेकार्थानामपि पुनरपि प्रत्येकमेकार्थिकान्युपपद्यंत इति अत्र प्रतिविधानमाह मउलपुल्ल
निजहा संकोयविबोहमित्तभिन्नाई अच्छेणाभिन्नाई कमलं सामण्णरूवेणं अविवरियंतह सत्तं विवरीयमत्थो निवाहकालंमि किंचिम्मित्त विभिन्ना सा
मण्णा पवयणं नेयं यथेह मुकुल पुल्लमिति चैतयोः संकोचविकाशरूपतया भेदः सामान्यरूपतया चाभेदः कमलमिति नचैषां पुनः प्रत्येकमेकार्थिकानि
नघथा आद्यस्य मुकुलं कुमलं कोरकं जालकं कलिकाद्यनुमित्यादि द्वितीयस्य तु फुल्लं विकोचं विकोशं विकासितं उन्मीलितं उन्मिषितं स्मितं उन्निद्रं विनंपि
ते हसितं उद्बुद्धं व्याकोशमित्यादि तृतीयस्य तु कमलं पद्मं अरविंदं पंकजं सरोजमिति तथेहाप्यवितथार्थतो मुकुलकल्पं सूत्रमुच्यते तदेव बोधकाले व्याख्या
नकाले विवृतं सत्तत्फुल्लकमलकल्पमर्थो ऽभिधीयते विशेषरूपतया च किंचिन्मात्रमनयोर्भेदः सामान्यरूपतया त्वैकत्वं ज्ञेयं प्रवचनं श्रुतज्ञानमिति न
चैषां प्रवचनसूत्रार्थानामेकार्थिकानि न युज्यंते सुयधम्मतित्थ इत्यादिनानंतरमेवाभिधास्यमानत्वादिति अथ दृष्टान्तांतरेणापि प्रवचनसूत्रार्थानामेकार्थ
त्वादिरूपतां समर्थयन्नाह सामान्नविसेसाणं जह वेगाणेगयावयवत्ताए दुभयमत्थो य जहा वीसं बहुपज्जवोत्तिय एवं सुत्तत्थाणं एगाणेगट्ठयाचवत्थाए १९०

डाक्टर भाऊदाजी ... MEMORIAL Dr BHAU DAJI

पवयणमुभयं चतयं नियय बहुपद्धवेतोस॥ अथ इति कमलोदाहरणापेक्षया उदाहरणांतरत्व सूचकः तत्रश्च यथा वा सामान्यविशेषयोर्व्यवस्थाया विवक्षया ए
कतानेकता च दृश्यते एकार्थत्वमनेकार्थत्वं दृष्टमित्यर्थः तथात्रार्थलक्षणे एकस्मिन्नर्थे द्वयोरपि सामान्यविशेषयोरेकत्वादेकार्थता सामान्यस्य च विजा
तीयव्यावृत्ताकारप्रत्ययनिबंधनत्वाद्विशेषाणां तु सजातीयविजातीयभिन्नत्वप्रतिभासकारणत्वादनेकार्थता तदुभयमत्थो यजहत्ति यथा च तयोः
सामान्यविशेषयोरुभयं तदुभयं अर्थोऽभिधीयते अर्थशब्दवाच्यं द्वितयमप्येतद्भवतीत्यर्थः ते च सामान्यविशेषार्थलक्षणास्तयोरप्यर्थाः विष्वक् पृथ
ग्यथा बहुपर्याया बह्वेकार्थिका स्युर्यथा॥ सामान्यं सत्ताभाव इत्यादि विशेषा भेदाः पर्याया इत्यादि अर्थो द्रव्यं वस्त्वित्यादि एवं प्रस्तुतयोः सूत्रार्थयोर
पि विवक्षया एकार्थतादयो भावनीयाः तथाहि॥ प्रवचनलक्षणे एकस्मिन्नर्थे द्वयोरपि सूत्रार्थयोरवृत्तत्वादेकार्थता पवयणमुभयं चेतयत्ति तच्च
सूत्रार्थयोरुभयमपि प्रवचनमुच्यते त्रिकं च तत्सूत्रार्थप्रवचनलक्षणं विष्वक् पृथग्बहुपर्यायं बह्वेकार्थिकं तथा च वक्ष्यति सुयधम्मतित्थमग्गो इत्या
दि अथवान्यमतभेदाद्वा त्रयाणामपि प्रवचनादीनामेकार्थता पृथग्बहुपर्यायं बह्वेकार्थिकं नय च वक्ष्यति न विरुध्यंत इति दर्शयन्नाह अहवा सद्द
नामं वंजणसुद्धिय नयस्सभिन्नत्थं इयरस्स अभिन्नत्थं संववहारो पत्तदेवरको संववहारत्थाए नम्हाणेणगयाणं निच्छयउ नोजुत्ताइं तेसिं वीसंपद्यापना
माइं अथवान्यंत्रवीतिशब्दाद्वितनयः समभिरूढलक्षणः शब्दनयः स्तस्याभिप्रायात्सर्वमपि नाम भिन्नार्थमेव शब्दभेदाद्घटपटाद्यभिधानवदिति इ
तरस्य तु नैगमादिरर्थनयस्याभिप्रायाद्भिन्नार्थमपि भवति वस्तुतोऽनेकार्थपर्यायत्वाच्छक्रपुरंदरादिनामवदिति किं च संव्यवहारश्च लोकव्यवहार
श्चैतदपेक्षोऽभिन्नार्थनामार्थः॥ एकार्थिकनामापेक्षः प्रायः प्रवर्तत इत्यर्थः स्वः स्वर्गः सुरसद्म त्रिदशावासस्त्रिविष्टपं त्रिदिवमित्याद्येकार्थिकनाम
मालादिशास्त्राणां संव्यवहारनयापेक्षयैव प्रवृत्तेरिति ननु किमित्याह संववहारत्थादि तस्माद्धेनाक्रमेणाकारेण संव्यवहारनयापेक्षया नाम्नामेक
तापकार्थदाप्यस्तीत्यर्थः न निश्चयतः शब्दनयशब्दनयलक्षणनिश्चयमतेन सर्वथापि नाम्नामभिन्नार्थता न्वकचिदेकार्थत्वमित्यर्थः ततस्तस्मात्तेषां प्रवच
नसूत्रार्थादिपृथक्पृथक्व्यवहारनयमतेन युक्तानि घटमानकानि पर्यायनामान्येकार्थिकाभिधानानीत्येकादशगाथार्थः १३९० तत्र श्रुतिधर्म इति कोऽर्थ
इत्याह बोहो कयस्सधम्मो सहावधम्मो सजीवपज्जाउ सुगईएसंजमंमिय धरणाउ वासुयं धम्मो श्रुतस्य धर्मः स्वभावः स च बोधो बोधस्वभावत्वा
च्छ्रुत अथवाश्रुतं च तत्धर्मश्च श्रुतधर्मो जीवपर्यायः अथवा सुगतौ संयमे वा धारणाद्धर्मः श्रुतमुच्यते श्रुतं च धर्मश्चेति श्रुतधर्मा अर्थ तीर्थशब्दा
भावात् तद्युक्तं शब्दार्थयोर्वाच्यवाचक संबंधस्य विद्यमानत्वाद्यद्यर्थस्य शब्दो वाचकस्तर्ह्यगृहीतसंकेतस्यापि म्लेच्छादेरसावर्थं प्रतिपादये
दिति चेन्नैवं कर्मक्षयोपशमसव्यपेक्षस्यैव तस्य तत्प्रतिपादकत्वात्क्षयोपशमस्य च संकेतादिसापेक्षत्वान्न हि प्रदीपः प्रकाशकइत्येताव
न्मात्रेणैवांधादीनामप्यर्थं प्रकाशयति ननु यदि क्षयोपशमापेक्षः शब्दोर्थं प्रकाशयति तर्हि संकेतस्यापि म्लेच्छादेरसावर्थं प्रतिपाद
येदिति चेन्नैवं कर्मक्षयोपशमसव्यपेक्षस्यैव तस्य तत्प्रतिपादकत्वात्क्षयोपशमस्य संकेतादिसापेक्षत्वान्न हि प्रदीपः प्रकाशकइ
त्येतावन्मात्रेणैवांधादीनामप्यर्थं प्रकाशयति नहि संकेतकरणेपि तत्प्रकाशनप्रसंगो नैवं तद्दृष्टि गृहीतसंकेतनामवगानेनार्थप्र
तिपत्तिदर्शनात् किं भंगर गमुकल्पक्षयोपशमकल्पनेन तदयुक्तं तथाहि केषांचिज्जडमतीनां शास्त्रव्याख्यानेपि विषमपदवाक्येषु
विशिष्टक्षयोपशमाभावात् संकेतोपि कर्तुं न शक्यते अन्येतु तत्करणेपि नार्थं प्रतिपद्यंते यदपि केषांचिदपूर्वम्लेच्छभाषादिश्रवणे कृतसं
केतानामपि लगित्येव कथमप्यर्थं प्रतिपत्तिर्दृश्यते तत्रापि क्षयोपशमस्यैवातिपटुत्वं हेतुः तस्मात्कर्मक्षयोपशमस्यैवातिपटुत्वं हेतुः
तस्मात्कर्मक्षयोपशमादि सामग्रीसव्यपेक्षः शब्दो वाचकः अर्थस्तु वाच्य इति शब्दार्थयोर्वाच्यवाचकभावलक्षणः संबंध इति तदेवं व्याख्या
ताद्वविहंपि नेगमनउ इत्यादि गाथा तद्व्याख्याने च व्याख्यातमुपोद्घातनिर्युक्तिद्वारगाथाद्वयस्य द्वितीयं द्वारमथ तृतीयं निर्गमद्वार
मभिधित्सुस्तत्प्रतिपादकगाथायाः प्रस्तावनामाह निर्दिष्टस्य पस्य सर्वसाद्यपर्यवसितस्य कालभावविहिं कितं जीवदव्वं पसयमेयं जउ जहेवा
खेत्ते कम्मि वि काले पुरिसविसेसो भावउ कासो खेत्ताइ निग्गनियमप्पेउ चिय छव्विहो जं सो तदेवमुद्देशनादिष्टस्य निर्देशेन च निर्दि

एतस्य स्फुटसामायिकाध्ययनस्येदानीं प्रसूतिरूपनिर्वक्तव्या सा च द्रव्यक्षेत्रकालभावैः कारणभूतैर्भणनीया एतदेव दर्शयति किंतमित्यादि
किंनाम तत् जीवद्रव्यं जडेति यत एवं भूतं सामायिकाध्ययनं प्रसूतमिति तावद्वक्तव्यं जहवत्ति यथा वायिनं केनापि श्रीमन्महावीरलक्षणे-
न जीवद्रव्ये क्षायिकभाववर्तिना एतत्सामायिकं प्ररूपितं तथा वक्तव्यं तथा खेत्तेइत्यादि कस्मिन्क्षेत्रे क्व वा काले भगवता प्रथमतः सामायिकाध्ययनं
प्ररूपितमिति वाच्यं तथा भावतो भावे प्रत्यनयाप्रक्रुते कोसौ पुरुषविशेषो जीवो येनेदं सामायिकमभिहितमिति च भणनीयं इह च दव्वाभि
लावविधेवेए धम्मछन्नोग भावो य भावपुरिसो उ जीवो भावे य गयं तु भावेणमिति वक्ष्यमाणगाथायां द्रव्यादिभेदैरनेकधा पुरुषसंभवमुप
ते दर्शयिष्यन् भावे भावनिर्गमे विचार्ये भावपुरुषो जीव इति वक्ष्यते तत्रापि भावे पुरुषविशेषो जीव इत्युक्तं तदेवमत्र क्षेत्रकालपुरुषविशेषलक्ष
णत्रिकमनंतरवक्ष्यमाणनिर्गमभेद एव द्रष्टव्यं यस्मात् षड्विधो सौ निर्गमस्तस्य च निर्गमभेदषट्कस्य मध्ये क्षेत्रकालौ साक्षादेव पथ्ये
ते भावनिर्गमे च पुरुषविशेषो जीवो वक्ष्यत इत्येवं क्षेत्रादित्रिकं निर्गमभेदः अत्राह ननु द्रव्यमपि निर्गमभेद एव तस्यापि तत्राभिधास्य
मानत्वात्तत्कथं क्षेत्रादित्रिकमेव तद्भेदत्वेनोच्यते सत्यं किंतु पुरुषविशेषग्रहणे नैव तद्ग्रहणं मन्यत इत्यदोष इत्यलं प्रसंगेनेति सप्त
विंशतिगाथार्थः ५३४ कतिविधः पुनर्निर्गमः षड्विध इत्याह नामं ठवणा दविए खेत्ते काले तहेव भावे य एसो उ निग्गमस्सा निक्खेवो छव्विहो हो
इ ॥ नामस्थापनानिर्गमौ नामावश्यकादिवत् क्षुण्णानुसारेण भावनीयौ द्रव्याद्द्रव्यस्य वा निर्गमः क्षेत्रात्क्षेत्रस्य वा कालात्कालस्य वा भा
वाद्भावस्य वा निर्गम इत्यादि वाच्यमिति निर्युक्तिगाथासंक्षेपार्थः ५३५ विस्तरार्थं तु भाष्यकारः प्राह दव्वाउ दव्वस्स व विणिग्गमो दव्व
निग्गमो सोय तिविहो सचित्ताइ तिविहाउ संभवो नेउं द्रव्याद्द्रव्यस्य वा निर्गमो द्रव्यनिर्गमः स च सचित्तादिद्रव्यसंबंधत्वात्सचित्ता
दित्रिविधस्तत्र सचित्तादेस्त्रिविधाद्वा सचित्तादेर्द्रव्यात् संभव उत्पादो ज्ञेय इति तथाहि पभवो सचित्ताउ भूमेरंकुरपयंगव फाइ
किमिगज्झसोणियाइ मीसाउ होसरीराउ किमिघुणघुणाइ दारुउ नं च निग्गयं न नो दव्वं विगप्प वसउ जह सज्झावो वयारेहिं ॥ सचि
त्ताद्भूमिद्रव्यात्सचित्तद्रव्यस्यांकुरस्य प्रभवो विनिर्गमो ज्ञातव्यः मिश्रस्य तु पतंगद्रव्यस्य तस्य हि पक्षादिप्रदेशो अचित्तः शेषं तु सचित्तमिति
मिश्रता अचित्तस्य तु वाष्य द्रव्यस्य तस्य हि पक्षादिप्रदेशो अचित्तः तदेवं सचित्तात्सचित्तादेस्त्रिविधस्य निर्गम इत्युक्तं अचित्तद्रव्या

दारुणकाष्ठात्सचित्त द्रव्यस्यांकुरस्य प्रभवो विनिर्गमो ज्ञातव्यः मिश्रस्य तु गण्डूद्रव्यस्य निर्गमः डिंभरूपस्य तद्गतकेशादीनामचित्त
त्वाच्छेषस्य तु सचित्तत्वान्मिश्रता अचित्तस्य तु शोणितद्रव्यस्य मिश्रात्सचित्तादेर्निर्गम इत्यपि भावितं तथा जं चेत्यादि यद्वा द्रव्यं यस्मा
द्रव्याद्विकल्पवशतो मानसकल्पनासमारोपाद्यथा सद्भावेन सद्भूतप्रकारेण उपचारेण वा निर्गतं सोपि द्रव्यान्निर्गमो द्रव्यनिर्गम
उच्यते तत्र यथा सद्भावेन विकल्पवशाद्यथा दुग्धादिद्रव्याद्घृतादिनिर्गमो न दृश्यत इति विकल्पनावशत इत्युच्यते दुग्धस्य च दधि
घृतादिभावेन परिणामिकारणता समीक्ष्यत इत्येतावता यथा सद्भावेनेत्यभिधीयते उपचारेण तु रूपकादिद्रव्याद्भोजनादेर्निर्गम इत्या
दि सर्वं यथासंभवं मन्यदपि स्वबुध्या स्वयमवकव्यमिति क्षेत्रनिर्गममाह खित्तस्स विनिग्गमणं सरूवउ नच्छि तं जमकिरियं खेत्ताउ स
तम्मि विहविघदवाइ निग्गमणं उवयारउ खित्तस्स निग्गमो लोग निरकुडाणंव लहुं विनिग्गयं विया जह खेत्तं राउलाउत्ति ॥ यथा द्रव्यस्या
पि क्वचित्कविकल्पनया निर्गम उच्यते न तु स्वरूपतः एवं क्षेत्रस्यापि स्वरूपेण कुतोपि निर्गमो नास्ति तस्याक्रियत्वेन तद्योगात्क्षेत्रा
त्पुनः निर्गमोस्ति यथा आयुःक्षयादिसमये उर्ध्वलोकादिक्षेत्रादिव नारकद्रव्यादेर्निर्गमः समस्तेव यथा लोकक्षेत्रान्निष्कुटानिर्गता
इति तेषां स्वरूपेणावस्थितानां निर्गमक्रियाभावेपि निर्गता इव निर्गता इति निर्गमोपचारः तथा लब्धं विनिर्गतं क्षेत्रं राजकुलान्निर्गतं
भरतादिक्षेत्रं वउ पमादि कालाद् भिक्षाशिवादेर्वा इत्यादीति कालनिर्गममाह कालो विहु धम्मो निकिरिउ न स निग्गमो पभवो तु
तो वियदवाउ पभवइ काले वजं जम्मि उवयारउ वसरउ विणिग्गउ निग्गउ यत चोहं अहवाउ कालाउ ॥ कालोपि वर्तनारूपो द्रव्यधर्म
एव स च स्वरूपेण निःक्रियो द्रव्यद्वारेणैव तत्क्रियाभावतो स्तस्य च तन एव स्वाश्रयभूताद्द्रव्यान्निर्गमः प्रभव उत्पत्तिः यद्वा हरिता
दिकं यस्मिन्वर्षादिके काले प्रभवत्युत्पद्यते स कालनिर्गम इति अथवा उपचारतोपि कालनिर्गमो यथा शारत्समयो सौ निर्गत आ
विर्भूतः ततो वा शारत्कालाद्धानिर्गतो निस्तीर्णोहं बालाद्यवस्थातो वा नरो निर्गत इत्याद्युपचारतः कालनिर्गम इति अथ भावनि
र्गममाह भावो विद्दव धम्मो तनो च्चिय तस्स निग्गमो पभवो दव्वस्स व भावाउ विणिग्गमो भाव उ वन्नाओ रूवाई योग्गलाउ कसायना
णाइउ य जीवाउ नित्तिपभवंति ते वा निहिंतो नच्चिउं गम्मि ॥ भावोपि कालद्रव्यधर्म एव तस्य च ततो द्रव्याद्यो निर्गमः प्रभवः

संभावनिर्गमः द्रव्यस्यवाभावानिर्गमोभावनिर्गमः कउच्चाह भावतोभावमाश्रित्य योद्रव्यस्यापगमो विनाशः इदमुक्तंभवति ।।यदा
द्रव्यंपूर्वपर्यायेणविनश्यति अपूर्वपर्यायेणउत्पद्यते तदापूर्वपर्यायात्मकतभावाद्द्रव्यस्यनिर्गमनाद्भावानिर्गमोभावनिर्गमइत्यु
च्यते तथारूपादयोभावाः पुद्गलद्रव्यात्कषायज्ञानादयश्चजीवानिर्गच्छंति प्रसवंतीतिभावानांनिर्गमोभावानिर्गमउच्यंते तेषांतेहिता
त्ति अथवानेपुद्गलजीवादयः पदार्थास्तेभ्योरूपादिभ्यः कषायादिभ्यश्चभावेभ्यस्तद्वियोगेभावेनभावविनाशेनिर्गच्छंतीतिभावेभ्यो
निर्गमोभावनिर्गमइत्युच्यतइति तदेयंविनेयमतिव्युत्पादनार्थमभिहितः षड्विधोनिर्गमइदानींप्रकृतेयावताप्रयोजनंतदुपदर्शयि
तुंप्रशस्तभावनिर्गमस्वरूपंतावद्दर्शयन्नाह तच्छपसत्थंमि छन्नाणाणविर इभावनिग्गमणं जीवस्ससंभवतिय जसंम्मत्तादउनुमो
तत्रानंतरोक्तेभावनिर्गमेप्रशस्तंरूपंनिर्गमनंकिमित्याह मिथ्यात्वाज्ञानाविरतिलक्षणादप्रशस्तभावान्निर्गमनंनिस्सरणंजी
वस्यकिमितीत्याह यद्यस्मात्संभवत्येव ततोमिथ्यात्वन्यप्रशस्तभावनिर्गमाज्जीवस्यमुक्तिपदप्राप्तिहेतवः सम्यक्त्वादयोगुणाइति
भावस्यैवंप्रस्तुतेकेनप्रयोजनमित्याह एत्थउपसत्थभावपस्स यमेत्तंविसेसउहिगयं अपसत्थावगमोविय सेसाविततंगभायाउ ।।
इहचप्रक्रमेसामायिकाध्ययनंप्रस्तुतं तच्चक्षायोपशमिकेभाववर्तते तदिहतस्यैवप्रकाशस्तस्यक्षायोपशमिकभावस्य याप्रस्तुनिर्ग
हावीरान्निर्गमरूपास्तैवविशेषतोधिकृतमधिकारस्तथाप्रशस्तमिथ्यात्वादिविषयोदयिकभावस्ययोपगमोविनाशस्तेनापिचाधि
कारस्तदपगमाभावेप्रशस्तभावप्रसूतेरेवायोगादिति शेषास्तुनिर्गमभेदास्तदंगभावेन प्रशस्तभावनिर्गमकारणतयाअनंतरंपारंपर्येण
वाकोपिकथंचिदुपयुज्यंतइतीहनिर्दिष्टाइति तदंगतेवद्रव्यादीनांदर्शयति वीरादथंखेत्तंमहसेणवणंपमाणकालोय भावोयभावपुरिसो समास
उनिग्गमंगाइं ।। यतोद्रव्यात्सामायिकंनिर्गतंतद्रव्यमत्रश्रीमन्महावीरोमंतव्योयश्चयस्मिन्क्षेत्रेतन्निर्गतंतदिहमहसेनवनंमंतव्यं कालस्त्वत्र २१४
प्रथमपौरुषीलक्षणः प्रमाणकालोभावस्तुभावपुरुषोवक्ष्यमाणलक्षणाएतानिसमासतः संक्षेपतः सामायिकस्यनिर्गमांगानीति एतदेव
दर्शयति सामाइयंवीराउ महसेणवणेपमाणकालेय भावपुरिसाहिभावो विणिग्गउवुरकमाणोय गतार्था नवरंश्रीमन्महावीरजीवलक्षणा
ज्ज्ञानकषायादयंवक्ष्यमाणविस्तरस्वरूपसामायिकलक्षणोभावोविनिर्गतः इहचक्षायोपशमिकेभाववर्तमानत्वात्सामायिकंभावइत्युक्तं

डाक्टर भाऊदाजीइत्यावरणसमर्पितम्
Dr BHAU DAJI

अथमहावीरलक्षणस्यद्रव्यस्यनिर्गमंतावदभिधित्सुराह इच्चेवमाइसव्वं दव्वाहीणंजउत्तिणस्सेव नानिग्गमणंचात्तुं वोच्छंसामाइयस्सतउ ।। इत्ये
वमादिकंक्षेत्रकालनिर्गमादिकंसामायिकाध्ययनावस्थकेऽकृतरक्षणवारादिकंवासर्वमपियतोयस्माद्द्रव्यस्यमहावीरलक्षणस्याधीनंततस्तस्यैव
महावीरलक्षणस्यद्रव्यस्यजिनस्यनिर्गमनमुक्त्वा ततः सामायिकस्यनिर्गमनंवक्ष्यदति ननुमहावीरजिनस्यापिनिर्गमनंकथंवक्तव्यमित्याह मि
च्छत्ताइतमाउ सनिग्गउजहयकेवलंपत्तो जहयपसत्यंततो सामाइयंतंपवरकामि तमिति तदेतत्संवक्ष्यामीति गाथापंचदशकार्थः १५०० इ
तउर्ध्वंपथंकिरदेसित्ताइत्यादिकासर्वापिनिर्गमवक्तव्यतासूत्रसिद्धैव यत्तुहउरवगमंतन्मूलावश्यकविवरणादवगंतव्यंतावत् यावत्प्रथम
गणधरवक्तव्यतायांभाष्यं जीवेतुहसंदेहोपच्चरकंजंनछिलोएखपुप्फंव आयुष्मन्निंद्रभूतेतवेषसंदेहः किमयमात्मा अस्तिनास्तिवा उ
भयहेतुसद्भावात् तत्रनास्तित्वहेतवोऽमीनास्त्यात्मा प्रत्यक्षेणात्यंतमग्रत्यमाणत्वा दिह यदत्यंताप्रत्यक्षंतल्लोकेनास्त्येव यथाखपुष्पं यच्चास्तितत्प्र
त्यक्षेणगृह्यतएव यथाघटइत्ययंव्यतिरेकदृष्टांतः अणवोपित्वप्रत्यक्षाः किंतुघटादिकार्यतयापरिणतास्तेप्रत्यक्षत्वमुपयांतिपुनरेवमा
त्माकदाचिदपिप्रत्यक्षतामुपगच्छत्यतोऽत्यंतविशेषणमिति एवंचमन्यसेत्वंकिमित्याह नयसोणुमाणगम्मोजम्हापच्चरकपुव्वयंतंपि
पुव्वोवलद्धसंबंधस्सयस्मरणंतस्मादिति इदमुक्तंभवति पूर्वंमहानसादावग्निधूमयोर्लिंगिलिंगिनोर्यः पूर्वंमहानसादौप्रत्यक्षादिनाउपलब्धः
कार्यकारणभावादिकः संबंधमनुस्मरतिनयथा यत्र२ धूमस्तत्र२ मागहंवन्हिमद्राक्षंयथामहानसादौधूमश्चात्रदृश्यतेतस्मादग्निनात्रा
ह भवितव्यमित्येवंलिंगग्रहणसंबंधस्मरणाभ्यांतत्प्रमाताहुतभुजमवगच्छतिनचैवमात्मनालिंगिनासार्द्धंकस्यापिलिंगस्यप्रत्यक्षेणसंबंधः
सिद्धोस्ति यतस्तत्संबंधमनुस्मरतः पुनस्तल्लिंगदर्शनाज्जीवेसंप्रत्ययः स्यादपिवनजीवलिंगयोः प्रत्यक्षतःसंबंधसिद्धिः स्यात्तदासाणाउ
जीवेसपच्चउहोज्जागतार्थोनववक्तव्यं सामान्यतोदृष्टादनुमानाहादित्यादिगतिवज्जीवः सिध्यति यथागतिमानादित्योदेशांतरप्राप्तिंग
तिपूर्विकांप्रत्यक्षेणैवनिश्चित्यस्तत्वेपितांतथैवप्रमाता साधयतीत्युक्तं नचैवमत्रक्वचिदपिदृष्टांतोजीवसत्त्वेनाविनाभूतः कोपिहेतुरध्यक्षे
णोपलक्ष्यतइत्यतोन सामान्यतोदृष्टादप्यनुमानात्प्रतीतिरिति नचागमगम्योपिजीवइतिदर्शयति नागमविगम्मोविनउ विषइदुर्नाग

मेोणुमाणाउे नइकासइ पच्चरको जीवोजस्सागमोवयणं नचागमगम्योपिन कोसोजीवो यस्मादागमोप्यनुमानान्नाभिद्यते परमार्थतस्तस्याप्यनुमा
नत्वान्तथाहि शाब्दंप्रमाणमागमउच्यते शब्दश्चाहि विधो दृष्टार्थविषयश्चतत्रदृष्टार्थविषयाछब्दाद्याप्रतीतिः साचसमूतानुमानमेव यतः क्वचित्प्र
थमं पृथुबुध्नोदरोर्धकुंडलोष्टायतवृत्त ग्रीवादिमतिघट पदार्थेघटशब्दं प्रयुज्यमानंदृष्ट्वानुनरंकालांतरेपिघट मानयेत्यादि शब्दं श्रुत्वा पृथुबुध्नोदरा
दिमर्थप्रथम उच्यते यथामुत्रपत्र पदार्थेघटशब्द प्रयोगमकरोति यथापूर्वंकुंभकारा पणादौघटशब्दश्चायमिदानीमपिश्रूयते तस्मात्तथा भूतस्यैवपृथु
बुध्नोदरादिमतः पदार्थस्यमयाआनयनादिक्रियाकर्तव्येत्यनुमानंविधायप्रमाता घटानयनादिक्रियांकरोतीत्येवं दृष्टार्थविषयं शाब्दंप्रमाणंवस्तु
तोनानुमानाद्भिद्यते नचैवमसावात्मा शब्दः शरीराद्रहितेन्यत्रप्रयुज्यमानः क्वचिदुपलब्धो यत्रस्वल्वात्मशब्दश्रवणादात्मेतिप्रत्ययोभवेदिति यद्यपिस्व
र्गनरकाद्यदृष्टार्थविषयंशाब्दंप्रमाणंस्वर्गनरकाद्यदृष्टार्थविषयंवचनं अविसंवादिवचनासप्रणीतत्वाच्चंद्रार्कोपरागादिवचनसप्रणीतत्वाच्चंद्रा
र्कोपरागादिवचनादित्येवमनुमानादेवतत्रप्रमाणतानचैवंभूतमात्मकमपि पश्यामो यस्यात्मा प्रत्यक्षइतितद्वचनमागमइतिमतिपद्येमही
तिशेषः किंच चोजंगमाविरुद्धा परोप्परउविसंसउजुत्तो सद्दप्पमाणविसयाईउजीवोत्तितोबुद्धी यतश्चतीर्थिकानांसंबंधिनः सर्वेप्यागमाः
परस्परविरोधिनः स्वल्पतोपिसंशयएवात्मनोयुक्तो नतुनिश्चयस्तथाहि केचिदागमा आत्मनोनास्तित्वमेवप्रतिपादयंति तद्यथानास्तिकाः
एतावानेवलोकोयंयावानिंद्रियगोचरः भद्रेवृकपदंपश्य यद्वदंत्यबहुश्रुताइत्यादि सद्योप्याह विज्ञानघनएवैतेभ्योभूतेभ्यः समुत्थायता
न्येवानुविनश्यति नप्रेत्यसंज्ञास्तिइत्यगनस्त्वाह नरूपंभिक्षवः पुद्गलाइत्यादि तस्मादागमानांपरस्परविरुद्धत्वान्नागमप्रमाणाद्प्यात्मसत्वसि
द्धिः इदंचवैशेषिकमतेनप्रत्यक्षानुमानागमलक्षणंप्रमाणत्रयमुपन्यस्तं एतच्चस्वयंद्रष्टव्यं उपमानप्रमाणगम्योपिजीवोनभवति तत्रहिय
थागौः नथागवयइत्यादावेवसादृश्यमसंनिकृष्टेर्थेबुद्धिमुत्पादयति नचेहान्यः कश्चित्त्रिभुवनेप्यात्मसदृशः पदार्थोस्तियद्दर्शनाद्आत्मानमव
गच्छामः कालाकाशदिगादयोजीवतुल्याविद्यंतइतिचेन्नतेषामपिविवादास्पदीभूतत्वेन तद्दृष्टिबद्धत्वादर्थापत्तिसाध्योपिजीवोनभवति न
हिदृष्टःश्रुतोवाकोप्यर्थ आत्मानमंतरेणोपपद्यते यद्बलात्तंसाधयामस्तस्मात्सर्वप्रमाणविषयातीतोजीवइतितद्बुद्धिःभावोपलंभकप्रमाण २३५
पंचकविषयातीतत्वात्प्रतिषेधसाधकभाव्यपंचमप्रमाणविषयइत्यएनजीवइत्यर्थः इतिपूर्वपक्षः अथैतत्प्रतिविधानमाह गोयमपच्चक्खोच्चिय जीवो

जमसंसयाइविन्नाणं पच्चक्खंचनसज्झं जहसुहदुक्खासदेहम्मि गौतमभवतोपिप्रत्यक्षएवायंजीवः किमन्येनप्रमाणांतरोपन्यासेन कोयं प्रत्यक्षएव
इतिचेदुच्यते यदेतत्तवैवसंशयादिविज्ञानंस्वसंवेदनसिद्धं हृदिस्फुरति सएवजीवः संशयादिज्ञानस्यैवतदनन्यत्वेनजीवत्वाद्यच्चप्रत्यक्षंत
न्नप्रमाणांतरेणसाध्यंयथास्वशरीरएवात्मसंवेदनसिद्धाः सुखदुःखादयः प्रत्यक्षसिद्धमपिसग्रामनगरंविश्वशून्यवादिनंप्रतिसाध्यतएवेतिप्र
तिचेन्नैवंनिरालंबनाः सर्वेप्रत्ययाःप्रत्ययत्वात्स्वप्नप्रत्ययवदित्यादिरस्तदुद्भावित बाधकप्रमाणस्यैव तत्रनिराकरणात्प्रस्तुतात्मग्राहकप्रत्यक्षेबाधक
प्रमाणाभावादिति इतश्चायंप्रत्यक्षोजीवः कुतइत्याह कयवंकरेमिकाहं चाहमहं पच्चयाइमाउय अप्पासप्पच्चरकोतिलकधोवपसाउ वाइत्य
थवाकृतवानहमकरोमि करोम्यहंकरिष्याम्यहं उक्तवानहं ब्रवीम्यहंवक्ष्याम्यहं ज्ञातवानहं जानेहंज्ञास्याम्यहमित्यादिप्रकारेण योयंत्रैकालिकः कार्य
व्यपदेशस्तद्विषयेप्रयुज्यमानतयात्मसमुच्छोयोयमहं प्रत्ययस्तस्मादपिप्रत्यक्षएवायमात्मेतिप्रपद्यतअयं त्यहंप्रत्ययोनानुमानिकोलिंगिकत्वा
न्नाप्यागमादिप्रमाणजन्यस्तदनभिज्ञानांबालगोपालादीनामप्यंतर्मुखतयाआत्मग्राहकत्वेनस्वसंविदितस्यत्यस्योत्पादाद्घटादौचानु
त्पादादिति अपिचकहपडिवण्णमहंतियकिमत्थिनत्थित्तिसंसउकह्णुसइसंसयंमिवायंकरसाहंपच्चनुमुत्तोहंतकथमसतिजीवेऽहमि
तिप्रतिपन्नस्तथाविषयाभावेविषयिणोनुत्थानप्रसंगादहएवास्यप्रत्ययस्यविषयइतिचेन्नजीवविप्रमुक्तेपिदेहेतदुत्पत्तिप्रसंगात्सतिचजीव
विषयेअस्मिन्नहंप्रत्ययेकिमहमस्मिन्नास्मीतिभवतःसंशयः केनप्रकारेणोपजायते अहंप्रत्ययग्राह्यस्यजीवस्यसद्भावादस्म्यहमितिनिश्चयएव
 युज्यतइतिभावः सतिचअस्मिन्नात्मास्तित्वसंशयेकस्यायमहंप्रत्ययोत्पत्तेनिर्मूलत्वेनतदनुत्थानप्रसंगादिति जीवाभावेसंशयविज्ञानमपिनयुज्यतएवेति
दर्शयन्नाह अहनत्थिसंसइच्चिय किमत्थिनत्थित्तिसंसउकस्स संसएयसरूवेगोयमयकिमसंसयंहोज्जा यदिसंशयीजीवएवांदौनास्तितर्ह्यस्तिनास्मी
तिसंशयः कस्यायंसंशयोहिविज्ञानाख्योगुणएव नचगुणिनमंतरेणगुणःसंभवति देहोस्यगुणीतिचेन्नदेहस्यमूर्तत्वाज्जडत्वाच्चज्ञानस्यचामूर्तत्वा
द्बोधरूपत्वाच्चनचाननुरूपाणांगुणिगुणभावोयुज्यते आकाशरूपादीनामपिनद्भावापत्त्याऽतिप्रसंगप्राप्तेः संसइएवेत्यादिवाइत्यथवासंशयितेस्वरू
पेगौतमकिमसंशयंशेषंभवेदित्युक्तंभवति किमस्मिहमित्येवंयःस्वरूपेतिसंशेतेआत्मनिश्चयोपियस्यानास्तीत्यर्थः तस्यशेषंकर्मबंधमोक्षा

दिकं घटपटादिकं च किमसंशय एव तस्य स्यादित्यर्थः आत्मास्तित्वनिश्चयमूलो हि शेषो वस्तुविषय इति भावः अहमत्र पञ्चात्मं च प्रत्यक्षमात्मानं नि
न्हुवानस्याश्रावणः शब्द इत्यादिवत् प्रत्यक्षविरुद्धो नाम पक्षाभासः स चावक्ष्यमाणात्मास्तित्वानुमानसद्भावाश्चित्यः शब्द इत्यादिवदनुमानविरुद्धो
पि न आह प्रत्यक्षसंशयोपि प्रागभ्युपगम्यानुत्तरत्र नास्मीति प्रतिजानानस्य सांख्यस्य अनित्यः कृतोपि चेतन आत्मेत्यादिवदभ्युपगमविरोधः
बालगोपालांगनादिप्रसिद्धं वात्मानं निराकुर्वतो चंद्रः शशीत्यादिवल्लोकविरोधः अहं नाहं चेति गदतो माता मे वंध्येत्यादिवत् स्ववचनव्याहतिः एवं
च प्रत्यक्षादिबाधिते स्मिन्पक्षेप्यपक्षधर्मतया हेतुरप्यसिद्धः हिमवत्पलपरिमाणादि पिशाचादिवच्च प्रमाणपंचकाभावस्य चानैकान्तिकं पि वक्ष्यमाणानु
मानप्रमाणसिद्धत्वात्मनि विपक्ष एव वृत्तेर्विरुद्धश्चेति प्रकारान्तरेणाप्यात्मनः प्रत्यक्षसिद्धतामाह गुणपच्चक्खत्तणउ गुणीवि जीवो घडोव्व पच्चक्ख
रको घडउ विघेप्पइ गुणी गुणामित्तग्रहणउ जह्वा प्रत्यक्ष एव गुणी जीवः स्मृतिजिज्ञासाचिकीर्षाजिगमिषासंशीत्यादि ज्ञानविशेषाणां तद्गुणा
नां स्वसंवेदनप्रत्यक्षसिद्धत्वादिह यस्य गुणाः प्रत्यक्षाः स प्रत्यक्षो दृष्टो यथा घटः प्रत्यक्षगुणश्च जीवस्तस्मात्प्रत्यक्षः यस्माद्धटोपि गुणी रूपादि
गुणप्रत्यक्षत्वादेव प्रत्यक्षस्तद्वदेहज्ञानादिगुणप्रत्यक्षत्वादात्मापीति आह अनैकान्तिकोयं यस्मादाकाशगुणः शब्दः प्रत्यक्षोस्ति पुनराकाशमिति
तदयुक्तं यतो नाकाशगुणः शब्दः किंतु पुद्गलगुणः ऐन्द्रियकत्वाद्रूपादिवदिति गुणानां प्रत्यक्षत्वे गुणिनस्तत्त्वं ननु वार्यते किमायातमिति चेदुच्यते
अण्णोनण्णो व तउ गहणाउ जीवम्मि कउ वियारोयं नणु भणतो गुणेभ्योनर्थान्तरं च गुणी तस्माद्गुणग्राहकप्रत्यक्षेण सोपि गृह्यत एवेति अथ गुणेभ्यो
न्योर्थान्तरभूत एव गुणीत एवं सति घटादयोपि न कुणिनो प्रत्यक्षास्तदर्थान्तरभूतस्य रूपादिगुणमात्रस्यैव ग्रहणादिह यदस्मादर्थान्तरभूतं ग्रहणेपि
नेतस्य ग्रहणं यथा घटे गृहीते पटस्य अर्थान्तरभूताश्च गुणिनो गुणा इष्यन्ते अतो गुणग्रहणेपि न गुणिग्रहणमतो घटादीनामपि समानेग्रहणदोषे
कोयं नाम भवतः केवले जीवविचारे नास्तित्वविवक्षाभ्युपेयते यच्चरकं जनंदीसइ घडो वेत्यादि अथ द्रव्यविरहिताः केपि न संत्येव गुणा इति तत्
स्तद्ग्रहणद्वारेण गृह्यन्त एव घटादयो न त्वेवं तदात्मन्यपि समानमेव किं च गुणिनो गुणानामर्थान्तरत्वे अभ्युपगम्यमाने गुणी भवतु मा गृह्यतां प्रत्य २१६
क्षस्तथापि ज्ञानादिगुणेभ्यः पृथगात्मा गुणी तदभ्युपगमेनापि सिद्धस्येवेति अत्र पराभिप्रायमाशंकमानः प्राह अहमन्नमि अत्थि गुणी न
य देहत्थंतरत्तउ किंतु देहे नाणाइगुणा सो च्चिय ताणं गुणीजुत्तो अथ मन्यसे अस्त्येव ज्ञानादिगुणानां गुणीनिवर्तं प्रत्याचक्ष्महे एतन्नाभ्युप

गतमेव यद्देहादर्थान्तरं तको सौ इति किंतु देह एव ज्ञानादयो गुणाः समुपलभ्यन्ते अतः स एव तेषां गुणी युक्तो यथा रूपादीनां घटः प्रयोगो देहगुणा एव
ज्ञानादयस्तत्रैवोपलभ्यमानत्वाद्गौरकृशस्थूलतादिवदिति अत्रोत्तरमाह नाणाइउ नदेहस्स मुत्तिमत्तइवं घमस्सेव तह्या नाणाइगुणा जस्स दे
हाहिउ जीवो प्रयोगो देहस्य संबंधिनो ज्ञानादिगुणा न भवन्त्येव तस्य मूर्तिमत्त्वाच्चाक्षुषत्वाद्वा घटवन्न च द्रव्यरहिता गुणाः समस्ति ततो यो ज्ञाना
दिगुणानां प्रत्यक्षेणैव ग्रहणात्तदयुक्तं अनुमानबाधितत्वात्तस्य प्रत्यक्षस्य तथाहि इन्द्रियातिरिक्तो विज्ञाता तदुपरमे पि पूर्वोपलब्धमर्थमनुस्मरति
स तस्मादर्थान्तरं दृष्टो यथा पंचवातायनोपलब्धार्थानुस्मर्ता देवदत्त इत्यादि वायुभूतिप्रश्ने वक्ष्याम इति उपसंजिहीर्षुराह इहतु देहेसेणायं य
चरको सच्चह्माम हं जीवो अविहयनाणत्तणउ तुह विन्नाणं वयमिवया इत्येवमुक्तप्रकारेण स्वशरीरे तावापि देशतः प्रत्यक्षो पमात्मा वत्स त्वं
श्च प्रत्यक्षेण साक्षाद्देशमेकं गृण्हाति प्रत्यक्षेण च प्रदीपादिप्रकाशेनैवदेशतः प्रकाशिता अपि घटादयो व्यवहारतः प्रत्यक्षा उच्यन्ते एवं सर्वात्म
ना च केवली प्रत्यक्षमिव करतलप्रकाश पश्यति अप्रतिहतानन्तज्ञानत्वेन सर्वात्मनापि प्रत्यक्षोयं जीवो यथातीन्द्रियमपि त्वत्संशयविज्ञानमिति भतिप
द्यस्वेति परशरीरेतर्हि कथमित्याह एवं चिय परदेहेणुमाणउ गिण्ह जीवमत्थित्ति अणुवित्तिनिवित्तिउ विण्णाणमयं सरूवेव यथा त्वद्देहे एवं परदेहे
पि गृहाण जीवमनुमानेन कथमित्याह अस्ति विद्यत इति कथंभूतं जीवमित्याह विज्ञानमयं विज्ञानात्मकं अनुमानमेव स्पष्टयन्नाह अणुवित्तिनिवि
त्तीउ सरूवे व त्तिइ इदमुक्तं भवति परशरीरेप्यस्ति जीवः इष्टानिष्टयोः प्रवृत्तिनिवृत्ती दृश्येते तत्सात्मकं दृष्टं यथा स्वशरीरं तथा च प्रवृत्तिनिवृत्ती दृश्येते
तत्सात्मकं दृष्टं यथा स्वशरीरं तथा च प्रवृत्तिर्दृश्यते परशरीरे तस्मादपि सात्मकं आत्माभावे चेष्टानिष्टप्रवृत्तिनिवृत्ती न भवतो यथा घट इत्यनुमानात्पर
शरीरे जीवसिद्धिः अत्र परमतमाशंक्योत्तरमाह जं च न लिंगेहिं समं मन्नसि लिंगिपुरा जउ गहिउ संगं ससेण व समं नालिंगउ तो णुमेउसो सोणेयंतो
जह्मा लिंगेहिं समं न दिट्ठपुव्वो वि गहलिंगदरिसणाउ गहो णुमेउ सरीरंमि यच्च मन्यसे जीवलिंगैः संबंध दर्शनाभाद इत्यादि पूर्वोक्त पूर्वपक्षानुसारेण म
न्यसे त्वं किमित्याह न तो न लिंगतो लिंगादनुमेयो सो जीवो यतः किमित्याह ॥ यतो नास्ति खलु लिंगैः कैश्चिदपि समं लिंगी जीवः कापि केनापि पुरा पूर्वं
गृहीतः किंवदित्याह शृंगमिव शशकेन समं ततो मे वा लिंगलिंगिनोः पूर्वसंबंधाग्रहणान्न लिंगाज्जीवोनुमीयत इति यन्मन्यसे त्वं तत्र प्रतिविधीयते ॥
सोनैकान्तः यस्माल्लिंगैः समं अदृष्टपूर्वोपि ग्रहादेवयो निःशेष शरीरे हसनगानरोदनकरचरणभ्रूविक्षेपादिविकृतग्रहलिंगदर्शनादनु

मीयत इति बाह्यानामपि प्रतीतमेवेति अनुमानान्तरमप्यात्मसाधकमाह देहस्यास्ति विहाया पइनिययागारउ घडस्सेव अक्खाणं च करणउ दंडाईणं कु
लालोव देहस्यास्ति विधाता कर्त्ता प्रतिज्ञा आदिमत्प्रतिनियताकारत्वात् घटवत् यत्पुनरकर्तृकं तदादिप्रतिनियताकारमपि न भवति यथाभ्रविकारः यश्च देहस्य कर्ता
स जीवः प्रतिनियताकारत्वं मेर्वादीनामप्यस्ति न च तेषां कश्चिद्विधाता इतीतरेणैकान्तिको हेतुः स्यादतो नुक्तमप्यादिमत्त्वविशेषणं द्रष्टव्यमिति तथा आत्मा प्राणामि
न्द्रियाणामस्त्यधिष्ठाता इत्यध्याहारः करणत्वात् यथा चक्रचीवरमृत्सूत्रदण्डादीनां कुलालः यच्च निरधिष्ठातृकं तत्करणमपि न भवति यथा आकाशं यश्चेन्द्रिया
णामधिष्ठाता स जीव इति तथा अस्तीन्द्रियविषयाणामादाता इति प्रयोगे वस्त्रं कस्मारदृष्टान्तो संडासए सलोहाणं इह यत्र दानादेयभावस्तत्रावश्यमा
दातास्ति यथा लोके संदंशकलोहानां कर्मारोयस्कारः विद्यते चेन्द्रियविषयाणामादानादेयभावो ततस्तेषामप्यस्त्यादाता स च जीवः यत्र त्वादाता ना
स्ति तत्रादानादेयभावोपि न विद्यते यथा आकाश इति तथा भोत्ता देहाईणं तोज्जत्तणउ नरोव भत्तस्स संघायायत्तणउ अत्थिय अत्थि परत्थोवइह देहादी
नां भोक्तास्ति भोग्यत्वात् शाल्यादितण्डुलवस्त्रादीनां नरः यस्य तु भोक्ता नास्ति तद्भोग्यमपि न भवति यथा खरविषाणं भोग्यं च शरीरादिकं त
तो विद्यमानभोक्तृकमिति तथा अर्थी स्वामी तत्र देहादीनां विद्यते स्वामी संघातरूपत्वात् गृहादिवत् मूर्तिमत्त्वादीन्द्रियकत्वाच्चाक्षुषकत्वादित्या
दयोप्यनेकान्तिकतापरिहारार्थं संभवद्धिह विशेषणाहेतवो योजनीयाः अथ गृहादीनां सूत्रधारादयः इति दृष्टान्तः यस्तु न स्वामिकं न संघाता
दिरूपमपि भवति यथा गगनकुसुमं संघातादिरूपं च देहादिकं तस्माद्विद्यमानस्वामिकमिति आह ननु देहस्यास्ति विहायाइत्यादिना शरीरादीनां कु
लादयः सिद्ध्यंति न तु प्रस्तुतो जीव इत्याशंक्योत्तरं क्षेपपरिहारौ चाह जो कत्ताइ स जीवो सज्झविरुद्धोत्ति ते मइ होज्जा मुत्ताइपसंगाउ न न्नो संसारिणो
होसो यश्चायमनन्तरं देहेन्द्रियादीनां कर्ता अधिष्ठाता आदाता भोक्ता अर्थी चोक्तः स सर्वोपि जीव एव अन्यस्येश्वरादेरयुक्तक्षमत्वेन कर्तृत्वाद्यसंभवादि
ति अथ साध्यविरुद्धसाधकत्वाद्विरुद्धा एते हेतव इति तव मतिर्भवेत् तथाहि घटादीनां कर्तारो दृष्टाः कुलालादयो मूर्तिमन्तः संघातरूपा अनित्यादि
स्वभावाश्च दृष्टा इत्यतो जीवोप्येवंविध एव सिध्यतीति तद्विपरीतश्च किलास्माकं साधयितुमिष्टः स्यादेषोयं सत्यमुक्तं कर्मपुद्गलसंघातोपगूढत्वात्से
शरीरत्वाच्च कथंचिन्मूर्तत्वादिधर्मयुक्त एवेति भावः अपरमप्यात्मसाधकमनुमानमाह अत्थि च्चिय ते जीवो संसयउ सोम्म थाणुपुरिसेव्व जं
संदिद्धं गोयम तत्थ वत्थि ध्रुवं हे सौम्य गौतम अस्त्येव तव जीवः संशयतः संशयसद्भावाद्यत्र संशयस्तदस्ति यथा स्थाणुपुरुषौ संशयश्च
तव जीवे तस्मादस्त्येवायं तथाहि स्थाणुपुरुषयोरूर्ध्वतारोहपरिणाहादुभयसाधारणधर्मप्रत्यक्षतायां चलनशिरःकण्डूयनवयोनि

लयनवल्ल्यारोहणाद्युभयगतविशेषधर्माप्रत्यक्षतायां चोभयगतेतद्धर्मानुस्मरणे चास्यैकतरविशेषनिश्चयचिकीर्षोः किमिदमिति विमर्शरूपः संशयः प्रादुर
स्ति एवंभूते च स्थाणुपुरुषादिगतसंशये न तत्स्थाणुपुरुषादिकं वस्त्वस्त्येव अवस्तुनि संशयायोगादेवमात्मशरीरयोरपि युपलब्धसामान्यविशेषधर्म
स्य ममरजुत्वयोः सामान्यधर्मप्रत्यक्षतायां विशेषधर्माप्रत्यक्षत्वेपि च तद्विषयानुस्मृतौ सत्यामेकतरविशेषोपलिप्सोः किमयमात्मा किंवा शरीरमात्र
मिदमिति विमर्शरूपः संशयः प्रादुरस्ति एवंभूते च स्थाणुपुरुषादिगतसंशयो जायते अयं चात्माशरीरयोः सत्त्व एवोपपद्यते नैकतरस्याप्यभावे ऽतोस्ति
जीवः अथैवं ब्रूषे ऽरण्यादिषु स्थाणुपुरुषसंशये तत्र विवक्षितप्रदेशे नयोरेकतरस्य एव भवतीति तदयुक्तमभिप्रायापरिज्ञानात् न हि वयमेवं ब्रूमस्तत्रैव प्र
देशे न तु तयमप्यस्तीति किंतु यद्गतसंदेहः तद्वस्तु तत्रान्यत्र वा प्रदेशे ध्रुवमस्त्येव अन्यथा यष्टत्वतविपर्ययोपि संशयः स्यादेतदेवाह जं संदिद्धमित्यादि
तस्मात्संशयविषयत्वादस्त्येव जीव इति स्थितं अथ पूर्वपक्षमाशंक्य परिहरन्नाह एवं नाम विसाणं खरस्स पत्तं न्न तं खरे चेव अन्नत्थ तदत्थि च्चिय
एवं विवरीयगाहे तिहं तत्र यदि यत्र संशयस्तेनावश्यमेव भवितव्यं एवं ततः खरविषाणमप्यस्तीति प्राप्तं तत्रापि कस्यचित्संशयसद्भावादुच्यते न
न्वभिहितमत्र यत्तत्रान्यत्र वा विद्यमानएव वस्तुनि संशयो भवत्येवेति न कश्चिद्व्यभिचारः एवं विवरीयगाहे वित्ति इदमुक्तं भवति यदा विपर्य
स्तः कश्चित्स्थाणौ पुरुष एवायमित्यादि विपरीतग्रहं करोतीति तदाप्यायमेवार्थो योवाच्यः सोपि विपरीतग्रहो विपरीते पुरुषादिके वस्तुनि सत्येवोपपद्य
ते नाविद्यमान इत्यर्थः एवं सर्वाभिप्रायेण योस्मादृशां शरीरे आत्मास्तित्वाभिमानो नायमात्मनः सर्वथा नास्तित्वे युज्यत इति इतोप्यस्ति जीव इत्युत्तर
त्याह ॥ अत्थि अजीव विवक्खो पडिसेहाउ घडोघडस्सेव नत्थि घडोत्ति व जीवत्थित्तपरो नत्थि सद्दोयं अत्र प्रयोगः प्रतिपक्षवानयमजीवो ऽत्र व्युत्पत्तिमच्छु
द्धपदप्रतिषेधाद्यत्र व्युत्पत्तिमतः शुद्धपदस्य प्रतिषेधो दृश्यते स प्रतिपक्षवान् दृष्टो यथा घटो घटप्रतिपक्षवान् अत्राघटप्रयोगे शुद्धस्य व्युत्पत्तिमत
श्च पदस्य प्रतिषेधोभावयं घटलक्षणप्रतिपक्षेण भवितव्यं यस्तु न प्रतिपक्षवान् न तत्र शुद्धस्य व्युत्पत्तिमतश्च पदस्य प्रतिषेधो यथा अखरविषा
णं अडित्थ इत्यादि अखरविषाणमित्यत्र खरविषाणलक्षणस्याशुद्धस्य सामासिकपदस्य प्रतिषेध इत्यतोत्र खरस्य विषाणं खरविषाणमित्यादि
व्युत्पत्तिमत्त्वे सत्यपि खरविषाणलक्षणो विपक्षो नास्ति अडित्थ इत्यत्र तु व्युत्पत्तिरहितस्य डित्थपदस्य प्रतिषेध इति समासरहितत्वेन शुद्धत्वे
सत्यपि नावश्यं भवत्यिनो डित्थलक्षणः कोपि पदार्थो जीववादिपक्षभूतोस्तीति नत्थि घडोत्ति चेत्यादिना स्याभिमतिं च यो यमात्मनिषेधध्वनिः स

जीवास्थित्वेनांतरीयक एव यथा नास्त्यत्र घट इति शब्देऽन्यत्र घटोऽस्ति तावितानाभ्युपगमयोगोयस्य निषेधः क्रियमाणो दृश्यते तत्कथं चिदस्त्येव यथा घटादिकं
निषिध्यते च भवता नास्ति जीव इति वचनाज्जीवस्तस्मान्निषेध एव यत्न तत्त्वसाधक इति अनैकांतिकोयं हेतुरसतोपि खरविषाणादेर्निषेधदर्शनादित्याशंक्या
ह असंउ नत्थि निसेहो संजोगाइ पडिसेहउ सिद्धं संजोगाइ चउक्कंपि सिद्धमछंतरे नियय असतो अविद्यमानस्य नास्ति निसमवस्यैव निषेध इति सिद्धंकु
तइत्याह संयोगादिप्रतिषेधादादिशब्दात्समवाय सामान्यविशेषपरिग्रहः एतदुक्तं भवति इह यत्किंचित्क्वचिद्देवदत्तादिकं निषिध्यते तस्यान्यत्र
सत एव विवक्षितस्थाने कस्मिंश्चित्संयोग समवाय सामान्य विशेषलक्षणं चतुष्टयमेव निषिध्यते न तु सर्वथैव देवदत्तादेरभावः प्रतिपाद्यते तत्र नास्ति
गृहे देवदत्त इत्यादिषु घटप्रमाणता मात्र गृहदेवदत्तादीनां सतामेव संयोगमात्रं निषिध्यते न तु तेषां सर्वथैवास्तित्वमपाक्रियते तथा नास्ति खरविषा
णमित्यादिषु खरविषाणादीनां सतामेव समवायमात्रं निराक्रियते तथा नास्त्यन्यश्चंद्रमा इत्यादिषु विद्यमानस्यैव चंद्रमसोऽन्यचंद्रनिषेधाच्चंद्र सामा
न्यमात्रं निषिध्यते न तु सर्वथा चंद्राभावः प्रतिपाद्यते तथा न संति घटप्रमाणा मुक्ता इत्यादिषु घटप्रमाणतामात्ररूपो विशेषो मुक्तानां निषिध्यते न तु मु
क्ताभावः ख्याप्यत इति एवं च सति नास्त्यात्मेत्यत्र विद्यमानस्यैवात्मनो यत्र क्वचन येन केनचित्सह संयोगमात्रमेवत्वया निषिद्धं यथा नास्त्यात्मा
वपुषीत्यादि न तु सर्वथात्मनः सत्वमिति अत्राह कश्चित् ॥ ननु यदि यन्निषिध्यते तदस्ति तर्हि मच्चिलोकेश्वरताप्यस्ति युष्मदादिभिर्निषिध्यमानत्वात्तथा
चतुर्णां समवायादिप्रतिषेधानां पंचमोपि प्रतिषेधप्रकारोस्ति त्वयैव निषिध्यमानत्वादत्रोच्यते ॥ त्रिलोकेश्वरतादिरेष मात्रं भवतो निषिध्यते
यथा घटप्रमाणत्वं मुक्तानां न तु सर्वथैश्वरता त्वशिष्यादिश्वरतायास्तत्रापि विद्यमानत्वात्तथा प्रतिषेधस्यापि पंचसंख्याविशिष्टत्वमपाक्रियते न तु स
र्वथा प्रतिषेधस्याभावः श्वतुःसंख्याविशिष्टस्य तस्य सद्भावान्न तु सर्वमप्यसद्भूमिदं तथाहि मत्त्रिलोकेश्वरत्वं तावदेव संदेहं निषिध्यते प्रतिषेध
स्यापि पंचसंख्याविशिष्टत्वमविद्यमानमेवानिवार्यते तथा संयोग समवाय सामान्य विशेषाणामपि गृहदेवदत्तखरविषाणादिष्व सतामेव प्रति
षेध इत्यसतां यन्निषिध्यते तदस्त्येवेत्येतत्कथं न भवत इत्याशंक्याह संजोगाइ चउक्कंपीत्यादि इदमुक्तं भवति ॥ देवदत्तादीनां संयोगादयो गृहादिषि
वासतोपि निषिध्यंते अर्थांतरेषु तु ते विद्यंत एव तथाहि गृहेण सह देवदत्तस्य संयोगो न विद्यते अर्थांतरेण तु क्षेत्रादिना सह तस्यासौ
समस्त्येव गृहस्यापि देवदत्तेन सह संयोगो नास्ति पट्टादिना तु सह तस्यासौ विद्यत एव एवं विषाणस्यापि खरे एव समवायो नास्ति गवादावस्त्येव
सामान्यमपि द्वितीयचंद्राभावाद् एवं नास्त्यर्थांतरेषु घटगवादावस्त्येव घटप्रमाणत्वमपि मुक्तासु नास्त्यर्थांतरेषु कूष्मांडादावस्त्येव त्रिलोके
श्वरतापि भवन एव नास्ति तीर्थकरादावस्त्येव पंचसंख्याविशिष्टत्वमपि प्रतिषेधे नास्त्यर्थांतरेषु कूष्मांडादावस्त्येव त्रिलोकेश्वरतापि भवद्व २१८

त्यनुत्तरविमानादावस्त्येव त्यनया विवक्षया भ्रमो यन्निषिध्यते तत्सामान्येनास्त्येव न त्वेवं प्रतिज्ञा वीमहे यद्यन्निषिध्यति तत्तत्रैवास्तीति येन व्यभि
चारः स्यादयमपि शरीरे जीवो निषेध्यमानोन्यत्रेति चेत्साधूक्तं अस्मत्सामीहितस्य सिध्यत्वाज्जीवसिध्यर्थमेव हि यत्नो मदेवयं स चेत्सिद्धं
तर्हि नास्तिद्धमन्यथानुपपत्तेरेव तदाश्रयः सेत्स्यति किं तया चिंतया न च शरीरमंतरेण जीवस्याश्रयोंतरमुपपद्यते तत्रैव तद्वस्थानलिंगोपलब्धे
र्न च वक्तव्यं शरीरमेव जीवो जीवति मृते न च्छिन्न इत्यादिव्यवस्थानुपपत्तेरित्यादेरभिधास्यमानत्वादिति जीवसिद्धावेवोपपत्त्यंतरमाह जीवो ६
त्ति सच्छयमिणं सुद्धत्तणउ घडाभिहाणं व जेणच्छेण सच्छं सो जीवो अहमईउच्चा अच्छो देहो त्ति यसत्तन्नो पज्जायवयणभेयाउ नाणाइगुणाय
जउ भणिउ जीवो न देहो त्ति जीव इत्येतद्वचनं सार्थकमिति प्रतिज्ञा व्युत्पत्तिमत्वे सति शुद्धपदत्वादिह व्युत्पत्तिमत्वे शुद्धपदं तदर्थवद् दृष्टं य
था घटादिकं तथा च जीवपदं तस्मात्सार्थकं यत्तु सार्थकं न भवति न तद्व्युत्पत्तिमन्न शुद्धपदं च न भवति यथा डित्थादिकं खरविषाणादिकं च न च तथा
जीवपदं तस्मात्सार्थकं व्युत्पत्तिमन्न भवति न शुद्धपदमपि सन्न सार्थकं यथा डित्थादिपदमिति हेतोरनेकांतिकतापरिहारार्थं व्युत्पत्तिमत्वविशे
षणं द्रष्टव्यं यदपि शुद्धपदं न भवति किंतु सामायिकं तदपि व्युत्पत्तिमत्वमेव सत्यपि सार्थकं न भवति यथा खरविषाणादिकमिति शुद्धत्वविशे
षणं अथ मन्यसे ॥ देह एवास्य जीवपदस्यार्थो न पुनरर्थांतरं उक्तं च ॥ देह एवायमनुप्रयुज्यमानो दृष्टो यथैष जीव एनं न हिनस्तीत्यतो देहे
एवास्यार्थो युक्त इति तदेतन्न कुत इत्याह ॥ देहजीवयोः पर्यायवचनभेदाद्यत्र हि पर्यायवचनभेदस्तत्रान्यत्वं दृष्टं यथा घटाकाशयोस्तत्र घटकुट
कुंभकलशादयो घटस्य पर्याया नभो व्योमांतरिक्षाकाशादयस्त्वाकाशपर्यायाः प्रस्तुते च जीवो जंतुरसुमान्प्राणी सत्वो भूत इत्यादयस्तत्र घटकुट
कुंभकलशादयो जीवपर्यायाः शरीरं वपुः कायो देहः कलेवरमित्यादयस्तु शरीरपर्यायाः पर्यायवचनभेदेपि चवस्त्वेकत्वे सर्वैकत्वप्रसंगोऽत्र बाध
कं यत्पुनरिदमुक्तं ॥ देह एवायमनुप्रयुज्यमानो दृष्ट इत्यादि तच्छरीरसहचरणावस्थानादितः शरीरे जीवोपचारः क्रियते किं चेत्थमपि श्रूय
त एव नातः स जीवो दृश्यतामिदं शरीरमिति किं च नाणाईत्यादि ॥ यस्माज्ज्ञानादिगुणयुतो जंतुर्जउ इत्थं देहस्तत्कथं देह एव जीवः शरीरे चोक्तं ज्ञाना
दिगुणो देहो मूर्तिमत्वात्पटवत्तस्माद्देहेंद्रियातिरिक्त आत्मा तद्गत परमेपि तद्गतवस्त्वर्थानामनुस्मरणाद्वातायनपुरुषवदिति तदेयाप्य प्रतिबुध्य
मानेऽद्रभूतौ भगवानाह जीवोत्थि वउ सच्चं मम वयणाउ व सेस वयणं व सव्वण्णु वयणउ वा अणुमयसव्वण्णुवयणं व जीवोस्तीत्येतद्वचः स
त्यं मद्वचनत्वाद्भवत्संशयविषयावशेषवचनवत् यच्चासत्यं न भवति तन्मदीयवचनमपि न भवति यथा कूटसाक्षिवचनं अथवा सत्यं जी

जीवोस्तीतिवचनं सर्वज्ञवचनत्वाद्भवदनुमतसर्वज्ञवचनवदिति यदिवा भयरागदोसमोहा भावाउ सच्चमणइवाईच सच्चंचियमेवयणं जाण
यमइत्थवयणंव ॥ सर्वमपि मद्वचनं सत्यमनतिपातिचबोधव्यं भयरागद्वेषाज्ञानरहितत्वादिहयद्भयादिरहितस्यवचनंतत्सत्यंदृष्टं यथामार्ग
ज्ञस्यभयरहितस्यप्रष्टुरिरागद्वेषरहितस्य मार्गोपदेशवचनंतथाचमद्वचस्तस्मात्सत्यमनतिपातिचेति अथाग्निभूतिगौतममाशंक्य भगवानुत्तर
माह ॥ कहसव्वण्णुत्तिमई जेणाहंसव्वसंसयच्छेदी पुच्छसुवूजंनजाणासि जेणवतेपच्चउहोज्जा कथंनामत्वंसर्वज्ञइतितेमतिरेवत्वमन्यसे तथा
भयरागद्वेषमोहाभावसिद्धइतिमन्यसे तद्युक्तं येनाहंसर्वसंशयच्छेदीयश्चसर्वसंशयच्छेत्तासर्वज्ञ इतितेमतिरेवत्वं एवदृष्टांताभावेनान्व
यासिद्धरनेकांतिकोयहेतुरितिचेत्तन्नसर्वसंशयछेत्तृत्वानुपपत्तिरेवहविपर्ययबाधकंप्रमाणं किमिहान्यपावेषणेनयदिवाप्रच्छमायत्रैलोक्या
नर्थंतवस्तुत्वंनजानासि येनसर्वज्ञप्रत्ययस्तेवजायते अभावाभावोपित्तल्लिंगादर्शनात्मयिसिद्धएवेतिस्वयमेवद्रष्टव्यं कदाचिदपिलिंगादर्शनेलि
गनोस्तित्वशंकयामतिप्रसंगइति अथोपसंहरन्नाह एवमुवउगलिंगंगोयमसव्वप्पमाणसंसिद्धं संसारीयरथावरतसाइभेयंमुणेजीवं एवमु
क्तेनप्रकारेणजीवमात्मानंगौतममुणप्रतिपद्यस्वेतिसंबंधः कथंभूतमुपयोगएवलिंगंयस्य सतथासर्वैःप्रत्यक्षानुमानागमप्रमाणैःसंसिद्धंप्रति
ष्ठितं तथासंसारीतरस्थावरत्रसादिभेदंसंसारिणश्चेतरेसिद्धाः आदिशब्दाच्चसूक्ष्मबादरपर्याप्तापर्याप्तादिभेदपरिग्रहइति अत्रैवसंतव
दीप्राह ननुबहुभेदत्वमात्मनोसिद्धं तस्यसर्वत्रैकत्वात्तदुक्तं एकएवहिभूतात्माभूतेभूतेव्यवस्थितः एकधाबहुधाचैवदृश्यतेजलचंद्रवत् यथा
विशुद्धमाकाशंतिमिरोपप्लुतोजनः संकीर्णमिवमात्राभिर्भिन्नाभिरभिमन्यते तथेदममलंब्रह्मनिर्विकल्पमविद्यया कलुषत्वमिवापन्नं भेद
रूपंप्रकाशते उर्द्धमूलमधःशाखमश्वत्थंप्राहुरव्ययं छंदांसियस्यपर्णानियस्तंवेदसवेदवित्तथा पुरुषएवेदंग्निंसर्वंयद्भूतंयच्चभव्यं उतामृत
त्वस्येशानोयदन्नेनातिरोहति यदेजतियन्नैजति यद्दूरेयदंतिके यदंतरस्यसर्वस्ययत्सर्वस्यास्यबाह्यतइत्यादि इत्येतदेवपूर्वार्धेनोत्क्षि
प्योत्तरार्धेनपरिहरन्नाह जइपुणसोएगोच्चिय यहवंचवोमंव सव्वपिंडेसुगोयमतदेगलिंगंपिंडेसुतहानजीवोयंपरःप्राह ॥ यदिपुनर्दर्शि
तन्यायेनसआत्मासर्वव्यापिनारकतिर्यङ्नरामरपिंडेषुमूर्तिविशेषेषुस्थितएकलिंगंवैसदृश्याभावादेकरूपमेवेतियुक्तं तस्यैकत्वंजीवस्त्व
यंविचार्यत्वेनप्रक्रांतोनतथानेकलिंगःसर्वत्रदृश्यतेमतिपिंडंतस्यविलक्षणभेदेनचलक्ष्यभेदादिनतस्यैकत्वमिति अथप्रयोगमाह ना

नाणाजीवाकुंभा दयोवउभुविलरक्कणाइभेयाउ सुहदुरकवंधमोरकाभावोयतदेगंत्ते ॥ नानारूपाभुविजीवाःपरस्परंभावलइत्यर्थः लक्ष
णादिभेदादितिहेतुः कुंभादयइवेतिदृष्टांतः यद्यन्नभिन्नं तस्यलक्षणभेदो यथानभसइति सुखदुःखबंधमोक्षाभावश्चयस्मात्तस्मात्तदेक
त्वेतस्माद्भिन्नाएवसर्वेपिजीवाइतिकथंपुनस्तेषांप्रतिपिंडंलक्षणभेदइत्याह जेणोवउगलिंगोजीवोभिन्नोयसोपइसरीरं उवउगोउक्करिसा
वगरिसोउ तेणतेणंभा येनज्ञानदर्शनोपलक्षणोसौजीवःसचोपयोगःप्रतिशरीरमुत्कर्षापकर्षभेदादनंतभेदएवेति तदेवं
भावितंनाणाजीवाइत्यादिपूर्वार्धमिदानींसुखदुःखेत्यादिकंतरार्धंभावयन्नाह एगत्तेसव्वगयत्तउनमोरकादउनभसेव कत्ताभोत्तामंता
नयसंसारीजहागासं एकत्वेजीवानांसुखदुःखबंधमोक्षादयोनोपपद्यंते सर्वगतत्वान्नभसइवयद्यत्रतुसुखादयोनतत्सर्वगतंयथात्रिवह
नइतिकिंच नकर्तानभोक्तानमंतासंसारीजीवः एकत्वात्सर्वजीवानांयद्येकंनतस्यकर्तृत्वादयोयथानभसइति अपिच एगत्तेनत्थिसु
हीबहुवघाउत्तिदेसनिरुउच्च बहुतरबद्धत्तणउ नयमुक्कोदेसमुक्कोव इहमत्रहृदयंनारकतिर्यगादयोनंताजीवानानाविधशरीरमान
सोयथानेकेखिलाएवतहनंतभागवतिनस्तुसुखिनःएवमनंताबद्धास्तदनंतभागवर्तिनस्तुमुक्तास्तेषांचसर्वेषामेकत्वेनकोपिसुखीप्रा
प्नोति पुरुतरोपघातात्विनत्वाद्यथासर्वांगरोगग्रस्तोगुल्मैकदेशेननीरोगोयज्ञदत्तः एवनकोपिमुक्तस्तसरवघटते बहुतरबद्धत्वाद्य
थासर्वांगकीलितोगुल्मैकदेशमुक्तस्तस्मादेकत्वेसुखाद्यनुपपत्तेर्नानात्वंजीवानामितिस्थितं भवतुतर्हिजीवानांनानात्वंकिंत्वेकैकोजीवः
सर्वजगद्व्यापकोअपास्तितिनैय्यायिकादिमतमपाकुर्वन्नाह जीवोतणुमित्तत्थो जहकुंभोतग्गुणोवलंभाउ अहवणुवलंभाउ भिन्नंमि घ
डपडस्सेव तनुमात्रस्थोजीवइतिप्रतिज्ञा तत्रैवतद्गुणोपलब्धेःयथाघटःस्वात्ममात्रेइतिशेषः अहवेत्यादि ॥ अथवा योयत्रप्रमाणैर्नो
पलभ्यते तस्यातत्राभावएवयथाभिन्नेघटेपटस्यनोपलभ्यतेचशरीराद्बहिर्जीवस्तस्मात्तस्यतत्राभावएवेतिउपसंहरन्नाह तन्नाकत्ता
भोत्तावंधोमुरकोसुहंचदुरकंच संसरणंचबहुत्ता सव्वगयत्तेसुजिनाइं तस्माद्बहुत्वात्सर्वगतत्वयोरेवसतोःकर्तृत्वादयोधर्माजीवस्ययुक्तं
न आत्मप्रत्यक्षविधिप्रमाणसिद्धं जीवंप्रतिपद्यस्वेति अथविज्ञानघनएवैतेभ्यो भूतेभ्यःसमुत्थायतान्येवानुविनश्यतिनप्रेत्यसंज्ञास्ती
त्यादिवेदवाक्यार्थमनुस्मृत्य यत्तस्यजातोयिममसंशयोभिविराधितोहितद्वचप्रष्टेनमुंचतिनत्किंकरोमीतिचेन्नदयुक्तंपुनरित्याहगोयम
वेयपयाणंइमाणअत्थंचतंनयाणासि जंविन्नाणघणोच्चिय भूएहितोसमुट्ठाया मन्नसिमद्यंगेसुवमयभावोत्तयसमुदग्गुद्धे

विणाणमेत्तमायाए एणुविणस्सइ सप्पुईं अच्छिनयपेच्च सन्ना अंपुव्व भवेहिन्नाणमघुगोत्ति गोतमेत्या मंत्रणं वेदपदानांश्रुतिवाक्यानाममीषां वि
ज्ञानघन एवैतेभ्य इत्यादीनां चेतसि वर्तमानानामर्थं यथास्थितं त्वं न जानासि नाववुध्यसे किमित्यत आह यद्यस्मात् मात्मक्षित्रायेण चोद्भूतमि
हार्थं मन्यसे विकल्पयसीति संबंधः कथंभूतमित्याह विणाणघणो वियत्ति पृथिव्यादिभूतानां विज्ञानलवसमुदायो विज्ञानघनः पृथिव्यादि
विज्ञानांशानामपि उइत्यर्थः अवधारणं त्वात्मवादिपरिकल्पितत स्य भूतसमुदायातिरिक्तस्य ज्ञानदर्शनादिगुणाश्रयस्यात्मनो निरासार्थं भू
तेभ्यः पृथिव्यादिभ्यः समुदितेभ्यो न तु व्यस्तेभ्यो ज्ञानस्य तत्समुदायपरिणामांगीकारादिति भावः मद्यांगेषु मद कारणेषु धातक्यादिषु मदश
वइव कथंभूतो विज्ञानघन इत्याह भूयसमुइउ जविणाणमेत्तमायत्ति भूतसमुदायाडुद्भूतस्तेदेव जातो न तु परभवात् कश्चिदायातो विज्ञा
नरूपमात्र आत्मेत्यर्थः समुत्थायोत्पद्य ततस्तान्येव पृथिव्यादिभूतानि विनाशमनुयातोऽनु लक्षीकृत्य भूयः पुनरपि स विज्ञानघनोऽपि
नरूपमात्र आत्मा विनश्यति नत्वात्मवादिना मिवान्यभवं यामिअनएव न प्रेत्य भवे परभवे संज्ञास्ति यत्पूर्वभवे नारकादिजन्मन्यभिधान
ज्ञान मात्ररूप आत्मा विनश्यति नत्वात्मवादिनामिवान्यभवं यामि अनएव न प्रेत्य ... नारकादेः प्रागेव सर्वथैव नानष्टत्वात्कदिति भावः॥
मासीत्तत्परभवे नास्ति यदुतासुकोनारको देवो वा भूत्वाइदानीं मनुष्यः संवृत्त इत्यादि नारकादेः प्रागेव सर्वथैवाना नष्टत्वात्कदिति भावः॥
किमिह वाक्ये तात्पर्यवृत्त्या मोक्तं भवतीत्याह जं भणियमित्यादि सर्वथात्मनः समुत्पद्य विनष्टत्वान्न भवाद्भवांतरं कोपियातीत्युक्तं भवति य
किमिह वाक्ये तात्पर्यवृत्त्या प्रोक्तं भवतीत्याह जंभणियमित्यादि। गोयमपयच्छएवं मन्नंतोनत्थि मन्नसेजीवं चवकंतरे क्रयपुणोभणिउजीवो
ज्ञेवं भूतमस्य वेदवाक्यस्यार्थमहमवगच्छामि ततः किमित्याह। गौतमपयच्छमेवं मन्यतोनास्ति मन्नसे जीवं चवकंतरे क्रयपुणोभणिउजीवो
जं भछिति अग्निहवणाइकिरिया फलं च तो संसयं कुण सिजीवो मा कुरु नपयच्छो यं इमंपयच्छन्निसामेहिं गोतमस्य वाक्यस्य दर्शितरूपमे
वपदार्थं मन्यमानस्त्वं नास्त्येवं जीवं मन्यसे यस्माच्च पुनर्नहवैसशरीरस्य प्रियाप्रिययोरपहतिरस्त्यशरीरं वावसंतं प्रियाप्रियेनस्पृ
शत इत्यादिषु वेदवाक्यांतरेष्वस्तीत्येवं जीवो भणितः प्रतिपादितः तथाग्निहोत्रं जुहुयात्स्वर्गकाम इत्यादिवचनादग्निहवनादिक्रियायाः
फलं च पारभविकं श्रूयते न चेदं भवांतरयायिनमात्मानमंतरेणोपपद्यते ततः किं जीवोस्ति नास्ति वेत्येवं संशयं जीवकरोषित्वं न हमुं माक
थाः यस्माद्विज्ञानघन एवैत्यादिवाक्यस्य नायमर्थो यं भवानध्यवस्यति किं त्वमुं वक्ष्यमाणं पदार्थमिह निशामयाकर्णयेति तमेव दर्शयति

MEMORIAL
[illegible]

विणाणाउणणो विणाणघणोत्ति सव्वसोवावि सम्भवइहामूएहिंतो घडविणाणाइ भावेणभाइ चियधपाई सोणुविणस्सइ विणस्समाणाइ अत्थंतरोवउगे कमसोविणयभावेणं
इह विज्ञानघनो जीव उच्यते विशिष्टं ज्ञानं विज्ञानं ज्ञानदर्शनोपयोग इत्यर्थः तेन विज्ञानेन महानन्यभूतत्वादेकतया घनत्वं निविडत्वं मापन्नो विज्ञानघनो जीवः एव
कारेण तु विज्ञानघन एवासौ न तु नैयायिकादीनामिव स्वरूपेण निर्विज्ञानत्वाज्जडोसौ बुद्ध्यादि क्ततत्र समवेतं चेतनमिति नियम्यते स भवत्कृतः घन इति क्रियाकेभ्य इत्याह भूएहिं
तोत्ति॥ भूतानीह घटपटादिज्ञेयवस्तुरूपाण्यभिप्रेतानि तेभ्यो ज्ञेयभावेन परिणतेभ्यः के न भवतीत्याह घटोयं पटोयमित्यादि विज्ञानभावेन घटादिज्ञानपर्या
येण ततः किमित्याशंक्य तादेवानुविनश्यतीति। अस्यार्थमाह ताइं चिएत्यादि तान्येव ज्ञानालंबनभूतानि घटादिभूतानि क्रमशः कालक्रमेण व्यवधानस्यग
तान्यमनस्कत्वादिना र्थांतरोपयोगसति विज्ञेयभूतेभ्यो जीवः समुत्थायकालक्रमाद्व्यवधानादिनार्थांतरोपयोगसति ज्ञेयभावेन तान्येवानुविनाशमानुयाता
न्यनुविनश्यतीति नार्थर्थः किमिच्छं सर्वथायमात्मा विनश्यति नेत्याह पुव्वा वरविणाणा वउगउ विगमसंभवं सहावो विण्णाणसंतइए विण्णाणघणा
यमविणासी एकस्वायमात्मा त्रिस्वभावः कथमित्युच्येत अर्थांतरोपयोगकाले पूर्वविज्ञानोपयोगेन भावदयं विगमस्वभावो विनश्वररूपः अपरविज्ञा
नोपयोगेन तु संभवस्वभाव उत्पादरूपः अनादिकालप्रवृत्तसामान्यविज्ञानमात्रसंतत्यापुनरयं विज्ञानघनो जीवो विनष्ट एवावतिष्ठते एवमोन्यदपि सर्वव
स्त्वन्याद्यन्यव्ययध्रौव्यस्वभावमेवावगंतव्यं नपुनः किमपि सर्वथोत्पद्यते विनश्यतिचेति नप्रेत्य संज्ञास्तीत्येन व्याचिख्यासुराह नचयेच्चनाणस
न्नो वतिउ एसंपउववउगाउ विण्णाणघणाभिरको जीवोयं वयपयभिहिउ नचप्रेत्येति नचान्यवस्तूपयोगकाले प्राक्तनी ज्ञानसंज्ञास्ति कुतः सांप्रतवस्तु
विषयोपयोगादिसंयुक्तं भवति यदा घटोपयोगा निवृत्तो पटोपयोग उत्पद्यते तदा घटोपयोगसंज्ञा नास्ति तदुपयोगस्य निरुद्धत्वात् किंतु पटोपयोगसंज्ञै
वास्ति तदुपयोगस्यैव तदानीमुत्पन्नत्वात् तस्माद्विज्ञानघनाख्यो वेदपदेष्वभिहितो यं जीव स्ततो गौतम प्रतिपद्यस्वैनमिति पुनरपि हमेयमाशंक्यं परिह
रन्नाह एवंपिद्धयंधम्मा नाणंतप्पाव भावउ बुद्धी तन्नो तदभावंमिवि जं नाणं वेयसमयंमि अत्थमिए आइच्चे चंदे संतासु अग्गीवायासु किंजोय
इ रयंपुरिसो अप्पज्जोइ इतिनिद्दिट्ठो बुद्धीतिस्याद्बुद्धिः प्रेरकस्यैव मपि सप्पवइ भूएहिंतो इत्यादिना युष्मद्व्याख्यानप्रकारेणापीत्यर्थः पृथिव्यादि
भूतज्ञानं भूतस्वभावात्मकं एव ज्ञानमिति भावः कुत इत्याह सब्भावभावउत्ति एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीति वचनाद्भूतस
द्भावे ज्ञानं स्यभावात्तदभावेचाभावादित्यर्थः यस्य च भावएव यद्भवत्यभावे च न भवति तत्तस्यैव धर्मोयथा चंद्रमसश्चंद्रिकाप्रकाशश्च ज्ञानमनुविधा
ति नतु सामान्यं ज्ञानमात्रं यस्माद्भूताभावेपि वेदलक्षणसमये सिद्धं निसामान्यज्ञानं भणितमेवेति शेषः केनवाक्येनेत्याह अत्थमिए इत्यादि

अस्तमिते आदित्ये याज्ञवल्क्ये चन्द्रमस्यस्तमिते शांतेग्नौ शांतायां वाचि किंज्योतिरेवायंपुरुषः आत्मज्योतिः सम्राडिति होवाचज्योतिरितिज्ञानमाह आदि
त्यास्तमयादौ किंज्योतिरित्याह अयंपुरुषइति पुरुषआत्मेत्यर्थः अथचकभूतइत्याह अप्पधोइति आत्मैवज्योतिरस्य सोयमात्मज्योतिः ज्ञानात्मकइतिहृ
दयं निर्दिष्टोहविद्भिः कथितस्ततोज्ञानं भूतधर्मइत्यर्थः अयंचकथंभूतइत्याह अप्पधोइत्ति आत्मैवज्योतिरस्य सोयमात्मज्योतिः मयोद्दोकिंज्योति
रित्याह अयंपुरुषइति पुरुषआत्मेत्यर्थः अयंचकथंभूतइत्याह अप्पधोइति आत्मैवज्योतिरस्य सोयमात्मज्योतिः ज्ञानात्मकइतिहृदयंनिर्दिष्टोवेदवि
द्भिः कथितस्ततोज्ञानंभूतधर्मइत्यर्थः इतश्चनज्ञानंभूतधर्मः कुतइत्याह तदभावेविभावाउ भावेवाभावउनतधम्मो जहघडभावाभावे विवधयाउपडो
सिन्नो नभूतधर्मोज्ञानंमुक्तावस्थायांभूतभावेपिभावात्मृतशरीरादौतद्भावेपिचाभावाद्यथा घटस्यधर्मः पटोनभवति किंतुतस्माद्भिन्नएव कुतइ
त्याह अच्छोकिंहो घटभावाभावे विपर्ययात्घटभावेप्यभावात्तदभावेपिचाभावाद्यथा घटस्यधर्मः पटोनभवति तदेवंकेषांचिद्वेदपदानामर्थव्या
ख्याय सांप्रतमुपसंहरन् सर्वेषांचवेदपदानां संक्षेपतोर्थमुपदर्शयन्नाह एसिंवेयपयाणंनतमत्थंवियासि अहवसव्वेसिं अत्थोकिंहुघस्सई वि
णाणंवत्थु भेउवा जाईदव्वंकिरिया गुणोहवासंसउ तवाभुत्तो अयमेविनिवायं नवत्थधम्मोजउजुत्तो सव्वंचियसव्वमयं सपरप्पजायउजउनिय
यं सव्वमसव्वमयंपिय विचित्तरूवं विसरकाउ सामण्णविससमउ तेणपयच्चोविसरूवो याजुत्तो सव्वंचियसव्वमयं वत्थुसविसरूवो पयायावेर
कृयासव्वो ॥ तस्मादेषांपूर्वोक्तानांवेदपदानांयथामयाव्याख्यातोऽर्थस्तथात्वंनवेत्सिवनजीवेसंशयंकरोषि अथवासर्वेषामप्यशेषवेदपदानाम
र्थत्वंनजानासि यस्मात्सर्वेष्वपि वेदपदेषुविषयेतवेवंभूतः संशयोस्तीतिसंबंधः कथंभूतइत्याह अच्छोकिंहोघस्सइत्यादि किमेतेषांवेदपदानामम
र्थः श्रुतिः शब्दोभवेद्यथाभेरीपटहढक्कादीनां शब्दस्यशब्दएवार्थः अथवायथघटादिशब्दे समुच्चारितेनदभिधेयार्थविषयंविज्ञानमत्रनदृश्यते
नत्वेषामर्थः किंवाघटशब्दे समुत्कीर्तितेपृथुबुध्नोदराद्याकारवान्घटलक्षणोर्थोतिनोक्तोनतुपटादिरित्येवंयोवस्तुभेदः प्रतीपसेसएषामर्थः यदिवाकिं
जातिरमीषामर्थोयथागोशब्दे समुच्चारितेगोजातिरवसीयते यदिवाकिंद्रव्यमेषामर्थोयथादंडीत्यादिषुदंडादिमद्द्रव्यं किंधावतीत्यादिनामिवधावनादिक्रिया
अमीषामर्थः अथवाकिंशुक्लादिगुणएतेषामर्थइति अयंचसंशयस्तवायुक्तोयस्मात्स्यमेवनैववायुमित्येवंकस्यापिवस्तुनोधर्मोवधारयितुंनयुक्तः शब्दोपि
घस्तुदोषएवतनएवंभूतस्यैवार्थस्याप्यभिधायकोनेत्ववाइत्थंभूतस्यार्थस्यायंप्रतिपादकइत्येवमेतद्धर्मस्याप्यवधारणवयुक्तमेवकुतइत्याह ॥ सव्वंचि
येत्यादि यस्मात्सर्वमपिवाच्यवाचकादिकंवस्तु नियतंनिश्चितं स्वपरपर्यायैः सर्वात्मकमेव सामान्यविवक्षयेत्यर्थः विशेषविवक्षयातुनियतरूपमित्यर्थः)

तस्मात्सर्वेषामपिपदानां विवक्षावशात् सामान्यमयोविशेषमयश्चपदार्थोपुनः पुनरेकांतेनेत्थंभूतएव अनित्थंभूतएवेतिकुतइत्याह ॥ वत्थुसेत्यादि य
स्मात्सर्वोपिवाच्यस्यवाचकस्यवावस्तुनः स्वभावः पर्यायापेक्षया योयत्रदेशादौ यस्यार्थस्यवाचकयस्यार्थस्यवाचकतयारूढः सतस्यवाचकोद्र
ष्टव्यः सामान्यविवक्षयातुसर्वः सर्ववाचकः सर्वंचसर्वस्य वाच्यमित्यनयादिशासकलंस्वधियाभावनीयमिति तदेवंतेनत्रिजगत्स्वरूपवेदि
नाभगवताश्रीमन्महावीरेणनिःशेषपरप्रबोधनोपायकुशलतयातीक्ष्णपरशुनेवनिपुणयुक्तिप्रबंधेनगुपिलवल्लीवितानइवमूलाच्छिन्नः
समग्रोपितस्यतत्समासन्नपरमकल्याणस्येद्भूतः संशयः तस्मिंश्चछिन्ने किमसौकृतवानित्याह छिन्नंमिसंसयंमी जिणेणजरमरणविप्प
मुक्केणं सोसमणोपव्वइउ पंचहिंसहखंडियसएहिं सप्रबोधानवरंश्राम्यतीतिश्रमणः सन्नसौपापात्त्यजितः प्रव्रजितोभगवतोदीक्षांप्रतिपन्नइत्य
र्थः संयतः संयतोभवति नासंयतइतिनिश्चयनयमताश्रयणाच्चत्थमुक्तमितीहभावार्थः खंडिकास्तुछात्राइति अथवक्ष्यमाणेषुकर्मादिषुदससु
वादस्थानेषुयदिहतुल्यंतद्ग्रंथलाघवार्थमतिदिशन्नाह एवंकम्माइसुवि जंसामण्णंतयंसमाउच्चं जोपुणजत्थविसेसो समासउत्तंपवक्खामि
एवंयदिहात्मवादप्रक्रमेप्रत्यक्षानुमानागमप्रमाणवक्तव्यतादिकंवक्ष्यमाणंकर्मादिवादस्थानकेः किमपितुल्यतत्सधियातत्रतत्रायोजनीयं य
त्रयत्रवादस्थानकेविशेषस्तत्रतत्रसंक्षेपतः स्वयमेववक्ष्यामीतिसमस्तगाथार्थः ५७ ॥ इतिप्रथमगणधरवादःसमाप्तः अथद्वितीयगणधरवक्त
व्यतामभिधित्सुराह तंपव्वइयंसोउंबीओ आगच्छइ अमरिसेणं वच्चामिणमाणेमी पराजिणित्ताणतंसमणं तमिंद्रभूतिंप्रव्रजितंश्रुत्वाद्वितीयोग्निभू
तिनामातत्सोदर्यबंधुरारंतरेमर्षेणाकुलितचेताः समागच्छति भगवत्समीपंकेनाभिप्रायेणेत्याह वज्जामिणमितिवाक्यालंकारेआनयामितं भ्रात
रमिंद्रभूतिंनन्दवितथ्येनेत्ययमपिवाक्यालंकारेतंश्रमणमिंद्रजालिकंकमपिपराजित्येति पुनरपिकिंचिंतयन्नसावागतइत्याह छलिउ छला
इणासो मन्नेमाइंदजालिउवावि कोजाणइकहवत्तं पत्ताहवदमाणीसे ॥ दुर्जयस्त्रिभुवनस्यापि मद्भ्राताइंद्रभूतिः केवलमहमिदंमन्येछलादिना
छलितो सोतेनधूर्तेनछलजातिनिग्रहस्थानग्रहणनिपुणेनतेनकेनापिदुष्टेनमामातमहंधुरित्यर्थः अथवामायेंद्रजालिकः कोपिनिश्चितः सोयेनत
स्यापिजगद्गुरोर्मम्भ्रातुर्भ्रामितंचेतस्तस्मात्किंबहुनाकोजानातितद्वादस्थानकंतयोस्तत्र कथमपिवृत्तंमत्परोक्षत्वादितिऊर्ध्वंपुनर्मीपितत्रगतेत
स्यतदिंद्रजालव्यतिकरस्तमितमानसरवचरनरामरव्रातवंदनमात्रवृंहितचेतसः श्रमणकस्यवद्भाणिनियाकाचिद्वार्तावर्तमानावाभविष्य
तितावदस्त्ययंसमग्रोपिलोकइतिकिंचिंतनेनआगच्छता प्रोक्तमित्याह सोपरकंतरमेगंपि आइजइमेतउमितस्सय सीसेहोहंगउ चोतुंपन्नाजिण

सगासंकोजाणाति नावादिइ्मूति स्तेन कथमपितत्रनिर्जितोममपुनरपिएकमपिपक्षांतरंपक्षविशेषंसयदिवात्यबबुध्यते माहिहितस्यसंहेनूदाहरणस्य
पक्षविशेषस्यसयधुनरमहानेनकथमपि पक्षांतरंपक्षविशेषंसयदियात्यबबुध्यते सयधुनरमहानेनकथमपिपारंगछतीतिहृदयं ततोमीतिवा
क्यालंकारे तस्यैवश्रमणत्वेस्यशिष्यत्वेन गतोहं भवेयमिति निश्चिपस्तनइत्यादि थागर्जिकृत्वाजिनस्यश्रीमन्महावीरस्यांतिकेभगइति ततःकिं
मित्याह आभठाय जिणेणं जाइजरामरणविप्पमुक्केणं नामेणाय गोत्तेणाय सव्वण्णूसव्वदरिसीणं आभाषितश्चसलस्त्रजातिजरामरणविप्रमुक्तेन
सर्वज्ञेन सर्वदर्शिनाच जिनेन कथं नाम्नाचहे अग्निभूते गोत्रेणचहे गौतमस गोत्र इति इत्थंचनामगोत्राभ्यांसंलप्तस्य तस्यचिंतामूद्होनामापिम
मविज्ञानात्यथवाजगत्प्रसिद्धोहं कः किलमांनवेत्ति यदिहिमेहृद्गतं संशयंज्ञास्यत्यपनेष्यतिवातदाभवेन्ममविस्मय इतिचिंतयति तस्मिन्भगवा
नामाह किमन्नेअत्थिकम्मं उयाहुनत्थित्ति संसउतुज्झं वेयपयाण यअत्थं नयाणसीतेसिमोअत्थो हे अग्निभूते गौतम त्वमेतन्मन्यसे चिंतयसि यदु
तभिन्नेमिथ्यात्वादिहेतुसमन्वितेनजीवेनेति कर्म्मज्ञानावरणादिकं तत्किमस्तिनास्तिवेति नन्वयमनुचितस्तवसंशयः आयं हि भवतोविरुद्धवेदप
दनिबंधनोवर्तते तेषांचवेदपदानांत्वमर्थंनजानासि तेनसंशयंकरोषि तेषांचवेदपदानामयंवक्ष्यमाणलक्षणोऽर्थ इति अत्रभाष्यं कम्मेतुहसंदेहो
मन्नसितंनाणगोयराईयंतुहतमणुमाण साहणमितितदेवानुमानमाह मण्णसि इमं पफलं जस्सहे आयुष्मन्नग्निभूते ज्ञानावरणादिपरमाणु
संघातरूपे कर्मणि नवसंदेहोयतः प्रत्यक्षानुमानादिसमस्तप्रमाणात्मकज्ञानगोचरातीतमेवतदत्वंमन्यसे तथाहि ॥ नतावत्प्रत्यक्षं कर्म अतींद्रिय
त्वात्खरविषाणवदित्यादि प्रमाणविषयातीतत्वं भावज्जीवस्यैवकर्मणोपिसमानमायत्वात् भावनीयमिति तदेतत्सौम्य मामंस्थास्त्वं यतोममता
वत्प्रत्यक्षमेव कर्म्मतवाप्यनुमानंसाधनं यस्यतदेतनुमानंसाधनंवर्तते तत्कर्म नपुनःसर्वप्रमाणगोचरातीतं यस्य किमित्याह अणुभूइमयं फलं ज
स्सत्ति सुखदुःखानामनुभूतिरनुभवनं तन्मनयतत्मत्मकंफलंयस्यशुभाशुभकर्म्मणइति अनेनवेदमनुमानंसूचितं अस्तिसुखदुःखानि
भवस्यहेतुःकार्यत्वादंकुरस्येवेति अथयदिभवतःप्रत्यक्षंकर्मतर्हिममापितत्प्रत्यक्षंकस्मान्नभवतीति चेत्तदयुक्तं नहियदेकस्यकस्यचित्प्रत्य
क्षं तेनापरस्यापिप्रत्यक्षेणभवितव्यं नहिसिंहसरभसादयःसर्वस्यापिलोकस्यप्रत्यक्षानचतेनसंतिबालादीनामपितत्सर्वस्यप्रसिद्धत्वात्तस्मा
दस्तिकर्म सर्वज्ञत्वेनमयाप्रत्यक्षीकृतत्वाद्भवत्संशयविज्ञानवदिति नचवक्तव्यं त्वयिसर्वज्ञत्वंनप्रत्यसिद्धंकइहसर्वसंसयछेदी पुच्छसुवर्जंनथाण
सीत्यादिनाप्रागेव मतिविहितत्वात्कार्यप्रत्यक्षंतयाभवतोपिचप्रत्यक्षमेव कर्म यथा घटादिकार्यप्रत्यक्षतयापरमाणवइति यदुक्तं तुहतमणुमाणसा

हणमिति तदेवानुमानमाह अत्थिसुहदुहकेहेउ कज्जाउबीयमंकुरस्सेव सोदिट्ठोचेवमई वभिचाराउनतंजुत्तं जोतुल्लसाहणाणं फलेविसेसोनसोविणाहेउं।
कज्जत्तणउगोयम घडोव्वहेऊ यसोकम्मंप्रतिपाणिप्रसिद्धयोः सुखदुःखयोर्हेतुरस्तिकार्यत्वादंकुरस्येव बीजमिति यश्चेह सुखदुःखयोर्हेतुस्तत्कर्मेत्यस्ति
तदिति यन्मतिः स्रक्चंदनांगनादयः सुखस्यहेतवोदुःखस्यतुविषकंटकादयइति दृष्टएवसुखदुःखयोर्हेतुरस्ति किमदृष्टस्यकर्मणस्तद्धेतुत्वकल्प
नेन नहि दृष्टपरिहारेणादृष्टकल्पनासंगतत्वमावहत्यतिप्रसंगात्तदयुक्तंव्यभिचारात्तथाहि॥ जोतुल्येत्यादि॥ १५०००॥ इहयस्तुल्यसाधनयोरिष्टशब्दा
दिविषयसुखसाधनसमेतयोरनिष्टार्थसाधनसंप्रयुक्तयोर्द्वयोर्बहूनांवाफले सुखदुःखानुभवनलक्षणविशेषस्तारतम्यरूपोदृश्यते नासौअदृ
ष्टकिमपिहेतुमंतरेणोपपद्यते कार्यत्वाद्घटवद्यश्च तत्र विशेषाध्ययकोदृष्टहेतुस्तद्धेतुःकर्मेतिप्रतिपद्यस्वेति अनुमानांतरमपिकर्मसाधनायाह
बालसरीरंदेहंतरपुव्वं इंदियाइमत्ताउ जहबालदेहपुव्वो जुवदेहोपुव्वमिह कम्मं॥ शरीरांतरपूर्वकमाद्यंबालशरीरं इंद्रियादिमत्वाद्युवशरीरवदिति
आदिशब्दात्सुखदुःखित्वप्राणापाननिमेषोन्मेषजीवनादिमत्वान्यपिहेतवोद्रष्टव्याः नचजन्मांतरातीतशरीरपूर्वकमेवेति शक्यतेवक्तुं तस्याप्य
यांतरालगतावसत्वेन तत्पूर्वकत्वानुपपत्तेः नचाशरीरिणोनियतगर्भदेशस्थानप्राप्तिपूर्वकःशरीरग्रहोयुज्यते नियामककारणाभावात्नापिस्वभा
वोनियामकस्तस्यनिराकरिष्यमाणत्वात्यश्चेह बालशरीरस्य पूर्वंशरीरांतरंतत्कर्मेतिमंतव्यं कर्म्मणंशरीरमित्यर्थः जोएण कम्मएणं आहारेई अणंत
रंजीवो इत्यादिवचनादिति अनुमानांतरमपिकर्मसिद्धयेत्याह किरियाफलभावाउ दाणाइणं फलं किसीएव तंचियदाणाइफलं मणप्पसायाइजइबुद्धी
किरियासामण्णाउ जंफलमस्सावितंमयंकम्मं तस्सपरिणामरूवं सुहदुक्खफलंजउभुज्जो दीणाइणंफलंति इहदानादिक्रियाणां फलभावात्फलसद्भा
वदर्शनादित्यर्थः यथाकृषिक्रियायाइहयाचेतनारब्धापिनभवति यथापरमाण्वादिक्रिया सचेतनारब्धाश्च दानादिक्रियास्तस्मात्फलवत्यः यच्च
तासांफलंतत्कर्मयातुनिःफलाक्रियासासचेतनारब्धापि नभवति स्याद्दानादिक्रियास्तस्मात्फलवत्यःस्यादितदनैकांतिकोयंहेतुश्चेतनारब्धा
नामपि कासांचित्कृष्यादिक्रियाणांनिःफलत्वदर्शनात्तदयुक्तं फलत्वाभिप्रायेणैवतदारंभाद्यत्तु कुचिन्निःफलत्वमपिदृश्यते तत्सम्यग्ज्ञाना
द्यभावेनसामग्रीवैकल्याद्द्रष्टव्यं मनःप्रसादादिसामग्रीविकलतयादानादिक्रियाअपिनिःफला इष्यंतएवेत्यदोषः यदिचानपरस्यैवंभूताबु
द्धिः स्यात्कथंभूतइत्याह तंचियेत्यादि तदेवदानादिक्रियाणां फलंयदस्माद्दृशामपिप्रत्यक्षं मनःप्रसादादिदृष्टमुक्तंभवति॥ कृष्यादिक्रियाःदृष्ट
धान्यादयवाप्तिफलादृष्टाः अतोदानादिक्रियाणामपिदृष्टमेव मनःप्रसादादिकं फलं भविष्यति किमदृष्टकर्मलक्षणफलसाधनेनेतद्दृष्टवि

विरुद्धसाधनाद्विरुद्धोयंहेतुः तर्ह्यत्रवयंब्रूम किरियासामणाउ इत्यादिअस्यापिमनः प्रसादस्ययसर्वं तन्ममकर्म्मसम्मतं ननुमनः प्रसादस्यापि
कथंफलमभिधीयत इत्याह किरियासामाणाउत्ति इदमुक्तंभवति मनःप्रसादोपिक्रियारूपएव ततश्चयथादानकृष्यादिकाःक्रियाः फलभव
न्त्यस्तथाक्रियासाम्यात्मनःप्रसादस्यापिफलेन भवितव्यमेव यच्चतस्यफलंतत्कर्म्मैवेति नाकश्चिद्व्यभिचारः यतःकर्म्मणः सकाशात्किमित्याह
सुखदुःखफलंजउत्ति सुखदुःखरूपंफलं सुखदुःखफलंयतो यस्मात्कर्म्मणः सकाशाज्जायते कथंभूतः पुनरपि कथंभूतंयत्सुखदुःखफल
मित्याह ॥तस्यैवकर्म्मणः कारणमुक्तासज्जनत्वेन परिणमनंपरिणामस्तद्रूपमिति एतदुक्तंभवति॥यतः कर्म्मणः सकाशाज्जायते कथंभूतः पु
नरपि कथंभूतंयत्सुखदुःखफलमित्याह यतःकर्म्मणः सकाशात्निक्षणंतत्परिणतिरूपंसुखदुःखफलंप्राणिनांसमुपजायते तत्कर्म्मनःप्रसा
दक्रियाया अपिफलमभिहितं आहनुन्वनंतरगाथायां दानादिक्रियाफलंकर्म्मोक्तंइदानींदानादिक्रियैवकर्म्मणःकारणमुक्ता अत्रतुमनःप्रसाद
क्रियातत्कारणमुच्यतइति कथंनपूर्वापरविरोधइति सत्यं किंतुमनःप्रसादादिक्रियैवानंतर्येण कर्म्मणः कारणंकेवलंतस्याअपिमनःप्रसादादिक्रि
यायादानादिक्रियैवकारणमतःकारणकारणेकारणोपचारादृोषइति अत्रपुनरपिप्रेर्यमाशंक्यपरिहारमाह होघमणोवित्तीए दाणाइकिरियाजइफ
लंबुद्धी तन्निमित्ततोउपिंडोघुघडस्सविणोउ अत्रपरस्ययद्येवंमतावुद्धिःस्यात्कथंभूताइत्याह ननुमनोवृत्तेमनःप्रसाददादिक्रियायादृष्टरूपाद्दा
नादिक्रियैवफलंनत्वदृष्टंकर्म्मेतिभावः अयमत्राभिप्रायःदानादिक्रियातोमनःप्रसादस्योत्पद्यते तेनाप्यश्चवधर्मानदिलादिपरिणामःपुनरपिदानादि
क्रियांकरोतिएवंपुनःपुनरपिदानक्रियामवृत्तेःसैवमनःप्रसादादेःफलमस्तुनतुकर्म्मेति अयमभिप्रायःदानादिक्रियातोमनःप्रसादस्यो
जायते दृष्टफलमात्रेणैवचरितार्थत्वात्किमदृष्टफलकल्पनेनेतिहृदयं तदेतन्न कुतोनिमित्तत्वात्मनःप्रसादादिक्रियांप्रतिदानादिक्रियायानि २२३
मित्तकारणत्वादित्यर्थः यथाम्दृत्पिंडोघटस्यनिमित्तंविधेयत्वाद्दानादिक्रियापिमनःप्रसत्तेः दृश्यंतेहिपात्रदानादिभ्यश्चित्ताह्लादादयोजायमा
नानचयदस्यनिमित्तंतत्तस्यैवफलंवक्तुमुचितंदूरविरुद्धत्वादिति पुनरपिदृष्टांतीकृतकृष्यादिक्रियावष्टंभेनैवसर्वासामपिक्रियाणांदृष्टफलमात्ररूपता
मेवसाधयन्नाहप्रेरकः एवंपिदिठफलयाकिरिआनकम्मफलापसत्ताउ साहम्मतफलेचियजहमंसफलोपसुविणासो॥नन्वेवमपियुष्मदुप
न्यस्तकृष्यादिक्रियादृष्टफलमात्रेणैवसिलमप्रयोजनाभवतियथादानादिक्रियाया अपिश्लाघादिकाकिंचिद्दृष्टफलमस्तुकिमदृष्टफलकल्पनेन
किंबहुनासाक्रियासर्वापितमात्रफलैवदृष्टमात्रफलेवयुज्यतेनादृष्टफला यथादृष्टमांसमात्रफलापशुविनाशक्रियानहिपशुविनाशनक्रि

यादृष्टाधर्म्मफलार्थंकोप्यारभते किंतुमांसभक्षणार्थमतस्तन्मात्रफलैवसाताचैवावसितप्रयोजनत्वादेवंदानादिक्रियायाअपिदृष्टंसंख्येयभागो
पिनप्रवर्तते कृतिपयमात्रएवलोकस्तासुप्रवर्तते अदृष्टफलासु नबहवइत्यर्थः नतश्चहिंसादीनामशुभक्रियाणामदृष्टफलाभावात्तुशुभक्रिया
णामपिदानादीनामदृष्टफलाभावोभविष्यतीति इतिपराभिप्रायइतिभगवानाह सोम्मजउच्चियजीवा पायंदिठफलासुवट्टंति अदिठफलाउ
वियताउपडिवद्धतेवोण सोम्येत्याग्निभूतेरामंत्रणं यतएवप्राणिनः प्रायेणकृषिवाणिज्यहिंसादिकास्वेवदृष्टफलस्वशुभक्रियासुप्रवर्तंते
अदृष्टफलासुपुनर्दानादिकासुशुभक्रियासुस्वल्पाएवप्रवर्तंते तेनैवतस्मादेवकारणात्ताअपिकृषिहिंसादिकादृष्टफलाःक्रियाःअदृ
ष्टफलाअपिमतिपद्यतस्वाभ्युपगच्छइदमुक्तंभवति॥यद्यपिकृषिहिंसादिक्रियावर्तारोदृष्टफलमात्रार्थमेवताःसमारंभतेनाधर्म्मार्थंत
थापिते अधर्म्मलक्षणंपापारूपमदृष्टफलमश्रुवएव अनंतसंसारिजीवानुपपत्तेस्तेहिकृषिहिंसादिक्रियामिनिन्नमनभिषितमप्यदृ
ष्टंपापलक्षणंफलंबध्वाअनंताइहतिष्ठंति दानादिक्रियानुष्टानारस्तुस्वल्पाःअदृष्टंधर्म्मरूपंफलमासाद्यक्रमेणमुच्यंतइति ननुदानादि
क्रियानुष्ठातभिर्यदृष्टंधर्म्मलक्षणंफलमाशंसितंतत्तेषांभवतुयैस्तुकृषिहिंसादिक्रियाकर्तृभिरदृष्टमधर्म्मरूपंफलमासाद्यनाशंसितंत
तेषांकथंभवतीतिचेत्तदयुक्तं॥नह्यविकलंकारणंस्वकार्यंजनयत्स्वाप्याशंसामपेक्षते किंत्वविकलकारणतयास्वकार्यंजनयत्येवय
त्पुरःशातमपिकोद्रवाबीजंकृषिकृदप्रदेशेपतितं जलादिसामग्रीसद्भावेविकलकारणतांभाम्तंचप्राशंसाभावेपिस्वकार्यंजनयत्येवअवि
कलकारणभूताश्चकृषिहिंसादयोधर्म्मजननेतस्तत्कष्टगनाशंसातत्रकोपयुज्यतेनचदानादिक्रियायामपिविनेकिनःफलाशंसां
प्रकुर्वंति तथाप्यविकलकारणतयाविशिष्टतरमेवताःधर्म्मफलंजनयंतिनस्मात्शुभायाअशुभायाश्चसर्वस्याअपिक्रियायाअदृष्टं
शुभाशुभंफलमस्त्येवेतिप्रतिपत्तव्यं अनंतसंसारिजीवसत्तान्यथानुपपत्तेरितिस्थितं एतदेवमतिपादयितुमाह इयराअदिठरहिया
सव्वेसुच्चेयतेअयत्तेण अदिठारंभोचेव केसबहुलोभवेचाहि॥इतरथायदिकृषिहिंसाद्यशुभक्रियाणामदृष्टंफलंनाभ्युपगम्य
तेतदतिनत्कर्तारोदृष्टफलाभावान्मरणानंतरमेवसर्वेप्ययत्नेनमुच्येरन्संसारकारणाभावान्मुक्तिंगच्छेयुस्ततश्चप्रायःशून्यएवसं
सारःस्यादित्यर्थःपश्चाददृष्टारंभोदृष्टफलानांदानादिक्रियाणांसमारंभःसएवक्लेशबहुलःसंसारपरिभ्रमणकारणतयादुरंतःस्या
त्तथाहि॥तेदानादिक्रियानुष्टातारस्तदनुष्ठानेनदृष्टफलानुबंधंविदधुस्ततोजन्मांतरेनद्विपाकमनुभवंतस्तत्प्रेरिताःपुनरपिदानादि

क्रियास्वेवमप्रवर्तेरन्नतोभ्यस्तत्फलसंचयात्तद्विपाकानुभूतिः पुनरपि दानादिक्रियारंभ इत्येवमनंतसंततियमः संसारस्तेषां भवेत्तत्रैत
स्यादित्थमप्यस्तु कात्र किलास्माकं बाधा अत्रोच्यते इहामप्रवरीयसी भवतां बाधा यत्क्वापि हि साधुश्च न क्रियानुष्ठातॄणामदृष्टसंचयाभावे
सर्वेषां मुक्तिगमने एकोपि तत्क्रियानुष्ठाता संसारे क्वापि नोपलभ्येत अशुभतत्फलविपाकानुभविता चैकोपि क्वचिदपि न दृश्येत दानादिशु
भक्रियानुष्ठातारः शुभतत्फलविपाकानुभवितार एव च केवलाः सर्वत्रोपलभ्येरन् न चैवं दृश्यते। तस्मात्किमित्याह जमणिट्ठभोगभाजो ब
हुतरगा जं च नेहमइपुव्वं अदिट्ठाणिट्ठफलं कोइ विकिरियं समारभइ तेण पडिवक्खकिरिया अदिट्ठगा तियफला सव्वा दिट्ठाणेगंतफला।
सा विअदिट्ठाणुगा वेय यस्मादनिष्टो गभोजो बहुतरा भूयांसः अशुभकर्मविपाकनिबंधनदुःखानुभवितार एव व्याप्ये वेति भावः तेनत
स्मात्कारणाल्लोक्यप्रतिपक्षस्वरूपा अशुभा या सा सर्वा अपि क्रिया अदृष्टशुभाशुभं कर्मरूपादृष्टफलविपाक इति व्यत्ययः कस्मान्न भवती
ति चेदुच्यते शुभक्रियारंभिणामेव बहुत्वाद् शुभक्रियानुष्ठानामेव च स्वल्पत्वादिति तत्राह ॥ नन्वशुभक्रियारंभकाणामपि यदृष्टफ
लं भवति न तत्किमिति दानादिक्रियारंभक इव तदारंभ कोपि कश्चिद् दाशंसां कुर्वाणो न दृश्यत इत्याह जं च नेहेत्यादि ॥ यस्मान्नेहादृष्टं नेष्टम
शुभं फलं यस्याः सा अदृष्टानिष्टफला तामिच्छुर्भूतां क्रियां मतिपूर्वामाशंसाबुद्धिपूर्विकां कोपि समारभत इत्यतो न कोपि तदाशंसां कुर्वाणो
दृश्यते तस्मात्सर्वापि क्रिया दृष्टैकांतिकफलेति मतिपक्षस्येति पुनरपि कथंभूता इत्याह दिट्ठाणेगंतफलत्ति दृष्टं धान्यद्रविणलाभादिक
मनैकांतिकफला सर्वापि क्रिया इदमुक्तं भवति ॥ सर्वस्या अपि क्रियाया अदृष्टफलं भावद्रैकांतेनैव भवति यत्तु दृष्टफलं तदनैकांतिकमेव
कस्याश्चिद्भवति कस्याश्चिन्नेत्यर्थः एतच्च दृष्टफलस्यानैकांतिकत्वमदृष्टानुभावेनैवेति प्रतिपत्तव्यं नहि समानसाधनारब्धतुल्यक्रि
याणां द्वयोर्बहूनां वा एकस्य दृष्टफलविघातोऽन्यस्य तु नेत्येतद्दृष्टहेतुमंतरेणोपपद्यत इति भावः एतच्चादृष्टहेतु प्रागुक्तमेवेति अथवा किमि
ह प्रयासेन प्रागेव साधितमेव कर्म कथायुक्तेत्याह अहवा फलाउ कम्मं कज्जत्तणउ पसाहियं पुव्वं पञ्चरमाणवो घडस्सव किरियाण फलं
तयं भिन्नं अथवा ॥ जो तुल्लसाहणाणं फले विसेसो न सो विणा हेउं कज्जत्तणउ गोयम घडोव्व हेऊ य सो कम्मं इत्यस्यां गाथायां प्रागस्माभिः क
र्मप्रसाधितमेव कुत इत्याह फलात्तुल्यसाधनानां यः फलविशेषस्तस्मादित्यर्थः ततोपि फलविशेषात्कस्मात्प्रसाधितं कर्मेत्याह।

कार्यत्वात्तस्य फलविशेषस्य यत्कार्यं तस्य कारणं भवत्येव यथा घटस्य परमाणवः यच्चेह कारणं भवत्येव यथा घटस्य परमाणवः यच्चेह कारणं तत्क
र्म क्रियाणां तयं फलं भिन्नमिति देतेव कर्म सर्वासामपि क्रियाणामदृष्टं फलमित्येवमिहापि साध्यते कथंभूतं तदित्याह क्रियाभ्यो भिन्नं कर्मणः
कार्यक्रियाणां च कारणत्वात्तत्कार्यकारणयोश्च परस्परं भेदादिति भावः अत्राक्षेपपरिहारौ आह आहन्नणु मुत्तमेवं मुत्तं चिय कज्जमुत्तिमत्ता
उ इह जह मुत्तत्तणउ घडस्स परमाणवो मुत्ता आह प्रेरको ननु यदि कार्याणां शरीरादीनां दर्शनात्तत्कारणभूतं कर्म साध्यते तर्हि कार्यस्य मूर्त
त्वात्कर्मापि मूर्तं प्राप्नोति आचार्यः पुनरमाह मुत्तं चिय इत्यादि ॥ यदस्माभिः प्रयत्नेन साधयितव्यं तद्भवतापि परसिद्धांतानभिज्ञबालबुद्धिना या
निष्पादनाभिप्रायेण साधितमेव तथाहि वयमपि ब्रूमो मूर्तमेव कर्म तत्कार्यस्य शरीरादेर्मूर्तत्वादिह यद्यत्कार्यं मूर्तं तस्य २ कारणमपि मू
र्तं यथा घटस्य परमाणवः यच्चामूर्तं कार्यं अतस्तेषाममूर्तत्वात्कर्मणो मूर्तत्वमपि प्राप्नोति नहि मूर्तादमूर्तप्रसवो युज्यते न चैकस्य मूर्तत्वममू
र्तत्वं च युक्तं विरुद्धत्वात् अत्रोच्यते नन्वत एवात्र समवायिकारणमधिक्रियते न निमित्तकारणं सुखादीनां त्वात्मधर्मत्वादात्मैव समवायिका
रणं कर्म पुनः स्तेषामन्नपानादिवन्निमित्तकारणमेवेत्यदोष इति कर्मणो मूर्तत्वसाधनाय हेत्वंतराण्यप्याह तह सुहसंवित्तीउ
संबंधे वेयणुब्भवाउ य बज्झबलाहाणाउ परिणामाउ य विण्णेयं आहारस्सेवानलइव घडोव्व नेहाइकय बलाहाणो खीरमिवोदाहरणाइं क
म्मरूवित्तगमगाइं कम्मरूवित्तगमगाइं ॥ इह प्रथमगाथोपन्यस्तहेतुचतुष्टयस्य द्वितीयगाथायां यथासंख्यं चत्वारो दृष्टांता द्रष्टव्या
स्तत्र मूर्तं कर्म तत्संबंधे सुखादिसंवित्तेरिह यत्संबंधे सुखादिसंवेद्य तेन मूर्तं दृष्टं यथा अशनाद्याहारः यच्चामूर्तं न तत्संबंधे सुखा
दिसंवित्तिः यथाकाशादिसंबद्धे संवित्तिः यथाकाशादिसंबंधे तस्मात्तत्संबद्धे सुखादिसंवेदनान्मूर्तं कर्मेति १ तथा यत्संबंधे वेदनो
द्भवो भवति तन्मूर्तं दृष्टं च कर्मसंबंधे वेदनोद्भवस्तस्मात्तन्मूर्तमिति २ तथा मूर्तं कर्म आत्मनो ज्ञानाच्च तद्धर्माणां व्यतिरिक्तमेव प्रतिबाह्येन स्रक्चं
दनांगनादीना बलस्योपचयस्याधीयमानत्वाद्यथा स्नेहादिना आधीयमानबलो घटः आधीयते च बाह्यैर्मिथ्यात्वादिहेतुभूतैर्वस्तुभिः कर्मणउ
पचयलक्षणं बलं तस्मात्तन्मूर्तमिति ३ तथा मूर्तं कर्म आत्मादिव्यतिरिक्तत्वे सति परिणामित्वात् सिद्धमात्रं क्षीरमिवेति ४ एवमादीनि हेतूदाहर
णानि कर्मणो रूपित्वगमकानीति अत्र परिणामित्वात् सिद्धमात्रायोत्तरमाह अह मय मसिद्ध मेयं परिणामाउ विसेसो किं घाउ सिद्धो परिणामो

से दृष्टिपरिणामादिव पयसः अथ परिणामित्वादित्यसिद्धोयं हेतुरिति मतं भएवतरप्युक्तं यतः सोपिपरिणामः सिद्धः कर्मणः कथउत्ति कर्मका
र्यस्य शरीरादेः परिणामित्वदर्शनादित्यर्थः इह यस्य कार्यं परिणाम रूपमुपलभ्यते तस्यात्मनोपि परिणामित्वं निश्चीयते यथा धीनक्षत्रादिभावेन परिण
मात्पयसोपि परिणामित्वं विज्ञायत एवेति यत्पूर्वं स्कन्धः स्वादि वैचित्र्य दर्शनान्यद्वेतुभूतं कर्मसाधितं तत्र पुनरप्यभिभूतिराह अब्भाइ विगाराणं
जह वेचित्तं विणावि कम्मेण तहजइ संसारीणं हवेघ कोनाम तो दोसो ॥ आह ननु यथाशास्त्रादि विकाराणामंतरेणापि कर्मवैचित्र्यं दृश्यते
था तेनैव प्रकारेण संसारिजीवस्कंधानामपि स्कन्धः स्वादिभावेन वैचित्र्यं यदि कर्मविनापि स्यात्ततः को नाम दोषो भवेन्न कोपीत्यर्थः भ
गवानाह कम्मं विककोभेउ जह व सर कंध चित्तया सिद्धा नह कम्म मोग्गलाण वि विचित्तया जीवसहियाणं यथाभ्रविकाराणां गंधर्वनगरेंद्र
धनुरादीनां गृहदेवकुलप्राकारतरुकृष्णनीलरक्तादिभावेन वैचित्र्यमिष्यते सौम्यवादः स्यापिशक्तार्थत्वात्तर्हि कर्मण्यपि को भेदः कोवि
शेषो येन तत्रैव वैचित्र्यं नाभ्युपगम्यते नन्वहं तथा सकललोक प्रत्यक्षाणाममीमांगंधर्वपुरशक्रकोदंडादीनां बाह्यस्कंधानां विचित्रतामर्थं
भ्रो तोपि सिद्धा तथा तेनैव प्रकारेणांतराणामपि कर्मस्कंधानां पुद्गलमयत्वे समानेपि जीवसहितत्वस्य विशेषतो वैचित्र्यकारणस्य सद्भावे पि स्कन्धः
स्वादि जनकरूपतया विचित्रता किमिति नेष्यते यदि त्वभ्रादयो बाह्यपुद्गला नानारूपतया परिणमंति तर्हि जीवैः परिगृहीताः स्कतरां ते तथा परि
णंस्यंतीति भावः एतदेव भावयति वत्ताण विचित्तया जइ पडियणा कम्मणो विसेसेण जीवाणुगयस्स मया भत्तीण व चित्तेनच्छाणं ॥ यदि हि जीवप
रिगृहीतानामपि बाह्यानामभ्रादिपुद्गलानां नानाकारपरिणतिरूपा चित्रता त्वयामति पन्ना तर्हि जीवानुगतानां कर्मपुद्गलानां विशेषत एवा
स्माकं भवतश्च सासंमता भविष्यति भक्त्यो विच्छिन यस्तासामिव चित्रत्वलयामति पन्ना तर्हि जीवस्तानां अयं अभिप्रायश्चित्रकरादि शिल्पी
जीव परिगृहीतानां चित्रलेप्यकाष्टकर्मानुगतपुद्गलानां या परिणामविचित्रता सा विस्रसा परिणते भ्रधनुरादिपुद्गलपरिणामचित्रतायाः स
काशाद्विशिष्टैवेति प्रत्यक्षत एव दृश्यते अतो जीवपरिगृहीतत्वेन कर्मपुद्गलानामपि स्कन्धः स्वादि वैचित्र्यजननरूपा विशिष्टतरा परिणाम
चित्रता कथं न स्यादिति अत्र परः प्राह तो जइ तणुमित्तं चिय हवेघ का कम्म कप्पणा नाम कम्मं पि तणुतणु च्चिय सण्ह यर संतरा नवरं ॥ एवमन्य
ते पुरोप घभ्राद्यविकाराणामिव पुद्गलानां विचित्रपरिणतिरभ्युपगम्यते ततो बाह्यं सकलजनप्रत्यक्षं तनुमात्रमेवेदं स्करूपकरूपस्कन्धः स्वादि
भावैः स्वभावत एवाभ्रादि विकारवद्विचित्ररूपतया परिणमतीत्येव दे वास्तु कानाम पुनस्तद्वैचित्र्य हेतुभूतस्यांतरंगतनुरूपकल्पस्य कर्मणः परि

Dr. BHAU DAJI MEMORIAL

कल्पनास्वभावादेव सर्वस्यापि पुद्गलपरिणामवैचित्र्यस्य सिद्धत्वादिति भगवानाह कम्मंपीत्यादि अयमभिप्रायः यथाभ्रादिविकाराणामिनन
नो वैचित्र्यमभ्युपगम्यते न हि ननु कर्माणि न तु रेव कार्मणशरीरमेवेत्यर्थः केवलं श्लक्ष्णतरा अतींद्रियत्वादभ्यंतरा च जीवेन सहातिसं
श्लिष्टत्वात्तत्तश्च यथाभ्रादिविकारवद्बाह्यस्थूरतनोर्वैचित्र्यमभ्युपगम्यते तथा कर्मतनोरपि तत्किं नाभ्युपगम्यते इति भावः अथ प्रेर्यमा
शंक्य परिहारमाह कोतीइ विणा दोसो थूलाए सव्वहा विमुक्कस्स देहग्गहणाभावो तउ य संसार वोच्छित्ती प्रेरकः प्राह ननु बाह्याया स्थू
रत्वादेवैचित्र्यं प्रत्यक्षे दृष्टत्वादभ्राविकारवदभ्युपगमेच्छा अंतरंगायाः तनुकर्मरूपायाः सूक्ष्मतनोर्वैचित्र्यं कमामिच्छामस्तस्याः सर्वथा
मूलक्षत्वात्तथ तदनभ्युपगमे दोषः कोप्यापतति ततोर्थापत्तेरेव न हि चित्रताऽभ्युपगंतव्या तर्हि निवेदितो कस्तया विना दोषो नु भज्यते आचा
र्यः प्राह मरणकाले स्थूलया दृश्यमानतन्वा सर्वथा विप्रमुक्तस्य जंतोर्भवांतरगतस्थूलतनुग्रहणनिबंधनभूतां सूक्ष्मकर्मतनुमंतरेणाग्रेतनदे
हग्रहणाभावलक्षणो दोषः समापद्यते न हि निष्कारणमेव शरीरांतरग्रहणं युज्यते ततश्च देहांतरग्रहणानुपपत्तेर्मरणानंतरं सर्वस्याप्यश
रीरत्वाद्यत्नेनैव संसारव्यवच्छित्तिः स्यात् ततोपि च किं स्यादित्याह सव्वविमोरकावत्ती निक्कारणउ य सव्व संसारी भवमुक्काण च पुणो संसर
णमेउ अणासासो ततः संसारव्यवच्छेदानंतरं सर्वस्यापि जीवराशेर्मोक्षापत्तिप्रसंगे स्थाशरीराणामपि संसारपर्यटनं तर्हि निःकारण एव
सर्वस्यापि संसारः स्यात् अमुक्तानां च सिद्धानामिच्छं पुनः कस्मान्निः कारण एव संसारपातः स्यात्तथैव च तत्र संसरणं ततश्च मोक्षेप्यनाश्वा
स इति पुनः प्रकारांतरेण प्रेर्यमाह मुत्तस्सामुत्तिमया जीवेण कहं ह वेघ संबंधो सोम घडस्स व नभसा जह वा दव्वस्स किरियाए ननु मूर्तं कर्मेति
प्राक् प्रभवाद्भिः समर्थितं तस्य च मूर्तस्य घटस्यामूर्तेन नभसा संयोगलक्षणः संबंधः स्यादतः कर्मसिद्धाप्येतदपरमेवरं प्रपश्यामः भगवा
नाह ॥ सौम्य यथा मूर्तस्य घटस्यामूर्तेन नभसा संयोगलक्षण संबंधस्तथा अन्यापि जीवकर्मणोः संबंधसिद्धिमाह अहवा पचरकं चिय जी
वोवनिबंधणं जह सरीरं चिट्ठइ कम्मयमेवं भवंतरे जीवसंजुत्तं ॥ अथवाय थेदं बाह्यं स्थूलशरीरं जीवो यानिबंधन जीवेन सह संबद्धं बाह्यशरीरं भ
वति तर्हि प्रेच्छामो भवंतं भावपि धर्माधर्मौ मूर्तौ वा भवेतामम् मूर्तौ वा यदि मूर्तौ तर्हि तयोरप्यमूर्तेनात्मना सह कथं संबंधो अथ तयोर्जीवेन स
हासौ कथमपि भवति न हि कर्मणापि तेन सार्द्धं मयं कस्मान्न स्यात् तथा मूर्तौ धर्माधर्मौ न हि बाह्य मूर्तस्थूरशरीरेण सह तयोः संबंधः कथं स्यान्मूर्ता
मूर्तयोः प्रविशि प्रायेण संबंधायोगान्नाभसवद्घयोस्तयोर्बाह्यशरीरवैशिनिमित्तत्वमुपपद्यते तिप्रा संवादयामूर्तयोरपि तयोर्बाह्यशरीरेण मूर्तेन सह स्यतसंबंधस्तर्हि

हिंजीवकर्म्मणोस्तज्ञाविकः प्रद्वेषरानि अथापराक्षेपपरिहारोमाह मुत्तेणामुत्तिमउ ववघायाणुग्गहाकहंहोद्धा जहविण्णाणाईणं मइरापाणोस
हारहिं ॥ ननुमूर्तेनकर्म्मणामूर्तिमतोजीवस्यकथमल्हादपरितापाद्यनुग्रहोपघातोस्यानानत्वमूर्त्तस्यनभसोमूर्त्तमलयजलज्वलनज्वालादिभिस्तोयु
उपेतेइतिभावः अथोत्तरमाह ॥ जहविण्णाणाईणमित्यादि यथामूर्त्तानामपिविज्ञानविविदिषाधृतिस्मृत्यादिजीवधर्म्माणांमूर्तैरपिमदिरापानेनहृत्पूरवि
षपिपीलिकाभिर्भक्षितेरूपघातः क्रियतेपयःशर्कराघृतचूर्णभेषजादिभिस्त्वनुग्रहइत्येवमिहापीति एतच्चजीवस्यामूर्त्तत्वमभ्युपगम्योक्तं यदिवा
अमूर्तोपिसर्वथासौनभवतीतिदर्शयन्नाह अहवानेगंतोयंसंसारीसव्वहाअरूवोत्ति जमणाइकम्मसंतइपरिणामावन्नरूवोसो ॥ अथवानायमेकां
तोयदुत संसारीजीवः सर्वथामूर्तइतिकुतोयद्यस्मादनादिकर्म्मसंततिपरिणामापन्न यःपिंडमन्यायेनानादिकर्म्मसंतानपरिणतिस्वरूपतांप्राप्तरूप
यस्यसतथातनश्चमूर्तकर्म्मणः कथंचिदनन्यत्वान्नमूर्तोपिकथंजीवइतिमूर्तेनकर्म्मणाभवतएवतस्यानुग्रहोपघातोनभसस्त्वमूर्त्तत्वाद्चेतनत्वाच्चतौनभव
तएवेति कथंपुनःकर्म्मणोनादिसंतानइत्याह संताणोणाईउ परोप्परंहेउ२भावाउ देहस्सयकम्मस्सय गोयमबीयंकुराणंच ॥ अनादिःकर्म्मणःसंतानः
इतिप्रतिज्ञादेहकर्म्मणोःपरस्परंहेतुमद्भावादितिहेतुः बीजांकुरयोरिवेतिदृष्टांतः यथाबीजेनांकुरोजन्यतेंकुरादपिक्रमेणबीजमुपजायते एवंदेहेनक
र्मजन्यतेकर्म्मणातुदेहइत्येवंपुनःपुनरपिपरस्परमनादिकालीनहेतु२मद्भावादित्यर्थः इहययोरन्योन्यंहेतुमद्भावःतयोरनादिःसंतानोयथाबीजां
कुरपितृपुत्रादीनां तथाचदेहकर्म्मणोस्तद्धेतोरनादिःकर्म्मसंतानइति वेदोक्तद्वारेणापिकर्म्मसाधयन्नाह कम्मेवाखदगोयमजमग्गिहोत्ताइ सग्गकाम
स्स वेयविहियं विहण्णइ दाणाइफलंचयोयम्मि कर्म्मणिचासतिगौतमअग्निहोत्रादि नास्वर्गकामस्यवेदविहितंयत्क्रियापिस्वर्गादिफलंतद्विहन्यते
स्वर्गादेःकृतकर्म्महेतुत्वात्तस्यचभवतानभ्युपगमात् लोकेयद्दानादिक्रियाणांफलंस्वर्गादिकं प्रसिद्धं तदपिविहन्येत अयुक्तंचेदं किरियाफलभावाउ २२६
दाणाईणंफलंकिसीएवेत्यादिनाप्रतिविहितत्वादितिकर्म्मणोभ्युपगमेयदीश्वरादयोजगद्वैचित्र्यकर्तारइष्यंतेतदप्ययुक्तमितिदर्शयन्नाह कम्ममणि
च्छंतोवाक्कइंचियजीवमीसराईवा मण्णसिदेहाईणं जंकत्तारंनसोजुत्तो कम्मचानिच्छन्नग्निभूतेगौतमयंकर्म्मरहितत्वाच्छुद्धमेवजीवमात्मनमीश्व
राव्यक्तकालनियतियदृच्छादिकंवादेहादीनांकर्तारंमन्यसेतत्राप्युच्यतेनासौशुद्धजीवेश्वरादिकर्तायुज्यतइति कुतइत्याह उवगरणाभावाउ निच्चेठासु
नयाउअभावदसरदेहारंते विजुत्तवावाणवच्छावा नयमीश्वरजीवादिरकर्म्माशरीरादिकार्याण्यारभतेउपकरणाभावाद्दंडाद्युपकरणरहितकुलाल
वन्नचकर्म्मविनाराधारंभेजीवादीनामन्यदुपकरणंघटतेगर्भाद्यवस्थास्वन्योपकरणासंभवाच्छुक्रशोणिताद्यग्रहणस्याप्यकर्म्मणोनुपपत्तेः अथवान्यथा
प्रयोगःक्रियते ॥ निच्चिठेत्यादिनाकर्म्माशरीराद्यारभतेनिश्चेष्टत्वादाकाशवत्तथाऽमूर्त्तत्वात् हादिशरीरत्वान्निःक्रियत्वात्सर्वगतत्वादाकाशवदेव तथा

पकत्वादेकपरमाणुवदित्यादि अत्रोच्यते ॥ शरीरवानीश्वरः सर्वाण्यपिदेहादिकार्याण्यारभते नन्वीश्वरदेहारंभेपितर्हितुल्यतापर्यनुयोगस्यतथात्यक
र्मनारभते निजशरीरमीश्वरोनिरूपकरणत्वाद्दंडादिरहितकुलालवदिति अथान्यकोपीश्वरःतच्छरीरारंभायप्रवर्ततेततःसोपिशरीरवानशरीरोवाय
दशरीरस्तर्हिनारभते निरूपकरणत्वादित्यादिसैववक्तव्यताअथशरीरवांस्तर्हितच्छरीरारंभेपितुल्यतासोप्यकर्म्मानिजशरीरंनारभतेनिरूपकरण
त्वादित्यादि अथतच्छरीरमन्यःशरीरवानारभतेउतस्तस्याप्यन्यस्ततस्तस्याप्यन्यइत्येवमनवस्थाअनिष्टंचसर्वमेतत्तस्मान्नेश्वरोदेहादीनांकर्ता किंतु
कर्म्मासिद्धं द्वितीयोजीवएवनिःप्रयोजनश्चेश्वरोदेहादीकुर्वन्नुन्मत्तकल्पएवस्यात्सप्रयोजनकर्तृत्वेपुनरनीश्वरप्रसंगःनचानादिशुद्धस्यदेहा
दिकरणेच्छाप्युज्यते तस्यारागविकल्परूपत्वादित्यादि अत्रबहुवक्तव्यं ग्रंथगहनताप्रसंगात्तुनोच्यतेइत्यनेनैवविधानेनविष्णुप्रजापत्यादयोपिप्रत्युक्ताइष्ट
व्याइति अथाशंकांतरंप्रतिविधातुमाह अहवसाहावं मण्णसिविण्णाणघणाइवेयपुत्ताउ तहबहुदोसं गोयम ताणंचपयाणमयमुत्थो अथापिविज्ञानघ
न एवैतेभ्योभूतेभ्यइत्यादिवेदवचनश्रवणात्स्वभावंदेहादीनांकर्तारंमन्यसे यतःकेचिदाहुः ॥ सर्वहेतुनिराशंसंभावानांजन्मवर्ण्यते स्वभाववादिभि
स्तेहिनाहुःस्वेयमपिकारणं राजीवकंटकादीनां वैचित्र्यंकःकरोतिहिमयूरचंद्रिकादिर्वाविचित्रःकेननिर्म्मितःकादाचित्कंयदत्रास्तिनिःशेषंतद्धेतु
कं यथाकंटकतैक्ष्ण्यादितथाचैतेस्वभावादयः तदेतद्यथात्वंमन्यसेगौतम तथोपगम्यमानंबहुदोषमेव तथाहि योदेहादीनांकर्तास्वभावोभ्युपगम्यते
तस्यापिवदृप्तिप्रायेणाप्रमाणकत्वात्किंचवस्तुविशेषःसस्वभावोमूर्तोवास्यादमूर्तोवायदिमूर्तस्तर्हिस्वभावइतिनामांतरेणकर्म्मैवोक्तंस्यात्यथामू
र्तस्तर्हिनासौकस्यापिकर्ताअमूर्तत्वान्निरूपकरणत्वाच्चव्योमवदिति नचमूर्तस्यशरीरादेःकार्यस्यामूर्तंकारणमनुरूपमाकाशवदिति अथाकारण
तास्वभावइष्यते तत्राप्यभिदध्महे ॥ नन्वेवंसत्यकारणंशरीरमुत्पद्यतइत्यभ्युपगतंभवेत्तच्चायुक्तमेव यतोयदहेतुकंमाकस्मिकंनतदादिमत्प्राति
नियताकारंयथाअभ्रादिविकारःआदिमत्प्रतिनियताकारंचशरीरादितस्मान्नाकस्मिकं किंतुकर्महेतुकमेवप्रतिनियताकारत्वादेवचोपकरणसहित
कर्तृनिर्वर्त्यमेवशरीरादिकंघटादिवदितिगम्यतएव नचगर्भाद्यवस्थासुकर्म्मणोन्यदुपकरणंघटतइत्युक्तमेव अथवस्तुनोधर्म्मःस्वभावोभ्युपगम्यते
तथाप्यसौपर्यायधर्म्मोविज्ञानादिवत्तर्हिनशरीरादिकारणमसावमूर्तत्वादाकाशवदित्यभिहितमेव अथमूर्तवस्तुधर्म्मोसौतर्हिसिद्धंसाध्यताकर्म्मणो
पिपुद्गलास्तिकायपर्यायविशेषत्वेनास्माभिरुपगतत्वादिति अपिच ॥ पुरुषएवेदंसर्वमित्यादि प्रथमगणधरलिखितवेदवाक्यश्रवणाद्भवतःक
र्म्मास्तित्वसंशयःएषांहिवेदपदानामयमर्थस्तवचेतसिविपरिवर्तते ॥ पुरुषआत्माएवकारोवधारणेसचपुरुषातिरिक्तस्यकर्म्मप्रकृतीश्वरादेःस
त्ताव्यवच्छेदार्थःइदंसर्वंप्रत्यक्षंवर्तमानंचेतनाचेतनस्वरूपंग्निमितिवाक्यालंकारेयद्भूतमतीतंयच्चभाव्यंभविष्यन्मुक्तिसंसारावपिसएवेत्यर्थः

उतामृतत्वस्येशानइति उतशब्दोप्यर्थे अपिशब्दश्च समुच्चये अमृतत्वस्यचामरणस्वभावस्यमोक्षस्येशानः प्रभुरित्यर्थः यदन्नेनातिरोहती तिचशब्दस्य
लुप्तस्यदर्शनाद्यदन्नेनाहारेणातिरोहत्यतिशयेनवृद्धिमुपैति यदेजतिचलति पश्वादियन्नेजति नचलति पर्वतादि यद्दूरे मेर्वादि यदुअंतिके उ शब्दोवधारणे
यदंतिकेसमीपेतदपि पुरुषएवेत्यर्थः यदंतर्मध्येस्य चेतनाचेतनस्य सर्वस्य यदेव सर्वस्याप्यस्यबाह्यतः तत्सर्वंपुरुषएवेत्यर्थः यदंतर्मध्येस्य चेतनाचेत
नस्य सर्वस्य यदेव सर्वस्यबाह्यतः सर्वंपुरुषएवेत्यतस्तद्व्यतिरिक्तस्यकर्मणः किलसत्ताउ अद्वैयादातिभाति यथाविज्ञानघन एवैतेभ्यो भूतेभ्य इत्यादी
न्यपिवेदपदानिकर्माभाव प्रतिपादकानि मन्यसेत्वं अत्राप्येव कारस्यकर्मादिसत्ताव्यवछेदपरत्वानुदेव मेत वा पुरुषएवेद मित्यादीनान्यपि वेदपदानिक
र्माभाव प्रतिपादकानिमन्यसेत्वं विज्ञानघनादीनांच वेदपदानांनाय्यमर्थो यो भवतश्चेतसि वर्तते तेषांपदानामयंभावार्थः पुरुषएवेदंसर्वमित्यादीनी
भावत्पुरुषस्तुति पराणिजात्यादिमदत्यागहेतो रद्वैतभाव प्रतिपादकानि मन्यसेत्वं अत्राप्येवकारस्य कर्मादिसत्ताव्यवछेदकानिवेद वाक्यानि
हि कानिचिद्विधिवादपराणिकान्यप्यर्थवाद प्रधानान्यपराण्यनुवादपराणि तत्राग्निहोत्रंजुहुयात्स्वर्गकाम इत्यादीनि विधिवादपराणि अर्थवा
दस्तुद्विधास्तुत्यर्थवादोनिंदार्थवादश्च तत्र पुरुषएवेदं सर्वमित्यादि मित्यादिकस्तुत्यर्थवादो निंदार्थवादश्च तत्र सर्वविधस्यैष महिमा भुवि
दिव्ये ब्रह्मपुरेह्येष व्योम्न्यात्मा प्रतिष्ठितस्तमक्षरंवेदयतेथ यस्तु स सर्वज्ञः सर्ववित्सर्वमेवाविवेशइति तथाएकयापूर्णाहुत्या सर्वान्कामानवाप्नो
तीत्यादि सर्वोपि स्तुत्यर्थवादः एकयापूर्णयेत्यादि विधिवादोपिकस्मान्नभवतीति चेदुच्यते शेषस्याग्निहोत्राद्यनुष्ठानस्य वैयर्थ्यप्रसंगादिति
एषवःप्रथमोयज्ञो योऽग्निष्टोमः योऽनेनाऽनिष्ट्वाऽन्येनयजते सगर्तमभ्यपतत्तत्र पशुमेधादीनांप्रथमकारणंनिंधतइत्ययंनिंदार्थवादः द्वादशमासाः
संवत्सरोग्निरुष्णोऽग्निर्हिमस्यभेषजमित्यादीनितुवेदवाक्यान्यनुवादप्रधानानि लोकप्रसिद्धस्यैवार्थस्यैतैरनुवादादितितस्मात्पुरुषएवेदंस
र्वमित्यादीनि वेदपदानि स्तुत्यर्थवादप्रधानानि द्रष्टव्यानि विज्ञानघनएवैतेभ्य इत्यत्राप्ययमर्थः विज्ञानघनाख्यः पुरुषएवायं भूतेभ्योर्थांतरवर्तते। २२०
सचकर्ताकार्यंचशरीरादिकमिति मा कुप्रसाधितमेवततश्चकर्तृत्वकार्यभ्यामर्थांतरंकरणमनुमीयते तथाहि यत्रकर्तृकार्यभावस्तत्रावश्यं
भाविकरणंयथायस्कारायःपिण्डादिवेसदंशः यच्चात्रात्मनः शरीरादिकार्यनिष्पत्तौ करणभावमापाद्यते तत्कर्मेतिप्रतिपद्यस्व अपिचसाक्षादेवकर्म
सत्ताप्रतिपादकानिश्रूयंतएववेदवाक्यानि तद्यथा पुण्यःपुण्येनकर्मणापापः पापेनकर्मणेत्यादि।। तस्मादागमादपिसिद्धप्रतिपद्यस्वकर्मेति
इत्येवंभगवताभिहितोऽग्निभूतिः किंकृतवानित्याह छिण्णंमिसंसयंमि जिणेणजरमरणविप्पमुक्केणं सोसमणोपव्वइओ पंचहिंसहखंडियसए
हिं अस्याःपूर्ववद्व्याख्येति एकोनचत्वारिंशद्गाथार्थः ९६ इतिद्वितीयोगणधरवादः समाप्तः।। छ।। अथतृतीयगणधरस्यवायुभूते

र्वक्तव्यतामभिधित्सुराह तेपव्वइए सोउं तइओ आगच्छइ जिणसगासंवच्चामिणवंदामी वंदित्तापज्जुवासामि।। तावितं भूत्याग्निभूती प्रव्रजितौश्रुत्वा ततो
यो वायुभूतिनामाद्विजोपाध्यायो दिनसकाशमागच्छति सातिशयनिजबुद्धयनिःक्रमणाकर्णनात्कृगितिचगलिताभिमानो भगवतिसंजातसर्व
ज्ञप्रत्ययः सन्नेवमध्यवस्यागतो व्रजामि तत्राहमपिवंदे भगवंतं श्रीमन्महावीरंवंदित्वाचपर्युपास्तिंकरोमि तस्यभगवत इति ।अपरंचविकल्प स
मागतोस्यावित्याह सीसत्तेणोवगयासंपइमिंदग्गिभूइणोजस्स तिहुयणकयप्पणामो समहाभागोभिगमणिज्जो तदभिगमणवंदणोवासणाइणा
होपपूय ऽरामोहं वोच्छिन्नसंसउवा वोजुंपतो जिणसगासं पूतपापोविशुद्ध पापोपगतपापइत्यर्थः शेषंसुगमं ततः किमित्याह आभट्ठोयजिणे
णं जाइजरामरणविप्पमुक्केणं नामेणयगोत्तेणय सव्वण्णूसव्वदरिसीणं।। व्याख्यापूर्ववदिति इत्थंसगौरवंसाजसमाभाषितोपिभगवतासकलत्रै
लोक्यातिशायिनीतस्यरूपादिसमृद्धिमभिवीक्ष्यक्षोभादसमर्थोहि हृद्गतसंशयंप्रष्टुविरभूयातूष्णीमाश्रितापुनरप्युक्तः किमित्याह तज्जीवतस्सरीरंति
संसउनविय पुच्छसेकिंचिवेयपयाणयअत्थंनयाणसीतेसिमो अत्थोहेआउष्मन्वायुभूते तदेवसजीवः तदेवशरीरंनपुनरन्यदित्येवंभूतस्तवसं
शयोवर्तते नापिच तदपनोदार्थं किंचिन्मांपृच्छसि ननुयद्यपाटाभिर्गछ तात्वयाभिहितमासीत्वोछिन्नसंसउवत्तिनाकिमितिनकिंचित्पृच्छसि अयं
चसंशयस्तवविरुद्धवेदपदश्रवणनिबंधनोवर्तते तेषांचवेदपदानामर्थंत्वंनजानासि तेनसंशयंकुरुते तेषांचायंवक्ष्यमाणलक्षणोर्थइति यथावत्वा
युभूतेरयंसंशयस्तथाविशेषतएवभाष्यकारोभावयन्नाह यक्काहाइभूयसमुदयसंभूयाचेयणत्ति तेसंका पत्तेयमदिठाविहु मज्जंगमउब्बसमुदा
ये जहमज्जंगेसुमउ नीसुमदिट्ठोविसमुदएहोउं कालंतरेविणस्सइ तहभूयगणंमिचेयण्णं।। यक्कापृथ्वीआदिशब्दादप्तेजोवायुपरिग्रहः बक्कादयएव
भवंतीतिकृत्वाभूतानिवक्कादिभूतानितेषांसमुदयः परस्परमीलनपरिणतिर्वक्कादिभूतसमुदायस्तस्मात्प्रागसतीसंभूताजाताचेतनेत्येवंभूतात
वशंका साचचेतनापृथिव्यादिभूतेषुप्रत्येकावस्था यामदृष्टापिधातकीकुसुमगुडोदकादि मुमद्यांगेषु मदइवतत्समुदाये संभूतेतिमन्यसे तत्एवदृश्य
ते तदेवमन्वयद्वारेण चेतनायाभूतसमुदायधर्मतादर्शिताअथव्यतिरेकद्वारेणापितस्यास्तांदर्शयितुमाह ।।जहमद्यगेसुइत्यादियथाचमद्यांगेषुमद
इवतत्समुदायेभूत्वाततः कियंतमपिकालंस्थित्वाकालांतरेतथाविधसामग्रीवशात्कुतश्चिद्विनश्यति तथाभूतगणेपिप्रत्येकमसंश्चेतन्यंभूत्वाततःकि
यतमपिकालंस्थित्वाकालांतरेतथाविधसामग्रीवशात्ततोव्यपव्यतिरेकाल्यांनिश्चीयते भूतधर्मएवचैतन्यंइदमत्रहृदयं।। यत्समुदायेषुप्रत्येकेनोप
लभ्यते तत्समुदायेचोपलभ्यते नतत्समुदायमात्रधर्मएव यथामद्यांगेसमुदायधर्मोमदः सहि मद्यांगेषु विश्वग्नोपलभ्यते तत्समुदायेचोपलभ्यते।
नत्तद्धर्मः एवंचेतनापिभूतसमुदायेभवति पृथक्चनभवतिअतस्तद्धर्मः धर्मधर्मिणोश्चाभेदएवभेदेघटपटयोरिवधर्मिधर्मभावाभावप्रसं

ग्यस्मात्स एव जीवस्तदेव च शरीरं व्याख्यातेषु पुनः शरीराद्भिन्नः श्रूयते जीवस्तद्यथा न ह वै सशरीरस्य प्रियाप्रिययोरपहतिरस्ति अशरीरं वा सं
तं प्रियाप्रिये न स्पृशत इत्यादि ततस्तव संशयः इति अत्रोत्तरमाह पत्तेयमभावाउ न रेणुतेल्लं व समुदये चेय मज्जंगेसु मउ वीसं पि न सव्वसो नत्थि
न समुदये चेयन्ति न भूतसमुदायमात्रप्रभवा चेतना पत्तेयमभावाउ त्ति भूतप्रत्येकावस्थायां तस्या अंशतोऽपि सर्वथाप्यनुपलब्धेरित्यर्थः किंयथा
किं प्रभवं न भवतीत्याह न रेणुतिल्लं व त्ति यथा प्रत्येकं सर्वथाप्यनुपलंभाद्रेणुकणसमुदायप्रभवं तैलं न भवतीत्यर्थः प्रयोगो यद्येषु पृथगवस्थायां
सर्वथा नोपलभ्यते तत्तेषां समुदायेऽपि न भवति यथा सिकताकणसमुदाये तैलं न भवतीत्यर्थः यत्तु तेषां समुदायेऽपि भवति न तस्य पृथगव्यवस्थि
तेषु सर्वथानुपलंभो यथा एकैकतिलावस्थायां तैलस्य सर्वथा नोपलभ्यते च भूतेषु प्रत्येकावस्थायां सर्वथानुपलब्धस्यापि तस्मान्नासौ तत्समुदाय
मात्रप्रभवा किं तर्हि तद्व्यतिरिक्तमपि जीवलक्षणं कारणांतरं भूतसमुदायातिरिक्तं न तत्संघटितं यत्तद्व्यं प्रभवतीति प्रतिपत्तव्यं आह ॥ प्रत्येका
वस्थायां सर्वथानुपलंभादित्यनैकांतिकोऽयं हेतुः प्रत्येकावस्थायां सर्वथानुपलब्धस्यापि मदस्य मद्यांगसमुदाये दर्शनादित्याशंक्याह मद्यंगेसु
मित्यादि धातकीकुसुमादिमद्यांगेषु पुनर्विभक्तं पृथक् न सर्वथा मदो नास्ति किंतु यावद्यावती च मदमात्रा पृथगपि तेष्वस्तीत्यर्थः ततोऽनैकांति
कता हेतोरिति भूतेष्वप्येवं भविष्यतीति चेन्नैतदेवं कुत इत्याह भमिधाणिवितण्हयाइं पत्तेयं पिहु जहा मयंगेसु तह जइ भूएसु भवे चेया तो समुदए होज्जा अ
था प्रत्येकावस्थायां धातकीकुसुमेषु यावद्यावती च भ्रमिश्चित्तभ्रमापादनशक्तिः गुडद्राक्षेक्षुरसादिषु पुनर्घ्राणि तृप्तिजनकशक्तिरस्ति उदके
तु वितृष्णताकरणशक्तिरस्ति आदिशब्दादन्येष्वपि मद्यांगेष्वन्यापि यथासंभवं शक्तिर्वाच्या तथा नैवंप्रकारेण व्यस्तेष्वपि पृथिव्यादिभूतेषु यदि काचि
च्चैतन्यशक्तिः स्याद्विभाव्येत तदानीं तत्समुदाये संपूर्णा स्पष्टा चेतना स्यात् न चैवं दृश्यते तस्मान्न भूतसमुदायमात्रप्रभवेयमिति ननु यदि प्रत्येकावस्थायां मद्यांगे
षु सर्वथैव मदशक्तिर्न स्यात्तथा किं दूषणं स्यादित्याह जइ वा सव्वाभावो वीसं तो किं तदंगनियमः कोऽयं धातकीकुसुमादीनां मद्यांगतानियमस्तत्समुदायनि
यमो वा अन्नेसु वि तो हुज्जा हि ॥ यदि मद्यांगेषु पृथगवस्थायां सर्वथैव मदशक्त्यभावस्तर्हि कोऽयं धातकीकुसुमादीनां मद्यांगतानियमस्तत्समुदायनि
यमो वा किमिति मद्यार्थी धातकीकुसुमादीन्येवान्वेषयति तत्समुदायं किमिति नियमेन मीलयतीत्यर्थः न त्वन्येष्वपि च भस्मादिषु गोमयादिषु समुदितेषु मदं
भवेदिति अथ मद्यांगेषु प्रत्येकावस्थायामपि मदशक्तिसद्भावं साधितमाकर्ण्य कश्चित्पर एवं ब्रूयात् किमित्याह भूयाणं पत्तेयं पि चेयणा समुदये दरिस
णाउ जह मज्जंगेसु मउ मइ त्ति हेउ नासिद्धोयं स्यात्परस्य मतिः साधूक्तं यत्पृथगपि मद्यांगेषु किंचिन्मदसामर्थ्यमस्तीति एतदेव हि भूतेषु व्यस्तेष्वस्तु तस्था
यां चैतन्यास्तित्वसिद्धावनुदाहरणं भविष्यति ॥ तथाहि ॥ व्यस्तेष्वपि भूतेषु चैतन्यमस्ति तत्समुदाये तद्दर्शनान्मद्यांगेषु मदवदिति ॥ यथा मद्यांगेषु मदः

२२८

पृथगल्पत्वान्नातिस्पष्टस्तत्समुदाये त्वभिव्यक्तिमेति तथा भूतेष्वपि पृथगवस्थायामणीयसी चेतना तत्समुदायेऽपि भूयसीयमिति अत्रोत्तरमाह ॥ हे
ऊ न सिद्धोयमिति चेतनाया भूतसमुदायदर्शनादित्ययं सिद्धोऽयं हेतुरित्यर्थः आत्मनो भूतसमुदायांतर्गतत्वेन चेतनायास्तद्धर्मत्वादात्माभावे च न तत्समुदाय
दर्शनादित्यसिद्धोऽयं हेतुरिति भावः यदि हि भूतसमुदायमात्रधर्मश्चेतना भवेत्तदा मृतशरीरेऽप्युपलभ्येत वा यो क्तदानीं तत्राभावात्तदनुपलंभ इति चेन्नै
वं नलिकादिप्रयोगतस्तत्प्रक्षेपेऽपि तदनुपलब्धिः तेजस्तदानीं तत्र नास्तीति चेन्न तत्प्रक्षेपेऽपि तदनुपलंभाद्विशिष्टतेजोवाय्वभावात्तदनुपलंभ इति नालि
कादिप्रयोगतस्तत्प्रक्षेपेऽपि तदनुपलब्धिः तेजस्तदानीं तत्र नास्तीति चेन्न तत्प्रक्षेपेऽपि तदनुपलंभाद्विशिष्टतेजोवाय्वभावात्तदनुपलंभ इति किं नामा
त्मसत्तां विहायान्यत्तदेव रूपं ननु संज्ञांतरेणात्मसत्त्वमेवाभ्युपगतं स्यादिति अथ परस्योत्तरमाशंक्य प्रतिविधातुमाह नणु पच्चक्खविरोहो
गोयम तं नाणुमाणभावाउ नह पच्चक्खविरोहो यत्तेयं भूयचेयन्ति ॥ ननु प्रत्यक्षविरुद्धमेतद्यद्भूतसमुदायेऽपि लभ्यमानापि चेतना न तत्समुदाय
स्यैवाभिधीयते न हि घटे रूपादय उपलभ्यमाना घटस्येति वक्तुमुचितं तदयुक्तं यतो न तु जलसमुदायमात्रे उपलभ्यमानाऽपि हरितादयस्तन्मात्र
प्रभवा इति शक्यते वक्तुं तद्बीजसाधकानुमानेन बाध्यते तदनुपलंभ इति चेन्न तदिहापि समानमेतदेवाह गोयमेत्यादि वायुभूते परपीडक भूतिसो
दर्यभ्रातृत्वेन समानगोत्रत्वाद्गौतमेत्येवमामंत्रणं यत्त्वं ब्रूषे तदेतन्न भूतसमुदायातिरिक्तात्मसाधकानुमानसद्भावात्तत्त्वेनैव त्वत्प्रत्यक्षस्य बा
धितत्वादिति भावः प्रत्युत तवैव प्रत्यक्षविरोधः किं कुर्वत इत्याह यत्तेयं भूयचेयन्तिं वदत इति शेषः प्रत्येकावस्थायां पृथिव्यादिभूतेषु चैतन्या
भावस्यैव दर्शनात्तदस्तित्वं प्रत्यक्षेणैव बाध्यत इति प्रत्येकं भूतेषु चेतनेति कुर्वतस्तवैव प्रत्यक्षविरोध इत्यर्थः किं पुनः तदात्मसाधकमनुमानमि
त्याह पत्तेयं भूयचेयन्तिं वदत इति शेषः प्रत्येकावस्थायां पृथिव्यादिभूतेषु चैतन्याभावस्यैव दर्शनात्तदस्तित्वं प्रत्यक्षेणैव बाध्यत इति प्रत्येकं भू
तेषु चेतनेति कुर्वतस्तवैव प्रत्यक्षविरोध इत्यर्थः किं पुनस्तदात्मसाधकमनुमानमित्याह भूइंदियोवलद्धाणुसरणउ तेहिं भिन्नरूवस्स
चेया पंचगवक्खोवलद्धणुसरसत्तासरउ ॥ तेभ्यो भूतेंद्रियेभ्यो भिन्नरूपस्य कस्यापि धर्मश्चेतनेति प्रतिज्ञा भूतेंद्रियोपलब्धार्थानुस्मर
णादिति हेतुः यथा पंचभिर्गवाक्षैरुपलब्धानर्थाननुस्मरंस्तद्व्यतिरिक्तस्य कस्यापि देवदत्तादेः पुरुषस्य चेतनेति दृष्टांतः अयमत्र तात्पर्यार्थः
इह य एको यैरनेकैरुपलब्धानर्थाननुस्मरति स तेभ्यो भेदवान् दृष्टो यथा पंचभिर्गवाक्षैरुपलब्धानर्थाननुस्मरन् तेभ्यो देवदत्तः यश्च यस्मा
द्भूतेंद्रियात्मकसमुदायाद्भिन्नो न भवति किं तर्ह्यनन्यो नायमेकोऽनेकोपलब्धानामर्थानामनुस्मर्ता यथा शब्दादिग्राहकज्ञानो विज्ञानविशेषः
नैकोपलब्धानुस्मरतोऽपि च न तद्व्यतिरिक्तत्वेऽपि देवदत्तस्यापि गवाक्षमात्रमसंगो बाधकं प्रमाणं इंद्रियाण्येवोपलभंते न पुनस्तेभ्योऽन्य उपलभत

इतिचेन्न नतु परमे पितद्ग्र्पलब्धार्थानुस्मरणा तद्व्यापारेपिकदाचि दनुपलंभादित्य नंतरमेवक्ष्यमाणत्वादिति अनुमानांतरमप्यात्मसिद्धाय
प्राह नतुवरमेविसरणउं तव्वावारे विनोपलंभाउ इंदियभिन्नस्समई पंचगवरकाणभविणोव ॥ इंद्रियेभ्योभिन्न स्येवक स्वामी यो घटादिज्ञा
नलक्षणामतिरिक्ति प्रतिज्ञानुपरमेप्यंधत्व बाधिर्याधवस्थाया मिंद्रियव्यापाराभावे पितद्वारेणोपलब्धानामर्थानामनुस्मरणादितिहेतुः
अथवास्यामेवप्रतिज्ञायांतद्व्यापारेपींद्रियव्यापृतावपिकदाचिदनुपयुक्तावस्थायांवस्त्वनुपलंभादित्यपरोहेतुः यदिहींद्रियाण्येवद्रष्ट
णिभवेयुः नर्हिकाममतिविस्यारितास्यस्यानिमगण्णमात्रादीद्रियसर्वस्यापि योग्यदेशस्थितानामपि रूपशब्दादिवस्तूनामनुपयुक्तस्या
न्यमनस्कस्यशून्यचित्तस्योपलंभोनभवति ततोज्ञायतेनेंद्रियग्रामव्यतिरिक्तस्यैवकस्यचिदयमुपलंभः यथापंचभिर्गवाक्षैर्योभिद्रादि
वस्तून्यनुभवितुर्द्रष्टुरेकस्येतिदृष्टांतः। अत्रापिप्रयोगाभ्यांतात्पर्यमुपदर्श्यते तद्यथा इहयोयद्उपरमेपिहेवदतः अनुस्मरति चायमात्मांधबधिर
त्वादिकालेपींद्रियोपलब्धानर्थानितः सतेभ्योर्थांतरमिति तथा इंद्रियेभ्योव्यतिरिक्तआत्मातद्व्यापारेपियेरूपलभ्यानर्थान्नोपलभ्यतेसतेभ्योभि
न्नोदृष्टः यथास्थगितिगवाक्षोप्यनामन्यस्कतयानुपयुक्तोपश्यंस्तेभ्योदेवदत्तइति ।अपरमेप्यात्मनेंद्रियव्यतिरिक्तात्मसाधकमनुमानमाह
उवलस्सन्नेणविगारगहणउतदहिउधुवं अस्थि पुव्वावरवातायण गहणविगाराइपुरिसोव्व इहधुवानिश्चितं तदधिकस्तेभ्य इंद्रियेभ्यः सम
धिकोभिन्नः समस्तिजीवः अन्येनोपलभ्यान्येनविकारग्रहणादिहयोन्येनोपलभ्यान्येनविकारग्रहणादिहयोन्येनोपलभ्यान्येनविकारं
प्रतिपद्यते सतस्माद्भिन्नोदृष्टो यथाप्रवरप्रासादोपरिस्थितस्तनः पदपरिपाटीकुर्वाणः पूर्ववातायनेनरमणीमवलोक्यापरवातायनेनसमा
यातायास्तस्याः करादिनाकुचस्पर्शादिविकारमुपदर्शन्देवदत्तः तथाचायमात्माचक्षुषा स्त्रीकामभेनंदृष्ट्वारसनेनकंठ्यास्वलालास्रावादिवि
कारंप्रतिपद्यते तस्मात्तयोर्भिन्नइति अथवाग्रहणशब्दोपिहादानपर्यायःकृत्वान्यथानुमानंविधीयते ॥ इंद्रियेभ्योव्यतिरिक्तआत्मा अन्येनोप
लभ्यान्येनग्रहणादिहयआदेयंकरादिकमर्थमन्येनोपलभ्यान्येनगृह्णाति सताभ्यांभेदवान्दृष्टोयथापूर्ववातायनेनघटादिकमुपलभ्या
परवातायनेनगृह्णानस्ताभ्यांदेवदत्तः तथाचायमात्माचक्षुषोपलब्धंघटादिकमर्थंहस्तादिनाजीघृक्षतिताभ्यांभिन्नइति ॥अथान्यदनु
मानं सव्वेंदिउवलद्धाणसरणउंतदहिउगुमंतव्वो जहपंचभिन्नविणाणपुरिसाविण्णाणसंपण्णो सर्वेंद्रियोपलब्धार्थानुस्मरणात्तः कारणात्तद
धिकोभिन्नःपुरुषोभ्य पंचभिन्नविज्ञानपुरुषास्तेषामायानिस्पर्शादिविषयाणिविज्ञानानितैःसंपन्नस्तद्ज्ञाताध्यक्षःपुरुषस्तेभ्यःपंचभ्यो
जीवः दृष्टांतमाह यथापंचजनेभिन्नविज्ञानाश्चपंचभिन्नविज्ञानाः इच्छावशास्तस्येकस्पर्शरसगंधरूपशब्दोपयोगवतश्लस्यर्थः पंचभि

न्नविज्ञानश्च भिन्नः इदमत्रतात्पर्यं यइहपंचैकोपलब्धानामर्थानामेकोनुस्मर्तासतेभ्योभिन्नोदृष्टोयथेच्छानुविधायशब्दादिभिन्नजातीयविज्ञानपु
रुषपंचकानंदशेषविज्ञानाभिज्ञपुमानितिच्छानुविधायिविशेषणादिच्छायाश्चेंद्रियाणामसंभवात्सहकारिकारणतयाउपलब्धिकारणमात्रतया
इंद्रियेष्वपिसद्भावाउपचारतस्तेषामप्युपलब्धेरविरोधादहोषः किंचप्रतिपत्तुपायमात्रमेवैतत्प्रत्यतींद्रियेष्वर्थेष्वेकांतेनैवयुक्त्यन्वेषणपरै
र्भाव्यं उक्तंच आगमश्चोपपत्तिश्चसंपूर्णंदृष्टिकारणं अतींद्रियाणामर्थानासद्भावप्रतिपत्तयेइति अथापरमपिभूतव्यतिरिक्तात्मसाधकमनु
मानमाह विणाणंतरपुव्वं बालनाणमिहनाणभावाउ जहबालनाणपुव्वं जहनाणंतंचदेहहियं अन्यविज्ञानपूर्वकमिदंबालविज्ञानंविज्ञान
त्वादिहयद्विज्ञानं तदन्यविज्ञानपूर्वकंदृष्टंयथाबालविज्ञानेपूर्वकंदृष्टंयथाबालविज्ञानपूर्वकंयुवविज्ञानंयद्विज्ञानपूर्वकंचेदंबालविज्ञानंत
च्छरीरादन्यदेव पूर्वशरीरत्यागेपीहत्यविज्ञानकारणत्वात्तस्यचविज्ञानस्यगुणत्वेनगुणितेआत्मानमंतरेणासंभवाच्छरीरव्यतिरिक्तमात्मानं
व्यवस्थापयन्तशरीरमेवात्मेति विज्ञानत्वादितिप्रतिज्ञार्थैकदेशत्वादसिद्धोहेतुरितिचेन्नविशेषस्यपक्षीकृतत्वाद्धर्मितविशेषेपक्षीकृते
सामान्यंहेतुर्यथानित्योवर्णात्मकः शब्दः शब्दत्वान्मेघशब्दवदेवमिहापिबालविज्ञानमन्यविज्ञानपूर्वकमितिविशेषः पक्षीकृतोनतुसा
मान्यविज्ञानमन्यविज्ञानपूर्वकमितिपक्षीकृतंयेनविज्ञानत्वादितिप्रतिज्ञार्थैकदेशः स्याद्यथानित्यःशब्दःशब्दत्वादित्यादि॥अथा
न्यदनुमानं पढमोथणाहिलासोअण्णाहाराहिलाससमुप्पन्नोयं जहसंपयाभिलासो गुणमइउ सोयदेहहिउ ॥गोतमयोयमाद्यः स्तनाभिलाषो
बालस्यायमन्याभिलाषपूर्वकोदृष्टो यथासांप्रताभिलाषः यदभिलाषपूर्वकश्चायमाद्यः स्तनाभिलाषः सशरीरादन्यएवपूर्वशरीरपरित्या
गेपीहत्याभिलाषकारणत्वाज्ञानगुणश्चाभिलाषोनगुणिनमंतरेणसंभवत्यतोयस्तस्याश्रयभूतोगुणिसशरीरातिरिक्तआत्मेति आह॥
नन्वेकांतिकोयंसर्वस्याप्यभिलाषपूर्वकत्वानुपपत्तेर्नहिमोक्षाभिलाषोन्यस्तनाभिलाषपूर्वकइति पर्वच सामान्योक्तौमोक्षाभिलाषपक्षे
पिघटनएवमोक्षाभिलाषस्यापिघटनएवमोक्षाभिलाषस्यापिसामान्येनाभिलाषपूर्वकत्वादिति अनुमानांतरमाह बालसरीरदेहंतरपुव्वं
इंदियाइमत्ताउ जुवदेहोबालादिव सज्जस्सदेहोसदेहोत्ति बालशरीरंशरीरांतरपूर्वकं इंद्रियादिमत्वादिहयदिंद्रियादिमत्तदन्यदेह
पूर्वकंदृष्टं यथायुवशरीरंबालदेहपूर्वकं यत्पूर्वकंचेदंबालशरीरंतदस्माच्छरीरादर्थांतरंतदप्यपीहशरीरोपादानाद्यस्यचतच्छरीरंसभ
वांतरयायीशरीरीतदर्थांतरभूतोदेहवानस्त्यात्मानपुनःशरीरमेवात्मेतिसिद्धमिति अनुमानांतरमाह अण्णसुहदुक्खपुव्वं सुहाइयालस्ससंपदुक्ख
हेव अनुसरईमइनणउ अणुभूइमउयजीवोत्ति अन्यसुखपूर्वकमिदमाद्यंबालसुखं अनुभवात्मकत्वात्सांप्रतसुखवद्यत्सुखपूर्वकंचेद

मायंसरूवं नच्छरीरादन्यदेवतदत्य येपीहत्यसरूवकारणत्ताउ णश्चायंसच्चगुणिनमंतरेणत्तेभवत्यतोयत्तस्याश्रयभूतोगुणी सदेहादर्थांतरमिति सुखा
नुभूमिमयोजीवइतिसिद्धं एवंदुःखरागद्वेषभयशोकादयोप्यायोजनीयाइति अथवाग्जीवकर्म सिद्धान्तुक्थान्यप्यनुमानान्यात्रापिजीवसिद्धिप्रशक्त्या
वानेदस्यत्यनुग्रहार्थंपुनरप्याह संताणोणाईउ परप्परहेउ २भावाउ देहस्सयकम्मस्सय गोयबीयंकुराणंव यदिनामदेहकर्मणोरनादिसंतानस्त
हिंजीव सिद्धोक्किमायातमित्याह तोकम्मसरीराणं कत्तारंकरण कधभावाउ पडिवज्जतदभहियं दंडघडाणंकुलालंव अत्थिसरीरविहाया पइनिय
यागारउ घडस्सेव अरकाणंवरकरणउ दंडाईणंकुलालोव अथिंदियविस याणं आणादेयभाउवे वस्सं कम्माराइयादायालोएसंडासलोहाणंभो
त्तादेहाईणंभुधन्नणउनरोव भत्तस्स संघायाइत्तणउ अत्थियअत्थीघरस्सेवजोकत्ताइ सजीवो सज्झविरुद्धोत्तिने मईहोधामुत्ताइपसंगाउ
तन्नोसंसारिणोदोसो आसांव्याख्यापूर्ववदेवेति अथसुगतमतानुसारीकश्चिदाह ॥नगुसर्वपदार्थानांक्षणनश्वरत्वाज्जीवस्यापिक्षणि
कतयाशरीरेणसहैव विनिष्टत्वाद्वस्तुनः शरीरात्तस्यानर्थांतिरतैवेति किन्नव्यतिरिक्तत्वसाधनप्रयासेनेत्यत्राह जाईसरो विगनउ सरणाउ
बालजाइसरणोव्व जहवासदेवपत्तं नरोरसंतोविदेसंमि इहयोजातिस्मरोजीवः सप्राप्तविकशरीरविगमेपिवासतिन विगतइतिप्रतिज्ञा
सरणादितिहेतुः यथाबालजातोबालजन्मनिवृत्तं स्मरतीतिबालजातिस्मरणेवृद्धइतिदृष्टांतः यथात्वदेशेमालवकमध्यदेशादौ यत्तविदेशे
पिगतोनरः स्मरन्नविगतः इदमुक्तंभवति योन्यदेशकालाद्यनुभूतमर्थंस्मरतिसो विनष्टोदृष्टो यथाबालकालानुभूता महितसंस्काराउत्तरो
त्तरक्षणाःस्मरंतीतिवक्तव्यं पूर्वक्षणानांनिरन्वयविनाशेन सर्वथाविनष्टत्वादुत्तरोत्तरक्षणाभां सर्वथाविनष्टत्वादुत्तरोत्तरक्षणानांस
र्वथाविनष्टत्वादुत्तरोत्तरक्षणानांसर्वथान्यत्वान्नचान्यानुभूतमन्योनुस्मरति देवदत्तानुभूतस्ययज्ञदत्तानुस्मरणप्रसंगादिति अथ
पराभिप्रायमाशंक्यप्रतिविधातुमाह अहमन्नसिखणिउविहु सुमरइविन्नाण संतइगुणाउ तहविसरीराइन्नोसिद्धोविणाणसंताणो अथे
वंमन्यसेत्वं दृष्टिकोपिक्षणतंगुरोपिजीवःपूर्ववृत्तांतंस्मरत्येवकुतइत्याह विज्ञानानांविज्ञानलक्षणानांसंततिः संतानस्तस्यागुणत्वात्
थ्यरूपतस्मादितिक्षणसंतानस्यावस्थितत्वात्क्षणनश्वरोपिस्मरतीत्यर्थः अत्रोत्तरमाह ननुतथाप्येवमपिसति ज्ञानलक्षणसंतानस्याग्रे
तनशरीरसंक्रांतेर्भवांतरसद्भावः सिद्ध्यति सर्वशरीरेभ्यश्चविज्ञानसंतानस्येच्छमर्थांतरता साधिताभवति अविच्छिन्नविज्ञानसंता
नात्मकश्चैवंशरीरादर्थांतरभूतआत्मासिद्धोभवतीति नदेवंपरभवमंगीकृत्याविनष्टस्मरणमावेदितमिदानीमिहभवमंगीकृत्यविनष्टस्म
रणमावेदितमिदानीमिहभवमंगीकृत्याह अथवाक्षणिकत्वमभ्युपगम्योक्तमधुनातत्क्षणिकमेवनभवतीत्याह नयसव्वहेवखणियं ना

णंपुव्वोवलद्धसरणाउ खणिउनसरइभूयं अहजम्माणंतरविणठो नचसर्वथैवक्षणिकंज्ञानंवक्तुंयुज्यते कथं किंतुक्षणिकतोभगवानपीछत्यवे
तिसर्वथैवेत्युक्तं कस्मात्पुनर्ज्ञानंनक्षणिकमित्याह नयसव्वहेवखणियंनाणंपुव्वोवलद्धसरणाउ खणिउनसरइपेभ कस्मात्पुनर्ज्ञानंक्षणि
कमित्याह पूर्वोपलब्धस्य बालकालाद्यनुभूतसर्वथवद्धसाधवस्थायामपिस्मरणदर्शनान्नचैतदेकांतक्षणिकत्वेसत्युपपद्यते कुतइ
त्याह खणिउइत्यादि यःक्षणिकोनायंनूनमतीतंस्मरतियथाजन्मानंतरविनष्टः एकांतक्षणिकंचेष्यतेज्ञानमतः स्मरणाभावप्रसंगइति
क्षणिकज्ञानपक्षेदूषणांतरमप्याह जस्सेगमेगवंधप्पभंगंतेयखणियंचविणाणं नस्सा कत्तंकदाविरवि॥ यस्यवादिनोबौद्धस्यैकविज्ञान
संततयःसत्वाइतिवचनादेकमेवासहायंज्ञानंतस्यसर्वमपिवस्तुक्षणिकमित्येवंभूतविज्ञानंकदाचिदपिनयुक्तमिति संबंधःइष्यतेचसर्वक्षणि
कताविज्ञानंसौगतैः यत्सत्तत्सर्वंक्षणिकंतथाक्षणिकाःसर्वसंस्कारारत्यादिवचनादेनचक्षणिकतायाहकज्ञानस्यैकत्वेनसंभवत्येनयदाहित्रिलोक
तलगतैः सर्वैरपिक्षणिकैःपदार्थैःपुरःस्थितैर्वा तदेकविज्ञानंजन्यतेततस्तदेतज्ज्ञानीयाथ्युतक्षणिकाः सर्वेप्यमीपदार्थादितिनचैवंसंवेरापितैस्तज्जन्य
नेकुतइत्याह॥पवधपणंति यस्मादेकमेवनातिनियतंबंधनंनिबंधनमालंबनंयस्यतदेकनिबंधनंज्ञानं अंतःकथमशेषवस्तुस्तोमव्यापिनीक्षणिकताम
बुध्यतेअपिचैकालंबनत्वेपियद्यशेषपदार्थविषयाणामपिज्ञानानांयुगपदुत्पत्तिरिष्येत आत्माचतदर्थानुस्मर्तानदास्याशेषपदार्थक्षणिकतापार
ज्ञानंनचाशेषार्थग्राहकानेकज्ञानानांयुगपदुत्पत्तिरिष्यते किंचतदेकमप्येकार्थविषयमपिचविज्ञानंसर्वपदार्थगतक्षणिकतामतास्यदेवयद्युत
त्पन्नंतराध्वंसिनाभविष्यदविनाशित्वेहिनदवस्थिततयाउपविष्टसदन्यमन्यंचातुर्थमुत्पत्त्यनंतरमुपरमंतदृष्टा सर्वमेवास्मत्क्रमस्मत्सूजातिय
वर्ज्येचवस्तुक्षणिकमेतत्येवेबुध्येतनंचैतदस्ति ॥कुतइत्याह॥ एगंतेणखनियंचेति यस्यचबौद्धस्यैकांतेनक्षणिकंक्षणध्वंस्येनविज्ञानंनपुनर्विरा
बस्थायिनस्यकथंसर्ववस्तुगतक्षणिकतापरिज्ञानंस्यात्तस्मात्क्षणिकमेवप्रमातृज्ञानमेष्टव्यं तच्चगुणत्वादनुरूपंगुणिनमात्मानमंतरेणानस
भवत्यतः सिद्धःशरीराद्व्यतिरिक्त आत्मेति उक्तगाथोक्तमेवकंचिदर्थंभावयति जंसविसयनियययंविय जम्माणंतरहयंचतंकिहण्णु नाहितिस
व्वइयविणाणं विसयखणभंगूयाईणि यत्स्वविषयमात्रनियतंजन्मानंतरहतंचप्रमातृविज्ञानं तत्कथंबहुविज्ञानविषयगतान्क्षणभंगानिरा
तमकत्वसुखदुःखिरवतादीन्धर्मान्ज्ञास्यतिनकथंचिदित्यर्थः अत्रपरमाशंक्यपरिहरन्नाह गिण्हेयस्स घभंगं जईयमईसविसयाणुमाणाउ तपि
नजउणुमाणंजुत्तंसभावइसिद्धीउ॥ यदिचयरस्यैवंभूतामतिःस्याद्यदुतएकमप्येकालंबनमपिक्षणिकमपिचप्रमातृविज्ञानंसर्ववस्तुगतल

MEMORIAL
इन्दिरागांधीराष्ट्रीयकलाकेन्द्रम्

णभंगंग्रण्हीयात् कुतइत्याह स्वविषयानुमानादितउक्तंभवति यस्मादयमस्यद्विषयः क्षणिकः अहंचक्षणनश्वररूपंततोविज्ञानसाम्यादन्यान्यपि
विज्ञानानिक्षणिकानि विषयसाम्याच्चान्येपिविषयाः सर्वेपिक्षणिकाइत्येवंस्वंचविषयाश्चस्वविषयास्तदनुमानात्सर्वस्यापि वस्तुनस्तेमस्यक्षणि
कत्वादिगृह्यते अत्रदूषणमाह ॥ तंपीत्यादि तदपिनयुक्तंघटमानकंकुतइत्याह यतस्तात्स्वविषयानुमानमन्येषांविज्ञानानामन्यविषयाणांचपक्षी
कृतानांसत्वादिप्रसिद्धौविनयुज्यते नहिसत्वेनाप्यप्रसिद्धे धर्मिणिक्षणिकतादिधर्मः साध्यमानोविभ्राजते कोहिनामशशविषाणादेनसत्वेना
प्रतीतेषुकृतकत्वादिनाऽनित्यत्वादिधर्म्मान्साधयति तत्रपक्षः प्रसिद्धोधर्म्मीत्यादिवचनान्नचेदमेकमेकालेवनक्षणिकंच ज्ञानमेतद्वोद्धुंशक्नो
ति यदुतान्यज्ञानानिसंतितद्विषयाश्चविद्यते तेषान्वविषयाणांस्वविषयज्ञानजननस्वभावाद्यएवंभूताधर्म्माःसंतीति एतदपरिज्ञानेन
कथमेतेषांक्षणिकतांसाधयिष्यति धर्म्मिणएवाप्रसिद्धेः स्यादेतत्स्वविषयाणांस्वविषयानुमानादेवान्यविज्ञानादिसत्तापिमेत्स्यत्येव ॥तथाहि ॥
यथाहमस्मितथान्यान्यपिज्ञानानिसंति यथाचमद्विषयोविद्यते एवमन्येपिज्ञानविषयाविद्यंते एवयथाचाहंमद्विषयश्चक्षणिकः एवमन्य
ज्ञानानितद्विषयाश्चक्षणिकाएवेत्येवंसर्वेषांसत्वंक्षणिकताचस्वविषयानुमानादेवसेत्स्यतीति एतदप्ययुक्तं ॥ यतः सर्वक्षणिकताग्राहकंज्ञानंक्षण
नश्वरत्वानजन्मानंतरंमृतयित्वाहमस्मिक्षणिकंचेत्येवमात्मानमपिनावबुध्यतेन्यपरज्ञानंतुतस्यदूरोत्सारितमेवकिंचतत्स्वविषयमात्रस्यापि
क्षणिकतांगच्छति ॥ समानकालमेवद्वयोरपिविनष्टत्वाद्यदिहिस्वविषयंविनश्यतांतंदृष्ट्वानक्षणिकतांनिश्चित्यस्वयंपश्चात्कालांतरेणद्विनश्येत्त
दास्यात्तस्यस्वविषयेक्षणिकताप्रतिपत्तिर्नचैतदस्तिज्ञानस्यविषयश्चनिजरक्षणंजनयित्वासमानकालमेवविनाशाभ्युपगमान्नचस्वसंवेदन
प्रत्यक्षेणवाक्षणिकताप्रतिपत्तिर्नचैतदस्ति ज्ञानस्यविषयस्यनिजक्षणंनजनयित्वासमानकालमेवविनाशाभ्युपगमान्नचस्वसंवेदनप्रत्यक्षेण २३१
ह्यिप्रत्यक्षेणवाक्षणिकताग्रह्यतइति सौगतैरिष्यतेअनुमानगम्यत्वेनतस्याभीरभ्युपगमादिति अत्रपरस्योत्तरमाशंक्यनिराचिकीर्षुराह ॥
जाणेद्धवासणाउ साविहुवासंतवासणिद्धाणंजुत्तासमेच्चदोण्हं नउजम्माणंतरहयस्स ॥ स्यादेतत्सर्व३विज्ञानक्षणेकृत्तरोत्तरविज्ञानक्षणाना
मेवंभूतावासनाजन्यते ययान्यविज्ञानतद्विषयाणांसत्वक्षणिकताहानिप्रसंगः किंचसापिवासनाक्षणिकाक्षणिकावाक्षणिकत्वेकथंतद्
त्सर्वक्षणिकतापरिज्ञानंअक्षणिकत्वेनप्रतिज्ञाहानीरिति नदेवंपरपक्षंदूषयित्वासांप्रतंस्वपक्षमुपदिदर्शयिषुरुपसंहरन्नाह बहुविन्ना
णप्पभवोजुगवमणेगत्थयाहवेगस्स ॥ विणाणावच्छावा पउच्चविनीविधोउवा विणाणरवणाविणासे दोसाइच्चादयोपरस्संति नउवियस्सं

भूयसुम विणाणमयंमिजीवंमि नदेवंविज्ञानस्यप्रतिक्षणंविनाशोभ्युपगम्यमानेइत्यादयोदोषाः प्रसजंति केपुनस्तेदोषाइत्याह चहुविणाणेत्या
दिइहैवंसंबंधः क्षणनश्वरविज्ञानदिनाभुवनत्रयांवर्त्तिसर्वार्थग्रहणार्थंयुगपदेवबहूनांज्ञानानांप्रभवउत्पादोभ्युपगंतव्यः नदाश्रयभूत
श्चदृष्टानामर्थानामनुस्मर्तावास्थिन आत्माभ्युपगंतव्योन्यथातस्तत्सर्वक्षणिकक्षणिकाः सर्वसंस्काराः निरात्मनः सर्वभावाइत्यादि सर्व
क्षणिकतादिविज्ञानंनोपपद्येततदभ्युपगमेचस्वमतत्यागप्रसक्तिः अथवाक्षणिकंविज्ञानमिच्छताएकस्यापिविज्ञानस्ययुगपदनेका
र्थतासर्वभुवनांतर्वर्त्तार्थग्राहिताऽभ्युपगंतव्यायेनसर्वक्षणिकतादिविज्ञानमुपपद्यते नचैतदिष्यते दृश्यतेवाविष्याबावस्थायति॥ यदिवाअ
वस्थाविज्ञानस्यानवस्थाविज्ञानावस्थाभ्युपगंतव्या इदमुक्तंभवति ॥ विज्ञानस्यानल्पकत्वाग्रशोवस्थानमेष्टव्यं येनतत्सर्वक्षसमासीनमन्या
न्यवस्तुविनश्वरतांवीक्ष्यप्रमाणंसर्वक्षणिकतामपगच्छेदिति सर्वमागेवोक्तमेव एवंचाभ्युपगमेविज्ञानसंज्ञामात्रविशिष्टआत्मैवाभ्युपगतो
भवति अथेनद्वहुविज्ञानप्रभवादिकंनेष्यते तर्हिप्रतीत्यवृत्तिविघातः प्राप्नोति इदमत्रहृदयं ॥ कारणंप्रतीत्याश्रित्यकार्यस्यवृत्तिः प्रव
निरूत्पत्तिरितियावत्सपुनः कारणकार्यावस्थायांकथंचिदप्यन्वेतित्येवसौगतैरभ्युपगम्यते इत्थंचाभ्युपगम्यमानेऽतीतस्मरणादिसमस्तव्य
वहारोच्छेदप्रसंगः एवंहिव्यवहारप्रवृत्तिः स्याद्यद्यतीतानेकसंकेतादिज्ञानाश्रयस्तत्तद्विज्ञानरूपेणपरिणामान्वयीआत्माभ्युपग
म्यते तथाभ्युपगमेचसतिप्रतीत्यवृत्त्यभ्युपगमविघातः स्यादित्यादि ॥ नयदिविज्ञानस्यक्षणविनाशेएतेदोषाः प्रसजंतितर्हिकामीदोषा
नप्रसजंतीत्याह ॥ नउठियेत्यादि नत्वस्मदभ्युगतेजीवेस्फ्रूपगम्यमानोएतेदोषाः प्रसजंति कथंभूतेजीवेस्थितसंभूतस्युतविज्ञानमयेकथंचि
द्रव्यरूपतयास्थितंकथंचिदुत्तरपर्यायेणसंभूतंकथंचित्पुनःपूर्वपर्यायेणच्युतंविनष्टंयाद्विज्ञानेतन्मयेइत्यर्थः नसमादमुमेवात्माद्यव्ययध्रौ
व्ययुक्तेशरीरादर्थांतरभूतमस्मदभ्युपगतमात्मानंसमस्तव्यवहारसिद्धयेप्रतिपद्यस्वेति नन्वेवंभूतस्यात्मनः कथंभूतानिज्ञानानिप्रवर्त्तते
कस्माच्चहेतोस्तानिजायंतइत्याह तस्सविचित्तावरण रकयोवसमजाइं चित्तरूवाइं रवणियाणियकालंतर वित्तीणीमेमइविह्राणाइं ॥ मते
र्मतिज्ञानस्यविधानानिनानाभेदरूपाणितस्ययथोक्तरूपस्यात्मनःप्रवर्त्ततेकथंभूतानीत्यादि विचित्रोयोसौमतिज्ञानावरणक्षयोपशा
मस्तनोजानाति अतएवस्वकारणभूतक्षयोपशमवैचित्र्याद्विचित्ररूपाणितथापर्यायरूपतयाक्षणिकानिद्रव्यरूपतयानित्यत्वात्कालां
तरवृत्तीनि उपलक्षणंचमतिविधानानिश्रुतावधिमनःपर्यायज्ञानविधानान्यपियथासंख्यंश्रुतावधिमनःपर्यायज्ञानावरणक्षयो

पशमवेचित्र्याद्विचित्ररूपाणि यथासंभवं तस्य दृष्टव्यानि केवलज्ञानं तेकमेवाविकल्पं भेदरहितमुदितमाख्यातं भगवद्भिर्यतः सर्वस्यापि निजाव
रणस्य क्षयएव द्रष्टव्यमिति एतदेवाह निखीसंताणोसिं सव्वावरणपरिसंखए जं च केवलमुदियं केवल भावेनाणंतमोविगप्पमिति ॥ एतेषां
च मतिज्ञानादिविधानामेव विशेषतज्ञानमात्ररूपसंतानो नित्यो व्यवच्छिन्नरूपः केवलज्ञानं त्वविकल्पं भेदरहितमुदितमाख्यातं भगवद्भिर्य
तः सर्वस्यापि निजावरणस्य क्षय एवतदुपजायते अतोविकल्पं केवल भावेनानंतकालावस्थायित्वातदनंतार्थविषयत्वाच्चानंतमिति पुनर्वा
युभूतिः संदिहानः प्राह सोजइदेहादन्नो तोपविसंतोवनिस्सरंतोवा कीस नदीसइ गोयम दुविहाणवलद्धि उसाय असउखरसिंगस्सव स
उविहूराइह्यवभिहिया रूहमाकत्तनणउं कम्माणुगयस्सजीवस्स यदिनाम शरीरादन्यो सौजीवस्ततो घटेचटके इवशरीरे प्रविशन्निस्सरन्वा
किमितिनोपलभ्यते भगवानाह गोयमेत्यादि ॥ यतोद्विविधानुपलब्धिरस्तिअतस्तस्याअनुपलभ्येः कारणान्नौतमजीवोनदृश्यते कथं
पुनः सानुपलब्धिर्द्विविधा इत्याहे साचअनुपलब्धिरेकाअसतोभवति यथाखरशृंगस्य द्वितीयानुसतोप्यर्थस्यभवति कुतइत्याह दू
रादिभावादितिदूरपतन्नपक्षीनिदृश्यते यथा स्वर्यादिः आदिशब्दादतिसन्निकर्षादितिसौक्ष्म्यात्मनोनवस्थानादिंद्रियापाटवान्मतिमां
द्यादशक्यत्वावरणादभिभवात्सामान्यादनुपयोगादनुपायाद्विस्मृतेर्दुरागमान्मोहाद्विदर्शनाद्विकारादक्रियातो नधिगमात्कालविप्रक
र्षात्स्वभावविप्रकर्षाच्चेति तदनुपयोगादनुपायाद्विस्मृतेर्दुरागमान्मोहाद्विदर्शनाद्विकारादक्रियातो नधिगमात्कालविप्रकर्षात्स्वभावविप्र
कर्षाच्चेति तत्रातिसन्निकर्षात्सन्नप्यर्थो नोपलभ्यते यथा नेत्रहूषिका पक्ष्मादिः अति सौक्ष्म्यात्परण्वादिः ३ मनोनवस्थानात्सतोप्यनुपलब्धि
र्यथानष्टचेतसां ४ इंद्रियापाटवात्किंचिद्बधिरादीनां ५ मतिमांद्यादनुपलब्धिः सतामपिसूक्ष्म शास्त्रार्थविशेषाणां ६ अशक्यत्वात् स्वक
र्णकाटिकामस्तकपृष्ठादीनां आवरणात्कुड्यादिस्थगितलोचनादीनां करकुम्बा यावत्तानांच ८ अभिभवात्सतस्सूरतेजसि दिवसेतारका २३२
णां ९ सामान्यात्सूपलक्षितस्यापि माषादेः समानजातीयमाषादिराशिपतितस्याप्रत्यभिज्ञानात्सतोप्यनुपलब्धिः १० अनुपयोगाद्रूपो
पयुक्तस्य शेषविषयाणां ११ अनुपायात् शृंगादिभ्यो गोमहिष्यादिपयःपरिणामजिज्ञासो १२ विस्मृतेः पूर्वोपलब्धस्य १३ दुरागमाद्रूपदेशा
त्सुभ्रान्तिरूपकरीतिकादिवि प्रलंभितमतेः कनकादीनां सतामप्यनुपलब्धिः १४ मोहात्सतामपिजीवादितत्वानां १५ विदर्शनात्सर्वथानांधादी
नां १६ वार्धक्यादिविकाराद्दुरा पूर्वोपलब्धस्यसतोप्यनुपलब्धिः १७ अक्रियातोभूखननादिक्रियाभावाद्वृक्षमूलादीनामनुपलब्धिः १८

अनधिगमाच्छास्त्राश्रवणात्तदर्थस्यसतोप्यनुपलब्धिः १९ कालविप्रकर्षाद्भूतभविष्यद्वृषभदेवपद्मनाभतीर्थकरादीनामनुपलब्धिः २० स्वभा
वविप्रकर्षान्नभःपिशाचादीनामनुपलंभः २१ तदेवंसतामप्यर्थानामेकविंशतिविधानुपलब्धिः प्रवर्तते अतोस्यकर्मानुगतस्यसंसारिणो जी
वस्यामूर्तत्वान्नभस इवकर्मणत्वस्यनु सौक्ष्म्यात्परमाणोनिव सतोनुपलब्धिर्नासतः कथं पुनरेतद्बुध्यते नासन आत्मनोनुपलब्धिः किं
तुसतइति चेदुच्यते अनुमानेनात्सत्वस्यसाधितत्वादिति वेदोक्तद्वारेणापि देहव्यतिरिक्तमात्मानं साधयितुमाह । वेहाणणेवजिएजम
ग्रहोत्तादस्सग्गकामस्स वेहविहियं विहिणइ दाणाइफलं च लोयम्मि शरीरमात्रेजीवे सति गौतम यत्स्वर्गकामस्यवेद विहितमग्निहोत्रा
द्यनुष्ठानं तद्विहन्यते देहस्यवह्निनाअत्रैवभस्मीकरणात्जीवाभावेकस्यासौस्वर्गोभवेदितिभावः दानादिफलंचानुभवितुरभा
वात्कस्यभवेदिति विरुद्धवेदपदश्रवणनिबंधनश्चैषवायुभूतेः जीवशरीरमात्रेजीवेसतिगौतम यत्स्वर्गकामस्यवेद विहितमग्नि
होत्राद्यनुष्ठानं नद्विहन्यते देहस्यवह्निनाअत्रैवभस्मीकरणात् जीवशरीरयोर्भेदाभेदविषयः संशयो नोवेदपदार्थकथनद्वारेण।
पितमपाकुर्वन्नाह विणाणघणाईणं वेयपयाणं तमत्थमविदंतो देहाणणं मन्नसि ताणं च पयाणं अयमत्थो ॥ विज्ञानघनाख्यः पुरुषप
वायंभूतेभ्योर्थांतरमित्यादिव्याख्यापूर्ववदेव अतएवप्रागुक्तं शरीरतयापरिणतोभूतसंघातोयं विधमानकर्तृकः आदिमत्प्रतिनिय
ताकारत्वाद्घटवद्यश्चतत्कर्तासतदतिरिक्तोजीवइति भूतातिरिक्तात्मप्रतिपादकानिवेदवाक्यानि नचापि प्रतीतान्येव नघथा ॥ सत्ये
नलभ्यस्तपसाह्येषब्रह्मचर्येणनित्यंज्योतिर्मयोहिशुद्धोयंपश्यंतिधीरायतयः संयतात्मानइत्यादि तदेवंसर्वेषामपि वेदवाक्यानांभूता
तिरिक्तस्यजीवस्यप्रतिपादकत्वात् भूतेभ्योतिरिक्तंजीवं प्रतिपद्यस्वेति एवंभगवतासंशयेऽपनीते वायुभूतिः किंकृतवानित्याह छिन्नंमी
त्यादि तदेवं सर्वेषामपि गाथा व्याख्यापूर्ववदिति ॥ आसामपि चत्वारिंशद्गाथार्थः १३८ इति तृतीयोगणधरवादः समाप्तः ॥३॥ अथचतुर्थ
स्यव्यक्तगणधरस्यवक्तव्यतामभिधित्सुराह तेपव्वइएसोउं वियत्तुआगच्छईजिणसगासं वच्चामिणवंदामि वंदित्ता पज्जुवासामि ॥ रूगमा
एवपितिव्यक्तनामाद्विजोपाध्यायः समागतोभगवतः समीपं ततोभगवता किंकृतमित्याह आभट्ठोयगाह व्याख्यातपूर्वविदिति आभाष्यभ
गवता किमुक्तोयमित्याह किमन्ने अत्थिभूया उयाहु नत्थित्ति संसउतुज्झ वेयपयाण यअत्थं नयाणसी तेसिमोअत्थो । पृथिव्यप्तेजो
वाय्वाकाशलक्षणानि पंचभूतानि तानि चाकिंसंतिनवेति त्वंमन्यसे संशयश्चतवायं विरुद्धवेदपदश्रवणनिबंधनोवर्तते तानिचामूनिपदानि

स्वप्नोपमं वै सकलमित्येष ब्रह्मविधिरंजसा विज्ञेय इत्यादि तथा द्यावापृथिवी इत्यादि तथा पृथिवी देवता आपो देवता इत्यादि एतेषां चायमर्थस्तव
प्रतिभासते स्वप्नोपमं स्वप्नसदृशं वै निपातोऽवधारणे सकलमशेषं जगदित्येष ब्रह्मविधिः परमार्थप्रकारः अंजसा प्रगुणेन न्यायेन विज्ञेयो ज्ञातव्य
इत्यादि एतेषां चायमर्थस्तव प्रतिभासते स्वप्नोपमं स्वप्नसदृशं वै निपातोऽवधारणे सकलमशेषं जगदित्येष ब्रह्मविधिः परमार्थप्रकारः अंज
सा प्रगुणेन न्यायेन विज्ञेयो ज्ञातव्य इत्यादि तदेवमादीनि वेदपदानि किल भूतनिह्नवपराणि द्यावापृथिव्यादीनि तु तत्सत्ताप्रतिपादका
न्यतस्त्वं संशयं करोषि तेषां वेदपदानां त्वमर्थं न जानासि च शब्दाद्युक्तिहृदयं च न वेत्सि येन संशयं कुरुषे तेषां चायमर्थो वक्ष्यमाणलक्षण इति अ
थ भाष्यं भूएसु जस्स संका सुविणयमाउ व्व माइ होज्ज त्ति न वियारिज्जंताइं भजंति जं सव्वजुत्तिं भूयाइ संसयाउ जीवाइ कओ कह त्ति ते बुद्धी न
स्वप्नसदृशं संका मन्नसी मायोवमं लोयं आयुष्मन् व्यक्त भूतेषु भवतः संदेहः यतः स्वप्नोपमानि मायोपमानि चैतानि भवेयुरिति त्वमन्यसे
यथा हि स्वप्ने किल कश्चिन्निःस्वोऽपि निजगृहाङ्गणे गजघटातुरगनिवहमणिकनकराश्यादिकमद्भुतमपि पश्यति मायायां चेन्द्रजालवि
लसितरूपायामविद्यमानमपि कनकमणिमौक्तिकरजतभाजनारामपुष्पफलादिकं दृश्यते तथैतान्यपि भूतान्येवंविधान्येवेति मन्यसे यथ
स्माद् विचार्यमाणान्येतानि सर्वथैव न काञ्चिद्युक्तिं भजन्ते सहन्ते भूतेषु च संशये जीवपुण्यपापादिषु किल का वार्ता भूतविकाराधिष्ठानत्वात्ते
षामिति तव बुद्धिः स्यात् सर्वस्यापि भूतजीवादिवस्तुनस्त्वदभिप्रायेणाभावात्सर्वशून्यताशङ्काऽभवाग्निरवशेषमपि लोकं मायोपमं स्वप्नेन्द्र
जालतुल्यं मन्यसे इति युक्तिं चात्र व्यक्ते चेतोगतां भगवानाविष्कुर्वन्नाह जह किर न सओ परओ नोभयओ नावि अन्नओ सिद्धी भावाण भवेक्खाए व
वियत्त जह दीह हस्साणं ॥ व्यक्त भवतोऽयमभिप्रायो यथा किल न स्वतो न परतो न चोभयतो नाप्यन्यतो भावानां सिद्धिः संभाव्यते कुत इत्याह ॥ २३३
अपेक्षातः कार्यकारणादिभावस्यापेक्षिकत्वादित्यर्थः ह्रस्वदीर्घव्यपदेशवत् तथाहि यत्किमपि भावजातमस्ति तेन सर्वेणापि कार्येण
वा भवितव्यं कारणेन वा भवितव्यं तत्र कार्यं कारणेन क्रियत इति कारणापेक्षत्वात्तस्य कार्यव्यपदेशो न स्वतस्तस्य कार्यत्वं स्वतः सिद्धं किमप्यस्ति उ
एवं कारणमपि कार्यं करोतीति कार्यापेक्षयैव तस्य कारणत्वव्यपदेशो न तु तस्य कारणत्वं स्वतः सिद्धं किंचिदस्ति तदेवं कार्यादिभावः
स्वतो न सिद्ध्यति यच्च स्वतो न सिद्धं तस्य परतोऽपि सिद्धिर्नास्ति यथा खरविषाणस्य न तत्र च न स्वतः कार्यादिभावो नापि परतः स्वपरोभया
त्तर्हि न सिद्धिरिति चेत्तदयुक्तं व्यस्ताउभया तत्सिद्धेरभावात् तत्समुदायेऽपि तदयोगात् न हि सिकताकणेषु प्रत्येकमसत्तैलं तत्समुदाये प्रादुर्भवति

अपि च ॥ उभयतः सिद्धिपक्षे इतरेतराश्रयदोषः प्राप्नोति यावद्धि कार्यं न सिध्यति न तावत्कारणसिद्धिरस्ति यावच्च कारणं न सिध्यति न तावत्का
र्यसिद्धिः मा भूदयमितरेतराश्रयदोषस्तस्मान्नोभयतोऽपि कार्यादिभावसिद्धिः नाप्यन्यतो नुभयत इत्यर्थः स्वपरोभयव्यतिरेकेणान्यस्य वस्तुनोऽस
त्त्वेन निर्हेतुकत्वप्रसङ्गात् एवं ह्रस्वदीर्घलक्षणे दृष्टान्तेऽप्यपेक्षात इत्यस्य ह्रस्वदीर्घत्वासिद्धिलक्षणेन साध्येनान्वयो भावनीयः तथाहि ॥ प्रदेशिन्या
अंगुष्ठमपेक्ष्य दीर्घत्वं प्रदीयते मध्यमां त्वपेक्ष्य ह्रस्वत्वं परमार्थेन त्वियं स्वतो न ह्रस्वा नापि दीर्घेति देवं न स्वतो ह्रस्वदीर्घत्वयोः सिद्धिः ततः परतः उभयतोऽनुभ
यतश्च तत्सिद्ध्यभावो यथोक्तवद्भावनीयस्तदुक्तं न दीर्घेऽस्तीह दीर्घत्वं न ह्रस्वेनापि च द्वये तस्मादसिद्धं शून्यत्वात् सदित्याख्यायते कथं हि ह्रस्वप्रतीत्य सिद्धं
दीर्घं प्रतीत्य ह्रस्वमपि न च किंचिदस्ति सिद्धं व्यवहारवशाद्वदत्येवं ॥ २ ॥ इतश्च सर्वं जगच्छून्यताकुत इत्याह अत्थि जमग्गाणगयावसन्नेगयारदीसाउं
संपुण्णमिलयाथवा सुणावा सव्वहाभावा नन्वस्तित्वघटयोरेकत्वमनेकत्वं वा यद्येकत्वं तर्हि सर्वैकता प्राप्नोति यो यो स्ति स स घट इत्यस्तित्वे घटस्य प्रवेशा
त्सर्वत्र स्यात् घटत्वप्रसङ्गः स्यान्न पटादिपदार्थान्तरं घटो वा सर्वसत्त्वाव्यतिरेकात्सर्वात्मकः स्यादथवा यो घटः स एवास्तीति घटमात्रे स्तित्वं प्रविष्टं ततोऽन्यत्र
सत्त्वाभावात् घटस्य सर्वस्याप्यभावप्रसङ्गतो घट एवैकः स्यादथवा यो घटः स एवास्तीति घटमात्रे स्तित्वं प्रविष्टं ततोऽन्यत्र सत्त्वा स्यात् सोऽपि वा न वेद घटः
व्यावृत्तो हि प्रतियोगिनि यदा च न तत्प्रतिपक्षभूतोऽघट एव नास्ति तदा किमपेक्ष्यासौ घटः स्यादिति सर्वशून्यैमिति अथ घटसत्त्वयोरन्यत्वमिति द्वितीयो विकल्पः त्व
तर्हि सत्त्वरहितत्वादसन्घटः खरविषाणवदिति अपि च सतो भावः सत्त्वमुच्यते तस्य च सदाधारभूतेभ्यो घटादिभ्यः स चेदन्यत्वे सत्त्वमेव स्यादाधारादन्यत्वे
आधेयस्याप्यनुपपत्तेः तदेवमस्तित्वेन सह घटादीनामेकत्वान्यत्वविकल्पाभ्यामुक्तन्यायेन सर्वैकत्वादिदोषप्रसङ्गात्सर्वेऽपि भावा अनभिलप्या वाभ
वेयुः सर्वाशून्या वा स्युः सर्वथैव तेषामभावो भवेदित्यर्थः अपि यन्नोभयपक्षे तत्तावन्निर्विवादं खरविषाणवदसत्त्वेनोपनिवृत्तानलक्ष्या यदप्युत्पत्तिम
ल्लोकेऽभ्युपगम्यते तस्यापि जाताजातादिविकल्पयुक्तिभिः स्यादो न घटत इति शून्यैव युक्तिरित्येतदेवाह जायाजायोभयओ न जायमाणं च जायए जम्हा
अणवत्थाभावोभयदोसाओ सुन्नया तम्हा इह भावं जातं जायते जाततादेन त्रिः पटघटवदथमपि जायते तदनवस्थानात्तत्वाविशेषेणपुनः २ जन्म
प्रसंगादथजातं जायते तदप्ययुक्तं ॥ कुत इत्याह उभयदोषोल्लसत्कोभयपक्षोक्तदोषापत्तेरित्यर्थः किं च ॥ एतज्जाताजातलक्षणमुभयमस्ति वा
नवा यद्यस्ति तर्हि जातमेव तत्पुनरुभयं तत्र चोक्तो दोषः अथ नास्ति तथापि नोभयं न त्विति तज्जातमेव तत्राप्यभिहितमेव दूषणं नापि जायमानं

जायते पूर्वोक्तविकल्पद्वयानतिवृत्तेस्तथा हि तदपि जायमानमस्ति न वा यद्यस्ति तर्हि जातमेव तन्नास्ति चेन्नतर्हि जातमेव पक्षद्वयेपि चास्मिन्नभिहित एव
दोषः उक्तं च ॥ गतं न गम्यते तावदगतं नैव गम्यते गतागतविनिर्मुक्तं गम्यमानं गम्यते इत्यादि यस्मादेवं तस्मादेतद्वस्त्वादिदोषप्रसङ्गेनैव स्तूनामु
त्पादायोगाज्जगतः शून्यतैव युक्तेति प्रकारान्तरेणापि वस्तूत्पत्त्ययोगः शून्यतासाधनार्थमाह हेउपच्चयसामग्गी वीसुंभावे स नो य तुक्कर्य।
वीसहसामग्गिमयं सव्वाभावे य सामग्गी तस्या विष्कं भावेषु पृथगवस्थासु यत्कार्यं न दृश्यते दृश्यते च सामग्रीसद्भावः प्राप्नोतीत्यर्थः नतः
सर्वशून्यतैवेति भावः इह मन्त्रहृदयं ॥ हेतवश्च प्रत्ययाश्च स्वजनान्यमर्थं किमेकैकशः कुर्वन्ति संहत्य वा नतावदेकैकशः तथानुपलब्धे
स्तन एकैकस्मात्कार्यस्योत्पत्त्यभावे सामग्रीसद्भावोन प्राप्नोति अन्तुस्त्वनायाः सामग्र्या अप्ययोगात्तन्तश्च सर्वशून्यतैव जगतः उक्तं च
हेतुप्रत्ययसामग्रीपृथग्भावे यदर्शनात्तेन तेनाभिलाप्या हि भावाः सर्वे स्वभावः लोके यावत्संज्ञाप्रवृत्तेः संज्ञाभावे चाभिलप्रमशक्यत्वादि
ति कुतः पुनः पृथगवस्थायां संज्ञाप्रवृत्तिरित्याह लोके यावदित्यादि लोके यावत्संज्ञा घटोयमित्यादिसंज्ञाप्रवृत्तिस्तावत्संपूर्णकार्ये सं
पूर्णसामग्र्यामेव यस्माद्दृश्यते पृथग्भावे च सामग्र्यामप्यभावात्सिकतातैलवन्नसत्त्वे च भावाः भावासत्त्वे च कुतः सामग्रीसद्भाव इति
प्रकारान्तरेणापि शून्यतासिध्यर्थमाह। परभागादरिसणउ सव्वाराभागसुहुमयाउय उभयाणुवलंभाउ सव्वाणुवलद्धिउ सुण्णं ॥ इह य
वद्दृश्यं तदसदेवानुपलंभात्खरविषाणवदिति निश्चितानध्यक्षतो दृश्यस्यापि च स्तम्भकुम्भकुड्यादेः परमध्यभागयोरसत्त्वं चार्वाग्भा
गान्तरितत्वेन तयोरप्यदर्शनादाराद्भागस्यापि च सावयवत्वात्पुनरन्यः स्वल्पाराद्भागस्तस्याप्यन्यः पुनस्तस्याप्यन्यः इत्येवं तावद्यावत्स
र्वारातीयभागस्य परमाणुप्रतरमात्रत्वेनाति सौक्ष्म्यात्पूर्वेषां चाराद्भागानामन्यस्यान्येनान्तरितत्वेनानुपलब्धेस्ततश्चोक्तन्यायेन प
रभागसर्वारातीयभागस्य परमाणुप्रतरमात्रत्वेनातिसौक्ष्म्यात्पूर्वेषां चाराद्भागानामन्यस्यान्येनान्तरितत्वेनानुपलब्धेस्ततश्चोक्तन्यायेन
परभागसर्वारातीयभागलक्षणोभयभागानुपलंभात्सर्वस्यापि वस्तुजातस्यानुपलब्धेः शून्यं जगदिति। उक्तं च यावद्दृश्यं परस्तावद्भागः स च न दृश्यते
तेन तेनाभिलाप्या हि भावाः सर्वे स्वभावतः ११ नदेवमुक्तयुक्त्या सर्वस्यापि मुक्तादेरभावः प्राप्नोति श्रूयते च श्रुतौ भूतादिसद्भावो पीति संशयः इति पूर्वपक्षः ॥
अथ भगवान्प्रतिविधानमाह माकुरु वियत्तसंसाय मसइ न संसय समुड्भवो जुत्तो खकुसुमखरसिंगेसुव जुगो सो याणुपुरिसेसु ॥ आयुष्मन्व्यक्त मा कु

था: संशयं माभूमावं बुध्यस्व यतो सति भूतकदंबके संशयः खकुसुमखरविषाणयोरिव न युक्तोपि च भावनिश्चय एव स्यात्सस्वेव च भूतेषु स्थाणुपुरुषादिष्विव संश
यो युक्तः यदि पुनरसत्यपि वस्तुनि संदेहः स्यात्तदाविशेषेण खरविषाणादिष्वपि स्यादिति भावः एतदेव भावयति कोवा विसेसहेउ सव्वाभावे विभाणुपुरिसेसु स
कानकुसुमाइसु विवज्जउवाहे कनभव कोवात्र विशेषहेतु रुच्यतां यत्सर्वाभावे सर्वशून्यतायामविशिष्टायामपि स्थाण्वादिषु संशयो भवति नखपुष्पा
दिषु न नु विशेषहेत्वभावादविशेषेण सर्वत्र संशयोस्तु नियामकाभावात्विपर्ययो वाभवेत्खपुष्पादिषु संशयः स्यान्न स्थाण्वादिष्विति भावः अपि
च पच्चक्खउणुमाणादागमउवापसिद्धिरत्थाणं सव्वप्पमाणविसया भावे कि ह संसओ जुत्तो यदा हि प्रमाणैरर्थानां प्रसिद्धिर्वा तास्मभवेत्तस्य कथं चित् विद्वत्
निःसंशयो भवति नखपुष्पादिषु नन्वविशेषहे युज्यते यदा च सर्वेषां नदिषयाणां अभावस्तदा कथं संशयोस्तु संशयस्य ज्ञानं ज्ञेयाद्यर्थसामग्रीजन्य
त्वात्सर्वशून्यत्वे च तदभावान्न संशयोद्भूतिर्निर्मूलत्वादिति भावः एतदेव समर्थयति जं संसयाइ सोनाणपज्जयात्तं च नेयसंबद्धं सव्वनेयाभावे न संसउ
तेण ते जुत्तो। यस्मात्संशयविपर्ययानध्यवसायनिर्णया विज्ञानपर्यायास्ते च ज्ञेयनिबंधनमेव सर्वशून्यतायां न ज्ञेयमस्ति तस्मान्न तव संशयो युक्तः सति
च संशयेनुमानसिद्धा एव भावाः कथमित्याह संति च्चिय ते भावा संसयउ सोमथाणुपुरिसोव अह दिट्ठंतसमसिद्ध मणसि न णु संसयाभावो ॥ सौ
म्य संति भवतोपि भावाः संशयसमुत्थानादिह यत्संशय्यते तदस्ति यथा स्थाणुपुरुषौ यच्चासत्तन्न संशय्यते यथा खपुष्पखरविषाणे अवस्थाणुपुरु
षलक्षणदृष्टान्तमसिद्धं मन्यसे त्वं सर्वेषामपि स्थाणुपुरुषादिभावानामविशेषेण नास्तित्वाभ्युपगमात्ततः युक्तयतोनुसर्वभावासत्त्वे संशयाभाव एव
स्यादित्युक्तमेवेति अथ परमतमाशंक्य परिहरन्नाह सव्वाभावे विमई संदेहो सिमिणएव नो तं च जं सरणाइ निमित्तो सिमिणा न उसव्वहाभावो ॥ स्या
न्मतिः परस्य सर्वाभावे सर्वे दृष्टः संशयो यथा किल कश्चिन्नामरो निजगृहांगणे किमयं हिपद्रो महीद्रो वेति संशेते न च तत्र किंचिदप्यस्त्येवमन्यत्र सर्वभा
वाभावेपि संशयो भविष्यति तच्च न यतस्मात्स्वप्नेपि पूर्वदृष्टानुभूतस्मरणादिनिमित्तः संदेहो न तु सर्वथा भावाभावे सो क्वापि प्रवर्तते एवमेतत्कानि पुनस्त
न्निमित्तानीत्याह अणुभूयदिट्ठचिंतिय सुयपयइवियार देवयाणूया सिमिणस्स णिमित्ताईं पुण्णं पावं च नाभावो स्नानभोजनविलेपनादिकमन्यस्यानुभू
तं स्वप्ने दृश्यते इत्यनुभूतोर्थः स्वप्नस्य निमित्तं अश्वयाकरितुरगादिको अन्यदा दृष्टोर्थस्तन्निमित्तं चिंतितश्च विभव प्रियतमालाभादिः श्रुतश्च स्व
र्गनरकादिः तथा वातपित्तादिजनितः प्रकृतिविकारः स्वप्नस्य निमित्तं तथानुकूलप्रतिकूला वा देवता तन्निमित्तं चिंतितश्च विभवप्रियतमालाभादिः
श्रुतश्च स्वर्गनरकादिः तथा वातपित्तादिजनितः प्रकृतिविकारः किंच स्वप्नोपि चकाव एवतनस्तस्यापि सत्त्वे कथं शून्यं जगदिति भावना प्रतिज्ञायते

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी इस्मारक ग्रंथसंग्रह

कथं पुनः स्वप्नस्याभावत्वमित्याह विणाणमयत्तणउ घडविणाणंवक्कमणउ भावो अहवाविहिय निमित्तो घडोव्वनेमित्तियत्ताउ॥ भावः स्वप्नइति प्रतिज्ञा वि
ज्ञानमयत्वादितिहेतुः घटविज्ञानवदितिदृष्टांतः अथवा भावः स्वप्नोनैमित्तिकत्वान्निमित्तनिष्पन्नोनैमित्तिकत्वान्निमित्तनिष्पन्नोनैमित्तिकस्तद्भावस्तत्वं त
स्मादित्यर्थः घटवदिति कथं पुनः नैमित्तिकइत्याह यतोविहितनिमित्तः विहितानि अणुहूयदिठ चितियेत्यादिना प्रतिपादितानि निमित्तानि यस्यासौ
विहितनिमित्तइति सर्वशून्यतांचेष्यमाणायां स्वप्नादिव्यवहाराभावप्रसंगएवेति दर्शयन्नाह सव्वाभावेवकउ कमिणोकमिणोत्ति सच्चमलियंवि
गंधव्वपुरंपाडलिपुत्तन्नोवयारोति कघतिकारणंतिय सज्झमिणं साहणंतिकत्तति चत्तावयणंवञ्च परपरकोयंसपरकोयं किंचेह थिरदवोसिण च
लयारूवणाइं नियचाइंडं सद्दाउयगज्झा सोत्ताईयाइं समयाविवघाउव सव्वग्गहणं चकिनकणिंमि किंकन्नयावसम्मं सग्गाहोकिवमिच्छत्तं किंरूस
परोभयबुद्धी कहंचत्तेसिंपरोप्परमसिद्धी अथपरमइएणइ सपरमइविसेसणंकत्तो॥ सर्वाभावेचसर्वशून्यतायांचाभ्युपगम्यमानायां स्वप्नोयम
स्वप्नोयमितिकुतः किंकृतोयंविशेषइत्यर्थः तथासत्यमिदमलीकंवातथा गंधर्वपुरमेतत्पाटलीपुत्रादिचेदं तथातथ्योवचारोपचारोत्ति अयंतथ्योनिरुपचरितो
मुख्यश्चतुष्पदविशेषः सिंहः अयंतूपचारिकोमनुष्यविशेषोमाणवकः तथाकार्यमिदंघटादिकारणंचेदं मृत्पिंडादि तथासाध्यमिदमनित्यत्वादिसाध
नं कृतकत्वादिकर्ता घटादेःकुलालादिः तथायंवक्ता वादीवचनंचेदं व्यवयवपंचावयवंवा इदं चवाच्यमभिधेयमस्य शब्दसंदर्भस्य तथायंस्वपक्षोऽ
यंचपरपक्ष इतिसर्वशून्यत्वे कुतोसौविशेषोगम्यते किंचेहथिरेत्यादि किंचेहपृथिव्याः स्थिरत्वं अपांद्रवत्वं वन्हेरुष्णत्वं वायोश्चलत्वं आकाशस्यारूपि
त्वमित्यादयोनियताः सर्वदैवैकस्त्वभावविशेषाः सर्वशून्यतायांकुतोगम्यते तथाशब्दादयोग्राह्या एव इंद्रियाणिचश्रोत्रादीनि ग्राहकाण्येवेति कु
तोनियमसिद्धिः समयेत्यादि ननुसर्वशून्यतायां स्वप्नायस्वप्नसत्यालीकादीनां विशेषनिबंधनाभावात्समतैवकस्मान्नभवति यादृशःस्वप्नोऽस्वप्नो
पितादृशएव यादृशश्चास्वप्नःस्वप्नोपितादृशएवेत्यादि अथवाविपर्ययःकुतोनभवति यःस्वप्नःसोऽस्वप्नोयस्त्वस्वप्नःसस्वप्नइत्यादि यदिवासर्वेषा
मपिस्वप्नादीनां सर्वथाशून्यत्वेग्रहणमेव कस्मान्नभवति भ्रांतिवशादेवस्वप्नादेर्ग्रहणादिमितिचेत्तदयुक्तं देशकालस्वभावाहि नैयत्येनतद्ग्राहकज्ञा
नोत्पत्तेः किंचेयंभ्रांतिः किंविद्यतेनवायदिविद्यते तर्ह्यभ्युपगमविरोधः अथनविद्यते तर्हि भ्रांतेरसत्वाद्भावग्राहकज्ञानस्य निर्भ्रांततापत्तेरेवसर्वग्राहो
वा नपुनःशून्यतेति अथवान्यत्स्वप्नादौ भवेन्नं ननुसर्वशून्यत्वे शून्यत्वं सम्यक्सर्वाभावानांग्रहणं सग्राहोभावसत्वग्रहणं पुनर्मिथ्यात्वमित्यत्र क
कृतोविशेषहेतुः यदुक्तं नस्वतोभावानां सिद्धिरित्यादि तत्प्रतिविधानार्थमाह॥ किंहसपरोभयेत्यादि ननु कथं हस्वदीर्घोभयविषये इदं ह्रस्वमिदं

दीर्घमेतत्तुतदुभयमित्येवंभूतास्वपरोभयबुद्धिर्युगपद्दृश्यतेभवताकथंचैतेषां ह्रस्वदीर्घोभयानां परस्परसिद्धिरुच्यते पूर्वापरविरुद्धत्वान्नैतद्युक्तं युज्य
तइत्यर्थः अयमत्रभावार्थोनस्वल्वापेक्षिकमेववस्तूनां सत्वं किंतुस्वविषयज्ञानजननादर्थक्रियाकारित्वमपि ततश्चह्रस्वदीर्घोभयानांत्वात्मविषयविज्ञानं
नजयतिदृशांसत्यवतानिकथंतेषामसिद्धिः सदप्युक्तंमध्यमांगुलिमपेक्ष्यप्रदेशिन्याह्रस्वत्वमसदेवोच्यतइति तदप्युक्तं यतोयदिमध्यमापेक्ष्यप्रदेशि
न्यांस्वतः सर्वथासत्वमपिह्रस्वत्वंभवति तदाविशेषाभावात्खरविषाणपितद्भवेदतिदीर्घं किंडयस्थादि चपिचतस्यादथप्रदेशिन्याः क्वापेक्ष्यात्वात्म
न्यपिह्रस्वत्वं स्यात्सर्वत्रासत्वाविरोधान्नचैवंतस्मात्स्वतः सत्यामेवप्रदेशिन्यां वस्तुनोऽनंतधर्मात्मकत्वात्तत्सहकारिसंनिधौतत्तद्रूपाभिव्यक्तेस्तत्
ज्ञानमुत्पद्यते नपुनरसत्यामेवतस्यामपेक्षामात्रतएवह्रस्वज्ञानमुपजायते एवंदीर्घोभयादिष्वपिवाच्यं अथेदंह्रस्वमिदं दीर्घमेतच्चोभयमित्यादिस्वपरो
भयबुद्धिः परमतापराभ्युपगमेनोच्यते नपुनःस्वतःसिद्धं स्वविषयज्ञानजनकंह्रस्वादिकं किंचिदस्तितोनकश्चित्पूर्वापरविरोधइत्यत्राहननुसर्वशू
न्यत्वेइदंस्वमतमेतत्परमतमित्येतदपि स्वपरभावेनविशेषणंकुतोनकुतश्चिदित्यर्थः स्वपरभावोपिसमयाविवत्तउभाइत्यादिनावर्तितइतिभावः स्व
परभावाद्यभ्युपगमेचशून्यताभ्युपगमहानिरिति। अविच जुगवंकमेणवाति विणाणहोपदीहहस्सेसु जइजुगवंकाचेरका परोप्परलोयणाद्युगे
व ननुमध्यमाप्रदेशिन्यादीर्घह्रस्वयोस्तवाभिप्रायेण तदाकारप्रतिभासिज्ञानंकिंयुगपदेवभवेत्क्रमेणवा यदियुगपत्तर्हि परानपेक्षंद्वयोरपि
युगपदेवस्वप्रतिभासिनिज्ञानेप्रतिभासात्कस्यकिलकापेक्षा अथक्रमेणतथापिपूर्वमेवस्वप्रतिभासिनाज्ञानेनपरानपेक्षमेवह्रस्वस्यगृही
तत्वादुत्तरस्मिन्दीर्घकापेक्षा तस्माच्चक्षुरादिसामग्रीसद्भावेपरानपेक्षमेवस्वकीयाविविक्तरूपेणसर्वभावानांस्वज्ञाने प्रतिभासात्स्वतएवसिद्धि
अथवाबालस्यतत्क्षणमेवजातस्यशिशोर्यदिहनयनोन्मेषानंतरमेवाद्योविज्ञानं तत्किमपेक्ष्यप्रादुरस्ति यदिवायेनह्रस्वेनापिदीर्घं किंतुपरस्प
रंतुल्ययोरेववस्तुनोर्यत्युगपदेवस्वप्रतिभासिनाज्ञानेनगृह्यमाणयोः काअन्योन्यापेक्षा नकाचिद्यथातुल्यस्यलोचनयुग्मस्य तस्मादंगुल्या
दिपदार्थानांनान्यापेक्षमेवरूपं किंतुस्वप्रतिभासवताज्ञानेनान्यनिरपेक्षाएवतेस्वरूपतोगृह्यंते उत्तरकालंतुतत्तद्रूपजिज्ञासायां तत्तत्प्रतिपक्ष
स्मरणादिसहकारिकारणांतरवशाद्दीर्घह्रस्वादिव्यपदेशाःप्रवर्ततइति स्वतःसिद्धाःएवसंतिभावाइति अपिचकिंहस्साउदीहे दिहाउच्चेव
किन्नदीहेति कीसवनरवपुप्फाउ किनरवपुप्फाउहत्तयदि सर्वशून्यतातत्तःकिमितिह्रस्वादेवप्रदेशिनीभवति इत्यादिर्घंमध्यमादि इव्येदीर्घ
ज्ञानाभिधानव्यवहारःप्रवर्त्ततेदीर्घापेक्षएवदीर्घेनज्ञानाभिधानव्यवहारः किंनभवतीति नचैवंतस्मात्संत्येवभावानतुशून्यताजगतइति अ

पिच किंवावेरकाएच्चिय होधमयीवासभावएवायं सोभावोत्तिसञ्जाभो वञ्झापुत्तेनसंजुत्तो अथवासर्वस्याप्यसत्वेह्रस्वादेर्दीर्घाद्यपेक्षयापि
किंकर्त्तव्यं शून्यताप्रतिकूलत्वात्तस्या घाटाद्यर्थसत्ववदथपरस्यमतिर्भवेत्स्वभावा देवान्यपेक्षयैवह्रस्वदीर्घादिव्यवहारःप्रवर्ततेनचस्वभावःप
र्यनुयोगमर्हति तथाचोक्तं अग्निर्दहतिनाकाशं कोत्रपर्यनुयुज्यतामिति हंतेछमपिहतोसि यतःस्वोभावःभावस्तत्रस्वपरभावाभ्युपगमाच्छून्य
ताभ्युपगमहानिःनचवंध्यापुत्रकल्पानामर्थानांस्वभावपरिकल्पनमयुक्तमिति भवतुवाअपेक्षा तथापिनशून्यतासिद्धिःकुतइत्याह होघावेरको
उवविणाणंवाभिहाणमित्तंवा दीहंतिवहस्संतिव नउसत्तासेसधम्मावा अथवास्वतःसिद्धवस्तुन्यपेक्षातोभवेत्किमित्याह विज्ञानमाभिधान
मात्रंवाकेनोल्लेखेनेत्याह दीर्घमितिवाह्रस्वमितिवेति किंपुनर्नभवेदित्याह होघावेरकाउवा विणाणंवाभिहाणमित्तंवा दीहंतिवहस्संतिव।
नउसत्तासेसधम्मावा अथवास्वतःसिद्धवस्तुन्यपेक्षातोभवेत्किमित्याह विज्ञानमाभिधानमात्रंवाकेनोल्लेखेनेत्याह दीर्घमितिवाह्रस्व
मितिवेति किंपुनर्नभवेदित्याह नत्वन्यापेक्षयावस्तुनोसत्ताभवति नाप्यापेक्षितह्रस्वदीर्घत्वादिधर्माःशेषाःरूपरसादयो धर्माअन्यापे
क्षयासिध्यंते उत्पद्यतेचवस्तुसत्ताग्राहकाणिरूपादिधर्मग्राहकाणिचज्ञानान्यन्यतोपायक्षाभावात् कथंस्वतःसिद्धस्यवस्तुसत्तादेरभावस्तत्स
ञ्ज्ञावेचकथंशून्यताजगतइति कथंपुनःसत्तादयोऽन्यानपेक्षाइत्याह इहराहस्साभावे सव्वविणासोहनुघदीहस्स नयसोतन्नासत्ताइयाण
विरकायमाईणं॥इतरथायदिघटादीनांसत्तादयोप्यन्यापेक्षयाभवेयुः तदाह्रस्वाभावेह्रस्वस्यसर्वविनाशेदीर्घस्यापिवस्तुनःसर्वविनाशः
स्याह्रस्वसत्तापेक्षित्वादीर्घसत्तादीनां नचैवमसौदीर्घस्यसर्वविनाशोदृश्यते तस्मान्निश्चीयते सत्यन्यानपेक्षाएवघटादीनांसत्तारूपाद्
योधर्मास्तत्सर्वेवायात्ताशून्यतेति यदुक्तं नस्वतोनापिपरतोनापिवोभयतोभावानांसिद्धिरपेक्षातइत्यादि अत्रापेक्षातइतिविरुद्धोहेतु
र्विपक्षएवसत्वादितिदर्शयन्नाह जाविअविरकाविरकणमविरकभाविरकणिधमणुविरकासानमयासव्वेसकवि संतेसकनसकन्नयानाम॥था २३६
पीयह्रस्वादेर्दीर्घाद्यपेक्षासाप्यपेक्षणंक्रियारूपंतथा अपेक्षकंकर्त्तारं अपेक्षणीयंचकर्मानपेक्ष्यनभवतिविदुषासम्मतातत्तःकिमित्याह एतेषुचा
पेक्षणापेक्ष कापेक्षणीयेषुसर्वेषुसत्सुनकाचिच्छून्यतानाम अतोपेक्षकादिसत्वलक्षणविपक्षएवापेक्षालक्षणस्यहेतोर्वृत्तत्वाद्विरुद्धत्व
मिति तस्मात्स्वतःपरतःउभयतश्चभावानांसिद्धिरस्त्येव व्यवहारतोनिश्चयतस्तुस्वतःसिद्धाएवसर्वभावाइतिदर्शयति किंचिसउत्तहपरउत्त
उभयउ किंचिन्निच्चसिद्धंपि जलउघडउपुरिसो नहंचववहारउनेयं निछयउपुणवाहिर मिनिमित्तमित्तोवउगउसव्वं होइसउजमभावोनसि

सिद्धइत्तिनिमित्तिभावेवि॥इहकिंचित्स्वतएवसिध्यति यथाकर्त्रभिरपेक्षस्तत्कारणद्रव्यसंघानविशिष्टपरिणामरूपोजलदः किंचित्तुपरतोयथाकु
लालकर्तृकोघटः किंचिदुभयतोयथामातापितृभ्यांस्वकृतकर्मनश्चपुरुषः किंचिन्नित्यसिद्धमेव यथाआकाशंएतच्चव्यवहारनयापेक्षयाद्रष्टव्यं निश्च
यतस्तुवाह्यंनिमित्तमात्रमेवाश्रित्यसर्ववस्तुस्वतएवसिध्यति यदस्माद्बाह्यनिमित्तसद्भावेपिखरविषाणादिरूपोभावः कदाचिदपिनसिध्यति उभय
नयमतंचसम्यक्त्वमितिअथयदुक्तं अच्छित्तघडेगाणेगमायइत्यादिनत्वहीविघटतुमाह अच्छित्तघडेगायोगयाम्पयायमेत्ताचिंतियं अच्छिघडेपडिवन्ने
इहरासाकिन्नखरसिंगइहात्तिघडोन्नुनास्तीत्येवंप्रतिपन्नेसतितदनंतरमेवास्तित्वघटयोःकिमेकत्वानेकत्वेइत्यादिनाघटास्तित्वयोरेकत्वानेक
त्वलक्षणपर्यायमात्रचिंतैवभवताकृताभवति ननुनयोरभावःसिध्यति अन्यथाह्यभावरूपत्वाविशेषाद्यथाघटास्तित्वयोरेवंखरविषाणवंध्यापुत्रयो
रेकत्वानेकत्वचिंताभवतःकिन्नप्रवर्ततेइति किंच यथाघटास्तित्वयोरेकत्वानेकत्वविकल्पौत्वंविधत्सेतथाघटशून्यत्वयोरपितौविधातुंशक्येते
कथमित्याह घडसुन्नयन्नयाए सुन्नयाकाघडाहियासोम्म एगत्तेघडउच्चियनसुन्नयानामघडधम्मो॥ननुघटशून्यत्वयोरप्यन्यतानन्यताभावाय
द्यन्यतातर्हि सुन्नयाकाघडाहियासोम्म एगत्तेघडउच्चियनसुन्नयानामघडधम्मो ननुघटशून्यत्वयोरप्यन्यतानन्यताभावा यद्यन्यतातर्हिसुन्नयाए
सुन्नयाकाघडाहियासोम्म एगत्तेघडउच्चियनसुन्नयानामघडधम्मो ननुघटशून्यत्वयोरप्यन्यतानन्यताभावा यद्यन्यतातर्हिसुन्नयाकाघडायाहिसोम
त्तिसौम्यव्यक्तशून्यताकाघटाधिकानामननुघटमात्रमेवपश्यामो नपुनःक्वचिच्छून्यताघटादधिकासमीक्ष्यतेअथानन्यतातथापिसतिघटशून्यत्वयो
रेकत्वेघटएवासौयुज्यतेप्रत्यक्षतएवोपलभ्यमानत्वात्नतुशून्यत्वंनामकश्चित्तद्धर्मःसर्वप्रमाणैरनुपलब्धेरिति अपिच विणाणमयणावाईणिमेग
यातोतदस्थियासिद्धाअणत्तेअणाणी निच्चयणोवाकहंवाइं शून्यंसर्वमेवाकिंचत्रयमित्येनेष्कृतं याह्विज्ञानंवचनंवचनेनसहशून्यवाकाद्यदधिका नेभि
च्चनुभवमात्रमेवएकत्वमनेकत्वंवा यद्येकत्वंततस्तदस्ति नावरत्वास्तिनासिद्धमिति कुतःशून्यतावृक्षशिंशिपात्वयोरिवैकत्वस्थैवस्तुत्वादन्यत्वेतुविज्ञा
नवचनयोरतानीतिर्वचनश्चवादीकथंशून्यतासाधयेच्छिलासंघातवदिति अथघटसत्वयोरेकत्वानेकत्वविकल्पोभ्यधायियोघटःसएवास्तीतिघ
टमात्रेस्तित्वस्यप्रदेशाद्घटएवास्ति यदियाम्पनिपक्षाभावास्तोपिनास्तीतिनत्राह घटसत्ताघडधम्मो तत्तोण्णापोपडाइउभिन्नो अच्छित्तिणणभ
णिए कोघडएवत्तिनियमोयं घटास्तित्वलक्षणा घटसत्ताघटस्यधर्मः सचेत्ततोघटादनन्योभिन्नःपटादिस्तस्यसत्तैभ्योपिभिन्नस्तेन ततोघटोस्तीति
भणितेघटएवेति घटएवास्ति कोयंनियमो निजसत्तायाःपटादिष्वपिभावात्तेपिसत्येवेतिभावःतथाभिन्नेनघटास्तित्वयोरेकत्वविकल्पे यदुक्तंयोयो

स्तिसघट इति सर्वघटत्व प्रसंगो घटस्य वा सर्ववस्त्वात्मकत्वमिति न दपि सर्वघटसत्ताकटस्य धर्मः सच्चेत्ततो घटादनन्यो भिन्नः पटादिसत्तसु सर्वे नैव परिहृत
मिति एतदेवाह जवाइजत्थिनंतं घडोत्ति सव्वघडया पसंगोको भणिए घडोत्थि व कह सव्वछि त्ताव होहोति यद्वा भोक यघदत्ति न तत्सर्व घट इति तत्रको
यं सर्वघटत्वप्रसंगस्तथा यो घटः स एवास्तीत्युक्ते कथं सर्वास्तित्वावरोधः कथं घटस्य सर्वात्मकत्वमित्यर्थः यदा हि घटसत्ता घट एवास्ति नान्यत्रत
दा यत्र २ घटास्तित्वं तत्र घट इति न कश्चित्सर्वेषां घटताप्रसंगस्तथा घटसत्त्वेन घट एवास्तीत्येतस्मिन्नप्युक्ते न किंचिद् घटस्य सर्वात्मकं प्रतीयत इति भा
वः तदेवं प्रस्तुतं परपक्षमयाकृत्य स्वपक्षस्य भावार्थमाह अत्थित्ति तेण भणिए घडो स्याघडोउ अच्छेव चूउउजहा दुमोनियमा ॥ येन कारणेन घट
सत्ता घटधर्मत्वात् घट एवास्ति पटादिषु तु भिन्ना तेन तस्मात् स्यादस्तीत्युक्ते घटो घटो वा पटादिर्गम्यते निज २ सत्त्वस्य सर्वेषु पटादिष्वपि भावाद्घडोउअ
छेवत्ति घट इति प्रोक्ते अस्त्येवेति गम्यते निजसत्त्वस्य नियमेन घटे सद्भावादत्रयथासंख्यमुदाहरणद्वयं यथा द्रुम इत्युक्ते चूतो चूतो वा निंबादिर्ग
म्यते द्रुमत्वस्य सर्वत्र भावाच्चूत इत्युक्ते तु द्रुम एव गम्यते अद्रुमस्य चूतत्वायोगादिति यदुक्तं यदेतज्जातं जायते किं तदजातं जायते किं तज्जाताजा
तं जायत इत्यादयः शून्यतासिध्यर्थमुपन्यस्यमाना निरर्थका एव विकल्पा इति मध्यकाभिप्रायः अथ तदपि जातं जाता २ दिविकल्पाश्रयभूतं जा
तत्वेन भवतो न सिद्धं किं त्वजातमेव तन्न तु स्ववचनविरुद्धमिदं जाममपि अजातमिति किंच ॥ जातस्यासत्त्वेन निराश्रयत्वाज्जाता २ दिविकल्पा निरर्थका एव अ
थे नदाश्रयाद्भूते जाताद्यवस्तुन्यसिद्धेपि न जातं जायत इत्यादि विकल्प विचारः प्रवर्तते तर्हि खपुष्पेप्यसौ किं न विधीयते असत्त्वाविशेषेण समया विवद्यस्य चेत्यादि दोषप्रसं
गाः न च वक्तव्यं परं प्रति सिद्धं जातमुररीकृत्य विकल्पा विधीयंते स्वपरभावाभ्युपगमे शून्यताहानिप्राप्तेरिति ॥ अपिच ॥ जइ सव्वहा न जायं किं जम्माणंतरं तदुवलंभो ।पुव्वं
वाणुवलंभो ।पुणो वि कालंतर हयस्स ॥ यदि सर्वैरपि प्रकारैर्घटादिकार्यं न जातमिति शून्यवादिना प्रतिपाद्यते तर्हि मृत्पिंडावस्थायामनुपलब्धं कुलालादिसामग्रीनिवर्तितजन्मा
नंतरं किमित्यकस्मात्तदुपलभ्यते पूर्वं वा जन्मतः किमिति तस्यानुपलंभः पुनरपि कालांतरे लगुडादिनाहतस्य किमिति तस्यानुपलंभः अजातस्य गगनन लिनस्येव सर्वदैव घ
टादेरनुपलंभ एव स्यात् न तु कदाचिदुपलंभः कदाचित्त्वनुपलंभो सो जातस्यैवोपपद्यत इति भावः । किंच। जह सव्वहा न जायं। जायं कण वयणं न हभावा ॥ अह जायं पि न जायं प
यासिया मत्तया शून्यं सर्वं जगदित्येवं भूतं यच्छून्यताविषयं विज्ञानं वचनं च तद्यथा जाता जातादिप्रकारैः सर्वथा न जातमप्यजातमपि। सत्केनापि प्रकारेण ताव ज्ञातं तथाभा
वाश्रपि घटादयो जाता एष्टव्याः इत्यतो न शून्यं त्रोदथ शून्यताविज्ञानवचनद्वयं जातमप्यजातमिष्यते तर्हि तद्विज्ञानवचनाभ्यां विना केनासौ शून्यताप्रकाशितामिति न
केनचिदिति शून्यतानुपपत्तिरिति ॥ यदप्युक्तं न जातं जायते नाप्यजातमित्यादि तदप्ययुक्तं यतो विवक्षया सर्वैरपि प्रकारैर्यथासंभवं वस्तु जायते किंचित्तु सर्वथा
न जायत इति दर्शयति जायइ जायमजायं जायजायमह जायमाणं च कज्जमह बिवक्खाए न जायए सव्वहा किंचि रूविति जाइ उजाऊ कुंभो संठाणऊ पुणरजाउ । जाया
जाउ दो हिवि। तस्समयं जायमाणोत्ति ॥ ग्रंथाग्रं १६००० ॥ पुव्वकऊ घडतया। परपज्याएहिंत दुभएहिंच। जायंनो य पडतया। न जायए सव्वहा कुंभो। वोमाइ निच्च जायं। न

न जायए तेण सव्वहा सो ॥ इह दव्वतया सव्वं। भयणिज्जं पज्जवग्गईए ॥ इह कार्यं घटादिकं विवक्षया किमपि जातं जायते किंचिदजातं किंचिज्जाताजातं किंचिज्जायमानं तु सर्व
था न जायत इति ॥ अथ यथाक्रममुदाहरणानि ॥ रूवीत्यादि रूपितया घटो जातो जायते मृद्रूपतायाः प्रागपि भावात्तद्रूपतया जात एव घटो जायत इत्यर्थः संस्थानतया
आकारविशेषेण पुनः स एवाजातो जायते मृत्पिंडाद्यवस्थाया आकारस्यासंभवान्मृद्रूपतया आकारविशेषेण चेति द्वाभ्यामपि प्रकाराभ्यां जाताजातो जायते तदनर्थांत
रभूतत्वाद्घटस्य तथा अतीतानागतकालयोर्विनष्टानुपपन्नत्वात् क्रियानुपपत्तेर्वर्तमानसमय एव क्रियासद्भावात्तत्समयं वर्तमानसमये जायमानो जायते किंचित्तु सर्व
था जाता जातादिप्रकारैर्न जायते ॥ किं पुनस्तदित्याह ॥ पुव्वकऊ इत्यादि पूर्वकृतस्तु पूर्वनिष्पन्नो घटो घटतया जातादिविकल्पानां मध्यादेकेनापि प्रकारेण न जायते पूर्व
मेव जातत्वात् किं घटतयैव न जायते ॥ नेत्याह ॥ परपज्जाएहिंति तथा पटादिगतैः परपर्यायैश्च घटो न जायते नैतस्य सर्वथा जातत्वात् खरविषाणवत्तथा तदुभयप
र्यायैश्च स्वपरपर्यायैर्जाताजातत्वात् पूर्वनिष्पन्नो घटो न जायते स्वपर्यायाणां पूर्वमेव जातत्वात् परपर्यायैश्च कदाचित्कस्याप्यभवनात् स्वपरपर्यायैः पूर्वकृतघटो न
जायते जाताजातपटखरविषाणवदिति भावः तथा जायमानोपि वर्तमानक्रियालक्षणसमये पटतया घटो न जायते पररूपतया कस्याप्यभवनात् किं पूर्वकृ
तो घट एवेत्थं न जायते आहोश्विदन्यदपि किंचिन्न जायते । इत्याह। वोमाइ इत्यादि न केवलं पूर्वकृतो घटो घटतया न जायते तथा व्योमादि च तेन कारणेन सौम्य
सर्वथा जातादिभिः सर्वैरपि प्रकारैर्न जायते येन किमित्याह येन नित्यजातं सर्वदावस्थितं हेतुद्वारेण विशेषणामिदं नित्यजातत्वान्न जायत इत्यर्थः ॥ उक्तस्यैवार्थ
स्योपसंहारव्याजेन तात्पर्यमुपदर्शयन्नाह ॥ इयेत्यादि इत्युक्तप्रकारेण सर्वमपि घटपटव्योमादिकं वस्तु द्रव्यतया द्रव्यरूपेण न जायत इतीहापि संबध्यते
तद्रूपतया सदावस्थितत्वादिति भावः पर्यायगत्या पर्यायचिंतया पुनः सर्वं भजनीयं विकल्पनीयं पूर्वजातं घटादिकं रूपादिभिः स्वपर्यायैरपि न जायते पूर्व
जातत्वादेव अजातं तु तत्स्वपर्यायैर्जायते परपर्यायैस्तु किंचिदपि न जायत इत्येवं पर्यायचिंतायां भजना एतच्च प्रायो दर्शितमेवेति ॥ अथ यदुक्तं ॥ सर्वसामग्रीम
यं दृश्यते सर्वाभावे कुतः सामग्री तत्र प्रतिविधानमाह दीसइ सामग्गिमयं सव्वमिहत्थि न य सा तणु निरुद्धं घेप्पइ वन पच्चक्खं किं कच्छभरोमसामग्गी ॥ इह यदुक्तं स
र्वमपि कार्यं सामग्र्यात्मकं दृश्यते सर्वाभावे नास्ति सामग्रीति तदेतदहि.. इदमेव प्रस्तुतार्थप्रतिपादकत्वाद्वाजनकं कंठोष्ठताल्वादिसामग्र्याः प्रत्यक्षत एवो
पलब्धेः अथ क्रूषे अविद्योपप्लवाद विद्यमानमपि दृश्यते । यत उक्तं ॥ कामस्वप्नभयोन्मादैरविद्योपप्लवात्तथा पश्यत्यसंतमप्यर्थं जनः केशोंडुकादिवदिति य
द्येवं तर्हि सत्त्वे सामान्येपि कच्छपरोमजनकसामग्री किमिति प्रत्यक्षत एव नोपलभ्यते समनाविपर्ययो वा कथं न स्यादिति वाच्यमिति । किंच ॥ सामग्गीमऊ व
त्ता ॥ वयणं च अत्थि जइ तो कउ सुण्णं । अह नत्थि केन भणियं । वयणाभावे सुयं केण ॥ सामग्री उरः शिरः कंठोष्ठताल्वजिह्वादिसमुदायात्मिका तन्मयः साम
ग्र्यात्मको वक्ता तद्वचनं चास्ति नवा यद्यस्ति तर्हि कुतो जगच्छून्यतं तद्वक्तृवचनसत्त्वेनैव व्यभिचारादथ तद्वक्तृवचने न स्तस्तर्हि वक्तृवचनाभावे केन भ

किंचि

णितं शून्यं जगन्न केनचित्सर्वशून्यत्वेन प्रतिपाद्यस्याप्यभावात्केन तच्छून्यवचः श्रुतमिति। अत्र पराभिप्रायमाशंक्य परिहरन्नाह। जेणं चेयनवत्ता। वयणं
वातो न संति वयणिज्जा। भावातो स्वण्णमिदं वयणमिदं सच्चमलियं वा जइ सच्चं नाभावो। अहालियं नप्पमाणमेयंति। अब्भुवगयंतियमई। नाभावे जुत्तमे
यंति॥ येनैव न वक्तानापि वचनं ततस्ते नैव न संति वचनीयाभावादुच्यतः शून्यमिदं जगदिति। अत्रोच्यते॥ यदेतद्वक्तृवचनवचनीयानां भावानामभा
वप्रतिपादकं वचनं तत्सत्यमलीकं वा यदि सत्यं तर्ह्यस्यैव सत्यवचनस्य सद्भावान्नाभावः सर्वभावानां अथालीकमिदं वचनं तर्ह्यप्रमाणमेतदतो नातः
शून्यतासिद्धिः अथ यथा तथा वाऽभ्युपगतमस्माभिः शून्यताप्रतिपादकं वचनमतो अस्मद्वचनप्रामाण्याच्छून्यतासिद्धिरिति तत्रमतिर्नैवं यतः स
त्यमलीकं वा त्वयेदमाप्युपगतमित्यादि पुनस्तदेवावर्त्तते किं वाऽभ्युपगंताऽभ्युपगमोऽभ्युपगमनीयं चेत्येतत्त्रयस्य सद्भावेऽभ्युपगमोऽप्येष भवतो
युज्यते न च सर्वभावानामभावे एतत्त्रयं युक्तमिति॥ अपिच॥ सिकयास्स किं न तेल्लं। सामग्गीओ तिलेसु विमिमम्मि। किंच न सव्वं सिज्झइ। सामग्गीओ खपुप्फाणं॥ सर्वभावानामसत्त्वे सर्वोपि प्रतिनियतो लोकव्यवहारः समुच्छिद्यते॥ तथाहि॥ भावाभावस्य सर्वत्राविशिष्टत्वात्किमिति सिकताकणसा
मग्रीतस्तैलं न भवति तिलादिसामग्र्यां वा तत्किमस्ति किं वा खपुष्पसामग्रीतः सर्वमपि कार्यजातं न सिध्यति नन्वेवं तस्मात्प्रतिनियतकार्यका
रणभावदर्शनान्नाभावसामग्रीतः किमप्युत्पद्यते किंतु यथास्वभावसामग्रीतस्तथा च सति न शून्यं जगदिति॥ किंच॥ सव्वं सामग्गीमयं। नेगंतोयं ज
ओणुरपएसो अहमोविसप्पएसो। जं धायंत्थासपरमाणू॥ सर्वं सामग्रीमयं सामग्रीजन्यं वस्त्विति यो मयपि नैकांतो यतो द्व्यणुकादयः स्कंधाः सप्रदेश
त्वाद्द्व्यादिपरमाणुजन्यत्वाद्भवंतु सामग्रीजन्याः परमाणुः पुनरप्रदेशत्वादिति न केनचिज्जन्यते इति कथमसौ सामग्रीजन्यः स्यादस्ति चासौ कार्यलि य
गगम्यत्वा॥ दुक्तंच॥ मूर्त्तोणुरप्रदेशः कारणमंत्यं भवेत्तथा नित्यः एकरसवर्णगंधो द्विस्पर्शः कार्यलिंगश्च॥ अथ यमपि सप्रदेशस्तर्हि तत्प्रदेशोणु
र्भविष्यति तस्यापि सप्रदेशत्वे तत्प्रदेशोप्यणुरित्येवं तावद्यावद्यत्र क्वचिन्निःप्रदेशता यामेव बुद्धेरवस्थानं भविष्यति स एव परमाणुस्तेनापि च साम
ग्रीजन्यत्वस्य व्यभिचार इति॥ न सत्येव परमाणवः॥ सामग्रीजन्यत्वाभावादित्याशंक्याह दीसइ सामग्गिमयं। न याणवो संति नणु विरुद्धमिदं। किं वाणूण
मभावो निप्पण्णमिणं खपुप्फेहिं॥ सामग्रीमयं सर्वं दृश्यत इति भवतैव प्रागुक्ते अणवश्च न संतीत्यधुनाभ्रूषे ननु विरुद्धमिदं यथा सर्वमप्यनंतवचनमिति ब्रू
वतः स्ववचनविरोधस्तथात्रापीत्यर्थः यदेव हि सामग्रीमयं किमपि दृश्यते भवता तदेवाणुसंघातात्मकमतः स्ववचनेनैव प्रतिपादितत्वात्परमाणवो न संतीति भावः किं चाणूनामभावे इदं सर्वमपि घटादिकार्यजातं किं खपुष्पैर्निष्पन्नं परमाण्वभावे तज्जनकमृत्पिंडादिसामर्थ्याभावादिति भावः तस्माद्यत्सामग्री २३८
मयं दृश्यत इति प्रतिपद्यते भवतात देव परमाणव इति॥ यदुक्तं॥ परभागादरिसणऊ सव्वाराभागसुहुमयाऊ यइत्यादि। तत्र प्रतिविधानमाह। दिसस्सा

रभागो। घिप्पइ न य परोत्तिनणु विरुद्धमिदं॥ सव्वाभावे विनमो। घेप्पइ किं खरविसाणस्स॥ यदुक्तं दृश्यस्यापि वस्तुनः परभागस्तावन्न दृश्यते आराद्भागस्तु गृह्य
ते परंसोप्यन्यान्यपरभागकल्पनया प्रागुक्तयुक्तितो नास्तीति ननु विरुद्धमिदं गृह्यते ऽसौ न च समस्तीति सर्वाभावाद्भ्रांत्यासौ गृह्यत इति चेन्नदयुक्तं यतः
सर्वाभावे तुल्येपि किमिति खरविषाणस्य संबंधी आराद्भागो न गृह्यते समता विपर्ययो वा कथं न भवतीति॥ किंच। परभागादरिसणऊ। नाराभागे विकि
न मणुमाणंति। आराभागग्गहणे। किंवा परभागसंसिद्धी॥ परभागमात्रादर्शनादाराद्भागोपि नास्तीत्यत्र किमनुमानं भवतः एतदुक्तं भवति॥ यत्प्रत्यक्षेण
सकललोकप्रसिद्धं तदप्रेक्षेष्यमिव कथमनुमानेन बाध्यते आराद्भागस्य हि आपेक्षिकत्वात्तदन्यथानुपपत्तेः परभागानुमानं तावद्युज्यते यत्तु
परभागादर्शनमात्रेणैव तन्निन्हवः सोऽसंबद्ध एव सत्स्वपि देशादिविप्रकृष्टेषु मेरुपिशाचादिष्वदर्शनसंभवात्तस्मान्न परभागादर्शनमात्रेणाराद्भागोऽ
यन्होतव्यः किं चाराद्भागग्रहणे परभागानुमानं युज्येतापीति भाष्यकारोप्याह॥ आराभागेत्यादि॥ आराद्भागग्रहणे कथं न परभागसंसिद्धिरपि तु तत्संसि
द्धिरेव तथाहि दृश्यस्य वस्तुनः परभागोस्ति तत्संबंधिभूतस्याराद्भागस्य ग्रहणादिह यत्संबंधिभूतो भागो गृह्यते तत्समस्ति यथा नभसः पूर्वभागे
गृहीते तत्संबंधी अपरभागः गृह्यते च घटादेराराद्भागोऽतस्तत्संबंधिभूतः परभागोप्यस्ति। यच्चोक्तं॥ आराद्भागस्याप्यन्य आराद्भागः कल्पनीयस्तस्या
प्यन्य इत्यादि तावद्यावत्सर्वारातीयभागः इत्यत्रापि परभागस्यासत्त्वे सर्वारातीयभागपरिकल्पनमनुपपन्नमेव स्यात्तस्मादस्ति परभाग इति। अपि
च। सव्वाभावे विकऊ॥ आरापरमज्झभागनाणत्तं। अहपरमईए भन्नइ। सपरमइ विसेसणं कत्तो आरपरमज्झभागा। पडिवण्णा जइ न कूणया नाम। अण्ण
डिवणेसु खरविसाणस्स। सव्वाभावेचारा। भागो किं दीसए न परभागो। सव्वाग्गहणं च न किं। किंवा न विवज्जऊ होइ॥ तिस्रोपि प्रतीतार्थाए
वेति॥ किंच। यदि परभागादर्शनाद्भावानामसत्त्वं प्रतिपाद्यते तर्हि स्फटिकादीनां तन्नस्यादिति दर्शयन्नाह। परभागदरिसणं वा। फलिहाईणंति ते धुवं
संति। जइ वा ते वि न संता। परभागादरिसणमहेऊ। सव्वादरिसणऊ च्चिय। नाभणए कीस भण्णाइ तन्नाम। पुव्वब्भुवगमहाणी। पच्चक्कविराहऊ चेव॥
ननु येषां स्फटिकाभ्रपटलादीनां भावानां परभागदर्शनमस्ति ते तावद्ध्रुवं संत्येवेति परभागादर्शनादित्ययं न हेतुनासर्वभावानामसत्त्वं न सिध्य
ति अथ स्फटिकादयोपि न संति तर्हि परभागादर्शनादित्ययमहेतुस्त्वदभिप्रेतस्य सर्वभावासत्त्वस्यासाधकत्वादतोऽव्यापकममुं हेतुं परित्य
ज्य सर्वादर्शनान्न संतीति भावा इत्ययमेव व्यापको हेतुः कस्मान्नाभण्यते भण्यइ तन्नामेति॥ अत्र परउत्तरं भणति॥ किमित्याह तन्नामोस्तु सर्वादर्श
नादित्ययं हेतुस्तर्हि भवत्वित्यर्थः यथा तथा शून्यतैवास्माभिः साधयितव्यासा च सर्वादर्शनादित्यनेनापि हेतुना सिध्यतु किमनेनाग्रहेणास्माकमि
तिभावः अथ सूरिराह॥ पुव्वेत्यादि नन्विदानीं सर्वादर्शनादिति ब्रुवतो भवतः परभागादरिसणऊ ति पूर्वाभ्युपगतस्य हानिः प्राप्नोति किंच॥ पाम

विशेषा·वि·वृ· ग्रामनगरसरित्समुद्रघटपटादीनां प्रत्यक्षेणैव दर्शनात्सर्वादर्शनलक्षणस्य हेतोः प्रत्यक्षविरोधस्ततः प्रत्यक्षविरोधश्च सर्वादर्शनादित्येतदयुक्तमि
२३९. ति। अत्र कश्चिदाह॥ ननु सपक्षस्य सर्वस्याव्यापकोऽपि विपक्षात्सर्वथा निवृत्तो हेतुरिष्यत एव यथाऽनित्यः शब्दः प्रयत्नानान्तरीयकत्वादिति नत्वनित्ये
ऽर्थः सर्वोऽपि प्रयत्नानान्तरीयको विद्युद्घनकुसुमादिभिर्व्यभिचारात्तद्वदिहापि यद्यपि यद्यपि सर्वेष्वपि भावेषु परभागादर्शनं नास्ति तथापि बहुष्वुताव
दस्त्येव तेषु शून्यतां साधयन्नसौ सम्यग्हेतुर्भविष्यति। तदयुक्तं॥ यतस्तत्र यदनित्यं न भवति तत्प्रयत्नानान्तरीयकमपि न भवति यथाऽऽकाशमि
त्येवं व्यतिरेकः सिध्यति इह तु यत्र च शून्यता नास्ति किं तर्हि वस्तुनः सत्त्वं परभागादर्शनमपि तत्र नास्ति। किंतु परभागदर्शनं यथा घट इति भवतः स
र्वासद्वादिनो व्यतिरेकः क्वचिदपि न सिध्यत्यतोऽहेतुरेवायमिति। अत्र पराभिप्रायमाशंक्य परिहरन्नाह। नत्थि परमज्झभागा। अप्पच्चक्खत्तऊ मई हो
ज्जा। ननु अरकुस्सावन्ती। अप्पच्चक्खत्तहा पीवा॥ अथ स्यान्मतिः परमध्यभागौ न स्तः अप्रत्यक्षत्वात्खरविषाणवत्तदसत्त्वेन तदपेक्षया निर्दिष्टरूप
मानः आराद्भागोऽपि नास्त्यतः सर्वशून्यतेत्यभिप्रायः। तदयुक्तं॥ यतोऽक्षमक्षमिन्द्रियं जीवो वा इन्द्रियं प्रतिवर्त्तते तदनिप्रत्यक्षोऽर्थः न प्रत्यक्षोऽप्रत्यक्षः तद्भावोऽ
प्रत्यक्षत्वं तस्मादप्रत्यक्षत्वादित्युच्यमाने नन्वक्षाणामर्थस्य चापत्तिः सत्ता प्राप्नोति तदापत्तौ च शून्यताभ्युपगमहानिः शून्यतायां वाप्रत्यक्षत्वलक्ष
णस्य हेतोर्हानिः अक्षार्थानामभावे प्रत्यक्षाप्रत्यक्षव्यपदेशानुपपत्तिरिति भावः। अपि चाप्रत्यक्षत्वादित्यनैकान्तिको हेतुरिति दर्शयन्नाह। अत्थि अ
पच्चक्खं पि हु। जह भवओ संसयाइविन्नाणं। अह नत्थि कण्णायाका। कारतवको णो बलछ्का॥ नन्वप्रत्यक्षमप्यस्ति किंचिद्वस्तु यथा भवतः संशयादिविज्ञानं
मन्येषामप्रत्यक्षमप्यस्ति ततो यथैतत्तथा परमध्यभागावप्यप्रत्यक्षौ भविष्यतः इत्यनैकान्तिको हेतुः अथ भवत्संशयादिविज्ञानमपि नास्ति तर्हि का नाम
शून्यता कस्य वाऽसौ केन वाऽपरः कश्चाभवत एवेह तत्र किल संशयः स चेन्नास्ति तर्हि कस्यान्यस्य ग्रामनगरादिसत्त्वे विप्रतिपत्तिरिति भावः। तदेवं यु
क्तिभिः शून्यतामपाकृत्य भगवान्व्यक्तं शिक्षयन्नाह। पच्चक्खेसु न जुत्तो। तुह भूमिजलानलेसु संदेहो। अनिलागासेसु भवे। सो वि न जुत्तो णुमाणा
ओ॥ तस्माद्भूमिजलवन्हिषु प्रत्यक्षेषु तव सौम्य संशयो न युक्तो यथा स्वस्वरूपे। अनिलोऽपि प्रत्यक्ष एव गुणप्रत्यक्षत्वाद्घटवत्ततस्तत्रापि न संशयो युक्तः
॥ अनुवानिलाकाशयोः प्रत्यक्षत्वेन संशयस्तथाप्यसौ न युक्तोऽनुमानसिद्धत्वात्तयोरिति। तत्रानिलविषयं तावदनुमानमाह। अत्थि अदिस्सापाइय फरिसा
इगुणी गुणत्तणओ। रूवस्स घडो व्व गुणी। जो तेसिं सो निलो नाम॥ य एते ऽदृश्येन केनाप्यापादिता जनिताः स्पर्शादयस्ते विद्यमानगुणिनो गुणत्वादादि
शब्दाच्च स्वास्थ्यकंपा गृह्यन्ते एतेऽपि द्विवायुप्रभवत्वाद्वायुगुणा एव इह ये गुणास्ते विद्यमानगुणिनो दृष्टाः यथा घटरूपादयः यश्चैषां स्पर्शशब्द २३९
स्वास्थ्यकंपा गृह्यन्ते एतेऽपि द्विवायुप्रभवत्वाद्वायुगुणा एव इह ये गुणास्ते विद्यमानगुणिनो दृष्टाः यथा घटरूपादयः यश्चैषां स्पर्शशब्दस्वास्थ्यकंपानां

गुणी स वायुस्तस्मादस्त्यसाविति। आकाशसाधकमनुमानमाह। अत्थि वसुहाइभाणं। तोयस्स घडो व्व मुत्तिमत्ताओ। जं भूयाणं भाणं। तं वोमं वत्त सुव
त्तं॥ अस्ति वसुधाजलानलवायूनां भाजनमाधारो मूर्त्तिमत्त्वात्तोयस्य घटवद्यच्च तेषां भाजनं तदायुष्मन्व्यक्त सुव्यक्तमेव व्योमेति॥ यदि च॥ साध्यै
कदेशतां दृष्टान्तस्य कश्चित्प्रेरयति तदिदं प्रयोगो विद्यमानभाजना पृथ्वी मूर्त्तत्वात्तोयवत्तथा आपस्तेजोवत्तेजश्च वायुवद्वायुश्च पृथ्वीवदिति
तदेवं पंचापि भूतानि प्रसाध्योपसंहरन्नाह। एवं पच्चक्खाइ। यमाणसिद्धाइं सोम्म पडिवज्ज। जीवसरीराहारो॥ वओगधम्माइं भूयाइं॥ तदेवं
सौम्य प्रत्यक्षादिप्रमाणसिद्धानि प्रतिपद्यस्व पंचभूतानि जीवशरीरयोराधाराद्युपयोगधर्मकाणि चेतानीति। अत्राशंक्योपहतानि च पृथिव्यप्तेजो
वायुलक्षणानि चत्वारि भूतानि सचेतनान्यतः पराभिप्रायमाशंक्य तेषां च सचेतनत्वं संसाधयिषुराह। किह सजीवाय मई। तल्लिंगाउ निलावसा
णाइं। वोमं विमुत्तिभावा। दाधारो चेव न सजीवं॥ कथं पुनः सह जीवेन वर्त्तंत इति सजीवानि भूतानीति परस्य मतिः स्यादत्रोच्यते तस्य जीवस्य लिंगं
तल्लिंगं तस्मात्तदुपलब्धेरित्यर्थः सचेतनान्यनिलावसानानि चत्वारि भूतानि व्योमाकाशं पुनर्विगतमूर्त्तिभावमाधार एव न तु सजीवमिति तल्लिं
गादित्यत्कं॥ तत्र वनस्पतेः सजीवत्वे किं लिंगमित्याह। जम्मजराजीवणमरणरुहणाहारदोहलामयओ॥ रोगतिगिच्छाईहिय। नारि व्व सचेयणा
तरवो॥ सचेतनास्तरव इति प्रतिज्ञा जन्मजराजीवनमरणसंरोहणाहारदोहदामयतच्चिकित्सादिसद्भावादिति हेतुर्नारीवदिति दृष्टान्तः॥ आह॥
नन्वनैकान्तिकोऽयं अचेतनेष्वपि जन्मादिव्यपदेशदर्शनात्तथाहि जातं नष्टं दधीति व्यपदिश्यते न चैतत्सचेतनं तथा जीवितं विषं मृतं कुसुंभकमित्या
दि॥ अत्रोच्यते॥ वनस्पतौ सर्वाण्यपि सचेतनालिंगानि जन्मादीन्युपलभ्यंतेऽतो मनुष्यादिवत्तानि तेषु निरुपचरितानि दध्यादौ तु प्रतिनियता एव
कश्चिज्जातादिव्यपदेशो दृश्यते स चौपचारिक एव जातमिव जातं दधि मृतमिव मृतं कुसुंभकमित्यादि वनस्पतिरेव सचेतनत्वसाधने हेत्व
न्तराण्यप्याह। छिक्कपरोइया छिक्कमेत्तसंकोइ कुलिंगो व्व। आसयसंचाराओ। वियत्त वल्लीवियाणाइं। सम्भादओ य सावयबोहसंकोयणाइओऽभिमया
बउलादओ य सद्दाइं। विसयकालोवलंभाओ॥ सचेतनाः स्पृष्टप्ररोदिकादयो वनस्पतयः स्पृष्टमात्रसंकोचात्कुलिंगाः कीटादिवत्तथा सचेतना वल्ल्यादयः स्व
रक्षार्थं वृत्तिवृक्षवरंडकाद्याश्रयं प्रति संचरणात्तथा सर्पादयश्च चेतनत्वेनाभिमताः स्वापप्रबोधसंकोचकादिमत्त्वाद्देवदत्तादिवत्तथा सचेतना बकुलाशो
ककुरबकविरहकचंपकतिलकादयः शब्दादिविषयकालोपलंभाद्रूपगंधरसस्पर्शविषयाणां काले प्रत्यभिज्ञोपभोगस्य यथासंभवमुपलंभादित्यर्थः
पुरुषवदिति एवं पूर्वमपि दोहदालिंगेषु कूष्मांडीबीजपूरकादयो वनस्पतिविशेषाः पक्षीकर्त्तव्या इति। अथ सामान्येन तरूणां पृथ्वीविशेषाणां च विद्रुमा
दीनां सचेतनत्वसाधनायाह। मंसंकुरो व्व सामाणजाइरूवंकुरोवलंभाओ। तरुगण विद्रुमलवणो। वलादओ सासयावत्था॥ तरुगणास्तथा विद्रुमलवणोप

लादयश्चस्वाश्रयावस्थाः स्वजन्मस्थानगताः संतश्चेतनाः छिन्नानाममीषांपुनस्तत्स्थान एवसमानजातीयांकुरोच्छानाद्द्रुमांसांकुरवदाह ननुपृथिव्यादिभूता
नामिहसचेतनत्वंसाधयितुमारब्धंततः पृथिव्याएवादौतरसाधयितुंयुक्तंतस्याएवादावुपन्यासात्किमितिजन्मजराजीवनेत्यादिनातरूणामेवादौतत्साधितं
पश्चात्तुविद्रुमलवणोपलादीनामेवेति॥सत्यं॥किंतुपृथ्वीविकारतयापृथ्वीभूतएवतरूणामंतर्भावो लोकेप्रसिद्धः स्वव्यक्तचैतन्यलिंगाश्चयथातरवोन
तथालवणोपलजलादयइतितेषामेवादौचैतन्यंसाधितमिति॥अथोदकस्यसचेतनत्वंसाधयितुमाह॥भूमीरकयसाभाविसंभवउददुराइवजलमुत्तं॥
अहवामच्छोवसभाव।वोमसंभूयपायाऊ॥भौममंभःसचेतनमुक्तंक्षतभूमिसमानजातीयस्वाभाविकस्यतस्यसंभवाद्दर्दुरवदथवासचेतनमंतरिक्षमंत
अभ्रादिविकारस्वाभावसंभूतयानान्मत्स्यवदिति।तेजोनिलावधिकृत्याह।अपरप्रेरिअतिरियानियमियदिग्गमणऊणिलोगोव्वअनलोआहारओ।विद्धिविकार
यलंभाउ॥सात्मकोवायुः अपरप्रेरिततिर्यगनियमितदिग्गमनाद्गोवत्तथासात्मकंतेजः आहारोपादानात्तद्वृद्धौविकारविशेषोपलंभान्नरवदाथवाबंधमुक्ते
म्याश्चव्यत्ययेनोपन्यासइति।तदेवंपृथिव्यादीनांप्रत्येकंसचेतनत्वंप्रसाध्येदानींसर्वेषांसामान्येनतत्साधयन्नाह।तणवोणइआइविगारमुत्तजाइत्तऊणिलंता
नथासअहयाऊ।निज्जीवसजीवरूवाऊ॥पृथिव्याद्यनिलांतानिचत्वारिभूतानिजीवनिर्वर्तितातत्तदाधारभूतास्तनवइतिप्रतिज्ञा अभ्रादिविकारादन्य
सतिमूर्त्तजातित्वाद्गवादिशरीरवदभ्रादिविकारास्तुविश्रसापरिणतपुद्गलसंघातरूपत्वेनाचेतनत्वाद्वर्जिताः ताश्चपृथिव्यादितनवःशस्त्रोपहतानि
र्जीवाअशस्त्रोपहतास्तुसजीवाःवर्णगंधरसादिलक्षणतःसमवसेयाइति।प्रकारांतरेणापिपृथिव्याद्येकेंद्रियाणांजीवत्वंसाधयितुमाह।सिज्झंतिसो
ममबुहसो।जीवानवसत्तसंभवोनविय।परिमियदेसोलोगो।नसंतिचेगिंदियाजेसिं।तेसिंभवविच्छित्ती।पावइनेढायसाजऊतेण।सिद्धंमणंतजी
वा।भुत्याहारायतेवस्सं॥सिध्यंतिमुक्तिंयांतितावदजस्रंबहवोजीवाः नचनवसत्वोत्पादःकेनापीष्यते परिमितदेशश्चलोकस्तदस्ततदाधाराः
स्थूलाःस्तोकाएवजीवाघटंते एवंचसतियेषांमतेनवनस्पत्यादयएकेंद्रियाजीवानसंति तेषांभवस्यसंसारस्यविच्छित्तिःप्राप्नोति नचासौकस्या
पितीर्थांतरीयस्येष्टायतस्तेनतस्मात्कारणात्सिद्धं सत्वानामानंत्यंतेचसंसारित्वादवस्यंभूताधाराःसंसारिणएवेत्यर्थः नचवनस्पत्यादीनंतरेणा
न्यत्तेषांशरीरमुपपद्यते निवेद्यतांतावच्छरीरशरास्ते ऽभ्युपगम्यतांवावनस्पत्यादीनांसात्मकत्वमितिभावः अथप्रेरकमाशंक्य परिहारमाह।एव
मर्हिंसाभावो जीवघणंतिनयतंजऊभिहियं।सत्थोवहयमजीवं।नयजीवघणंतितोहिंसा॥नन्वेवंसतिलोकस्यातीवपृथिव्यादिजीवघनत्वादहिं
साभावःसंयतैरप्यहिंसाव्रतमिथ्यनिर्वाहयितुमशक्यमितिभावः तदेतन्नयतोनंतरमेवाभिहितमस्माभिःशस्त्राभिहतंपृथिव्यादिकमजीवंभव २४०
ति तदजीवत्वेचाकृताकारितादिपरिभोगेननिर्वहत्येवयतीनांसंयमः नचजीवघनोलोकइत्येतावन्मात्रेणैवहिंसासंभवतीति॥आह॥ननुजी

याकुले लोकेऽवश्यमेवजीवघातःसंभाव्यतेजीवांश्चघ्नन्कथंहिंसकोनस्यादितिभावः।नयघायऊत्तिहिंसो।नघायंतोत्तिनिच्छियमहिंसो।नविरलजीवमहिं
सो नयजीवघणंतितोहिंसो।अहणंतोविहुहिंसो।दुट्ठत्तणऊमऊअहिमरोव्व।बाहिंतोनविहिंसो।सुद्धत्तणऊजहविज्जो।नहिघातकइत्येतावताहिंस्रो
नचाघ्नन्नपिनिश्चयनयमतेनाहिंस्रः नापिविरलजीवमित्येतावन्मात्रेणाहिंस्रोनचापिजीवघनमित्येतावताचहिंस्रइति किंतर्हिअभिमरोराजादिघा
तकःसइवदुष्टाध्यवसायोऽघ्नन्नपिहिंस्रोमतः बाधमानोपिचशुद्धपरिणामोनहिंस्रोयथावैद्यइति।घ्नन्नपिअहिंस्रोऽघ्नन्नपिचहिंस्रउक्तःसइह
कथंभूतोमात्यइत्याह।पंचसमिऊतिगुत्तो।नाणीअविहिंसऊनविवरीऊ होइवसंपत्तिसे।मावाजीवोवरोहेणं॥पंचभिःसमितिभिःसमितस्तिसृभिश्च
गुप्तिभिर्गुप्तोज्ञानीजीवस्वरूपतद्रक्षाक्रियाभिज्ञः सर्वथाजीवरक्षापरिणामपरिणतस्तत्प्रयत्नश्चकथमपिहिंसन्नप्यविहिंसकोमतः एतद्विपरीतलक्षण
स्तुनाहिंसकः किंतुहिंस्रएवायमशुभपरिणामत्वादत्यजीवहिंसायास्तुजीवोपरोधेनजीवस्यकीटादिरूपरोधेनोपघातिनसंपत्तिर्भवतुमाह व्याससत्तस्यसाध्वा
देःहिंसकत्वेतस्याअनेकांतिकत्वादिति।कुतस्तस्यान्तनैकांतिकत्वमित्याह।असुभोजोपरिणामो।साहिंसासोउबाहिरनिमित्तं।कोविअवेक्खेनवा।जम्हा
णेगंतियंवज्झं॥यस्मादिहनिश्चयनयतोयोऽशुभपरिणामःसएवहिंसेत्याख्यायते सचबाह्यसत्वातिपातक्रियालक्षणंनिमित्तंकोप्यपेक्षते कोपिपुनस्त
न्निरपेक्षोपिभवेद्यथातंदुलमत्स्यादीनांयस्मादनैकांतिकमेवबाह्यंनिमित्तंतत्सद्भावेप्यहिंसकत्वात्तदभावेपिचहिंसकत्वादिति।नन्वेवंतर्हिबाह्योजीवघा
तःकिंसर्वथैवहिंसानसंभवतिउच्यतेकश्चिद्भवति।कश्चित्तुनकथमित्याह।असुभपरिणामहेऊ।जीवाबाहोत्तितोमयंहिंसा।जस्सउनसोनिमित्तं।संतो
विनतस्ससाहिंसा॥ततस्तस्माद्योजीवाबाधोऽशुभपरिणामस्यहेतुरथवाशुभपरिणामोहेतुःकारणंयस्यासावशुभपरिणामहेतुर्जीवाबाधोजीवघा
तःसएवहिंसेतिमतंतीर्थकरगणधराणांयस्यतुजीवाबाधस्यसोऽशुभपरिणामोननिमित्तंसजीवाबाधःसन्नपितस्यसाधोर्नहिंसेति।अमुमेवा
र्थंदृष्टांतेनद्रढयन्नाह सद्दादऊरइफला नवीयमोहस्सभावसुद्धीऊ।जहतहजीवाबाहो।नसुहोमणसोविहिंसाए॥अथेहवीतरागद्वेषमोहस्यभगव
तइष्टाःशब्दरूपादयोभावविशुद्धितोनकदाचिद्रतिफलारतिजनकाःसंपद्यंते यथावेहशुद्धात्मनोरूपवत्यामपिमातरिपुनर्विषयाभिलाषःसंजाय
ते तथाशुद्धपरिणामस्ययत्नवतःसाधोःसत्वोपघातोपिनहिंसायैसंपद्यते ततोऽशुभपरिणामजनकत्वेबाह्यंनिमित्तमनैकांतिकमेवेति तस्माद्व्यव
संतिपंचभूतानिचेतनानिवाद्यानि[illegible]चत्वारिस्येतनप्रतीहीतिस्थितं।यच्चस्वप्नोपमंवैसकलमित्यादि॥तत्रापियस्तवचेतसिवर्त्ततेनासावर्थःकिंनुभ
यभययोर्द्विनानां भव्यसत्वानांधनकनकपुत्रकलत्रादिसारतामात्रप्रतिपादनंतेनविधीयते येनतेतदास्थांपरित्यज्यमुक्तयेप्रवर्त्तंते नपुनस्तत्र
भूताभावःप्रतिपाद्यतइतिमुंचसंशयंप्रतिपद्यस्वाभूतास्तित्वमिति।ततोव्यपगतसंदेहःसंवेगमागतोव्यक्तःकिंकृतवानित्याह।छिन्नंमिसंसयंमीत्यादि

MEMORIAL

गाथाव्याख्यानं पूर्ववदिति ध्वनीतिगाथार्थः॥२२१॥ इति चतुर्थो गणधरवादः समाप्तः॥४॥ अथ पंचमगणधरवक्तव्यतामभिधित्सुराह। तेपव्वइए सोऊ
ण सुहम्म आगच्छई जिणसगासं। वच्चामि ण वंदामी। वंदित्ता पज्जुवासामि॥ व्याख्या पूर्ववत् नवरं सुधर्मनामा द्विजोपाध्यायो ऽत्र वक्तव्यः। आगतस्य च तत
स्य भगवता किं कृतमित्याह। आभट्ठो य गाहा। व्याख्या पूर्ववदिति। आभाष्य किमुक्तोसावित्याह। किं मन्नि जारिसो इह भवंमि सो तारिसो परभवे वि। वेयपया
णय अत्थं। न याणसी तेसिमो अत्थो॥ त्वमेवं मन्यसे किं यो मनुष्यादिर्यादृश इह भवे स तादृश एव परभवेपि न न्वेवमनुचितस्ते संशयो यतो ऽसौ विरुद्धवेद
पदश्रुतिनिबंधनो वर्त्तते। तानि चामूनि॥ पुरुषो वै पुरुषत्वमश्नुते पशवः पशुत्वमित्यादि। तथा॥ शृगालो वै एष जायते यः सपुरीषो दह्यत इत्यादि
एषां च वेदपदानामयमेवार्थं मन्यसे त्वं पुरुषो मृतः सन् परभवे पुरुषत्वमेवाश्नुते प्राप्नोति यथा पशवो गवादयः पशुत्वमेवेत्यादि अमूनि किल भवांत
रगतजंतुसादृश्यप्रतिपादकानि तथा शृगालो वै इत्यादीनि वैसादृश्यप्रख्यापकानीत्यतस्तव संशयः अयं चायुक्त एव यतो ऽमीषां वेदपदानां ना
यमर्थः किंतु वक्ष्यमाणलक्षण इति॥ अत्र भाष्यं। कारणसरिसं कज्जं। बीयस्सेवंकुरोत्ति मण्णंतो। इहभवसरिसं सव्वं। जमवेसि परे वि तमजुत्तं। सुध
र्मा यां प्रति भगवानुवाच॥ इह कारणानुरूपमेव कार्यं भवति यथा यववीजानुरूपो यवांकुरः इह भवकारणं चान्यजन्म ततस्तेनापीह भवसदृ
शेन भवितव्यमित्येवं मन्यमानस्त्वं यदिह भवसदृशं सर्वं पुरुषादिकं परभवेप्येषि तदयुक्तमेवेति। कुत इत्याह। जाइ सरो सिंगाऊ॥ भूतणऊ सा
सवाणुलित्ताऊ संजायइ गोलोमा। विलोमसंजोगऊ दुव्वा॥ इति रुक्खायुवेदे। जोणिविहाणे य विसरिसेहिंतो दीसइ जम्हा जम्मं। सुहम्म तो नायमेगंतो
॥ ततः कारणानुरूपं कार्यमिति सुधर्मन्नायमेकांतो यतः शृंगादपि शरो जायते तस्मादेव च सर्षपानुलिप्ताद्भूतृणकः त्राप्यसंघातो जायते तथा गोलो
माविलोमाभ्यां दूर्वा प्रभवतीत्येवं वृक्षायुर्वेदविलक्षणानेकद्रव्यसंयोगजन्मानो वनस्पतयो दृश्यंते तथा योनिविधानेन योनिप्राभृते विषद्रव्याने
कद्रव्यसंयोगयोनयः सर्प्पसिंहादिप्राणिनो मणयो हेमादयश्च पदार्था नानारूपाः समुपलभ्यंते अतः केयं कार्यस्य कारणानुरूपतेति। अ
थवा यत एव कारणानुरूपं कार्यमत एव भवांतरे विचित्ररूपता जंतूनामिति दर्शयति। अहव जउ च्चिय बीयाणुरूवजम्मं मयं तउ च्चेव जीवं गिण्ह
शवाऊ। भवंतरे चित्तपरिणामं। जेण भवंकुरबीयं। कम्मं चित्तं च तं जउ भिहियं। हेउविचित्तत्तणऊ। भवंकुरविचित्तया तेणं जइ पडिवण्णं कम्मं
हेउविचित्तत्तणऊ विचित्तं च तो तस्स फलं विचित्तं। पवज्ज संसारिणो सोम्म॥ व्याख्या॥ अथवा यत एव बीजानुरूपं कारणानुगुणं कार्याणां जन्मम
तं तत एवेह भवाद्भवांतरे जीवं ग्रहाण प्रतिपद्यस्व कथंभूतं जातिकुलबलैश्वर्यरूपादिविचित्रपरिणामं॥ यदि नाम बीजानुरूपं जन्म तथा २४१
पि कथं भवांतरे विचित्रता जीवानामित्याह॥ जेण भवंकुरेत्यादि येन यस्मान्नारकतिर्यगादिरूपेण भवनं भवः स एवांकुर इव अंकुरस्तस्य बीजमि

ह कर्मैवावसेयं तच्च मिथ्यात्वाविरत्यादिहेतुवैचित्र्याद्विचित्रं यस्मान्मयाभिहितं तस्मात्तज्जन्यस्य भवांकुरस्यापि जात्यादिभेदेन विचित्रता ततो य
दि त्वया कर्म प्रतिपन्नं हेतुवैचित्र्याच्च यदि च न तद्वैचित्र्यमभ्युपगतं ततः संसारिणो जीवस्य तत्फलमपि नारकतिर्यङ्मनुष्यामररूपेण भव
नरूपं सौम्य विचित्ररूपं प्रतिपद्यस्वेति। अत्र प्रमाणमुपन्यस्यन्नाह। चित्तं संसारित्तं। विचित्तकम्मफलभावऊ हेऊ। इह चित्तं चित्ताणं कम्माण फलं
च लोगंमि॥ चित्रं संसारिजीवानां नारकादिरूपेण संसारित्वमिति प्रतिज्ञा विचित्रस्य कर्मणः फलरूपत्वादिति हेतुः इह यद्विचित्रहेतुकं तद्विचित्र
मुपलभ्यते यथेह विचित्राणां कृषिवाणिज्यादिकर्मणां फलं लोक इति। ८ तदेवं कर्मवैचित्र्याद्भववैचित्र्ये प्रमाणमुक्तं। अथ कर्मणोपि वैचित्र्ये
प्रमाणमाह। चित्ता कम्मपरिणई। पोग्गलपरिणामऊ जहा वज्झा। कम्माणं चित्तया पुण। तद्धेउविचित्तभावाऊ॥ इह विचित्रा कर्मपरिणतिः पु
द्गलपरिणामात्मकत्वादिह यत्पुद्गलपरिणत्यात्मकं तद्विचित्रपरिणतिरूपं दृश्यते यथा बाह्योभ्रादिविकारः पृथिव्यादिविकारो वा यत्तु विचि
त्रपरिणतिरूपं न भवति तत्पुद्गलपरिणामात्मकमपि न भवति यथा आकाशं या पुनः पुद्गलपरिणामतास्यापि कर्मणामावरणादिभेदेन विशे
षतो विचित्रता सा तद्धेतुवैचित्र्यादवगंतव्या विचित्राश्च मिथ्यात्वादयः प्रद्वेषनिह्नवादयश्च कर्महेतव इति। अथ पराभ्युपगमे नैव परभवे
जीवानां वैसादृश्यं साधयन्नाह। अह वा इहभवसरिसो। परलोगो वि जइ सम्मऊ तेणं। कम्मफलं पि इहभव। सरिसं पडिवज्ज परलोए। किं भणि
यमिहं मणुया नाणागइकम्मकारिणो संति। जइ ते तप्फलभाजो। परे वि तो सरिसया जुत्ता॥ व्याख्या॥ अथवा यदीहभवसदृशः परलोकोस
म्मतो भवतः तेणंति ततः कर्मफलमपि परलोके इहभवसदृशं इह सविचित्रशुभाशुभक्रियानुरूपं विचित्रं प्रतिपद्यस्वेति। एवं मुकुलितं
प्रतिपाद्येतदेव भावयति॥ किं भणियमित्यादि किमेतावता प्रतिपादितं भवति इह तावन्मनुष्याः नानागतिहेतुभूतविचित्रक्रियानुष्ठायिनः संती
ति प्रत्यक्षत एवोपलभ्यंते ततो यदि ते परलोके तत्तत्क्रियाफलभाज इष्यंते ततो यथेह स्वक्रियाणामसदृशास्तथा परलोकगतजंतूनामपि सैव
युक्तानुयोत्र यादृशः स परत्रापि तादृश एवेति। अत्र पराभिप्रायमाशंक्य परिहरन्नाह। अह इह सफलं कम्मं। न परे तो सव्वहा न सरिसत्तं। अ
कयागमकयनासा। कम्माभावेहवा पत्तो। कम्माभावे च कऊ। भवंतरं सरिसया वा तदभावे। निक्कारणऊ व भवो। जइ तो नासो वि तह चेव
॥ अथैवं मन्यसे इहस्य सफलं कर्मेति इहभवसंबंध्येव कृष्यादिक्रियारूपं कर्म सफलं न तु पारभविकं दानादिक्रियारूपं कर्म ततश्च तत्फला
भावान्न परलोके जंतुवैसादृश्यं॥ अत्रोत्तरमाह॥ तो सव्वहा न सरिसत्तंति तत एवं सति यत्त्वयाभिप्रेतं तत्सर्वथा परभवे जीवानां सदृशत्वं न
स्यात् अपि तु कर्मण्याजन्यत तत्त्वं नास्ति पारभविकक्रियाणां त्वया निःफलत्वाभ्युपगमत्वात् निःफलत्वेन कर्माभावादथ कर्माभावेपि भ

गाथाव्याख्यानं पूर्ववदिति भावनीयमिति गाथार्थः ॥२२१॥ इति चतुर्थो गणधरवादः समाप्तः ॥४॥ अथ पंचमगणधरवक्तव्यतामभिधित्सुराह । ते पव्वइए सोउं
सुहम्मो आगच्छई जिणसगासं । वच्चामि ण वंदामी । वंदित्ता पज्जुवासामि ॥ व्याख्या पूर्ववत् नवरं सुधर्मनामा द्विजोपाध्यायो ऽत्र वक्तव्यः । आगतस्य च तत
स भगवता किं कृतमित्याह । आभट्ठो य गाहा । व्याख्या पूर्ववदिति । आभाष्य च किमुक्तो असावित्याह । किं मन्ने जारिसो इह । भवंमि सो तारिसो परभवे वि । वेयपया
ण य अत्थं । न याणसी तेसिमो अत्थो ॥ त्वमेवं मन्यसे किं यो मनुष्यादिर्यादृश इह भवे स तादृशः परभवे पि न त्वथ मनुचितस्ते संशयो यतो ऽसौ विरुद्ध वेद
पदश्रुतिनिबंधनो वर्त्तते । तानि चामूनि ॥ पुरुषो वै पुरुषत्वमश्नुते पशवः पशुत्वमित्यादि । तथा ॥ शृगालो वै एष जायते यः सपुरीषो दह्यत इत्यादि
एषां च वेदपदानामयमेवार्थं मन्यसे त्वं पुरुषो मृतः सन् परभवे पुरुषत्वमेवाश्नुते प्राप्नोति यथा पशवो गवादयः पशुत्वमेवेत्यादि अमूनि किल भवांत
रगतजंतुसादृश्यप्रतिपादकानि तथा शृगालो वै इत्यादीनि वैसादृश्यख्यापकानीत्यतस्तव संशयः अयं चायुक्त एव यतो ऽमीषां वेदपदानां ना
यमर्थः किंतु वक्ष्यमाणलक्षण इति ॥ अत्र भाष्यं । कारणसरिसं कज्जं । बीयस्सेवंकुरोत्ति मण्णंतो । इह भवसरिसं सव्वं । जमवेसि परे वि तमजुत्तं । सुध
र्माणं प्रति भगवानुवाच ॥ इह कारणानुरूपमेव कार्यं भवति यथा यवबीजानुरूपो यवांकुरः इह भवकारणं चान्यजन्मनस्ततस्तेनापीह भवसदृ
शेन भवितव्यमित्येवं मन्यमानस्त्वं यदिह भवसदृशं सर्वं पुरुषादिकं परभवे प्यवैषि तदयुक्तमेवेति । कुत इत्याह । जाइ सरो सिंगाओ ॥ भूतणओ सा
सवाणुलित्ताओ संजायइ गोलोमा । विलोमसंजोगाओ दुव्वा ॥ इति रुक्खायुव्वेदे । जोणिविहाणे य विसरिसेहिंतो । दीसइ जम्हा जम्मं । सुहम्म तो नायमेगंतो
॥ ततः कारणानुरूपं कार्यमिति सुधर्मन् नायमेकांतो यतः शृंगादपि शरो जायते तस्मादेव च सर्षपानुलिप्तात् भूतृणकः शष्पसंघातो जायते तथा गोलो
माविलोमाभ्यो दूर्वा प्रभवतीत्येवं वृक्षायुर्वेदे विलक्षणानेकद्रव्यसंयोगजन्मानो वनस्पतयो दृश्यंते तथा योनिविधाने च योनिप्राभृते विसदृशाने
कद्रव्यसंयोगयोनयः सर्पसिंहादिप्राणिनो मणयो हेमादयश्च पदार्था नानारूपाः समुपलभ्यंते अतः कैव कार्यस्य कारणानुरूपतेति । अ
थवा यत एव कारणानुरूपं कार्यमत एव भवांतरे विचित्ररूपता जंतूनामिति दर्शयति । अहव जउ च्चिय बीयाणुरूवजम्मं मयं तओ च्चेव जीवं गिण्ह
भवाओ । भवंतरे चित्तपरिणामं । जेण भवंकुरबीयं । कम्मं चित्तं च तं जओ भिहियं । हेउविचित्तत्तणओ । भवंकुरविचित्तया तेणं जइ पडिवण्णं कम्मं
हेउविचित्तत्तओ विचित्तं च तो तप्फलं विचित्तं । पवज्ज संसारिणो सोम्म ॥ व्याख्या ॥ अथवा यत एव बीजानुरूपं कारणानुगुणं कार्याणां जन्मम
तं तत एवेह भवाद् भवांतरे जीवं गृहाण प्रतिपद्यस्व कथंभूतां जातिकुलबलैश्वर्यरूपादिविचित्रपरिणामं ॥ यदि नाम बीजानुरूपं जन्म तथा २४१
पि कथं भवांतरे विचित्रता जीवानामित्याह ॥ जेण भवंकुरेत्यादि येन यस्मान्नारकतिर्यगादिरूपेण भवनं भवः स एवांकुर इव अंकुरस्तस्य बीजमि

ह कर्मैव नान्यत् सेयं तच्च मिथ्यात्वाविरत्यादि हेतुवैचित्र्याद्विचित्रं यस्मान्मयाभिहितं तस्मात्तज्जन्यस्य भवांकुरस्यापि जात्यादिभेदेन विचित्रता ततो य
दि त्वया कर्म्म प्रतिपन्नं हेतुवैचित्र्याच्च यदि च तद्वैचित्र्यमभ्युपगतं ततः संसारिणो जीवस्य तत्फलमपि नारकतिर्यङ्मनुष्यामररूपेण भव
नरूपं सौम्य विचित्ररूपं प्रतिपद्यस्वेति । अत्र प्रमाणमुपरचयन्नाह । चित्तं संसारित्तं । विचित्तकम्मफलभावओ हेऊ । इह चित्तं चित्ताणं कम्माण फलं
च लोगंमि ॥ चित्रं संसारिजीवानां नारकादिरूपेण संसारित्वमिति प्रतिज्ञा विचित्रस्य कर्मणः फलरूपत्वादिति हेतुः इह यद्विचित्रहेतुकं तद्विचित्र
मुपलभ्यते यथेह विचित्राणां कृषिवाणिज्यादिकर्मणां फलं लोक इति । तदेवं कर्मवैचित्र्याद्भववैचित्र्ये प्रमाणमुक्तं । अथ कर्मणोपि वैचित्र्ये
प्रमाणमाह । चित्तं कम्मपरिणई । पोग्गलपरिणामओ जहा बज्झा । कम्माण चित्तया पुण । तद्धेउविचित्तभावाओ ॥ इह विचित्रा कर्मपरिणतिः पु
द्गलपरिणामात्मकत्वात् इह यत् पुद्गलपरिणात्यात्मकं तद्विचित्रपरिणतिरूपं दृश्यते यथा बाह्याभ्रादिविकारः पृथिव्यादिविकारो वा यत्तु विचि
त्रपरिणतिरूपं न भवति तत् पुद्गलपरिणामात्मकमपि न भवति यथाकाशं । अपि च पुनः पुद्गलपरिणामसाम्येपि कर्मणामावरणादिभेदेन विशे
षतो विचित्रता सा तद्धेतुवैचित्र्यादवगंतव्या विचित्राश्च मिथ्यात्वादयः प्रद्वेषनिह्नवादयश्च कर्महेतव इति । अथ पराभ्युपगमेनैव परभवे
जीवानां वैसदृश्यं साधयन्नाह । अह वा इह भवसरिसो । परलोगो वि जइ सम्मओ तेणं । कम्मफलंपि इह भव । सरिसं पडिवज्ज परलोए । किं भणि
यमिहं मणुया नाणागइकम्मकारिणो संति । जइ ते तप्फलभाजो । परे वि तो सरिसया जुत्ता ॥ व्याख्या ॥ अथ वा यदीह भवसदृशः परलोकोऽस्
मतो भवतस्तेणंति ततः कर्मफलमपि परलोके इह भवसदृशं इह सविचित्रशुभाशुभक्रियानुरूपं विचित्रं प्रतिपद्यस्वेति । एवं मुकुलितं
प्रतिपाद्येतदेव भावयति ॥ किं भणियमित्यादि किमेतावता प्रतिपादितं भवति इह तावन्मनुष्याः नानागतिहेतुभूतविचित्रक्रियानुष्ठायिनः संती
ति प्रत्यक्षत एव लभ्यंते ततो यदि ते परलोके तत्तत्क्रियाफलभाज इष्यंते ततो यथेह तत्क्रियाणामसदृशानां तथा परलोकगतजंतूनामपि सैव
युक्ता न तु योऽत्र यादृशः स परत्रापि तादृश एवेति । अत्र पराभिप्रायमाशंक्य परिहरन्नाह । अह इहसफलं कम्मं । न परे तो सव्वहा न सरिसत्तं । अ
कयागमकप्पणा सा । कम्माभावो अहवा पत्तो । कम्माभावे य कओ । भवंतरं सरिसया व तदभावे । निक्कारणओ भवो । जइ तो नासो वि तह चेव
॥ अथैवं ब्रूषे इह सफलं कर्मेति इह भवसंबंध्येव कृष्यादिक्रियारूपं कर्म सफलं न तु पारभविकं दानादिक्रियारूपं कर्म ततश्च तत्फला
भावान्न परलोके जंतुवैसदृश्यं ॥ अत्रोत्तरमाह ॥ तो सव्वहा न सरिसत्तंति तत एवं सति यत्त्वयाभिप्रेतं तत् सर्वथा परभवे जीवानां सदृशत्वं न
स्यान्नापि कर्म्मणा जन्यते तच्च नास्ति पारभविकक्रियाणां त्वया निःफलत्वाभ्युपगमत्वात् निःफलत्वे च कर्माभावात् अथ कर्माभावेपि भ

वैसादृश्यं नर्थ्योऽकृतस्यैवतस्यनिर्हेतुकस्यागमः प्राप्नोति कृतस्यचदानहिंसादिक्रियाफलरूपस्यकर्म्मणोनाशःप्रसजति अथवामूर्त्तएवकर्म्मणा
मभावःप्राप्तः दानहिंसादिक्रियाणांनिःफलत्वाभ्युपगमान्मूर्त्तएवकर्म्मणोबंधोपिनस्यादितिभावःततःकिमित्याह॥कर्म्माभावेचकारणाभावात्कु
तोभवांतरंतदभावेचदूरोत्सारितमेवसादृश्यं अथकर्म्मक्षयेपिभवइष्यतेतर्हिनिःकारणएवासौस्याद्यदिचैवमयमिष्यतेततोनाशोपितस्यभ
वस्यनिःकारणएवस्यादतोव्यर्थस्तपोनियमाद्यनुष्ठानप्रयासोनिःकारणत्वभवस्याभ्युपगम्यमानेवैसदृश्यमपिजीवानांनिःकारणंकिंनेष्यते विशे
षाभावादिति॥अथप्रेरकमाशंक्यपरिहरन्नाह।कम्माभावेविमई।कोदोसोहोज्जजईसभावोयं।जहकारणाणुरूवं।घडाइकज्जंसहावेणं।अथपर
स्यैवंभूतामतिःस्याद्यदुतकर्म्माभावेपियदिसद्भावरूपःस्वभावएवायंभवेत्तर्हिकोदोषःस्याद्विनापिकर्म्मयदिस्वभावादेवभवःस्यात्तर्हिकिंदूषणं
भवेन्नकिंचिदित्यर्थः॥दृष्टांतमाह॥यथाकर्म्मविनापिमृत्पिंडादिकारणानुरूपंघटादिकार्यंस्वस्वभावेनैवोत्पद्यमानंदृश्यते नथासदृशप्राणिज
न्मपरंपरारूपोभवोपिस्वभावादेवभविष्यति॥अत्रोच्यते॥ननुघटोपिनस्वभावतएवजायते कर्तृकरणाद्यपेक्षित्वात्तस्य ततश्चेहापिकर्त्तृ
करणःपारभविकस्यचशरीरादिकार्यस्यकरणंसंभाव्यते तच्चकर्तृकार्याभ्यांभिन्नंलोकेपिदृश्यतेकुलालघटाभ्यांचक्रादिवद्यच्चेहात्मनःश
रीरादिकार्यंकुर्वतःकरणंतत्कर्म्मेतिप्रतिपद्यस्वेतिस्यादेतद्घटादेःप्रत्यक्षसिद्धत्वाद्भवंतुकुलालादयःकर्त्तारःशरीरादिकार्येत्वभ्रादिविका
रवत्स्वभावतोपिभविष्यति ततोनकर्म्मसिद्धिस्तदयुक्तं यतोनस्वाभाविकंशरीरादिआदिमत्प्रतिनियताकारत्वाद्घटवदितिकिंचकारणानु
रूपमेवकार्यमित्येवंयत्सभावसादृश्यंत्वयाभ्युपगम्यतेतदपिस्वभाववादिनस्तवाभ्रादिविकारदृष्टांतपरिहीयते अभ्रादिविकारस्यस्वकारण
भूतपुद्गलद्रव्यादतिविलक्षणत्वादिति॥अपिच॥होज्जसहावोवत्थुं।निक्कारणयावचत्थुधम्मोवा।जइवत्थुंणत्थितओणुवलद्धीओखपुप्फंव अ
च्चंतमणुवलद्धोविअ।अहतओअत्थिनत्थिकिंकम्मं।हेऊवितदत्थित्ते।जोनणुकम्मस्सविसएव।कम्मस्ससवाभिहाणं।होज्जसभावोत्तिहोउकोदो
सो।निक्कारणस्सोसभावो।सरिसोएसत्तिकोहेऊ॥एतद्गाथात्रयंप्रायःप्रागेवव्याख्यातार्थं नवरंनिक्कारणमित्यादिस्तृतीयगाथोत्तरार्द्धे।इदमत्रहृदयं॥
सस्वभावोनित्यंसदृशएवत्वयाभ्युपगतव्योभवांतरेसदृशस्यैवमनुष्यादिभावस्यजननात्तस्यचस्वभावस्यनित्यंसदृशत्वेकोहेतुर्नकश्चिदित्य
भिप्रायःस्वभावतएवायंस्वभावःसदृशइतिचेन्नतुभवविसदृशतायामप्येतदुत्तरंशक्यतएवेति॥किंच॥सोमुत्तोऽमुत्तोवा।जइमुत्तोतोनसव्वहा
सरिसो।परिणामओपयंपिव।नदेहहेऊजइअमुत्तो।उवगरणाभावाउ नयहवइरूहम्मसोअमुत्तोवि।कज्जस्समुत्तिमत्ता।मुहसंविन्नादिओवे २४२
व॥व्याख्या॥सस्वभावोमूर्त्तोऽमूर्त्तोवायदिमूर्त्तस्तर्हिकर्मणासहतस्यकोविशेषःसंज्ञांतरमात्रविशिष्टकर्म्मैवेष्टमुक्तंस्यादिति नचासौसर्वदैवसर्वथासदृशोयु १

ज्यते परिणामित्वाद्दुग्धादिवदथवामूर्त्तत्वादेवाभ्रादिविकारवदिति अथामूर्त्तोसौस्वभावस्तर्हिनैषदेहादीनामारंभकोनुपकरणत्वाद्दंडादिविकलकु
लालवदमूर्त्तत्वादेवाकाशवत् नयहवइरूहम्मसोअमुत्तोवित्ति किंचसकथमर्म्मन्निनोपिसस्वभावोमूर्त्तोनयुक्तः शरीरादेस्तत्कार्यस्यमूर्त्तिमत्त्वान्नत्व
मूर्त्तस्यनभसइवकार्यंमूर्त्तंकार्यमुपपद्यते तथासुखसंवित्यादेश्चनायममूर्त्तः॥इदमुक्तंभवति॥कर्म्मतावद्भवतानेष्यतेस्वभाववादित्वात्तच्चश
रीरादीनिसुखदुःखसंवित्यादीनिचस्वभावस्यैवकार्याण्येष्टव्यानि नतस्यचामूर्त्तत्वेनैतान्युपपद्यंते ततोयथाद्वितीयगणधरवादेकार्यस्यमूर्त्तत्वात्सु
खसंवित्यादेश्चकर्म्मणोमूर्त्तत्वंसाधितं तथेहस्वभावस्यापिसाधनीयं॥तथाचप्रागुक्तं॥आहनणुमुत्तमेयं।मुत्तंचियकज्जमुत्तिमत्ताओ।इहजहमुत्त
त्तणओ।घडस्सपरमाणवोमुत्ता।तहसुहसंविन्नाओ।संबंधेयणुभवाओय।बज्झबलाहाणाओ।परिणामाओयविण्णेयमिति।अथनिःकारणतास्वभावमि
ति॥द्वितीयविकल्पमधिकृत्याह॥अहकम्मंवाकारणओचिय।सभावओतोविसरिसयाकत्तो।किमकारणओनभवे।विसरिसयाकिंचविच्छित्ती॥अथस्वभा
वतएवभवोत्पत्तिरिष्यतेअकारणतएवेत्ययमर्थोभिप्रेतःतोविति तथापिहंतपरभवविसदृशताकुतः॥कोभिप्रायइत्याह॥यथाकारणतःसदृशताभवति
तथाकिमित्यकारणतएवविसदृशतानस्यादकस्माच्चाकारणतोभवविच्छित्तिःकस्मान्नस्यादकस्माद्भवन्खरविषाणादिरपिभवेच्छरीरादीनांवाकार
णतोभवतामभ्रादीनामिवप्रतिनियताकारत्वादिरूपतानस्यात्तस्माच्चाकारणतास्वभावइति॥अथवस्तुधर्म्मोसावितितृतीयविकल्पमाश्रित्याह
।अहवसहावोधम्मो।वत्थुस्सनसोविसरिसओनिच्चं।उप्पायठिइभंगा।चित्ताजंवत्थुपज्जाया॥अथवस्तुनोधर्म्मःस्वभावःसोपिसर्वदैवसदृशोनघट
तइतिकथंसर्वदैवशरीरादीनांसदृशताजनयेत्कथंपुनरस्यसदैवसदृशतानघटतइत्याह॥उप्पायेत्यादि यद्यस्मादुत्पादस्थितिभंगादयश्चित्रावस्तुपर्या
यानचैतेसदैवावस्थितसादृश्याः नीलादीनांवस्तुधर्म्माणांप्रत्यक्षतएवान्यान्यरूपतयापरिणतिदर्शनात्किंचवस्तुधर्म्मोसौभवत्स्वभावआत्मधर्म्मो
वास्यात्पुद्गलधर्म्मोवायद्यात्मधर्म्मस्तर्हिनासौशरीरादीनांकारणं अमूर्त्तत्वादाकाशादिवदथपुद्गलधर्म्मस्तर्हिकर्म्मैवासौकर्म्मणोपिहिपुद्गलास्ति
कायधर्म्मत्वेनास्माभिरभ्युपगतत्वादिति॥किंच॥कम्मस्सविपरिणामोसुहम्मधम्माससयोपुग्गलमयस्स।हेऊचित्तोजगओ।होइसहावोत्तिकोदोसो॥सध
र्म्मःसौवस्तुधर्म्मोभवत्स्वभावोधर्म्मोभवति कोदोषोनकश्चिद्युक्तियुक्तत्वात्किंविशिष्टोधर्मइत्याह॥परिणामःकस्यकर्मणःकथंभूतस्यपुद्गलमय
स्यकथंभूतोयःकर्मपरिणामइत्याह हेतुःकस्यजगतोजगद्वैचित्र्यस्यतदेवंकर्म्मलक्षणस्यवस्तुनःपरिणामरूपोधर्म्मोभवति स्वभावोनात्रका
चिद्दोषापत्तिरस्माकमप्यसंमतोयमर्थः केवलंसर्वदासदृशोसौनभवति किंतुचित्रोमिथ्यात्वादिहेतुवैचित्र्यादिचित्रोविविधस्वभावःअतीनत
स्मात्परभवेसादृश्यमेववकिंतुविचित्ररूपतेति।यदिवाकिमनेनाव्यापकेनमिथ्यारूपेणचैकांतवादेनसर्वव्यापकमविनथरूपंचानेकांतवादमेव

दर्शयन्नाह। अहवासव्वं वत्थुं। पइक्खणंचिय सहम्मधम्मेहिं। संभवइ वेइ कोहिवि। केहिवितदवत्थमत्थं नं। तं अप्पणो विसरिसं। नपुव्वधम्मेहिं मच्छिमिल्लाणं ॥ सयलस्सतिहुयणस्सव। सरिसं सामण्णधम्मेहिं ॥ व्याख्या ॥ अथवा स्वधर्मान्निमेकएव परभवः सर्वमेव हि घटपटादिकं भुवनांतर्गतं वस्तु कैश्चित्पूर्वपर्यायसमानासमानपर्यायैः प्रतिक्षणमुत्पद्यते कैश्चित्तु नरकनरपर्यायसमानासमानपूर्वपर्यायैर्व्येति व्यपरमति कैश्चिन्तदवस्थमेवास्ते ततश्चैवसति न तद्वस्त्वात्म नोपिपूर्वधर्मैरन्तरीतरधर्मायोः न सदृशं किंपुनरन्यवस्तूनां सामान्यधर्मैस्तु सर्वस्यापि त्रिभुवनस्य समानं किंपुनरेकस्यैवनिजपूर्वजन्मन इति। ततः किंस्थितमित्याह। कोसव्वहेवसरिसो। सरिसो वाइहभवे परभवे वा। सुरिसासरिसं सव्वं। निच्चा २ इरूवंच ॥ कोत्थर्थो अर्थांतरे गत्ननावासहे हभवेपिवस्तुस्वधर्मैर्यापि सहसमानासमानरूपमेवेहभवेपीति कुतः परभवे सादृश्यमेवं प्रतिज्ञायते भवताइति भावस्तथा सर्वमपि नित्यानित्यंतथ र्मात्मकमिति। अमुमेवार्थं दृष्टांतेन प्रतिपादयितुमाह। जहनियएहिंविसरिसो। नजुवाभुविवालवुड्डधम्मेहिं। जगओविसमोसन्नाइ। एहिं तहपरभवे जीवो ॥ यथेह युवा निजैरप्यतीतानागतैर्बालवृद्धत्वादिपर्यायैरात्मनापि सर्वथा न समानः सत्तादिभिस्तु सामान्यपर्यायैर्जगत्तिनकेनचिन्नसमानस्त थायमपि जीवः परलोकंगतः सर्वेणापि सहसमानासमानरूपएवेतिकुतः सर्वथा सादृश्यमिति ॥ तदेव दृष्टांतेन भावयति। मणुओदेवीहूओ। सरिसोसत्ता इएहिंजगओवि। देवाइहिंविसरिसो। निच्चानिच्चोविएमेव ॥ मनुष्यो मृत्वा देवत्वमाप्तोजगत्त्रयस्यापिसत्तादिभिः पर्यायैः सदृशः देवत्वादिभिस्तु विसदृ शइति नैकांतेन कापि सदृशता तथा द्रव्यतयासो नित्यः पर्यायतयात्वनित्य इत्याद्यपि वक्तव्यं इत्याह ॥ नन्वस्माभिरपि नैकांतेन परभवसादृश्यमभ्युपग म्यते किंतु समानजात्यन्वयमात्रमेवेष्यते पुरुषादिर्मृतः पुरुषादिरेव भवतीति ॥ एतदप्ययुक्तं ॥ कर्मजनितो हि परभव इति साधितं तच्च मिथ्यात्वा दिविचित्रहेतुजन्यत्वाद्विचित्रमेव ततस्तज्जन्यः परभवोपि चित्रएव युज्यते न तु समानजात्यन्वयः सिध्यतीति ॥ किंच। उक्करिसावक्करिसा। नसमाणाएवि जेणजाईए। सरिसग्गाहेजम्हा। दाणाइफलं विहातम्हा ॥ सदृशग्रहे समानजातीयताग्रहे सति समानायामपि जातौ येन यस्मादीश्वरदरिद्रकुलीना दि रूपेणोत्कर्षापकर्षौ न घटां प्रांचतः यो हि यादृशः इहभवे स यदि परभवेपि तादृश एव तर्हि य इहभवे ईश्वरः स परभवेपि तादृश एव एवं दरिद्रादि ष्वपि वाच्यं ततश्चेहभवात्परभवे सर्वप्रकारैरप्युत्कर्षापकर्षौ न स्यातां किंत्वेकांतसदृशतैवभवेन्न चैतदिष्यते तस्मान्नैकांतेनायं सादृश्यग्रह इतिप्रक्रमा द्रष्टव्यं अथं भवान्मन्यसे कथा माभूतामुत्कर्षापकर्षौ का नो हानिरित्याह जम्हादाणाइफलंविहत्ति चकारस्य गम्यमानत्वाद्यस्माच्चेत्थं परत्रोत्कर्षाप कर्षयोरभावे दानादिफलं व्यर्थमापद्यते लोको हि परत्र देवादिसमृद्धिप्राप्त्या आत्मन उत्कर्षार्थं दानादिप्रवृत्तिं विदधाति यदि चोत्कर्षः तत्त्वाउत्कर्षा २४३
द्यभावाद्दरिद्रो दानतपस्तीर्थावगाहनाद्यपिकृत्वा पुनर्दरिद्रएवस्यान्नहिकृतहानादिफलमित्यपार्थिकादानादौ प्रवृत्तिस्तस्माच्च विधेयः सादृश्यग्र

हइति। अपिचैतस्मिन्नसादृश्यग्रहे वेदपदानामप्यप्रामाण्यमापद्यत इति दर्शयन्नाह। जंचसियालोवेएइए। सज्जायएवेयविहियमिच्छाइ। सग्गीयजंचफ लं। तमसंवद्धं सरिसत्तयाए। यच्च श्रृगालो वै एषजायते यः सपुरीषो दह्यत इत्यादि वेदविहितं तदपि परभवसदृशताग्रहे असंबद्धमेवस्यात्पुरुषादेरमु यस्य श्रृगालतादि अनुपपन्नत्वात् यथा यदप्यग्निहोत्रं जुहुयात्स्वर्गकामस्तथा अग्निष्टोमेन यमराज्यमभिजयतीत्यादिकं स्वर्गीयफलसूचकं तत्स्वर्गीय फलं तदप्यसंबद्धं भवेन्मनुष्यस्य स्वदभिप्रायेण देवत्वानुपपन्नेरिति पुरुषो वै पुरुषत्वमश्नुते पशवः पशुत्वमित्यादीनां च वेदपदानामयमर्थः कोपि पुरुषः खल्विह जन्मनि प्रकृत्याभद्रकोविनीतः सानुक्रोशोमत्सरश्च मनुष्यनामगोत्रे कर्मणी बध्नात्यतः स पुरुषत्वमश्नुते नतु नियमेन सर्वएव अन्यस्यान्यकर्मबंधस्यान्यथापपन्नत्वे एवं पशवोपि केचिन्मायादिदोषवशात्पशुनामगोत्रे कर्मणी बध्वा परभवे पशवो जायंते न तु सर्वोपि तिर्यगनेन कर्मापिच्छिन्नात्मजीवगतेरिति। तदेवं तस्यापि च्छिन्नः संशयस्ततः किमित्याह। छिन्नंमि संसयमी स्वामिणा जरमरणविप्पमुक्केणं। सो समणो पव्वइओ पंचहिं सह खंडियसएहिं ॥ इत्यर्थः ॥ २०५ ॥ इति पंचमोगणधरवादः समाप्तः ॥ ५ ॥ अथ षष्ठगणधरवक्तव्यताविभणिषुराह। तेपव्वइए सोउं। मंडिअओ आगच्छइजिण सयासं। वच्चामिणवंदामी। वंदित्ता पज्जुवासामि ॥ व्याख्या ॥ एवंसव्वंबरं मंडिकोनामषष्ठोद्विजोपाध्यायः श्रीमज्जिनसकाशमागच्छतीति। ततः किमि त्याह। आभट्टो य जिणेणं। जाइजरामरणविप्पमुक्केणं। नामेण य गोत्तेण य सव्वण्णू सव्वदरिसीणं। संतिनसंतितत्तसंसाऊतुज्झं। वेयपयाणय अत्थं। नयाणसीतेसिमो अत्थो ॥ मंडिक त्वमित्थं मन्यसे किं बंधमोक्षौ स्तः न वेति अयं चानुचितस्तव संशयो विरुद्धवेदपदश्रुतिनिबंधनत्वात्तथाहि स एष विगुणो विभुर्न बध्यते संसरति वा न मुच्यते मोचयति वा न वा एष बाह्यमाभ्यंतरं वा वेद इत्यादीनि वेदपदानि तथा न ह वै सशरीरस्य प्रियाप्रिययोरपह तिरस्ति अशरीरं वा वसंतं प्रियाप्रिये न स्पृशत इत्यादीनि च एतेषां चार्थं त्वं न जानासि यतोयमेव तदर्थस्तव चेतसि परिस्फुरति ॥ तद्यथा ॥ स एष अधिकृतो जंतुर्विगुणः सत्वरजस्तमोगुणरहितो विभुः सर्वगतो न बध्यते पुण्यपापाभ्यां न युज्यत इत्यर्थः संसरति वा नेत्यनुवर्तते न मुच्यते न कर्मणा वियुज्यते बंध स्यैवाभावात्कीन्वयति ॥ बानान्यमित्यनेनाकर्तृकत्वमाह नवा एष बाह्यमात्मनोन्यं महदहंकारादि अभ्यंतरं निजस्वरूपमेव वेद विजानाति प्रकृतिधर्म त्वाद्ज्ञानस्य ॥ प्रकृतेश्चाचेतनत्वात् अतः अमूनि किल बंधमोक्षाभाव प्रतिपादकानि तथा न ह वै नैवेत्यर्थः सशरीरस्य प्रियाप्रिययोरपहतिरस्तीति वाल्याध्या त्मिकानादि शरीरसंतानयुक्तत्वात्सुखदुःखयोः अपहतिः संसारिणो नास्तीत्यर्थः अशरीरं वा वसंतमभूर्तमित्यर्थः प्रियाप्रिये न स्पृशतस्तत्कारणभूतस्य कर्म णो भावादित्यर्थः अमूनि च बंधमोक्षाभिधायिकानीत्यतः संशयस्तत्र सा पविगुणो विभुरित्यादीनां नायमर्थः किंत्वयं वक्ष्यमाणलक्षण इति। अत्रभा ष्यं। तंमन्नसि जइ बंधो। जोगो जीवस्स कम्मुणा समयं। पुव्वं पच्छाजीवो कम्मं वसमं वते होज्जा ॥ वेयपयाण य तस्स न वइ अत्थं किंचत्वं न जानासि कुतो यस्मा

दायुक्तमनादिकत्वमेवं मन्यसे जीवस्य बंधो यदि कर्मणा सार्द्धं योगः संयोगोऽभिप्रेतः स च सत्वादिमानादिरहितो वा यद्यादिमांस्ततः किं पूर्वं जीवः प्रसूयेत पश्चा
त्कर्म पूर्वं वा कर्म पश्चाज्जीवः अन्यस्य नैसमं वा युगपद्वा द्वावपि तौ प्रसूयाताविति पक्षत्रयमिति। अत्राद्यपक्षस्य दूषणमाह। नहि पुव्वमहेऊओ खरसिंगं वाऽसं
भवोजुत्तो। निक्कारणजायस्सय। निक्कारणऊच्चिय विणासो॥ पूर्वं जीवः पश्चात्कर्मेत्येतदयुक्तं यतो न कर्मणः पूर्वं खरशृंगस्येवात्मनः संभवो युक्तो त्ति खरशृंग
स्येवात्मनः संभवो युक्तः अहेतुकत्वादिह यदहेतुकं तन्न जायते यथा खरशृंगं यच्च जायते तन्निर्हेतुकमपि न भवति यथा घटः॥ निःकारणस्य जातस्य निःका
रण एव विनाशः स्यादिति। अमुमेव विकल्पं दूषयन्नाह। अहवाणाइ च्चिय सो। निक्कारणऊ न कम्मजोगो से। अह निक्कारणऊ सो। मुक्कस्सवि होहिइ स जुज्जो॥
अथ चेत्कर्मणः पूर्वमात्मा अनादिकालसिद्ध एवेति किं तस्य सहेतुकनिर्हेतुकत्वचिंतयेति॥ अत्रोच्यते॥ निक्कारणऊ इत्यादि यद्येवं ततः स तस्य जीवस्य क
र्मयोगः कर्मबंधो न प्राप्नोति कारणाभावान्नभसइव अथ निःकारणोऽप्यसौ भवति तर्हि मुक्तस्यापि भूयः स भवति निःकारणत्वाविशेषात्ततश्च मुक्तावप्यना
श्वास इति। यदि वा। होज्ज व सनिच्चमुक्को। बंधाभावम्मि को व से मोक्खो। नहि मुक्कव्ववएसो। बंधाभावे मऊ नभसो॥ अथवा कर्मयोगाभावान्नित्यमुक्तए
वासौ भवेद्यदि वा बंधाभावे कः किल तस्य मोक्षव्यपदेशो न ह्यबद्धस्य नभसः कस्यापि मुक्तव्यपदेशो मतो बंधपूर्वकत्वान्मोक्षस्य तस्मान्न पूर्वं जीवः
पश्चात्कर्मेति। प्रथमविकल्प इति॥ अथ पूर्वं कर्म पश्चाज्जीवो युगपद्वा द्वावपीति। पक्षद्वयस्य प्रतिविधानमाह। नय कम्मस्स वि पुव्वं। कत्तुरभावा समु
ब्भवो जुत्तो। निक्कारणऊ सो विय। तह जुगवुप्पत्तिभावे य। नहि कत्ता कज्जं तिय। जुगवुप्पत्तीए इ जीवकम्माणं। जुत्तो ववएसोयं। जह लोए गोविसाणाणं
॥ न च जीवात्प्राक् कर्मणोऽपि समुद्भवो युक्तः कर्तुर्जीवस्य तदानीमभावात् क्रियमाणस्य च कर्मत्वायोगात् निःकारणश्चेत्स कर्मसमुद्भवः स्यान्तता
ऽकारणजातस्याकारणतयैव विनाशोऽपि स्यादिति तथा युगपदुत्पत्तावेवं प्रत्येकपक्षोक्तदोषा वाच्या इति शेषः निर्हेतुकत्वात्प्रत्येकवदुभयस्यापि
समुदितस्यानुत्पत्तिरित्यादि। न च युगपदुत्पन्नयोर्जीवकर्मणोः कर्तृकर्मभावो युज्यत इत्येतदेवाह। नहीत्यादि नहि युगपदुत्पन्नयोर्जीवकर्मणो
रयं जीवः कर्ता इदं वा ज्ञानावरणादिपुद्गलनिकुरंबं कर्मेति व्यपदेशो युज्यते यथा लोके सव्येतरगोविषाणयोरिति। द्वितीयमप्यविकल्पमधि
कृत्याह होज्जाणाईउ वा संबंधो नह विनस्सइ एमाउक्खो। जीवाईसोऽणंतो जीवनहाणं व संबंधो॥ स्यादेतदनादिरेव जीवकर्मणोः संबंधः संयोगो न तु तथापि
मोक्षो न घटते यस्माद्योऽनादिः संयोगः सोऽनंतो दृष्टो यथा जीवनभसोर्नित्याकाशेन सह जीवस्य कदाचिदपि संयोगो न निवर्तते एवं कर्मणापि सह सो
ऽपि न निवर्त्तेत तथा च सति मुक्त्यभावप्रसंग इति उपसंहरन्नाह। इह जुत्तीए न घडइ। कह बंधो कह मोक्खोत्ति। तेण तुह संसऊयं। नय कज्जोयं जह २४४
ट्ठा करक्क॥ इत्येवमुक्तयुक्त्या बंधो मोक्षश्च न घटते श्रूयते च श्रुतिषु वेदवाक्येषु सो तेन तवायं संशयो यथा वायं न कार्यः तथा शृणु सौम्येति। उक्तः पूर्वपक्षः। अत्र

प्रतिविधीयते॥ तत्र यत्तावदुक्तं किं पूर्वं जीवः पश्चात्कर्मेत्यादि तत्सर्वमयुक्तं। कुत इत्याह। संताणोऽणाईऊ। परोप्परं हेउहेउभावाऊ। देहस्सय क
म्मस्सय। मा इय बीयंकुराणं च॥ शरीरकर्मणोरनादिः संतान इति प्रतिज्ञा परस्परं हेतुहेतुमद्भावाद्बीजांकुरवदिति ततश्च किं पूर्वं जीवः पश्चात्कर्मेत्यादि पूर्वव
त् एवानादित्वात्तत्संतानस्येति॥ तदेव कर्मसंतानस्यानादित्वं साधयन्नाह। अत्थि स देहो जो कम्म। कारणं जो य कज्जमस्स। कम्मं च देह कारण। मत्थि य
जं कज्जमण्णस्स॥ अस्ति स कश्चिद्देहो योऽग्रेतनस्य कर्मणः कारणं यश्चान्यस्यातीतस्य कर्मणः कार्यं तथा कर्मापि समस्ति किं विशिष्टमित्याह यदग्रेतन
स्य देहस्य कारणं यच्चान्यस्यातीतस्य देहस्य कार्यमित्येवमनादौ संसारे न कश्चिद्विश्राम्यत्यतोऽनादिर्देहकर्मसंतान इति॥ आह॥ ननु बंधमोक्षाविहसा
धयितुं प्रस्तुतौ ततः कर्मसंतानस्यानादित्वसाधनमसंबद्धमिव लक्ष्यते। तदयुक्तं॥ ... कर्मसंभवति क्रियत इति कर्मेति व्युत्पत्ते
यं च तस्य करणमसावेव बंध इति कथं न तत्सिद्धिः। ननु यदि क्रियत इति कर्मोच्यते तर्हि कोऽस्य देहस्य च कर्तेत्याह। कत्ता जीवो कम्मस्स। करणऊ जह
घडस्स घडकारो। एवं चिय देहस्सवि। कम्मकरणसंभवाऊत्ति॥ कर्ता चात्र कर्मणो जीवः करणसमेतत्वाद्दंडादिकरणयुक्तकुलालवद्घटस्य करणं चेह जी
वस्य कर्मनिर्वर्त्यं यतः शरीरमवगंतव्यं एवं देहस्याप्यात्मैव कर्ता कर्मरूपं करणं कर्मकरणं तत्संभवाद्दंडयुक्तत्वाद्दंडादिकरणसमेतकुलालवदिति
॥ अथात्र परपर्यपरिहारं चाह। कम्मं करणमसिद्धं च तेनेमई कज्जऊत्तयं सिद्धं। किरियाफलऊयपुणो। पडिवज्जतमग्गिभूइव्व॥ स्यादेतदतीन्द्रियत्वेनासि
द्धत्वात्कर्मणः करणत्वमसिद्धं। तदयुक्तं। यतः कार्यतः कार्यद्वारेणानुमानसिद्धमेव तथा हि विद्यमानकरणं शरीरादिकृतकत्वाद्घटादिवद्यच्चास्य करणं
तत्कर्मैव तस्मादस्त्येव तदथवा विद्यमानकरणमेवात्मशरीरलक्षणाद्द्वयं कर्तृकार्यरूपत्वात्कुलालघटादिवद्यच्च कर्तुरात्मनः शरीरमुत्पादयतः
करणं तत्कर्मेति कथं न तत्सिद्धिः तथा फलवत्यो दानादिक्रियाश्चेतनारब्धक्रियारूपत्वात्कृष्यादिक्रियावद्यच्च तासां फलं तत्कर्मेत्यग्निभूति
वत्त्वमपि प्रतिपद्यस्वेति। यच्चोक्तं। योऽनादिः संयोगः सोऽनंतो दृष्टः इत्यादि तत्राह। जं संताणोणाई। तेणाणंतो वि णायमेगंतो। दीसइ संतो वि जऊ।
कस्सइ बीयंकुराईणं॥ यद्यस्माज्जीवस्य च कर्मसंयोगसंतानोऽनादिस्तेन तस्मादनंतोऽपीति नायमेकांतो यतोऽनादिरपि संयुक्तयोर्वस्तुनोः संता
नः सांतोऽपि कश्चिद्दृश्यते यथा बीजांकुरादीनां संतान इति। तथा हि॥ अन्नयरमणिव्वत्तिय। कज्जं बीयंकुराणजं विहयं। तत्थ हऊ संताणो। कुक्कुडि
अंडाईयाणं च। जह वह कंचणोवलाणं। संजोगोणाइसंतइ गऊ वि। वोच्छिज्जइ सोवायं। तह जोगो जीवकम्माणं॥ बीजांकुरयोर्मध्येऽन्यतरदनिर्वर्तितका
र्यमेव यदिह हतं व्युच्छिन्नं तदा नयोरिहतो व्यवच्छिन्नः संतानः एवं कुक्कुट्यंडकयोरपि तथा सुवर्णयोरपि च वक्तव्यं यथा वा कांचनोपलयोरनादिकालप्र
वृत्तेनानभावगतोऽपि संयोगः सोपायमग्नितापादिकोपायाद्व्यवच्छिद्यते तथा जीवकर्मणोरपि संयोगोऽनादिसंतानगतोऽपि तपःसंयमाद्युपाया

हुइ। छिद्यत इति न मोक्षाभाव इति। अत्र परस्य प्रश्नमुपन्यस्यांतरमाह॥ तो किं जीवनहाण व। अह जोगो कंचणोवलाणं व। जीवस्स य कम्मस्स य। भण्णइ दुवि
हो वि न विरुद्धो। पढमोऽभव्वाणं चिय। भव्वाणं कंचणोवलाणं व। जीवत्ते सामण्णे। भव्वो भव्वो त्ति को भेओ। आह॥ जीवस्य कर्म्मणश्च योयं परस्परं योगः
सोऽनादिः सन् किं जीवनभसोरिवानंतः अथ कांचनोपलयोरिव सांतोपि स्यादुभयथापि दर्शनात्किमत्र प्रतिपद्यामहे॥ भण्यते। तत्रोत्तरं॥ द्विधाप्य
यमविरुद्धस्तत्र प्रथमोऽनाद्यनंतरूपोऽभव्यानां द्रष्टव्यः यस्तु कांचनोपलयोरिवानादिः सांतः सो भव्यानां विज्ञेयः॥ आह॥ ननु जीवत्वसाम्येप्ययं
भव्योयं चाभव्य इति किंकृतोयं विशेषो न वक्तव्यं यथा जीवत्वसमानेपि नारकतिर्यगादयो विशेषास्तथा भव्याऽभव्यत्वविशेषोपि भविष्यतीति
चेत॥ कर्म्मजनिता एव नारकादिविशेषा न तु स्वाभाविका भव्याभव्यत्वविशेषोपि यदि कर्म्मजनितस्तदा भवतु को निवारयिता न चैवमित्येतदेवाह
होउ व जइ कम्मकओ। न विरोहो नारगाइभेउ व्व। भव्वाइभव्वा। सभावओ तेण संदेहो॥ भवतु वा यदि कर्मकृतो भव्याभव्यत्वविशेषो जीवाना
मिष्यते नात्र कश्चिद्विरोधो नारकादिभेदवत् न चैतदस्ति यतो भव्याऽभव्याः स्वभावत एव जीवा न तु कर्मतः इति यूयं भणथ ततो नास्माकं संदेह इति
॥ परेणैवमुक्ते सतीत्याह दव्वाइत्ते तुल्ले जीवनहाणं सहावओ भेओ। जीवाजीवाइगओ। जह तह भव्वियरविसेसो॥ यथा जीवनभसोर्द्रव्यत्वसत्वप्रमे
यत्वज्ञेयत्वादौ तुल्येपि जीवाजीवत्वचेतनाचेतनत्वादिस्वभावतो भेदस्तथा जीवानामपि जीवत्वसाम्येपि यदि भव्याभव्यकृतो विशेषः स्यात्त
र्हि को दोष इति। इत्थं संबोधितो भव्यत्वादिविशेषमभ्युपगम्य दूषणांतरमाह॥ एवंपि भव्वभावो जीवत्तंपिव सभावजाइ उ। पावइ निव्वाणम्मि य।
तह व न्न त्थि निव्वाणं॥ नन्वेवमपि भव्यभावो नित्योऽविनाशी प्राप्नोति। स्वभावजातीयत्वात्स्वाभाविकत्वाज्जीवत्ववदुत्वं वमिति चेत तदयुक्तं यत
स्तस्मिन् भव्यभावे तदवस्थे नित्यावस्थायिनि नास्ति निर्वाणं सिद्धानां भव्यानाप्यभव्य इति वचनादिति चेत्। कुत इत्याह॥ जह घडपुव्वाभावो। नाइस
हावो वि सनिहणो एवं। जइ भव्वत्ताभावो। भवेज्ज किरियाए को दोसो॥ यथा घटस्य प्रागभावोऽनादिस्वभावजातीयोपि घटोत्पत्तौ सनिधनो वि
नश्वरो दृष्टः एवं भव्यत्वस्यापि ज्ञानतपःसंयमचरणक्रियोपायतोऽभावः स्यात्तर्हि को दोषः संपद्यते न कश्चिदिति॥ आक्षेपपरिहारौ प्राह
॥ अणुदाहरणमभावो। खरसिंगंपिव मई न तं जम्हा। भावो च्चिय स विसिट्ठो। कुंभाणुप्पत्तिमेत्तेणं॥ स्यान्मतिः परस्य नन्वनुदाहरणमसौ प्रागऽभा
गभावोऽभावरूपत्वेन अवस्तुत्वात्खरविषाणवत् तन्न यस्मात् भाव एवासौ घटप्रागभावः तत्कारणभूतानादिकालप्रवृत्तपुद्गलसंघातरूपः केव
लं मात्रेण विशिष्ट इति भवतु तर्हि घटप्रागभाववद्भव्यत्वस्य विनाशः केवलमिह प्रसजति दोषांतरं प्रसजति॥ किमित्याह॥ एवं भव्वुच्छे २४५
ओ॥ कोट्ठागारस्सव अवचओ वत्ति। तं नाणंतत्तणओ। णागयकालंबराणं व॥ नन्वेवं सति भव्योच्छेदो भव्यजीवैः संसारः शून्यः प्राप्नोत्यपचयात्तस्य

यथा समुच्छेद इत्याह स्तोकस्तोकाकृष्यमाणधान्यस्य भृतकोष्ठागारस्य॥ इदमुक्तं भवति॥ कालस्यानंत्यात्प्रतिषण्मासपर्यंते चावश्यमेकस्य भव
स्य जीवस्य सिद्धिगमनात्क्रमेणापचीयमानस्य धान्यकोष्ठागारस्येव सर्वस्यापि भव्यराशेरुच्छेदः प्राप्नोतीति। अत्रोत्तरमाह॥ तदेतन्न अनं
तत्वाद्भव्यराशेरनागतकालाकाशवदिति इह यद्बृहदनंतकेनानंतं तत्स्तोकस्तोकतया पचीयमानमपि नोच्छिद्यते यथा प्रतिसमयं वर्त्तमानता
पत्त्यापचीयमानोप्यनागतकालसमयराशिः प्रतिसमयं बुद्ध्या प्रदेशापहारेणापचीयमानः सर्वनभःप्रदेशराशिर्वा इति। न भव्योच्छेदः॥ कुत
इत्याह। जं चातीयाणागय। कालाउ तुल्लओ जओ य संसिद्धो। एक्को अणंतभागो। भव्वाणमईयकालेणं। एस्सेण तत्तिओ च्चिय। जुत्तो जं तो वि सव्वभव्वा
ण। जुत्तो न समुच्छेओ। होज्ज मई कह मिणं सिद्धं॥ भव्वाणमणंतत्तण। मणंतभागो व कह विमुक्को सि। कालाइउ व्व मंडिय। मह वयणाओ व पडिव
ज्जा॥ व्याख्या॥ यस्मादतीतानागतकालौ तुल्यावेव यतश्चातीतेनाऽनंतेनापि कालेनैक एव निगोदानंततमो भागोऽद्यापि भव्यानां सिद्धः
एष्यतापि भविष्यत्कालेन तावन्मात्र एव भव्यानंतभागः सिद्धिं गच्छन् युक्तो घटमानको न हीनो नाधिको वा भविष्यतोपि कालस्यातीततुल्यत्वात्तत
एवमपि सति न सर्वभव्यानामुच्छेदः युक्तः सर्वेणापि कालेन तदनंतभागस्यैव सिद्धिगमनसंभवात् पदर्शनाद्यथ परस्य मतिर्भवेत् कथमिदं सि
द्धं यदुतानंता भव्यास्तदनंतभागश्च सर्वेणैव कालेन सेत्स्यतीत्यतोऽभिधीयते कालादय इवानंतास्तावद्भव्यास्तदनंतभागस्यैव मुक्तिग
मतात्कालाकाशयोरिव न सर्वेषामुच्छेद इति प्रतिपद्यस्व मद्वचनाद्वा मंडिक सर्वमेतच्छ्रद्धेहीति॥ कथं पुनस्त्वद्वचनात्सर्वमेतत्सत्यतया प्रति
पद्यामहे इत्याशंक्याह। सच्चं मिणं गिण्हसु। मह वयणाओ व सेसवयणं व। सव्वण्णुत्ताइओ वा। जाणयमज्झत्थवयणं व। भणासि किह सव्वण्णू। सव्वे
सिं संसयच्छेया। दिट्ठंताभावम्मि वि। पुच्छसु जो संसओ जस्स॥ व्याख्या॥ सत्यमिदमनंतरोक्तं सर्वमपि तिगृह्णत्वं मद्वचनाद्यथात्वं यथा शेषादि
विषयं शेषं मद्वचनं सर्वज्ञत्वादिभ्यो वा हेतुभ्यः आदिशब्दाद्वीतरागत्वादिपरिग्रहः ज्ञायकमध्यस्थवचनोवदित्ययमत्र दृष्टांत इति॥ अथैवं
मन्यसे कथमिव सर्वज्ञस्त्वमित्युच्यते॥ सर्वेषां सर्वसंशयच्छेदात् अन्यस्य सर्वसंशयच्छेत्तुः कस्याप्यदर्शनात्कोऽत्र दृष्टांतो न कश्चिदिति चेत्प्रोच्य
ते किमत्र दृष्टांतान्वेषणेन तदभावेपि हि यो यस्य संशयः स तं सर्वमपि पृच्छतु येन स्वप्रत्ययसिद्ध एवमपि सर्वज्ञत्वनिश्चयो भवतीति। अत्र परः प्राह
॥ भव्वा वि न सिज्झिस्संति। केइ कालेण जइ वि सव्वेण। नणु ते वि अभव्व च्चिय। किं वा भव्वत्तणं तेसिं॥ ननु भव्या अपि सेत्स्यति यदि सर्वेणापि कालेन न सर्वे
ऽपि न सेत्स्यंति तर्हि येषां सिद्धिर्न भविष्यति भव्या एवं ते किं न व्यपदिश्यंते केन वा विशेषेण तेषां भव्यत्वमिति निवेद्यतामिति॥ अत्रोत्तरमाह॥ भ
ण्णइ भव्वो जोग्गो। न य जोग्गत्तेण सिज्झए सव्वो। जह जोग्गंमि वि दलिए। सव्वंमि न कीरए पडिमा॥ भण्यते अत्रोत्तरं किमित्याह भव्योऽत्र सिद्धिगमनयो

२४६
ण्योभिप्रेतोमनुष्यः सिद्धिगतिंयास्यत्येवनचयोगत्वमस्तीत्येतावतैवसर्वः सिध्यति किंतुगमनसामग्रीसंभवेसति। दृष्टांतमाह॥ यथाहेममणिपाषा
णचंदनकाष्ठादिकेयोग्येपिप्रतिमार्हेपिदलिकेनसर्वस्मिन्प्रतिमाविधीयते किंतुयत्रैवतन्निष्पत्तियोग्यासामग्रीसंभवतितत्रैवासौक्रियते
नचतदसंभवमात्रेणाप्रतिमाविषयेप्ययोग्यताभवति नियमश्चेहनैवविधीयते यदुतप्रतिमायोग्येवस्तुनिप्रतिमाभवत्येवेति॥ किंतु॥ यदातदा
वातद्योग्यएवसाभवति नान्यत्रेतिएवमिहापिनभव्यइत्येतावन्मात्रेणैवसर्वःसिध्यति किंतुसामग्रीसंपत्तौनचतदसंपत्तावपि तस्याभव्य
भवति किंतुयदातदातुभव्यस्यैवमुक्तिर्नाभव्यस्येति॥ दृष्टांतांतरमाह। जहवासएयपासाणाकणगजोगोविकणगजोगोवि। नविजुज्जइसव्वो
सविजुज्जइजस्ससंपत्ती॥ किंपुणजासंपत्ती। साजोग्गस्सेवनउअजोग्गस्स। तहजोमोक्खोनियमा। सोभव्वाणंनइयरेसिं॥ व्याख्या॥ यथावासएवप्र
वाक्तःकनकवर्णपाषाणकनकयोयोगाविभागयोग्यतान्वितोपिसर्वोनविवियुज्यते किंतुसएववियुज्यते यस्यवियोगसामग्रीसंपन्निरिति॥ किंपुन
रतद्भुजमुक्षिप्यकमायावियोगसामग्रीसंप्राप्तिःसावियोगयोग्यस्यैवकनकवर्णोपलस्यभवति नतुतदयोग्यस्यतथातेनैवप्रकारेणयःसर्वकर्म
क्षयलक्षणोमोक्षःसनियमाद्भव्यानामेवभवति नेतरेषामभव्यानामिति भव्याभव्ययोर्विशेषइति। अथप्रकारांतरेणाक्षेपपरिहारौप्राह। कय
गाइमत्तणाउ। मोक्खोनिच्चोनहोइकुंभव्व। नोपद्धंसाभावो। भुवितद्धम्माविजंनिच्चो। अप्पुदाहरणमभावोएसोविमईनतंजउनियऊ। कुंभविणा
सविसिट्ठा भावोच्चियपुग्गलमउय॥ व्याख्या॥ ननुमोक्षोनित्योनभवति किंत्वनित्यो विनाशीकृतकत्वादादिशब्दात्प्रयत्नानंतरीयकत्वादिमत्त्वा
दिपरिग्रहःकुंभवदितिदृष्टांतः॥ अत्रोच्यते॥ अनैकांतिकताहेतूनांविपक्षेपिगमनाद्यस्मादिहघटादिप्रध्वंसाभावःकृतकादिस्वभावोपि
नित्यएवतदनित्यत्वेघटादेस्तद्रूपतयैवोन्मज्जनप्रसंगादिति॥ अथैवंपरस्यमति॥ नकेवलंपूर्वोक्तःप्रागभावःकिंत्वेषोपिप्रध्वंसाभावः
भवत्वेनावस्तुत्वादनुदाहरणमेवतदेतन्नयतोयस्मान्नियतोनिश्चितःकुंभविनाशविशेषेणविशिष्टःपुद्गलात्मकोभावएवायमपिप्रध्वं
साभावःअतोयुक्तमेतदुदाहरणमिति। एतच्चमोक्षस्यकृतकत्वमभ्युपगम्योक्तं। यदिवानभवत्येवकृतकोमोक्षइतिदर्शयन्नाह। किंचेगंतेण
कयंपोग्गलमेत्तविलयम्मिजीवस्स॥ किंनिव्वत्तियमहियं। नभसोघडमेत्तविलयम्मि॥ किमिहपुद्गलमात्रविलयेसतिसमस्तकर्मपुद्गलपरिशा
टसमयेजीवस्यात्मनःस्वतत्वमात्मावधतएकांतेनकृतंविहितं येनकृतकोमोक्षःस्यादेतदुक्तंभवति इहात्मकर्मपुद्गलवियोगोमोक्षोभिप्रेत
स्तत्रतपःसंयमप्रभावतोजीवात्कर्मणिपृथग्जायमानेकिमात्मनःक्रियतेयेनकृतकत्वादनित्यत्वंमोक्षस्यप्रतिपाद्येत। अथसएवात्मकर्मवि २४६
योगःक्रियमाणत्वात्कृतकस्ततोऽनित्यइत्याशंक्याह॥ किंनिव्वत्तियमित्यादि मुद्गरादिनाघटमात्रस्यविलयेविनाशेसतिकिंनामनभसोऽधि

कंनिर्वर्तितं। नकिंचिदित्यर्थः एवमिहापिकर्ममात्रविनाशेसतिकिंजीवस्याधिकंकृतं येनतदेकाधिकारूपस्यमोक्षस्यकृतकत्वेनानित्यत्वंस्यात्स्याएव
वभूकर्मणोविनाशेयथाघटविनाशवत्क्रियमाणत्वात्कृतकस्ततःसर्वकर्मक्षयलक्षणोमोक्षोऽनित्यइतिचेन्नदयुक्तं यतोयथाऽयमेवघटविनाशोयःके
वलोऽऽकाशसद्भावोनपुनस्ततोविभिन्नोसौनचाकाशस्यकिमप्याधिकंक्रियते तस्यसदास्थितत्वेननित्यत्वादेवमिहाप्ययमेवकर्मणोविनाशोयःके
वलात्मसद्भावोनत्वात्मनोविभिन्नोसौनचात्मनःकिंचिदधिकंविधीयतेतस्यापिनभोवन्नित्यत्वात्तस्मान्नमोक्षस्यकृतकत्वमनित्यत्वंवा कथंचि
त्त्वानित्यत्वंकिंचिद्दसाध्यतेवद्रव्यपर्यायोभयरूपतयासर्वस्यापिवस्तुनोनित्यानित्यरूपत्वादिति॥ आह॥ ननुकर्मपुद्गलायनिर्जीर्यजीवेनपरित्य
क्तास्तेलोकमेवाभिव्याप्यतिष्ठंति नपुनस्तद्बहिःक्वापिगच्छंति जीवोपिचलोकमध्यएवतिष्ठति ततश्चयथाघटवियुक्तस्याऽप्याकाशस्यतत्कपा
लपुद्गलसंयोगस्तदवस्थाएव एवंकर्मवियुक्तस्याप्यात्मनोनिर्जीर्णतत्पुद्गलसंयोगःसमस्त्येवेति। कथंनपुनरपितस्यतद्बंधइत्याशंक्याह। सो
णवराहोवपुणो। नयजम्मएवबंधकारणाभावा। जोगायबंधहेऊ। नयसोतस्सासरीरेत्ति॥ समुक्तोजीवःपुनरपिनबध्यतेबंधकारणाभावादनपराध
पुरुषवन्मनोवाक्कायसंयोगादयश्चबंधहेतवोभिधीयंते नचतेमुक्तस्यसंतिशरीराद्यभावान्नचकर्मवर्गणागतपुद्गलसंयोगमात्रेणरूपीत्रबंधो
भिन्निष्यते अतिप्रसंगादिदोषाघातत्वात्किंतुमिथ्यात्वादिहेतुनिबंधनइति॥ आह॥ नन्वयंमुक्तात्मासौगतानामिवभवतामप्यभिप्रायेणपुनरपि
भवेप्रादुर्भवति नवेत्याशंक्याह॥ नपुणोतस्सपसूई। बीयाभावादिहंकुरस्सेव। बीयंचतस्सकम्मं। नयतस्सतयंतउनिच्चो॥ नतस्यमुक्तस्यपुनरपि
भवप्रसूतिर्जायतेबीजाभावात्कारणस्याभावादंकुरस्यवदभावान्नप्रसूतिःबीजंचास्यकर्मैवावगंतव्यं नचमुक्तस्यनास्त्येवततःपुनरा
वृत्त्याभावान्नित्योसावितिइतश्चनित्योमुक्तः। कुतइत्याह। दव्वामुत्तत्तणउ। नहोयनिच्चोमउसदव्वतया। सव्वगयत्ताव्वत्ती। मइनितंनाणुमाणाउ॥ मु
क्तात्मानित्यइतिप्रतिज्ञा द्रव्यामूर्तत्वादितिहेतुः द्रव्यत्वेसतिअमूर्तत्वादितिहेतुः दवत्तएत्ति यथाद्रव्यत्वेसतिअमूर्त्तंनभएवेतिदृष्टांतः। अथै
वंभूतामतिःपरस्यस्यादनेनहेतुनासर्वगतत्वापत्तिरप्यात्मनःसिध्यति॥ तथाहि॥ सर्वगतआत्माद्रव्यत्वेसत्यमूर्तत्वान्नभोवत्ततश्चधर्मिविशे
षविपरीतसाधनाद्विरुद्धोयं। नदेतन्न॥ कुतोनुमानादनुमानबाधितत्वात्सर्वगतत्वस्येत्यर्थः। तथाह्यसर्वगतआत्माकर्तृत्वात्कुलालवन्नचकेवल
मसिद्धंभोक्तृत्वदृष्टत्वाद्यनुपपत्तेरितियदिवाकिमनेनैकांतिकेननित्यत्वग्राहेणएकांतानित्यत्ववादिनिराकरणार्थमेवत्वेवमभिहितं॥ परमा
र्थतस्तुसर्वमेववस्तुजिनानांभवनभंगस्थित्यात्मकमेवेतिदर्शयन्नाह। कोवानिच्चग्गाहो। सव्वंचियविभवभंगठिइमइयं। पज्जायंतरमित्ता। प्पणादनि
च्चाइयवएसो॥ गतार्थानवरंपर्यायांतरमात्रस्याप्यर्पणप्रधानभावेनविवक्षणंतस्मादनित्यादिव्यपदेशस्तथाहि घटःपूर्वेणमृत्पिंडपर्यायेणविनश्य

डाक्टर भाऊ दाजी …
Dr. BHAU DAJI

ति घटपर्यायतया पुनरुत्पन्नतिमद्रूपतयावतिष्ठते तत्रश्च यो विनष्टरूपतादिपर्यायो यदार्पितः प्रधानभूतो विवक्ष्यते तदा तेनानित्यत्वादिव्यपदे
शएवमसावपि मुक्तः संसारितया विनष्टः सिद्धतयोत्पन्नो जीवत्वसोपयोगत्वादिभिस्त्ववतिष्ठते यथा प्रथमसमयसमयसिद्धतया विनश्यति
द्विसमयसिद्धतयोत्पद्यते द्रव्यत्वजीवत्वादिभिस्त्ववतिष्ठते ततो ऽर्पितपर्यायेणानित्यत्वादिव्यपदेश इति ॥ मुक्तस्यावस्थानक्षेत्रनिरूपणार्थमा
ह ॥ मुत्तस्स को वगासो । सोम्मति लोगसिहरं गई किह से । कम्मलहुयातहागई । परिणामाई हि भणियमिदं ॥ मुक्तस्य क्षीणसमस्तकर्मणो जीव
स्य को ऽवकाशः का ऽवस्थानमिति प्रश्ने सत्याह सौम्य त्रिलोकशिखरं लोकांत इत्यर्थः ननु कथं से तस्याकर्मणो जीवस्येतावद्दूरमितो गतिः प्रव
र्त्तते कर्मनिबंधना हि जीवानां सर्वापि चेष्टा ततो विहायोगत्यादि कर्माभावे ऽपि गति चेष्टायामतिप्रसंगः प्राप्नोति ॥ अत्रोच्यते ॥ कम्मलहुयत्ति ।
कर्मापगमे सति लाघवात्तथा यमेकं तद्गतिप्रवृत्तिरित्यर्थः तथा गतिपरिणामात्कर्मक्षयसिद्धत्ववदपूर्वगतिपरिणामलाभादित्यर्थः यथा हि समस्तकर्म
क्षयादपूर्वं सिद्धत्वपरिणामं जीवः समासादयति तथोर्द्धगतिपरिणाममपीति भावः आदिशब्दादपरमपि तद्गतिकारणं समयभणितमिदमवगंत
व्यं तद्यथा ॥ लाउयएरंडफले । अग्गीधूमे य इसुधणुविमुक्के । गइपुव्वपओगेणं । एवं सिद्धाण वि गई उ ॥ अथान्यस्तत्रैव मोशंकां परिहरति ॥ किं सक्कि
यमरूवं । मंडियभुवि चेयणं व किमरूवं जह से विसेसधम्मो चेयन्नं तह मया किरिया ॥ आह ननु खात्काशकालादयो ऽमूर्त्ता निःक्रिया एव प्रसिद्धा स्त
त्किं नाम त्वया ऽरूपममूर्त्तं सद्वस्तु सक्रियं दृष्टं येन मुक्तात्मनः सक्रियत्वमभ्युपगम्यते ननु निःक्रिय एव मुक्तात्मा प्राप्नोति अमूर्त्तत्वादाकाशवदिति
भावः ॥ अत्रोच्यते ॥ मंडिकत्वमप्येतत्कथय प्रभु विकिमरूपं सद्वस्तु चेतनं वीक्षितं येन मुक्तात्मा चेतनो ऽभ्युपगम्यते अमूर्त्तत्वादचेतन एवायं
प्राप्नोत्याकाशवदिति तस्माद्यथासे तस्य जीवस्य अरूपेभ्य आकाशादिभ्यस्तद्रूपत्वे समाने ऽप्यपि चैतन्यलक्षणो विशेषधर्मः समस्ति तथा क्रियापि
मता सक्रियत्वमपि विशेषधर्मो ऽस्तु को विरोध इति भावः ॥ यच्चोक्तं निःक्रियो मुक्तात्मा अमूर्त्तत्वात्तदनैकांतिकमेव प्रतिबंधाभावादित्याह । अथवा
मुक्तामुक्तविशेषमपहाय सामान्येनात्मनः सक्रियत्वं साधयन्नाह । कत्ताइत्तणओ वा । सक्किरिओ यं मओ कुलालो व्व । देहप्फंदणओ वा । पच्चक्खं जंतपुरि
सो व्व ॥ अथवा सक्रियो ऽयमात्मा कर्तृत्वात्कुलालवत् आदिशब्दाद्भोक्तृत्वादित्यादि वाच्यं अथवा सक्रिय आत्मा प्रत्यक्षत एव देहपरिस्पंददर्शनाद्य
न्त्रपुरुषवदिति । पराशंकां प्रतिविधानं चाह । देहप्फंदणहेऊ । होज्ज पयत्तो त्ति सो विनाकिरिए । होज्जादिट्ठो व मई । तदरूवत्तेण पुसमाणं । रूव
त्तं मितदंदो । वत्तीतप्फंदणे पुणो हेऊ । पइनियय परिप्फंदण । मच्चेयणाणं न वि य जुत्तं ॥ अथ ब्रूषे देहपरिस्पंदहेतुरात्मनः प्रयत्नो न तु क्रिय
या अतो नात्मनः सक्रियत्वसिद्धिरित्यभिप्रायः । अत्रोत्तरमाह ॥ सो पि प्रयत्नो नाम नामो ऽक्रियस्यात्मनि न संभवत्यतः सक्रिय एवासौ अमू २४७

र्त्तस्य च प्रयत्नस्य देहपरिस्पंदहेतुत्वे को ऽन्यो हेतुरिति वाच्यं अन्यहेतुनिरपेक्षः स्वत एवायं परिस्पंदहेतुरिति चेद्देहवदेवात्मापि तद्धेतुर्भविष्यति
३ किमंतर्गडुना प्रयत्नेन अथादृष्टः ॥ को ऽपि देहपरिस्पंदहेतुर्नत्वात्मा निःक्रियत्वादनुमीयते दृष्टः किं मूर्त्तो ऽमूर्त्तो वा यद्यमूर्त्तस्तर्ह्यात्मापि देहपरिस्पं
दहेतुः किं नेष्यते अमूर्त्तत्वाविशेषादथ मूर्त्तिमानदृष्टः तर्हि कार्मणशरीरलक्षणो देह एव नान्यः संभवति तस्यापि च बहिर्दृश्यदेहपरिस्पंद
हेतुतया व्याप्रियमाणस्य परिस्पंदो ऽदृष्टत्वस्तस्य चान्यो हेतुर्वाच्यस्तस्याप्यन्यस्तस्यापि चान्य इत्यनवस्था अथ स्वभावादेवादृष्टस्य कार्म
णदेहस्य परिस्पंदः प्रवर्त्तते तर्हि बहिर्दृश्यस्यापि देहस्य तत एव तत्प्रवृत्तिर्भविष्यति किमदृष्टकार्मणदेहपरिकल्पनेन अस्त्वेवमिति चे
त्तदयुक्तं अचेतनानामेवं प्रतिनियतविशिष्टपरिस्पंदनस्वाभाविकत्वानुपपत्तेः नित्यं सत्त्वमसत्त्वं वा हेतोरन्यानपेक्षणादिदोषप्रसं
गात्तस्मात्कर्मविशिष्ट आत्मैव प्रतिनियतदेहपरिस्पंदनहेतुत्वेन व्याप्रियत इति सक्रियो ऽसाविति । भवतु तर्हि भवस्थस्य सकर्मणो जीवस्य क्रिया
मुक्तस्य तु कथमसावित्याशंक्य परिहरन्नाह । होउ किरिया भवत्थस्स । कम्मरहियस्स किं निमित्ता सा । नणु तग्गइपरिणामा । जह सिद्धत्तं तहा सा वि ॥
पूर्वार्द्धेनाक्षेपः पश्चार्द्धेन तु परिहारः प्राग्व्याख्यातार्थ एवेति । अपरस्त्वाह । किं सिद्धालयपरउ । न गई धम्मत्थिकाय विरहाउ । सो गइउवग्गहकारो
लोयम्मि जमत्थि नालोए ॥ यद्युक्तन्यायेन मुक्तस्य गतिक्रिया सक्रियत्वमिष्यते तर्हि सिद्धालयात्सिद्धावस्थितिक्षेत्रात्परतो ऽलोके ऽपि किमिति त
स्य गतिर्न प्रवर्त्तते ॥ अत्रोच्यते परतो धर्मास्तिकायविरहान्न हि रहो ऽपि कुतो ॥ इत्याह ॥ यद्यस्माद् असौ धर्मास्तिकायो लोक एव समस्ति नालोके
मा भूद् दलावलोकितेन प्रस्तुतानुपयोगिना कर्त्तव्यं न हि रहो ऽपि भवतु मुक्तस्य तद् गतिर्नियमाभावान्न दयुक्तं यतो जीवानां पुद्गलानां च गति
गमनस्योपग्रहउपष्टंभस्तत्कारी स एव धर्मास्तिकायो नान्यस्ततस्तस्याऽलोके ऽभावात्कथं लोकात्परतो ऽलोके ऽपि मुक्तात्मनां गतिः प्रवर्त्तत इति
॥ आह ॥ कथं पुनरेनदवसीयते यदुत लोकादन्यो ऽप्यलोकपदार्थः कश्चिदस्तीत्याशंक्याह । लोगस्स त्थि विवक्खो । सुद्धत्तणओ घडस्स अघडो व्व
स घडाइ च्चिय मई । न निसेहाओ तदणुरूवो ॥ अस्ति लोकस्य विपक्षो व्युत्पत्तिमच्छुद्धपदाभिधेयत्वादिह यद्व्युत्पत्तिमता शुद्धपदेनाभिधीयते
तस्य विपक्षो दृष्टो यथा घटस्याघटः यश्च लोकस्य विपक्षः सो ऽलोकः अथ स्यान्मतिर्न लोको ऽलोक इति यो लोकस्य विपक्षः स घटादिपदार्था
नामन्यतमो भविष्यति । किमिह वस्त्वंतरपरिकल्पनया ॥ तदेतन्न ॥ पर्युदासनञा निषिधान्निषेध्यस्यैवानुरूपो ऽत्र विपक्षो ऽन्वेषणीयः न
लोको ऽलोक इत्यत्र च लोकनिषेधः स चाकाशविशेषो ऽतो ऽलोकेनापि तदनुरूपेणैव भवितव्यं यथेहापंडित इत्युक्ते विशिष्टज्ञानविकल
श्चेतन एव पुरुषविशेषो गम्यते नाचेतनो घटादिः एवमिहापि लोकानुरूप एवालोको मंतव्यः । उक्तं च ॥ नञ्युक्तमिवयुक्तं वायद्धि कार्यविधी

यत्र तु व्याधिकरणेऽन्यस्मिन्नूर्ध्वं केऽपर्यर्थगतिस्तथा। ननिवयुक्तमन्यसहद्व्याधिकरणे तथाप्यर्थगतिस्तस्माल्लोकविपक्षत्वादस्य लोक इति। अथालो
कास्तित्वादेव धर्मास्तिकायो साधयन्नाह। तम्हा धम्माऽऽलोयपरिछेयकारिणो जुत्ता। इयरा गासे तुल्ले लोगोऽलोगो त्ति को भेऊ। लोगविभागा
भावे। पडिघायाभावऊण वा थाऊ। संववहाराभावो। संबंधाभावऊ होज्जा॥ यस्मादुक्तप्रकारेणास्य लोकस्तस्मात् लोकास्तित्वादेवावश्यं लो
कपरिछेदकारिण्या धर्मास्तिकायाद्या भवितव्यं अन्यथाकाशो सामान्ये सत्ययं लोकोऽयं चालोक इति किंकृतोऽयं विशेषः स्यात्तस्माद्यत्र क्षेत्रे
धर्मास्तिकायो वर्त्तते तल्लोकः शेषं त्वलोक इति लोकालोकव्यवस्थाकारिणो धर्मास्तिकायो विद्यते इति लोगेत्यादि यदि हि धर्मास्त्या
लोकविभागो न स्यात्ततो लोकविभागाभावे विशिष्टे एव सर्वस्मिन्नप्याकाशे गतिपरिणतानां जीवानां पुद्गलानां च प्रतिघाताभावेन तद्व्यवस्था
नाभावाद् लोकेऽपि गमनात्तस्य चानंतत्वात्तेषां परस्परं संबंधानस्यात्ततश्च औदारिकादिकर्मणां बर्णा पापर्यंतपुद्गलकृतो जीवानां बंधमोक्ष
सुखदुःखसंभवसंसरणादिव्यवहारो न स्यात् जीवस्य च जीवेन सहान्योन्यं मीलनाभावात्तत्कृतोऽनुग्रहोपघातादिव्यवहारो न स्यादिति॥ ततः

किमित्याह। निरणुग्गहत्तणाऊ। न गई परऊ जलादिव मच्छस्स। जो गमणाणुग्गहिया। सो धम्मा लोगपरिमाणो॥ ततो लोकात् परतोऽलोके जीवपुद्
गलानां न गतिर्निरनुग्रहत्वात् अगत्यनुग्रहकर्त्तुरभावादित्यर्थः यथा जलात्परतोऽजलस्य मत्स्यस्य गतिर्न भवत्युपग्राहकाभावादिति यश्चात्र जी
वपुद्गलगतेरनुग्रहकर्त्ता स लोकपरिमाणो धर्मास्तिकाय इति॥ अत्र प्रयोगमाह॥ अत्थि परिमाणकारी। लोगस्स पमेयभावऊ वस्सं। नाणंपिव
नेयस्सा लोगत्थित्तेऽयसंदेवस्स॥ अस्ति लोकस्य परिमाणकारी प्रमेयत्वात् ज्ञानमिव ज्ञेयस्य अथवा जीवाः पुद्गलाश्च लोकोऽभिधीयते ततः
स्तित्परिमाणकारी प्रमेयत्वाद्यथा ज्ञानादीनां प्रस्तोयश्चेह परिमाता स धर्मास्तिकायः स चावश्यमलोकस्यास्तित्वे सत्युपयुज्यते नान्यथा आका
शस्य सर्वत्राप्यविशिष्टत्वात्तस्माल्लोकाग्रे सिद्धस्यावस्थानमिति प्रस्तुतं॥ अथ प्रकारांतरेणाक्षेपपरिहारौ प्राह। पयणं पसत्तमेवं। थाणाऊ तं च नो त
उच्चट्ठ। इह कुत्ति लक्कणेयं। कत्तुरणत्थंतरं थाणं॥ ननु स्थीयतेऽस्मिन्निति स्थानमित्यधिकरणसाधनोऽयं शब्दस्ततश्च सिद्धस्य स्थानं सिद्धस्थानमिति
समासस्ततश्चैवं सति सिद्धस्य पतनं प्रसक्तं स्थानात्सर्वत्र पादपाद्यग्रस्थितदेवदत्तस्येव फलस्येव वा यस्य किल क्वापि पर्वताद्यवस्थानं तस्य कदाचित्
स्यापि पतनमपि दृश्यते ततः सिद्धस्यापि तत्कदाचित्प्राप्नोतीति भावः। तच्च न। यतः सिद्धस्य स्थानमितीयं कर्त्तरि षष्ठी ततश्च सिद्धस्य स्थानमिति
कोऽर्थः सिद्धस्तिष्ठति न तु तदर्थांतरभूतं स्थानमस्तीति॥ अथवा॥ नह निच्चत्तणऊ वा॥ थाणविणासपयणं न जुत्तं से। तह कम्माभावाऊ। पुण
क्कियाभावऊ वावि॥ अर्थांतरत्वेपि स्थानस्य पतनं न सिद्धस्य यतोऽस्यार्थांतरं स्थानं नभः तस्य च नित्यत्वाद्विनाशो न युक्तस्तदभावे च कुतः पत

नं मुक्तस्य कर्म चालनः पतनादिक्रियाकारणं मुक्तस्य च कर्माभावात् कुतः पतनक्रिया यावत्समयमेकमस्या ऊर्ध्वगतिक्रिया तस्याः कारणं ला
उ एरंडफले इत्यादिना दर्शितमेव पुनः क्रिया च मुक्तस्य नास्ति कारणाभावात् निजप्रयत्नप्रेरणाकर्षणाविकर्षणगुरुत्वादयोऽपि हि पतनकारणं
तत्संभवश्च मुक्तस्य नास्ति हेतोरभावादिति कुतोऽस्य पतनमिति॥ किं चस्थानात्पतनमित्यनैकांतिकमेव दर्शयति। निच्चं त्थाणाऊ वा। वोमाई
णापडणं पसज्जेज्जा। अह न मयमणेगंतो। थाणाऊ वस्स पडणं ति॥ ननु स्थानात्पतनमिति स्ववचनविरुद्धमिदं अस्थानादेव पतनस्य यु
ज्यमानत्वात् अथ स्थानादपि पतनमिष्यते तर्हि नित्यमेव स्थानात् व्योमादीनां पतनं प्रसज्येत अथ न तत्तेषामतं तर्हि स्थानात्पतनमित्यनैकांतिक
मेवेति॥ अथान्येन प्रकारेण प्रेर्यमाशंक्य परिहरन्नाह। भवऊ सिद्धान्ति मई। तेणाइमसिद्धसंभवो जुत्तो। कालाणाइत्तणऊ पढमसरीरं व तद
जुत्तं॥ अथ स्यान्मतिः परस्य यतो भवात् संसारात्सर्वोऽपि मुक्तात्मा सिद्धस्तेन ततः सर्वेषामपि सिद्धानामादिमत्त्वादवश्यमेव केनाप्याद्यसिद्धेन भवि
तव्यं। तदयुक्तं॥ यतो यथा सर्वाण्यपि शरीराण्यहोरात्राणि च सर्वाण्यादिमुक्तान्येव अथ कालस्यानादित्वान्नाद्यशरीरमाद्या होरात्रं वा किमपि
ज्ञायते तथा कालस्यानादित्वात् सिद्धोऽपि नाद्यः प्रतीयत इति। अथान्यदपि प्रेर्यपरिहारं चाह। परिमियदेसेणंता। किह माया मुत्तिविरहियत्ताऊ। ने
यम्मिव नाणाई दिट्ठीऊ वेगरूवम्मि॥ आह परिमिते देश एव सिद्धिक्षेत्रं तत्र कथमनादिकालवर्त्तिनोऽनंताः सिद्धा मांति॥ अत्रोत्तरमाह॥ अमूर्त्तत्वात्सिद्धाः
परिमितेऽपि क्षेत्रेऽनंता मांति यथा प्रतिद्रव्यमेवानंतानि सिद्धानां संबंधीनि केवलज्ञानकेवलदर्शनानि संपतंति दृष्टयो वा यथैकस्यामपि नर्त्तक्यां सह
स्रशः प्रपतंति परिमितेऽपि वाऽपवरकादिक्षेत्रे यद्यपि प्रदीपप्रभा मांति एवमिहाप्यमूर्त्ताः सिद्धाः कथं परिमितक्षेत्रेऽनंता न मास्यंति मूर्त्तानामपि प्रदीप
प्रभादीनां बहूनामेकत्रावस्थानं दृश्यते किमुताऽमूर्त्तानामिति भावः। तदेवं युक्तिभिः सुप्रसंगौ बंधमोक्षौ व्यवस्थाप्य वेदवाक्यद्वारेणापि तद्व्यवस्थामाह
। न ह वै ससरीरस्स प्पियप्पियावहति रेवमाईणं। वेयपयाणं च तुमं। न सदत्थं मुणसि तो संका। तुह बंधमोक्कम्मिय। सा च न कज्जा न ऊ फुडो च्चिय ससरी
रेयरभावो। न णु जो सो बंधमोक्को त्ति॥ व्याख्या॥ न ह वै सशरीरस्य प्रियाप्रिययोरपहतिरस्त्यशरीरं वा वसंतं प्रियाप्रिये न स्पृशत इत्यादीनां च वेदपदा
नां सदर्थं त्वं न मुणसि न जानासि तो बंधमोक्षेष्वत्र वसौम्य शंका सा च न कार्या यतो ननु यः सशरीरेतरभावः स स्फुट एव बंधमोक्षश्चेति कथं शंका युज्यते। एतदुक्तं
भ॰॥ सशरीरस्येत्यनेन बाह्याध्यात्मिकानादिशरीरसंतानस्वरूपो बंधः प्रोक्तः तथा अशरीरं वावसंतमित्यनेन त्वशेषशरीरापगमस्वभावो मोक्षः
प्रतिपादितः तथा स एष विगुणो विभुर्न बध्यत इत्यादीन्यपि पदानि संसारिजीवस्य बंधमोक्षाभावप्रतिपादकानि त्वं मन्यसे तच्चायुक्तं मुक्तजीवावि
षयत्वात्तेषां मुक्तस्य च बंधाद्यभावेऽविप्रतिपत्तिरेवेति। तदेवं भगवता छिन्ने तस्य संशये ततः किमित्याह। छिन्नंमि संसयम्मी। जिणेण जरमरण

विप्पमुक्केणं॥ सो समणो पव्वइऊ अद्धुट्ठहिं सह खंडियसएहिं। व्याख्या पूर्ववन्नवरं अर्द्धचतुर्थैः शिष्यशतैः सह प्रव्रजितोयमिति॥ द्वाषष्टिगाथार्थः॥
३७५॥ इति षष्ठगणधरः समाप्तः॥ ६॥ अथ सप्तमगणधरवक्तव्यतामभिधित्सुराह। तेपव्वइए सोऊ। मोरिउ आगच्छई जिणसयासं। वच्चामि णवंदा
मी। वंदित्ता पज्जुवासामि। आभट्ठो य जिणेणं। जाइजरामरणविप्पमुक्केण। नामेण य गोत्तेण य। सव्वण्णू सव्वदरिसीणं॥ गाथाद्वयमपि प्रकटार्थं। आ-
भाष्यतनः किमुक्त इत्याह। किं मण्णे अत्थि देवा। उयाहु नत्थित्ति संसऊ तुज्झ। वेयपयाण य अत्थं। न याणसी तेसिमो अत्थो॥ हे आयुष्मन्मौर्य त्वमेवं
मन्यसे किं देवाः संति न वेति उभयथापि वेदपदश्रवणात्तथा हि स एष यज्ञायुधी यजमानोंजसा स्वर्गं लोकं गच्छतीत्यादि तथा अपाम सोमं अमृता अभूम
अगमन्ज्योतिरविदाम देवान्किं नूनमस्मात्तृणवदरातिः किमु धूर्तिः अमृतमर्त्यस्येति तथा को जानाति मायोपमान्गीर्वाणान् इंद्रयमवरुण
कुबेरादीनित्यादि एतेषां च वेदपदानामयमर्थस्तव बुद्धौ प्रतिभासते यथा स एष यज्ञ एव दुरितदारणक्षमत्वादायुधं प्रहरणं यस्यासौ यज्ञायुधी
यजमानोंजसा प्रगुणेन न्यायेन स्वर्गं लोकं गच्छतीति दिवसत्ताप्रतिपत्तिः तथा अपाम पीतवंतः सोमं लतारसं अमृता अमरणधर्माणः अभूम
भूताः स्म अगमन् गताः ज्योतिः स्वर्गं अविदाम देवान्देवत्वं प्राप्ताः स्म किं नूनमस्मान्तृणवत्करिष्यति को सावित्याह अरातिर्व्याधिस्तथा किमु प्र
भेधूर्तिर्जरा अमृतमर्त्यस्येति अमृतत्वं प्राप्तस्य मर्त्यस्य पुरुषस्येत्यर्थः अमरणधर्मिणो मनुष्यस्य किं करिष्यति जराव्याधयदभिभावः अत्रापि देवस
त्ताप्रतिपत्तिः को जानाति मायोपमानित्यादीनि तु देवाभावप्रतिपादकानि अतस्तव संशयः अयुक्तश्चायं यतो मीषां वेदपदानामर्थं त्वं न जानासि चशब्दा
त्किंचन वेत्सि एतेषां हि वेदपदानां नायमर्थो यस्तवाभिप्रेतः किं त्वयं वक्ष्यमाणलक्षण इति॥ अथ भाष्यं। तं मन्नसि नेरइया। परतंता दुक्खसंपउत्ताय।
नतरंती हागंतुं। सद्धेया सुव्वमाणावि॥ सच्छंदयारिणो पुण ते। देवा दिव्वप्पभावजुत्ताय जं न कयाइ वि दरिसणं। मुवेंति तो संसऊ तेसु॥ मौर्य त्वमेवं
मन्यसे नारकाः स्वकृतपापनरकपालादिपरतंत्राः पराधीनवृत्तयः तीव्रदुःखसंघातविह्वलाश्च न शक्नुवंत्यत्रागंतुमतः प्रत्यक्षीकरणोपाया
भावाच्छ्रूयमाणा अपि श्रद्धेया भवंतु देवास्तु स्वच्छंदचारिणो दिव्यप्रभावयुक्ताश्च तथापि यस्मान्न कदाचिद्दर्शनपथमवतरंति श्रूयंते च श्रुतिस्मृत्यादि
ष्वतस्तेषु शंकेति॥ अत्रोत्तरमाह। माकुरु संसयमेए। सुदूरमणुयाइभिन्नजाईए। पेच्छसु पच्चक्खं च्चिय। चउव्विहे देवसंघाए॥ मौर्य पुत्र देवेषु मा संशयं
कार्षीस्त्वमेतानेव हि सुदूरमत्यर्थं मनुजादिभ्योभिन्नजातीयान्दिव्याभरणविलेपनवसनकुसुममालालंकृतान्भवनपतिव्यंतरज्योतिष्कवैमानिकलक्ष
णांश्चतुर्विधदेवसंघातानिमान्वंदनार्थमिहैव समवसरणागतान्प्रत्यक्षेणैव पश्यति॥ अथैतद्दर्शनात्पूर्वं य आसीत्संशयः स युक्तो भवेन्नैवं कुत इत्याह। पु
व्वंपि न संदेहो। जुत्तो जं तेइ सा सुपच्चक्खं। दीसंति तक्कयावि य। उवधायाणुग्गहा जगऊ॥ इह समवसरणागतदेवदर्शनात्पूर्वमपि तवान्येषां च संशयोन

युक्तो यद्यस्माच्चंद्रादित्यादिज्योतिष्कास्त्वया सर्वेणापि च लोकेन प्रत्यक्षत एव सर्वदा दृश्यंते अतो देवाः तत्प्रत्यक्षत्वात्कथं समस्तामरास्तित्वसंका किंच सं
त्येव देवाः लोकस्य तत्कृतानुग्रहोपघातदर्शनात्तथा हि दृश्यंते केचित्केचिन्निंद्याः कस्यापि किंचिद्विभवप्रदानादिना अनुग्रहं तदपहरणादिना चो
पघातं कुर्वंत स्ततो राजादिवत्कथमेते न संतीति॥ पुनरपि परमाशंक्य ज्योतिष्कदेवास्तित्वं साधयन्नाह। आलयमेत्तं च मई। पुरं व तव्वासिणो तह
विसिद्धा। जे ते देवत्तिमया न य निलया निच्चपरिसुण्णा॥ अथ एवंभूता मतिः परस्य भवेदालया एव आलयमात्रं चंद्रादिविमानानि ननु देवास्तत्कथं॥ ज्यो
तिष्कदेवानां प्रत्यक्षत्वमभिधीयते किं तद्यथा आलयमात्रमित्याह पुरंति यथा पुरं शून्यं लोकानामालयमावंस्थानमात्रं न तु तत्र लोकाः संत्येवं चंद्रा
दिविमानान्यप्यालयमात्रमेव ननु तत्र देवाः केचित्तिष्ठंत्यतः कथं तेषां प्रत्यक्षत्वं॥ अत्रोत्तरमाह॥ तथापि तद्वासिनः आलयवासिनः सामर्थ्या
द्येसिद्धास्ते देवा इति मताः संमताः यत्स्वालयः स सर्वोपि तन्निवासिना अधिष्ठितो दृष्टः यथा प्रत्यक्षोपलभ्यमानादेवदत्ताद्यधिष्ठितावसंत
पुराद्यालयाः आलयाश्च ज्योतिष्कविमानान्यतस्त आलयत्वान्यथानुपपत्तेर्ये तन्निवासिनः सिद्धास्ते देवा इति मता॥ आह॥ ननु कथं ते देवाः
सिध्यंति यादृशा हि प्रत्यक्षेण देवदत्तादयो दृश्यंते तेपि तादृशा एव स्फरीति तदयुक्तं विशिष्टा हि देवदत्ताद्यालयेभ्यश्चंद्राद्यालया इत्यत
स्तन्निवासिनोपि विशिष्टाः सिध्यंति ते च देवदत्तादिविलक्षणा देवा इति॥ अपरस्त्वाह॥ नन्वालयत्वादित्ययं हेतुस्तन्निवासिजनसाधने
नैकांतिकः शून्यालयैर्व्यभिचारादत्रोत्तरमाह॥ न य निलयेत्यादि। न च निलयाः आलया नित्यमेव शून्या भवंति अयमभिप्रायो ये केचिदालयास्तेप्रा
गिदानीमेष्यति वा काले अन्यत्र एव तन्निवासिभिरधिष्ठिता एव भवंति न तु नित्यमेव परिशून्यास्ततो यदा तदा वा चंद्राद्यालयनिवासिनो देवाः सिध्यंति। पुन
रप्यन्यपराभिप्रायमाशंक्य परिहारमाह। को जाणइ व किमेयं। ति होज्ज निस्संसयं विमाणाइं। रयणमयनभोगमणा। दिट्ठ जह विज्जाहराईणं॥ यदि वा ए
वंभूता मतिः परस्य भवेद्यदुत चंद्राद्यालयत्वेन यदीयते भवद्भिस्तदिदं को जानाति किं चिह्नयत्किं स्वरूपः ग्निमयो गोलश्चंद्रस्तत्त्वमयः स्वभावतः स्वच्छः आ
होश्चिदेवंभूता एवैते भास्वरा रत्नमयगोलको ज्योतिष्कविमानान्यतः कथमेतेषामालयत्वसिद्धिः। एतत्प्रति विधानमाह॥ निःसंशयं विमानान्येतानि रत्न
मयत्वे सति नभोगमनात्पुष्पकादिविद्याधरतपःसिद्धविमानवदिति अभ्रविकारपवनादिव्यवच्छेदार्थं रत्नमयत्वविशेषणमिति॥ अपरमपि पराभि
प्रायमाशंक्य परिहरन्नाह। होज्ज मई माया। न हाविन सकारिणो सुराजं ते। मयमायाइ विगारा पुरं व निच्चोवलंभाउ॥ अथ परस्य मतिर्भवेन्नैते चंद्रादि
विमानान्यालयाः किंतु मायेयं मायाविना केनापि प्रयुक्ता। अत्रोच्यते॥ मायात्वमीषामसिद्धं वाग्मात्रेणाभवताभिधानात्तथापुपगम्योच्यते यतस्त
दिणस्तथाविधमायाप्रयोक्तारस्ते सुराः सिद्धा एव मनुष्यादीनां तथाविधवैक्रियकरणादर्शनादभ्युपगम्यन्न मायात्वममीषामभिहितं न चैवं माया

दिविकारानिरयोपलंभात्सर्वेणास्वैदाहृश्यमानत्वादित्यर्थः प्रसिद्धपाटलिपुत्रादिपुरवदिति मायेंद्रजालकृतानि हि वस्तूनि न नित्यमुपलभ्यंत इति नित्य
विशेषणोपादानमिति। प्रकारांतरेणापि देवास्तित्वं साधयन्नाह। जइ नारगा पवन्ना पगिट्ठपावफलभोइणो तेणं। सुबहुगपुण्णफलभुजो पवज्जियव्वा
सुरगणा वि॥ इह स्वकृतप्रकृष्टपापफलभोगिनस्तावत्केचिन्नारकाः प्रतिपत्तव्यास्ते च यदि प्रतिपन्नास्त्वयेति तर्हि तेनैव प्रकारेण स्वोपार्जितप्रकृष्ट
सुकृतपुण्यफलभुजः सुरगणा अपि प्रतिपत्तव्याः॥ अथ आह॥ ननु इह वातिदुःखित नरास्तिर्यंचश्चातिदुःखिताः प्रकृष्टपापफलभुजो भविष्यंति तथा
मनुष्या एवातिसुखिताः प्रकृष्टपुण्यफलभुजो भविष्यंति किमदृष्टनारकदेवपरिकल्पनयेति। तदयुक्तं॥ प्रकृष्टपापफलभुजां सर्वप्रकारेणापि दु
:खिन भवितव्यं न चातिदुःखितानामपि नरतिरश्चां सर्वप्रकारदुःखं दृश्यते सुखवद् पवनालोकादिसुखस्य सर्वेषामपि दर्शनात् प्रकृष्टपुण्यफलभु
जामपि सर्वप्रकारेणापि सुखिन भवितव्यं न चेहातिसुखितानामपि नराणां सर्वप्रकारं सुखमवलोक्यते पूतिदेहोद्भवस्य रोगजरादिप्रभवस्य च दुःख
स्य तेषामपि सद्भावात्तस्मात्प्रकृष्टपापनिबंधनसर्वप्रकारदुःखवेदिनो नारकाः प्रकृष्टपुण्यहेतुकसर्वप्रकारसुखभोगिनो देवाश्चाभ्युपगंतव्या एव
ति। ननु यदि देवाः संति तर्हि स्वच्छंदचारिणोपि किमित्यत्र ते कदाचिदपि नागच्छंतीत्याह। संकंतदिव्वपेम्मा विसयपसत्तासमत्तकत्तव्वा। अणहीणम
णुयकज्जा नरभवमसुभं न इंति सुरा॥ नागच्छंतीह सदेवसुरगणाः संक्रांतदिव्यप्रेमत्वाद्विषयप्रसक्तत्वात्प्रकृष्टरूपादिगुणकामिनीप्रसक्तरम्यदेशां
तरगतपुरुषवत्तथाः समाप्तकर्तव्यत्वाद् द्वा कर्तव्यताप्रसाधननियुक्तविनीतपुरुषवत्तथा अनधीनं मनुजानां कार्यं येषां ते ऽनधीनमनुजकार्या स्त
द्भावस्तत्त्वं तस्मान्नेहागच्छंति सुराः अनेभिमतगेहादीनि संगयतिवदिति तथा असुभत्वान्नरभवस्य तद्गंधाऽसहिष्णुतया नेहागच्छंति देवाः स्वप
रित्यक्तकडेवरवदिति। ननु किं सर्वथा ते न आगच्छंति नैवमतएवाह। नवरि जिणजम्मदिक्खा केवलनिव्वाणमहनिओगेण। भत्तीए सोम्मसंसय। विच्छेय
त्थं व एज्ज ण्ह पुव्वाणुरागओ वा॥ समयनिबंधाउ वा तवगुणाउ वा नरगणपीडाणुग्गह कंदप्पाईहिं वा केइ॥ नवरं जिनजन्मदीक्षाकेवलनिर्वाणमहोत्सव
नियोगेन तत्कर्तव्यतानियमेन हि देवा आगच्छेयुस्तत्र सौधर्मेन्द्रादयो निजभक्त्या समागच्छंति केचित्तु तदनुवृत्त्या अन्ये संशयव्यवच्छेदार्थमपरे तु पू
र्वभविकपुत्रमित्राद्यनुरागात्समयनिबंधनः प्रतिबोधादिनिमित्तः संकेतनिश्चयस्तस्माच्च केचिद्देवा इहागच्छंति अन्ये तु महासत्वसाध्वादितपोगुणस
माकृष्टाः केचित्पूर्ववैरिकनरगणपीडार्थं अपरे तु पूर्वसुहृत्पुत्राद्यनुग्रहार्थं केचित्तु देवाः कंदर्पादिभिरिहागच्छंत्यादि शब्दात्साध्वादिपरीक्षार्थमितो
रिति द्रष्टव्यमिति॥ तदेवं निरूपितं देवानामत्राऽनागमनकारणमागमनकारणं च अथ देवसिद्धावन्यदपि कारणमाह। जाइस्सरकहणाउ। कामदपत्त
स्कदंसणाउय विज्जामंतोवायणा। सिद्धीउ गहविगाराउ उक्किट्ठपुण्णसंचय। फलभावाउ अभिहाणसिद्धीउ। सव्वागमसिद्धीउ। यसंति देवत्ति सद्धेयं

संति देवा इत्येतच्च श्रद्धेयमिति प्रतिज्ञा जातिस्मरणप्रत्ययितपुरुषेण कथनात्त्वां नानादेशाविचारि प्रत्ययितपुरुषावलोकितकथितविचित्रवद्देवकुला
दिवस्तुवत्तथा कस्यापि तपःप्रभृतिगुणयुक्तस्य प्रत्यक्षदर्शनप्रवृत्तेश्च केनचित्प्रत्यक्षप्रमाणेनोपलंभादित्यर्थः दूरविप्रकृष्टनगरादिवत्तथा विद्या
मंत्रोपयाचनेष्टः कार्यसिद्धेः प्रसाधफलानुमितराजादिवत्तथा गहविगाराउत्ति अनुप्रयोगोग्यहाधिष्ठितपुरुषदेहोजीवव्यतिरिक्तादृश्यवस्त्वधिष्ठि
तकः पुरुषासंभाव्यविकारवत्त्वात्क्रियादर्शनात्संचरिष्णुयंत्र व्यतिरिक्तमध्यप्रविष्टादृश्यमानपुरुषाधिष्ठितयंत्रवत्तथा तपोदानादिक्रियासमुपार्जितो
त्कृष्टपुण्यसंभारफलसद्भावादुत्कृष्टपापप्राग्भारफलसद्भावनिश्चितनारकवदेतच्च प्रागेव भावितं तथा देवा इति यदभिधानं ततोपि च देवानां सिद्धिः ए
तच्चानंतरगाथायां व्यक्तीकरिष्यते तथा सर्वेचैते आगमश्च सर्वागमास्तेष्वपि प्रतिपत्यासिद्धत्वाच्च संति देवा इति। यदुक्तं अभिहाणसिद्धीउत्ति तद्भाव
यन्नाह। देवत्ति सत्थयमिदं सुद्धत्तणउ घडाभिहाणं व। अहमवइ मणुउच्चिय देवो गुणरिद्धिसंपन्नो। तं न जउ तच्चत्थे सिद्धे उवयारउ मया सिद्धी। तच्च
त्थसीहसिद्धे माणवसीहोवयारोव्व॥ देवा इत्येतत्पदं सार्थकं व्युत्पत्तिमच्छुद्धपदत्वात्घटादिवत्तथा दीव्यंतीति देवा इति व्युत्पत्तिमत्त्वं समासतद्धितरहि
तत्वेन च शुद्धत्वं भावनात्वात्रप्रागुक्तैव अथ परस्य मतिर्भवेन्ननु मनुष्य एवेह दृश्यमानो देवो भविष्यति किमदृष्टदेवकल्पनया किं सर्वोपि मनुष्यो दे
व इति नेत्याह गुणसंपन्नो गणधरादिः ऋद्धिसंपन्नश्चक्रवर्त्यादिः॥ अत्रोच्यते॥ तदेतन्न यस्मात्तथ्ये मुख्ये वस्तुनि क्वचित्सिद्धे सत्यन्यत्रोपचारतस्त
त्सिद्धिर्मता यथा मुख्ये यथार्थे सिंहेन्यत्र सिद्धे ततो माणवके सिंहोपचारः क्रियते यमिहापि यदि मुख्या देवाः क्वचित्सिद्धा भवेयुस्तदा राजादौ देवोपचारो
युज्यते नान्यथेति। देवाभावे चाग्निहोत्रक्रियायां वैफल्यमिति दर्शयन्नाह। देवाभावे वफलं जमग्गिहोत्ताइयाण किरियाणं। सग्गीयं जन्नाणय दाणाइफ
लं च तदजुत्तं॥ वा इत्यथवा इदं दूषणं देवाभावेऽभ्युपगम्यमाने यदग्निहोत्रादिक्रियाणां अग्निहोत्रं जुहुयात्स्वर्गकाम इत्यादिनाऽऽस्वर्गीयं फलमुक्तं तथा यज्ञानां
च यत्फलं अभिहितं यदा दानादिफलं च यत्प्रसक्तलोकप्रसिद्धं तत्सर्वमयुक्तं आप्नोति स्वर्गोत्पत्तेर्यत्फलमुक्तं स्वर्गिणां चाभावे कुतः स्वर्ग इति साप
यज्ञायुधीत्यादीनि च वेदवाक्यानि देवास्तित्वप्रतिपादनपराणि वर्तंते ऽथ किं तावत्प्रतिपद्यसे यदपि कोजानाति मायोपमान् गीर्वाणानिंद्रयमवरुणकुबे
रादीनित्यादि वाक्यं तदपि न देवनास्तित्वाभिधायकं किंतु सुराणामपि मायोपमत्वाभिधानेन शेषर्द्धिसमुदायानां सुतरामनित्यत्वप्रतिपादकं बोद्धव्यं॥ अ
न्यथा हि देवास्तित्वप्रतिपादकवाक्यानि श्रुतिमंत्रपदैरिंद्रादीनामाह्वानं चानर्थकं स्यादेतदेवाह। जमसोमसूरसुरगुरुसाराज्जाईणि जयइ जन्नेहिं। मंतावाहण
मेवय इंदाइण विहा सव्वं। जमेत्यादेः पूर्वार्धस्यायमर्थः इत्थुणोऽइंद्रा प्रभृतिक्रतुभिर्यथा श्रुति सोमसूर्यसुरगुरुस्वाराज्यानि जयतीत्यादीनि देवास्तित्वसूच
कानि वेदवाक्यानि देवास्वाराज्यानि जयत्युपार्जयतीत्यर्थः इति तथा मंत्रैरिंद्रादीनामाह्वानं देवास्तित्व एवोपपद्यते अन्यथा व्यर्थं वस्यादिंद्रादीनां च मंत्रप

विशेषावि॰ वृ॰ देशाक्रान्तमेवमवगंतव्यंइंद्रआगच्छमेधातिथेमेषवृषणेत्यादि तस्मादुक्तिलोवेदवाक्येभ्यश्चसंतिदेवाइतिस्थितं॥तदेवंछिन्नोमौर्यपुत्रस्यभगवतासं
२५१ शयःततःकिंकृतवानसावित्याह।छिन्नंमिसंसयम्मी जिणेणजरमरणविप्पमुक्केण।सोसमणोपव्वइऊ।अद्धुट्ठेहिंसहखंडियसएहिं।व्याख्यापूर्ववत्
देकविंशतिगाथार्थः।३३॥इतिसप्तमोगणधरवादःसमाप्तः॥७॥अष्टमगणधरवक्तव्यतामाह।तेपव्वइएसोउं।अकंपिओआगच्छईजिणसयासं।वच्चा
मिणवंदामी।वंदित्तापज्जुवासामि॥व्याख्यातथैवनवरमकंपितनामाद्विजोपाध्यायोऽत्रवक्तव्यः।ततःकिमित्याह॥आभट्ठोयजिणेणामित्यादिगाथा॥सव्वा
ख्यानातथैवेति।नामगोत्राभ्यामाभाष्यततोसौभगवताकिमुक्तइत्याह।किंमन्नेनेरइया।अत्थीनत्थित्तिसंसओतुज्झ।वेयपयाणयअत्थं।नयाणसी
तेसिमोअत्थो॥किंनारकाःसंतिनवेतित्वंमन्यसे अयंचतवसंशयोविरुद्धवेदपदश्रवणनिबंधनस्तथाहि नारकोवैएषजायते यःशूद्रान्नमश्नातीत्यादि
एषब्राह्मणोनारकोजायतेयःशूद्रान्नमश्नातीत्यर्थः इत्यादीनिवाक्यानिनारकसत्ताप्रतिपादकानितथैवप्रेत्यनारकाःसंतीत्यादीनितुनारकाभावप्रतिपाद
कानि तत्रैषांवेदपदानामर्थंचशब्दाद्युक्तिहृदयंचत्वंनजानासि यतएतेषामयंवक्ष्यमाणोऽर्थइति॥अत्रभाष्यं॥तंमन्नसिपच्चक्खा।देवाचंदादओतहन्ने
वि।विज्जामंतोवायण।फलाइसिद्धीइगम्मंति।जेपुणकेइमेत्तफला।नेरइयत्तिकिहतेगहेयव्वा।सरकमणुमाणओवा।णुवलंभाभिन्नजाईया॥हेआयुष्मन्नकं
पितत्वमेवंमन्यसे वेदास्तावच्चंद्रादयःप्रत्यक्षप्रमाणसिद्धाएवअन्येतुअप्रत्यक्षाअपिविद्यामंत्रोपयाचितकादिफलसिद्ध्यानुमानतोगम्यंते येपुनःनारका
इत्यभिधानमात्ररूपाश्रुतिरेवफलंयेषांनपुनस्तदभिधायकशब्दव्यतिरिक्तोऽर्थस्तेसाक्षादनुमानतोवानुपलभ्यमानत्वेनतिर्यग्नरामरेभ्यःसर्वथाभिन्नजा
तीयाःकथंसंतीतिग्रहीतव्याःखरविषाणवदिति।अथभगवानुत्तरमाह।महपच्चक्खकन्नणओ।जीवाईएव्वनारएगिण्ह।किंजंसपच्चक्खं।तंपच्चक्खंनव
रिएक्कं।जंकासइपच्चक्खं।पच्चक्खंतंपिघेप्पयालोए।जंसीहादृदसिसणं।सिद्धंनयसव्वपच्चक्खं॥हेआयुष्मन्नकंपितसाक्षादनुपलभ्यमानत्वादित्यसि
द्धोहेतुर्यतोहंकेवलप्रत्यक्षेणसाक्षादेवपश्यामि नारकांस्ततोमत्प्रत्यक्षत्वात्संतीतिगृहाणप्रतिपद्यस्वनारकान्जीवा२दिपदार्थवदथैवंमन्यसे ममा
प्रत्यक्षत्वात्कथमेतान्गृह्णामि ननुदुरभिप्रायोयंयतःकिंयत्स्वस्यात्मनःप्रत्यक्षंतदेवैकंनवरंप्रत्यक्षमुच्यतइतिकाकानेयं ननुयदपिकस्यचिदप्रत्ययि
तपुरुषस्यान्यस्यप्रत्यक्षंतदपिप्रत्यक्षमपिगृह्यते व्यवह्रियंतेलोकेतथाहिसिंहसरभहंसादिदर्शनंसिद्धंप्रसिद्धंलोकेनचसिंहादयःसर्वजनप्रत्य
क्षादेशकालग्रामनगरसरित्समुद्रादयश्चनसर्वेपिभवतःप्रत्यक्षाः अथचान्यस्यापिप्रत्यक्षास्तिप्रत्यक्षतयाव्यवह्रियमाणादृश्यंतेअतोमत्प्रत्यक्षा २५१
नारकाःकिमितिप्रत्यक्षतयानव्यवह्रियंतइति॥अथाभिप्रायांतरमाशंक्यपरिहरन्नाह।अहवाजमिंदियाणं।पच्चक्खंकिंतदेवपच्चक्खं।उवयार
मेत्तओतं।पच्चक्खमणिंदियंतच्चं॥अथवाकिंयदिंद्रियाणांप्रत्यक्षंतदेवप्रत्यक्षमिष्यते।भवतामदीयंप्रत्यक्षंनाभ्युपगम्यते अतींद्रियत्वान्ननुमहानयं

D. D. MEMORIAL

विपर्यासो यस्मादुपचारमात्रतएवतदिंद्रियप्रत्यक्षंप्रत्यक्षतयाव्यवह्रियते यथावानुमानेबाह्यधूमादिलिंगद्वारेणबाह्याग्न्यादिवस्तुज्ञायतेनै
वं अत्रतनुउपचारात्प्रत्यक्षमिवप्रत्यक्षमुच्यते परमार्थतस्त्विदमपिपरोक्षमेवयतोऽसौजीवःसचानुमानवदत्रापिवस्तुसाक्षान्नपश्यतिकिंत्विंद्रिय
द्वारेणैवततोऽतींद्रियमेवतथ्यंप्रत्यक्षमवगंतव्यं तत्रजीवेनसाक्षादेववस्तुनउपलंभादिति॥अत्राह॥नन्वेंद्रियेप्रत्यक्षेयद्यपिजीवःसाक्षाद्वस्तुनजा
नाति तथापींद्रियाणिसाक्षात्तज्ज्ञास्यंति ततश्चेंद्रियाणांप्रत्यक्षमिंद्रियप्रत्यक्षंभविष्यतीत्याशंक्याह॥मुत्ताइभावओनो।वलद्धिमंतिंदियाइकुंभोव्व।
उवलंभद्दाराणि।ताइंजीवोतदुवलद्धा॥नोपलब्धिमतींद्रियाणिनवस्तुज्ञायकानीत्यर्थः पुद्गलसंघातरूपत्वेनमूर्त्तत्वादादिशब्दादचेतनत्वात्कुंभवन्न
चरमुपलंभस्य।श्रोत्रादिज्ञानस्यद्वाराणिभवंति।अमूनिगवाक्षयत्तत्सापेक्षस्यैवक्षयोपशमस्यप्रबोधाज्जीवएवचतदुपलब्धावस्तूपलब्धाजीव
स्येंद्रियाणांवाभेदएवेतिचेन्नैवं कुतइत्याह तदुवरमेविसरणाओ तव्वावारेविनोवलंभाओ॥इंदियभिन्नोआया।पंचमगवक्खोवलद्धाना॥इंद्रियेभ्यो
भिन्नोआयेति॥ज्ञानाजीवस्तदुपरमेपींद्रियोपरमेपितद्वारोपलब्धार्थानुस्मरणात्तद्व्यापारेपींद्रियव्यापारेप्यन्यमनस्कतायामनुपलंभाद्यथापंचभि
र्गवाक्षैरुपलब्धावस्तूपलंभकस्तेभ्योभिन्नइति॥अथेंद्रियप्रत्यक्षमतींद्रियप्रत्यक्षाद्धेतुपत्रयपतितदयुक्तं।कुतइत्याह।जोपुणअणिंदिओच्चिय।जोवोसव
प्पिहाणविगमाओ।सोक्कयदूसंवियाणइ।अयणीयघरोजहादट्ठ॥यःपुनरनिंद्रियएवकेवलज्ञानसंपन्नोजीवःसइंद्रियज्ञानवतोजीवात्स्फुट
तरंविजानातीतिप्रतिज्ञासर्वपिधानविगमात्सर्वावरणक्षयादित्यर्थः यथापंचगवाक्षगृहस्थितपुरुषात्सर्वथापनीतगृहःसर्वतएवाका
शीकृतप्रदेशेस्थितोद्रष्टापुरुषइति॥अनिंद्रियंज्ञानंनाभवत्येवप्रत्यक्षंकुतइत्याह नहिपच्चक्खंधम्मं।तवेणातद्धम्माभिनिग्गहणाओ।क
यगत्तऊच्चसिद्धी।कुंभाणिव्वन्नमेन्नस्स॥नाभवतिप्रत्यक्षमिंद्रियजंज्ञानमितिप्रक्रमाल्लभ्यते चक्षुरादींद्रियस्यरूपादिपरिछेदशक्तिविशेषरूपेणध
र्मांतरेणहेतुभूतेनतस्मानंतधर्मात्मकस्यवस्तुनोयद्रूपादिकंएकंधर्ममात्रंतस्यग्रहणादितिहेतुःकिंतद्यथानप्रत्यक्षमित्याह यथाकृतकत्वाद्यदनित्य
त्वमात्रसिद्धिलक्षणमनुमानमित्येषदृष्टांतः इहचयथापरस्मात्साध्यसिद्धेर्नानुमानंप्रत्यक्षंतथाइंद्रियजमपिविज्ञानमित्येतावद्भावार्थइति॥प्र
कारांतरेणापिइंद्रियज्ञानस्याप्रत्यक्षतांसाधयन्नाह पुव्वोवलद्धसंबंध।सरणाओवानलोव्वधूमाओ।अहवनिमित्तंतरओ।निमित्तमक्खस्सकेरणा
इ॥वाइत्यथवानप्रत्यक्षमिंद्रियजंज्ञानमिति सैवप्रतिज्ञापूर्वोपलब्धश्चासौसंबंधश्चपूर्वोपलब्धसंबंधस्तत्स्मरणाज्जायमानत्वाद्धूमानलज्ञा
नवत्तथाहि घटोयंपूर्वसंकेतकालेएवंभूतएवपदार्थप्रत्यायिताभिज्ञपुरुषाद्घटसंकेतस्यमयाग्रहीतत्वादितिपूर्वोपलब्धसंबंधस्मरणादेवसर्व
स्यापिघटादिग्राहकमिंद्रियज्ञानमुपजायते अन्यथानालिकेरद्वीपाद्यायातस्याप्यविशेषेणैवतत्स्यादभ्यासपाटवादिभ्यश्चाशुकारित्वादिंद्रि

यज्ञानप्रवृत्तेः सर्वत्रैतन्नलक्ष्यत इति॥१९००॥ अथवा प्रत्यक्षमिंद्रियजं ज्ञानं पूर्वं प्रतिपादितं युक्त्या अक्षस्य जीवस्य स्वव्यतिरिक्तनिमित्तविशे
षाज्जायमानत्वाद्धूमादग्निज्ञानवत्स्वव्यतिरिक्तानि च निमित्तान्यक्षस्य जीवस्य करणानींद्रियाणि मंतव्यानि यच्च प्रत्यक्षं न तस्य जीवस्य निमित्तांतराज्जा
यते किंतु जीवस्तत्र साक्षादेव ज्ञेयं पश्यति यथा अवधिमनःपर्यायकेवलज्ञानेष्विति। अतएवाह॥ केवलमणोहिरहियस्स। सव्वमणुमाणमित्त
यजम्हा। नारगसब्भावम्मिय। तदत्थिजं तेणा ते संति॥ केवलमनःपर्यायावधिज्ञानरहितस्य प्रमातुः संबंधि सर्वमपि ज्ञानं यस्मादनुमानमात्रमेव
परोक्षार्थविषयत्वात्केवलादिज्ञानत्रयं तु वस्तु साक्षात्कारित्वात्प्रत्यक्षं तदेवमनुमानं प्रत्यक्षं च यस्मान्नारकसद्भावे साध्ये विद्यत एव तेन
ते नारकाः संतीति प्रतिपद्यस्व तत्र प्रत्यक्षमदीयमेव केवलज्ञानं॥ अनुमानं त्विदं॥ पावफलस्स पगिट्ठस्स। भोइणो कम्मणो व सेस व्व। संति
धुवं ते भिमया। नेरइया अह मई होज्जा। अच्चत्थदुक्खिया जे। तिरियनरा नारगत्ति ते भिमया। तं न जऊ सुरसोक्ख। प्पगरिससरिसं न तं दुक्खं॥
प्रकृष्टस्य पापफलस्य भोगिनः केचिद्ध्रुवं संति कम्मऊत्ति कर्मफलत्वात्तस्येत्यर्थः अवशेषवदिति यथा जघन्यमध्यपापफलभोगिनः शेषास्ति
र्यङ्नरा विद्यंत इत्यर्थः इति दृष्टांतः ते भिमया नेरइयत्ति ये प्रकृष्टपापफलभोगिनस्ते नारका इत्यभिमताः अथ परस्यैवंभूता मतिर्भवेदित्यर्थं दुःखिता ये
तिर्यङ्मनुष्यास्त एवोत्कृष्टपापफलभोगित्वान्नारकव्यपदेशभाजो भविष्यंति किमदृष्टनारककल्पनयेति तदेतदयुक्तं यतोऽतिदुःखितानामपि तिर्यग्मनु
ष्याणां यद्दुःखं तदमरसौख्यप्रकर्षसदृशप्रकर्षवन्न भवति। इदमुक्तं भ॰॥ येषामुत्कृष्टपापफलभोगस्तेषां संभवसि सर्वैरपि प्रकारैर्दुःखेन भ
वितव्यं नचैवमतिदुःखितानामपि तिर्यगादीनां दृश्यते आलोकतरुच्छायाशीतलपवनसुरिसरः कूपजलादि सुखस्यातिदुःखितेष्वपि तेषु
दर्शनाच्छेदनपाचनदहनदंभनवज्रकंटकशिलास्फालनादिभिश्च नरकप्रसिद्धैः प्रकारैर्दुःस्यादर्शनादित्यादि प्रागुक्तानुसारेण स्वयमेवा
भ्यूह्यवान्यमिति आगमार्थश्चायमवगंतव्य इति सततमनुबद्धमुक्कं दुःखं नरकेषु तीव्रपरिणामं तिर्यक्षूष्णभयक्षुत्तृडादिदुःखं सुखं चाल्पं
।सुखदुःखे मनुजानां मनःशारीराश्रये बहुविकल्पे सौख्यमेव तु देवानामल्पं दुःखं तु मनसि भवं २ इति॥ प्रागनेकशोऽभिहितानुमानतोपि नारकास्सा
धयितुमाह। सव्वं चेदमकंपिय। मह वयणाऊ वसेसवयणं व। सव्वण्णुत्तणऊ वा। अणुमयसव्वण्णुवयणं व॥ नारकाः संतीति सत्यमकंपित इदं मद्वचन
त्वाद्यथाऽवशेषं त्वत्संशयादिविषयं मद्वचनं अथवा सर्वज्ञवचनत्वादित्येव हेतुर्वक्तव्यः तचानुमतमनुजैमिन्यादिसर्वज्ञवचनवदिति॥ अपिच॥
भयरागदोसमोहा॥ भावाऊ सच्चमणइवाइं व सव्वंचियमेवयणं। जाणवमभभवयणं व॥ प्रागनेकधाव्याख्यातेयं॥ अर्कपिताभिप्रायमाशंक्या २५२
त्मनि सर्वज्ञतासाधनादि भगवानाह। किह सव्वण्णूत्ति मई। पच्चक्खसव्वसंसयच्छेया। भयरागदोसरहिया। तल्लिंगाभावऊ सोम्म॥ इयमपि व्याख्याता

र्था यदपि न हु वे प्रेत्य नारकाः संतीत्यादौ नारकाभावः शंक्यते भवता। तदप्ययुक्तं॥ अतोयमत्राभिप्रायो मंतव्यः। न खलु प्रेत्य परलोके मेर्वादिवच्छाश्वताः
केचनाप्यवस्थिता नारकाः संति किंतु यदिहोत्कृष्टं पापमर्जति स इतो गत्वा प्रेत्य नारको भवत्यतः केनापि न तत्पापं विधेयं येन प्रेत्य नारकैर्भूयते। तदेवं
छिन्नस्तत्संशयो भगवतास्ततः किं कृतवानसावित्याह। छिन्नंमि संसयम्मी। जिणेण जरमरणविप्पमुक्केण। सो समणो पव्वइऊ। तिहि उ सह खंडियसएहिं
।स बोधादुनिविंशतिगाथार्थः॥१९६६। इत्यष्टमो गणधरवादः समाप्तः॥८॥ अथ नवमगणधरवक्तव्यतामभिधित्सुराह। ते पव्वइए सोउं। अयलभा
या आगच्छई जिणसयासं। वच्चामि ण वंदामी। वंदित्ता पज्जुवासामि॥ गतार्था नवरमचलभ्राता द्विजोऽयोध्यायो नवमो गणधर इति आभट्टोयेत्या
दि गाथा तथैव। आभाष्य ततः किमुक्तमित्याह। किं मन्ने पुण्णपावं। अत्थी नत्थित्ति संसऊ तुज्झ। वेयपयाण य अत्थं। न याणसी तेसिमो अत्थो॥ हे
आयुष्मन्नचलभ्रातस्त्वमेवं मन्यसे किं पुण्यपापे स्तः न वेति अयं चानुचितः संशयो यस्माद्विरुद्धवेदपदनिबंधनो विरुद्धदर्शनश्रुतिनिबंधनश्च
तव वर्तते। तत्र वेदपदानि॥ तावत्पुरुष एवेदं ग्निं सर्वमित्यादि यथा द्वितीयगणधरे तथा वाच्यानि तेषां चार्थं त्वं न जानासीत्याद्यपि तथैव व्याख्येय
मिति॥ अत्र भाष्यकारः पूर्वपक्षं प्रपंचयन्नाह। मन्नसि पुण्णं वावं॥ साहारणमहव दोवि भिन्नाइं। होज्ज न वा कम्मं चिय। सभावऊ भवपवंचोयं॥
इह केषांचित्तीर्थिकानामयं प्रवादः पुण्यमेवैकमस्ति न पापं अन्ये त्वाहुः पापमेवैकमस्ति न पुण्यं अपरे तु वदंति उभयमप्यन्योन्यानुविद्धस्वरूपमे
चकमणिवत्कर्मसम्मिश्रसुखदुःखाख्यफलहेतुः साधारणं पुण्यपापाख्यमेकं वस्त्विति अन्ये तु प्रतिपादयंति स्वतंत्रमुभयं विविक्तसुखदुःखकार
णं होज्ज न वा भवेदिति अन्ये पुनराहुर्मूलतः कर्मैव नास्ति स्वभावसिद्धः सर्वोप्ययं जगत्प्रपंचः अतस्त्वमप्येतानेव विकल्पान्मन्यसे एतेषां च विकल्पा
नां परस्परविरुद्धत्वात्संशयदोलामारूढोसित्वमिति। ननु येषां पुण्यमेवैकमस्ति न तु पापं तन्मते कथं कस्यापि दुःखोपपत्तिरित्याह। पुण्णुक्करि
से सुभया। तरतमजोगावगरिसऊ हाणी। तस्सेव खए मोक्खो। पच्छाहारोवमाणाऊ॥ पुनातीति पुण्यं तस्योत्कर्षे लेशतोलेशतश्च वृद्धौ शुभता भ
वति सुखस्यापि क्रमशो वृद्धिर्भवति तावद्यावदुत्कृष्टं स्वर्गसुखमित्यर्थः तस्यैव पुण्यस्य तरतमयोगापकर्षतो हानिः सुखस्य दुःखं भवति। इदमु
क्तं भवति॥ यथा २ पुण्यमपचीयते तथा २ जीवानां क्रमेण दुःखमुत्पद्यते यावत्सर्वप्रकर्षप्राप्तं नारकदुःखं तस्यैव च पुण्यस्य सर्वथा क्षये मोक्ष इति॥
एतच्च सर्वं पथ्याहारोपमानाद्भावनीयं॥ तथाहि॥ यथा पथ्याहारस्य क्रमेण वृद्धावारोग्यवृद्धिस्तथा पुण्यवृद्धौ सुखवृद्धिर्यथा च पथ्याहारस्य क्र
मेण परिहारे सरोगता भवत्येवं पुण्यापचये दुःखोत्पत्तिः सर्वथा यथाहारपरिहारे च मरणवत्पुण्यक्षये मोक्ष इति। केवलपापाभ्युपगमे सुख
संभवः कथमित्याह। पावुक्करिसे ऽहमया। तरतमजोगावगरिसऊ सुभया। तस्सेव खए मोक्खो। अपत्थभत्तोवमाणाऊ॥ इहापथ्याहारोप

मानांह्रिपूरीत्येनभावनाकार्या तथाहि यथाक्रमेणापथ्यवृद्धौरोगवृद्धिस्तथापांशायत्यात्मानंमलिनयतीति पापंतस्यवृद्धौदुःखवृद्धिरूपाऽधमतामं
तथा क्रमेणदुःखंवर्द्धते यावदुत्कृष्टंनारकः दुःखंपथ्याहारपथ्यत्यागात्क्रमेणारोग्यवृद्धिस्तथाक्रमेणपापस्यापकर्षात्सुखस्यवृद्धिर्यावदुत्कृष्टंसु
खसौख्यं यथाचापथ्याहारस्यसर्वथापरित्यागात्परमारोग्यमुपजायते एवंसर्वपापक्षयेमोक्षइति ॥अथसाधारणंपुण्यपापाख्यमेकमेवसंकीर्ण
वस्त्विति।तृतीयविकल्पंभावयन्नाह।साहारणवण्णाइव।अहसाहारणमहेगमेत्ताए।उक्करिसावगरिसउ।तस्सेवयपुण्णपावक्खा॥अहसाहा
रणमिति॥अथसाधारणंसंकीर्णपुण्यपापलक्षणार्थरव्यवस्तुभाव्यतइत्यर्थः कथंभूतंपुनरिदमवगंतव्यमित्याह॥ साहारणवण्णादिवत्ति
यथासाधारणंतुल्यंहरितालगुलिकादीनामन्यतरमीलितंयर्णकद्वयंआविशाद्यथामेचकमणिनरसिंहादिवातभेदमपिपुण्यपापाख्यंस
कीर्णमेकंवस्त्वित्यर्थः ननुयद्येकंवस्त्विदंतर्हिपुण्यंपापंचेतिपरस्परविरोधिवस्तुविषयमाख्याद्वयंकथंलभतइत्याह॥ अहेगमेत्ताएइत्या
दि अथैतस्यैवैकस्यसंकीर्णपुण्यपापाख्यस्यवस्तुनएकयापुण्यमात्रयाएकेनपुण्यांशेनेत्यर्थः उत्कर्षतोवृद्धौसत्यांपुण्याख्याप्रवर्त्तते ए
कयानुपापमात्रयाएकेनपापांशेनेत्यर्थः उत्कर्षतोवृद्धौसत्यांपापाख्याप्रवर्त्तते अपकर्षेपिपुण्यांशस्यपापाख्याप्रवर्त्तते पापांशस्यत्व
पकर्षेपुण्याख्याप्रवर्त्ततइति।चतुर्थपंचमंचविकल्पमधिकृत्याह।एवंचियदोभिन्नाइं।होज्जसभावउच्चेव।भवसंभूईभण्णई।नस
भावउजउभिमउ।हाज्जसहावोवत्थुं॥निक्कारणयावत्थुधम्मोवा।जइवत्थुनत्थितउ।णुवलद्धीखपुप्फंव॥एवमेवकेषांचिन्मतेनद्वेअपिभि
भवा न्नेस्वतंत्रेस्यातांपुण्यपापेतत्कार्ययोःसुखदुःखयोर्युगपद्येनानुभावादतोनेनैवभिन्नकार्यदर्शनेनततत्कारणभूतयोःपुण्यपापयो
र्भिन्नताऽनुमीयतइति होज्जवेत्यादि अथवास्वभावतएवचिनापिपुण्यपापाभ्यांभवसंभूतिर्भवेवैचित्र्यस्यसंभवःकेश्चिदिष्यते तदेवंदर्शिताःपं
चापिपुण्यपापविषयाविकल्पाः॥एतेश्चात्रमितमनोभिःसंशयोनकर्त्तव्यः एकस्यैवचतुर्थविकल्पस्यादेहत्वाच्छेषाणांचानादेयत्वात्दतएवप्र
त्यासन्नित्यायमंगीकृत्यपंचमविकल्पंतावद्दूषयितुमाह॥भण्णईत्यादि॥भण्यतेअत्रोत्तरंनस्वभावतोभवसंभूतिर्यतःस्वभावोवस्तुरूपोवाभिमतो
भवेदितिद्वितीयगाथायांसंबंधःनिकारणतावावस्तुधर्मोवास्वभावोभिमतोभवेदितित्रयोविकल्पास्तत्रयदिवस्तुरूपोयमिति प्रथमोविकल्पस्तर्हित
कोसौस्वभावोनास्ति अनुपलंभात्खपुष्पवदिति।अर्थनुपलभ्यमानोप्यस्त्यसावित्याशंक्याह।अच्चंतमणुवलद्धोवि अहतउअत्थिनत्थिकिंकम्मं
हेउचनदलित्ते।जोनणुकम्मस्सविसएव कम्मस्सवाभिहाणं।होज्जसभावोत्तिहोउकोदोसो।पइनिययागाराउ।नयसोकत्ताघडस्सिव
मुत्तोअमुत्तोवातउ।जइमुत्तोतोभिहाणउभिन्नो॥कम्मत्तिसहावोत्तिय।जइवामुत्तोनकत्तातो।देहाणंवोमंपिव मुत्ताकज्जाइउयमुत्तिमया

अहसोनिक्कारणया॥तोखरसिंगादउहोतु।अहवत्थुणोसधम्मो।परियामोतोसकम्मजीवाणं।पुन्नेयराभिहाणो कारणकज्जाणुमेउसो॥किरिया
णकारणउ देहाइणंचकज्जभावाउ कम्मंमदभिहियंतिय।पडिवज्जत्तमग्गिभूइव।तंचियदेहाईणं।किरियाणंपियफलंभासंभत्ताउ।पडिवज्जपुण्णपावं
सभावउभिन्नजाईयं॥एताश्चगाथाःप्रायोऽग्निभूतिगणधरवादेव्याख्याताएवसमासश्च नवरंकारणकज्जाणुमेउसोत्ति सचजीवकर्मणोःपुण्यपा
पाभिधानःपरिणामःकारणेनकार्येणचानुमीयते कारणानुमानात्कार्यानुमानाच्चगम्यतइत्याह।एतदेवानुमानद्वयमाह॥किरियाणंकारणउ
इत्यादिदानादिक्रियाणांहिंसादिक्रियाणांचकारणत्वात्कारणरूपत्वादस्तितत्फलभूतस्तत्कार्यरूपपुण्यपापात्मकोजीवकर्मपरिणामःयथाकृष्यादिक्रियाणां
शालियवगोधूमादिकं।उक्तंच॥समात्ततुल्यंविषमासुतुल्यंसतीषुसत्वाप्यसतीषुसत्वफलंक्रियास्वित्यथयन्निमित्तंतद्देहिनांसोस्तिगुणोपिधर्मः एत
त्कारणानुमानं देहाईणमित्यादि देहादीनांकारणमस्ति कार्यरूपत्वात्तेषांयथाघटस्यमृद्दंडचक्रचीवरादिसामग्रीकलितकुलालः नचवक्तव्यं दृष्टएव
मातापित्रादिकस्तेषांहेतुःदृष्टहेतुसाम्येपिसुरूपेतरादिभावेनदेहादीनांवैचित्र्यदर्शनात्तस्यचादृष्टकर्माख्यहेतुमंतरेणाभावादतएवपुण्यपापभे
देनकर्मणोद्वैविध्यंशुभदेहादीनांपुण्यकार्यत्वादितरेषांतुपापफलत्वादुक्तंच दृष्टदृष्टहेतुसंभविकार्यविशेषात्कुलालवत्हेत्वंतरमनुमेयं
तत्कर्मशुभाशुभंकर्तुः॥एतत्कार्यानुमानं॥तथामदभिहितमितिचकृत्वाऽग्निभूतिवत्त्वमपिकर्मप्रतिपद्यस्वसर्वज्ञवचनप्रामाण्यादित्यर्थः तदपिपुण्य
पापविभागेनविभक्तंप्रतिपद्यस्वदेहादीनांतत्कार्याणांक्रियाणांचतत्कारणभूतानांशुभाशुभत्वेनद्वैविध्यदर्शनादिति।पुनरपिपुण्यपापयोःसाधनाय
प्रमाणमाह।सुहदुक्खाणंकारणं।मणुरूवंकज्जभावउवस्स।परमाणवोघडस्सव।कारणमिहपुण्णपावाइं॥अस्त्यवश्यंसुखदुःखयोरनुरूपंका
रणं कार्यत्वात्तयोर्यच्चेहकार्यंतस्यानुरूपंकारणंभवत्येव यथाघटस्यपरमाणवस्तच्चतयोरिहानुरूपंकारणंसुखस्यपुण्यंदुःखस्यपापमिति।
परकःप्राह॥सुहदुक्खकारणंजइ।कम्मंकज्जस्सतदणुरूवंच।पत्तमरूवंतंपिहु।अहरूविंनाणुरूवंतो॥ननुयदिसुखदुःखयोःपुण्यपापात्मकंक
र्मकारणंतच्चयदिकार्यस्यसुखदुःखरूपस्यानुरूपंसदृशमिष्यते तर्हिसुखदुःखयोरात्मपरिणामत्वेनारूपत्वात्तदपिपुण्यपापात्मकंकर्मतदनु
रूपतयाऽनुरूपमाप्नोति अथरूपवत्तर्हिनारूपंतन्मूर्त्तत्वेनविलक्षणत्वादिति।अत्रोत्तरमाह॥नहिसव्वहाणुरूवं।भिन्नंवाकारणंअहमयंते।किं
कज्जकारणत्तणं।महवावत्थुत्तणंसत्तस्स॥नहिसर्वथाकार्याऽनुरूपंकारणमिष्यते येनसुखदुःखवत्कर्मणोप्यरूपत्वंप्रेर्येतनाप्येकांतेनसर्वधर्मैःकार
णंकार्याद्भिन्नमेष्टव्यं अहमयंतित्ति अथतेनैवैतन्मतं एकांतेनसर्वैरपिधर्मैःकारणंकार्यानुरूपमेवभिन्नंवाअननुरूपमेवेति तर्हिसर्वथानुरूपत्वेएक
स्यकारणत्वेअपरस्यापिकारणत्वादेकस्यचकार्यत्वेऽन्यस्यापिकार्यत्वात्किंतयोःकार्यकारणत्वंनकिंचिद्द्वयोरपिकारणत्वात्कार्यत्वादिति अथएकांतभेदः

भ्युपगम्यमानेकार्यस्यवस्तुत्वेकिंनामतस्यकारणस्यवस्तुत्वंनकिंचिद्द्वयोरपिवस्तुत्वेसर्वथाभेदहानिप्रसंगादिति तस्मान्नैकांतेनानुरूपतानतुरूप
ताथाकार्यकारणयोः।किंतर्हि।सव्वंतुल्लातुल्लं।जइतोकज्जाणुरूवयावेयं।जंसामन्नसपज्जाऊ।कज्जंपरपज्जऊसेसो॥नकेवलंकार्यकारणेएवतुल्या
तुल्यरूपे किंतुसकलमपित्रिभुवनांतर्गतंवस्तुपरस्परंतुल्यातुल्यरूपमेव नपुनःकिंचित्कस्यापिएकांतेनतुल्यमतुल्यंवा॥लब्धावकाशःपरःप्रा
ह॥जइइत्यादि यद्येवंततःकुर्यकार्यानुरूपताकारणस्यविशेषतोऽभिधीयते येनोच्यते सुहदुक्खाणंकारणमणुरूवमित्यादि यदिकिंचिदेकांतेनानुरूपंस्या
त्तदेवंकल्पेत यदात्वेकांतेनानकिंचिदनुरूपंनाप्यननुरूपंकिंतुसर्वंसर्वेणातुल्यातुल्यरूपमेव तदाकिमनेनविशेषणेन।अत्रोच्यते॥जंमि
त्यादि सोऽप्यतुल्यातुल्यत्वेसर्वगतेऽपियद्यस्मात्कारणस्यकार्येस्वपर्यायस्तस्मात्कारणंकार्यस्येहानुरूपमुच्यते शेषस्तुकार्यरूपःसर्वोऽपिपदार्थःकारण
स्यपरपर्यायइतितंप्रतिविवक्षितंकारणमसमानरूपमभिधीयते॥आह॥ननुकथंप्रस्तुतेसुखदुःखेकारणस्यस्वपर्यायःउच्यते जीवपुण्यसंयोगःसुख
स्यकारणंतस्यचसुखंपर्यायएवदुःखस्यापिजीवपापसंयोगःकारणमतस्तस्यापिदुःखंपर्यायएवयथाचसुखंशुभंकल्याणंशिवमित्यादीन्व्यपदेशा
ल्लभते तथातत्कारणभूतंपुण्यस्कंधद्रव्यमपियथाचदुःखंअशुभमकल्याणमशिवमित्यादिसंज्ञाभाक्नोति तथातत्कारणभूतंपापद्रव्यमपीतिविशेष
तोऽत्रपुण्यपापसुखदुःखयोरनुरूपकारणत्वेनोक्तेइति॥अथपरःप्रेर्यंचि।कीर्षुस्तदवकाशहेतोःपृच्छति।किंजहमुत्तममुत्तस्स।कारणंतहसुहाइणं
कम्मं।दिट्ठंसुहाइकारणं।मन्नाइजहेहतहकम्मं॥किंयथामूर्त्तंनीलादिकममूर्त्तस्यस्वप्रतिभासिज्ञानस्यकारणंहेतुस्तथासुखदुःखयोःपुण्यपापात्मकं
कर्मापिमूर्त्तमेवसत्कारणंयथाप्रत्यक्षएवदृष्टमन्नादिकं आदिशब्दात्स्रक्चंदनांगनाहिविषकंटकादिकमिहसुखदुःखयोःमूर्त्तंसत्कारणंतद्वत्कर्मापि
तयोरितिभावार्थः॥ततःकिंमितिचेदुच्यते।होउतयंचियकिंकम्म।णानजंतुल्लसाहणाणंपि।फलभेउसोवस्सं।सकारणोकारणंकम्मं॥ननुतदेवदृष्ट
मन्नादिकंयस्तुतर्हिसुखादेःकारणमस्तु किमदृष्टेनतेनकर्मणापरिकल्पितेन अतिप्रसंगात्तदेतन्नयद्यस्मात्तुल्यान्यन्नादीनिसाधनानियेषांतेतु
ल्यसाधनाःपुरुषास्तेषामपिफलेसुखदुःखलक्षणेकार्यभेदःफलभेदोमहान्दृश्यते तुल्येऽप्यन्नादिकेभुंजानस्याप्याह्लादोऽन्यस्यतुरोगोत्पत्ति
रित्यतइत्यर्थः यश्चायंतुल्यान्नादिसाधनानामपिफलभेदःसोऽवश्यमेवसकारणोनिःकारणत्वेनित्यंसत्त्वासत्त्वप्रसंगाद्यश्चतत्कारणंतददृष्टंकर्मइतिन
तत्कल्पनानर्थक्यमिति॥मूर्त्तंचतत्कर्मकुतइत्याह।एत्तोच्चियतंमुत्तं।मुत्तबलाहाणओजहाभिओ।देहाइकज्जमुत्ता।इओवभणिएपुणोभण्णइ॥यतएवतु
ल्यसाधनानांकर्मनिबंधनःफलभेदोऽतएवोच्यते मूर्त्तंकर्ममूर्त्तस्यदेहादेर्बलाधानकारित्वात्कुंभवद्यथानिमित्तमात्रभावित्वेनघटोदेहादीनांबल २५४
माधत्ते एवंकर्माप्यतोमूर्त्तमित्यर्थः अथवामूर्त्तंकर्ममूर्त्तेनस्रक्चंदनांगनादिनातस्योपचयलक्षणस्यबलस्याधीयमानत्वात्कुंभवद्यथामूर्त्ततै न

लादिनाबलस्याधीयमानत्वात्कुंभोमूर्त्तः एवंस्रक्चंदनादिनाउपचीयमानत्वात्कर्मापिमूर्त्तमितिभावः यदिवामूर्त्तंकर्मदेहादेस्तत्कार्यस्य मूर्त्तत्वात्प
रमाणुवद्यथाघटादेस्तत्कार्यस्यमूर्त्तस्यदर्शनात्परमाणवोमूर्त्ताः एवंदेहादेस्तत्कार्यस्यमूर्त्तस्यदर्शनात्कर्मापिमूर्त्तमित्यर्थः।एवंभणितेपुनर्भणतिपरःकि
मित्याह।तोकिंदेहाईणं।मुत्तत्तणओतयंहवइमुत्तं।अहसुहदुक्खाईणं।कारणभावादरूवंति॥ततःकिंदेहादीनांकर्मकार्याणांमूर्त्तानांदर्शनात्त
त्कर्ममूर्त्तंभवत्वाहोस्वित्सुखदुःखक्रोधमानादीनांजीवपरिणामभूतानांतत्कार्याणाममूर्त्तानांदर्शनात्तत्कारणभावेनामूर्त्तमस्तुकर्मेत्येवंमूर्त्त
त्वामूर्त्तत्वाभ्यामुभयथापितत्कार्यदर्शनात्किंमूर्त्तममूर्त्तंवाकर्मभवत्वितिनिर्दिश्यतामिति।एवंप्रेरकेणोक्तेसत्याह॥नसुहाईणंहेऊ।कम्मंचियकिं
तुताणजीवोवि।होइसमवाइकारणं।मियरंकम्मंतिकोदोसो।सुखादीनांकर्मैवकेवलंकारणंनभवति किंतुजीवोऽपितेषांसमवायिकारणंभवति
कर्मपुनरितरदसमवायिकारणंभवतीतिकोदोषः।इदमुक्तंभवति॥सुखादेरमूर्त्तत्वेनसमवायिकारणस्यजीवस्यामूर्त्तत्वमस्त्येव असमवायिकार
णस्यतुकर्मणःसुखाद्यमूर्त्तत्वेनामूर्त्तत्वंनभवतीत्यपीतिनदोषइति॥तदेवमुक्तंअर्थमुपसंहरन्केवलपुण्यलक्षणंप्रथमविकल्पंदूषयितुमाह।इ
यरूविन्नेसुहदुक्ख।कारणत्तेयकम्मुणोसिद्धे।पुण्णावगरिसमेत्तेणं।दुक्खबहुलत्तणमजुत्तं॥इत्येवंपंचमविकल्पोपन्यस्तस्वभाववादनिरासेनपु
ण्यपापात्मकस्यकर्मणःसुखदुःखकारणत्वेरूपित्वेचसिद्धेपुण्यापकर्षमात्रेणयद्दुःखबहुलत्वंप्रथमविकल्पोपन्यासेप्रोक्तंतदयुक्तमिति।कु
तोऽयुक्तमितिआह।कम्मपगरिसजणियं।तदवस्संपगरिसाणुभूईओ।सोक्खप्पगरिसभूई।जहपुण्णप्पगरिसप्पभवा॥तद्दुःखबहुलत्वंपुण्यापकर्ष
जनितंनभवति किंतुस्वानुरूपकर्मप्रकर्षजनितंप्रकर्षानुभूमित्वाद्वेदनाप्रकर्षानुभवरूपत्वादितिहेतुः यथासौख्यप्रकर्षानुभूतिःस्वानुरूपकर्मप्रक
र्षप्रभवाइतिदृष्टांतः।उपपत्त्यंतरमाह।तहबज्झसाहणप्पगरिसं।गभावादिह प्पायाननतयं।विवरीयवज्झसाहण।बलप्पगरिसंअवेक्खेज्जा॥
तथेत्युपपत्त्यंतरार्थः इहदेहिनांदुःखबहुलत्वंकेवलपुण्यापकर्षमात्रजनितंनभवति कुतइत्यत्रहेतुमाह बाह्यानियान्यनिष्टाहारादीनिसाधना
नितेषांयस्तदनुरूपःप्रकर्षस्तस्यांगभावात्कारणभावादिति॥विपर्ययेबाधकमाह॥इहेत्यादि तद्दुःखमन्यथा यदिपुण्यापकर्षमात्रजन्यंमन्येत
दापुण्यस्यपापेष्टाहारापचयमात्रादेवभवेन्नतुपापोदयसंपाद्यानिष्टाहारादिरूपविपरीतबाह्यसाधनानायदलंसामर्थ्यंतस्यद्वानुरूपोयःप्रकर्ष
स्तमपेक्षेत।इदमत्रहृदयं॥यदिपुण्यापकर्षमात्रजन्यंदुःखंभवेत्तदापुण्योदयप्राप्येष्टाहारादिसाधनापकर्षमात्रादेवभवेन्नचैतदस्ति दृष्टविपरीता
निष्टाहारादिसाधनसामर्थ्यादेवतद्भावादिति॥अपिच।देहोनापचयकउ।पुण्णुक्करिसेवमुत्तिमत्ताओ।होज्जवसहीणतरओ।कहमसुभयरोम
हल्लोय॥दुःखितहस्त्यादिदेहःकेवलपुण्यापचयमात्रकृतोनभवति मूर्त्तिमत्त्वाद्यथापुण्योत्कर्षतज्जन्योऽनुत्तरसुरचक्रवर्त्त्यादिदेहः यश्चपुण्या

पचयमात्रजन्यः सम्मूर्त्तिमानपिनभवति यथानकोपियदिचपुण्यापचयमात्रेणदेहोजन्येततदाहीनतरशुभ एवचस्यात्कथं महानशुभतरश्चभवेन्म
हतोमहापुण्यापचयजन्यत्वादशुभस्यचाशुभकर्मनिर्वर्त्यत्वात्पुण्येनपुनरणीयसापिशुभदेहोजन्यते नतुदुःखितः अणीयसापिहिसुवर्णात्वचेन
अणीयानपिसोवर्णएवघटोभवति नतुमार्त्तिकस्ताम्रादिर्वेति। अथकेवलपापपक्षंसंकीर्णपुण्यपापपक्षंचदूषयितुमाह। एवंविवयविवरीयं। जोए
ज्जासव्वपावपक्खेवि। नयसाहारणरूवं। कम्मंतक्कारणाभावा॥ सर्वपापमेवास्ति ननुपुण्यंपापापचयमात्रजन्यत्वात्सुखस्येत्येतस्मिन्नपिपक्षेएवमे
वकेवलपुण्यवादोक्तदूषणाद्विपरीतगत्यासर्वंयोजयेत्तद्यथा॥ पापापकर्षमात्रजनितंसुखंनभवति पापस्याल्पीयसोपिदुःखजनकत्वाद्यत्पथ्याल्पीया
नपिविषलवःस्वास्थ्यहेतुर्भवतितस्मात्पुण्यजनितमेवात्मनःपिसुखं मिसादिस्वबुद्ध्याभ्यूह्यवाच्यमितिपृथक्सुखदुःखयोःकारणभूतेस्वतंत्रेपु
ण्यपापेएष्टव्ये अतएवसाधारणेपिसंकीर्णपुण्यपापेनेष्टव्ये। कुतइत्याह॥ नयेत्यादिनचसाधारणरूपंसंकीर्णस्वभावंपुण्यपापात्मकमेकं कर्मा
स्तितस्यैवं भूतस्यकर्मणःकारणाभावादत्रप्रयोगः नास्तिसंकीर्णोभयरूपंकर्मअसंभाव्यमानैवंविधकारणत्वाद्वंध्यापुत्रवदिति। हेतोरसिद्ध
तांपरिहरन्नाह। कम्मंजोगनिमित्तं॥ सुभोऽसुभोवेगसमयम्मि॥ होज्जनउभयरूवो। कम्मंपितउतयणुरूवं॥ मिथ्यात्वाविरतिप्रमादकषाययोगाबंध
हेतवइतिपर्यंतेयोगाभिधानात्सर्वत्रकर्मबंधहेतुत्वस्ययोगाविनाभावात् योगानामेववंधहेतुत्वमितिकर्मयोगनिमित्तमुच्यते सचमनोवाक्काया
त्मकोयोगएकस्मिन्समयेशुभोऽशुभोवाभवेन्नतूभयरूपोतःकारणानुरूपत्वात्कार्यस्यकर्मापितदनुरूपंशुभंपुण्यरूपंवध्यते अशुभंपापरू
पंवाबध्यते नतुसंकीर्णस्वभावमुभयरूपमेवंदेवबध्यतइति॥ प्रेरकःप्राह॥ ननुमणवइकाउगा। सुभाऽसुभसमयंमिदीसंति। दव्वंमिमीसाभावो।
भवेज्जनउभावकरणंमि॥ ननुमनोवाक्काययोगाःशुभाऽशुभाश्चमिश्रा इत्यर्थः एकस्मिन्समयेदृश्यंतेतत्कथमुच्यते शुभोऽशुभोवाएगसमयम्मिति
॥ तथाहि॥ किंचिदविधिनादानादिवितरणंचिंतयतःशुभोऽशुभोमनोयोगस्तथाकिमप्यविधिनैवदानादिधर्ममुपदिशतःशुभाशुभोवाग्योगस्त
थाकिमप्यविधिनैवजिनपूजावंदनादिकायचेष्टांकुर्वतःशुभाशुभकाययोगइति तदेतदयुक्तं॥ कुतइत्याह॥ दव्वंमीत्यादि। इदमुक्तंभवति॥ इह
द्विविधोयोगो द्रव्यतोभावतश्च तत्रमनोवाक्काययोगप्रवर्तकानिद्रव्याणि मनोवाक्कायपरिस्पंदात्मकोयोगश्चद्रव्ययोगः यस्तुतदुभयरूपयोगहे
तुरध्यवसायःसभावयोगस्तत्रशुभाऽशुभरूपाणांयथोक्तचिंतादेशनाकायचेष्टानांप्रवर्तकेद्विविधेपिद्रव्ययोगेव्यवहारनयविवक्षादर्शनमात्रेण
भवेदपि शुभाशुभत्वलक्षणोमिश्रभावः ननुमनोवाक्काययोगनिबंधनाध्यवसायरूपेभावकरणेभावात्मकेयोगेऽयमभिप्रायः द्रव्ययोगोव्यव २९९
हारनयदर्शनेनशुभाशुभरूपोपीष्यते निश्चयनयेनतुसोपिशुभोऽशुभोवाकेवलःसमस्ति यथोक्तचिंतादेशनादिप्रवर्तकद्रव्ययोगानामपि

शुभाशुभमिश्ररूपाणांतन्मतेनाभावान्मनोवाक्कायद्रव्ययोगनिबंधनाध्यवसायरूपेभावकरणेभावयोगेशुभाशुभरूपोमिश्रभावोनास्ति निश्चयनय
दर्शनस्यैवागमेऽभिविवक्षितत्वान्नहिशुभान्यशुभानिवाऽध्यवसायस्थानानिमुक्त्वाशुभाऽध्यवसायस्थानरूपस्तृतीयोराशिरागमेक्वचिदपीष्यते येनाध्य
वसायरूपेभावयोगेशुभाशुभत्वंस्यादितिभावस्तस्माद्भावयोगएकस्मिन्समयेशुभोऽशुभोवाभवति नतुमिश्रस्ततःकर्मापितत्प्रत्ययंपृथक्पुण्यरू
पंपापरूपंवाबध्यते नतुमिश्ररूपमितिस्थितं॥ एतदेवसमर्थयन्नाह॥ झाणंसुभमसुभंवा। नउमीसंजंचझाणविरमेवि। लेसासुभाऽसुभा वा। सुभम
सुभंवातउकम्मं॥ ध्यानंयस्मादागमेएकदाधर्मशुक्लध्यानात्मकंशुभमार्त्तरौद्रात्मकमशुभंवानिर्दिष्टंनतुशुभाशुभरूपंयस्माच्चध्यानोपरमेपिलेश्या
तेजसीप्रभृतिकाशुभाकापोतीप्रमुखावाशुभाएकदाप्रोक्तानतुशुभाशुभरूपाध्यानलेश्यात्मकश्चभावयोगस्ततस्तस्यैकदाशुभाअशुभावाभ
वंति नतुमिश्रास्ततोभावयोगनिमित्तंकर्माप्येकदापुण्यात्मकंशुभंवध्यते पापात्मकमशुभंवावध्यते नतुमिश्रमपि॥ अपिच। पुव्वगहियंवकम्मंप
रिणामवसेणमीसयंनेज्जा। इयरेयरभावंवा। सम्मामिच्छाइनउगहणे॥ वाइत्यथवाएतदप्यपिसंभाव्यते यत्पूर्वंगृहीतंपूर्वंबद्धंमिथ्यात्वलक्ष
णंकर्मपरिणामवशात्पुंजत्रयंकुर्वन्मिश्रतांसम्यग्मिथ्यात्वपुंजरूपतांनयेत्प्रापयेदिति इतरेतरभावंवानयेत्सम्यक्त्वंमिथ्यात्वंचेति॥ इदमुक्तंभ
वति॥ पूर्वबद्धान्मिथ्यात्वपुद्गलान्विशुद्धपरिणामःसन्नर्धंशोधयित्वासम्यक्त्वरूपतांनयेदविशुद्धपरिणामस्तुसम्यक्त्वपुद्गला
न्मिथ्यात्वपुंजेसंक्रमय्यमिथ्यात्वरूपतांनयतीत्युक्तं। ततःसंक्रमविधिमेवसंक्षेपतोदर्शयति॥ मोत्तूणआउयंखलु दंसणमोहंचरित्तमोहंच। से
साणंपगईणं। उत्तरविहिसंकमोभज्जो॥ इहज्ञानावरणादिमूलप्रकृतीनामन्योन्यंसंक्रमःकदापिनभवत्येवउत्तरप्रकृतीनांतुनिजनिजमूलप्रकृत्यभि
न्नानांपरस्परसंक्रमोभवति॥ तत्रचायंविधिः॥ मोत्तूणआउयमित्यादि आउयंति जातिप्रधानोनिर्देशइतिबहुवचनमत्रद्रष्टव्यं चत्वार्यायूंषिमुक्त्वे
ति एकस्याआयुर्लक्षणायानिजमूलप्रकृतेरभिन्नानामपिचतुर्णामायुषामन्योन्यंसंक्रमोनभवतीतितद्वर्जनंतथादर्शनमोहंचारित्रमोहंचमुक्त्वा
एकस्यामोहनीयलक्षणायाःस्वभिन्नप्रकृतेरभिन्नयोरपिदर्शनमोहचारित्रमोहयोरन्योन्यंसंक्रमोनभवतीत्यर्थः किं उक्तशेषाणांतप्रकृतीनांकथं
भूतानामित्याह उत्तरविहत्तिविधयोभेदाः उत्तरेचतेविधयश्चोत्तरविधयउत्तरभेदास्तद्रूपानामुत्तरप्रकृतिरूपाणामितितासांकिमित्याह संक्रमो
भोज्योभजनीयः भजनाचैवंद्रष्टव्यायाः किलज्ञानावरणपंचकदर्शनावरणनवककषायषोडशकमिथ्यात्वभयजुगुप्सातैजसकार्मणवर्णादि
चतुष्कागुरुलघूपघातनिर्माणांतरायपंचकलक्षणाःसप्तचत्वारिंशद्ध्रुवबंधिन्युत्तरप्रकृतयस्तासांनिजैकमूलप्रकृत्यभिन्नानामन्योन्यं
संक्रमःसदैवभवति यथाज्ञानावरणपंचकांतर्वर्तिनिमतिज्ञानावरणेश्रुतज्ञानावरणादीनितेष्वपिमतिज्ञानावरणंसंक्रामतीत्यादि यास्तुशेषाः अध्रु

बबंधिन्यस्तासां निजे कमूलप्रकृत्यभेदवर्त्तिनीनामपि बध्यमानायामबध्यमानासंक्रामति न त्वबध्यमानायां बध्यमाना यथा साते बध्यमानेऽसातम
बध्यमानं संक्रामति न तु बध्यमानम बबध्यमाने इत्यादि वाच्य॥ मिथ्यप्रकृतिसंक्रमविधिः॥ शेषस्तु प्रदेशादिसंक्रमविधिः मूलप्रकृत्यभिन्नासु वेद्यमा
नासु संक्रमो भवतीत्यादिना स्थानांतरादवसेय इत्यलं प्रसंगेनेति तदेवं पुण्यपापे पृथक्व्यवस्थाप्येदानीं तयोरेव पृथग्लक्षणमाह॥ सोहणवण्णा
इगुणं। सुभाणुभावं च जं तयं पुण्णं। विवरीयमउ पावं। न बायरं नाइ सुहुमं च॥ शोभना: शुभा वर्णादयो गंधरसस्पर्शलक्षणा गुणा यस्य तच्छोभनव
र्णादिगुणं तथा यच्छुभानुभावं शुभविपाकमित्यर्थः तत्पुण्यमभिधीयते यत्पुनरतः पुण्याद्विपरीतलक्षणं अशुभवर्णादिगुणमशुभविपाकं चेत्यर्थः तत्पाप
मुच्यते एतच्चोभयमपि कथंभूतमित्याह नमेर्वादिभावेन परिणतस्कंधवदतिबादरं सूक्ष्मेण कर्मवर्गणाद्रव्येण निःष्पन्नत्वान्नापि परमाण्वादिवद
तिसूक्ष्मं च तदिति॥ आह॥ ननु तत्पुण्यपापरूपं कर्मद्वयं गृन्हानो जीवः कीदृशं गृन्हाति॥ कथं च गृन्हातीत्याह॥ गिण्हइ तज्जोग्गं चिय रेणुं पुरिसो ज
हा कयब्भंगो। एगखेत्तोगाढं जीवो सव्वप्पएसेहिं॥ तस्य पुण्यपापात्मकस्य कर्मणो योग्यमेव कर्मवर्गणागतं द्रव्यं जीवो गृन्हाति न तु परमाण्वादिकमौ
दारिकादिवर्गणागतं वाऽयोग्यमित्यर्थः तदप्येकक्षेत्रावगाढमेव गृन्हाति न तु स्वावगाढप्रदेशेभ्यो भिन्नप्रदेशावगाढमित्यर्थः तच्च यथा तैलादि
ताभ्यंगः पुरुषो रेणुं गृन्हाति तथा रागद्वेषक्लिन्नस्वरूपो जीवोपि गृन्हाति न तु निर्हेतुकमिति भावः इदं च सर्वैरपि स्वप्रदेशैर्जीवो गृन्हाति न तु कैश्चिदि
र्थः॥ उक्तं च॥ एगपएसोगाढं सव्वपएसेहिं कम्मुणो जोग्गं। बंधइ जहुत्तहेउं साइयमणाइयं वावि॥ उपशमश्रेण्याः प्रतिपतितो मोहनीयादिकं कर्म सादि बध्ना
ति। शेषस्त्वनवाप्तोपशमश्रेणि जीवोऽनादि बध्नातीत्यर्थः॥ इति अथ प्रेरकः प्राह॥ अविसिट्ठपोग्गलघणे लोए थूलतणुकम्मपविभागो। जुज्जेज्ज गहण
काले सुभासुभविवेयणं कत्तो। नन्वविशिष्टैः प्रत्याकाशप्रदेशमनंतानंतैः शुभाशुभादिभेदैर्नाव्यवस्थितैः पुद्गलैर्घनो निरंतरं व्याप्तोऽयं लोकस्तत्र ग्र
हणकाले गृन्हतो जीवस्य स्थूलसूक्ष्मकर्मप्रविभागो युज्येत ततो न बायरं नाइ सुहुमं चेति विशेषणमुपपन्नं एतद्विशेषणविशिष्टादन्यस्य स्वभा
वत एव जीवेऽग्रहणं सोहणवण्णाइगुणमित्यादि विशेषणं न युज्यत इति प्रेरकाकूतमिति॥ आचार्यः प्राह॥ अविसिट्ठं चिय तं सो। परिणामासयस
भावओ खिप्पं कुरुते सुभमसुभं वा। गहणे जीवो जहाहारं। स जीवस्तत्कर्म ग्रहणे ग्रहणकाले शुभाशुभादिविशेषणाविशिष्टमपि गृन्हन् क्षिप्रं तत्क्षण
मेव शुभमशुभं वा कुरुते शुभाशुभविभागेन स्थापयतीत्यर्थः कुत इत्याह परिणामासयसभावउत्ति इहाश्रयो द्विविधः कर्मणो जीवश्चाश्रयः कर्म तु
शुभाशुभत्वस्य तस्य द्विविधस्याप्याश्रयस्य स्वभावः आश्रयस्वभावः परिणामश्चाश्रयस्वभावश्च परिणामाश्रयस्वभावौ ताभ्यामेतत् कुरुते। इदमु २९६
क्तं भवति॥ जीवस्य शुभोऽशुभो वा परिणामोऽध्यवसायस्तद्वशाद्ग्रहणसमय एव कर्मणः शुभत्वमशुभत्वं वा जनयति तथा जीवस्यापि कर्माश्रयभू

तस्य स कोपि स्वभावोस्ति येन शुभाशुभत्वेन परिणामयन्नेव कर्म गृन्हाति तथा कर्मणोपि शुभाशुभभावाद्याश्रयस्य सस्वभावः स कश्चिद्योग्यताविशे
षोस्ति येन शुभाशुभपरिणामान्वितजीवेन गृह्यमाणमेवैतद्रूपतया परिणमति उपलक्षणं चैतत्प्रकृतिस्थित्यनुभागवैचित्र्यं प्रदेशनामल्पबहुभा
गवैचित्र्यं च जीवः कर्मणो ग्रहणसमय एव सर्वं करोतीत्युक्तं च॥ गहणसमयंमि जीवो। उप्पाएइ य गुणे सपच्चयओ। सव्वजिणाण भागो अहिगो उकार
णं किंतु। सहदुःखककारणत्ता ठिईविसेसेण सेसाउत्ति॥ एतत्सर्वं कर्मणो ग्रहणसमये आहारदृष्टांतेन जीवः करोतीति। आहारदृष्टांतमेव भाव
यति। परिणामासयवसऊ। धेणूए जह पऊ विसमहिस्स। तुल्लो वि तदाहारो। तह पुण्णापुण्णपरिणामो॥ तदाहारोत्ति तयोरहिधेन्वोराहारस्तदाहारः
स तुल्योपि दुग्धादिको गृहीतः परिणामाश्रयवशाद्यथा धेन्वा: पयो दुग्धं भवति अहेस्तु स एव विषं विषरूपतया परिणमति तथा तेनैव प्रकारेण
पुण्यापुण्यपरिणामः इदमुक्तं भवति॥ अस्ति स कश्चित्तस्याहारस्य परिणामो येन तुल्योपि स आश्रयवैचित्र्याद्विचित्रतया परिणमति आश्रयस्याप्य
हिधेनुलक्षणस्यास्ति तत्तन्निजसामर्थ्यं येन तुल्योपि गृहीत आहारस्तत्तद्रूपतया परिणमति तथा पुण्यपापयोरुपनययोजना कृतैवेति॥ अथवा
अयमेवाहारदृष्टांतोऽन्यथा भाव्यते। तद्यथा॥ जह वेगसरीरंमि वि सारासारपरिणामयामेवि। अविसिट्ठो आहारो। तह कम्मसुहासुहविभागो
धेनुविषधरयोर्भिन्ने शरीरे आहारस्य परिणामवैचित्र्यं दर्शितं यदिसं यथा वा यथा एकस्मिन्नपि पुरुषादिशरीरे ऽविशिष्टः शोभनोपि आहा
रो गृहीतस्तत्क्षण एव सारासारपरिणामतामेति रसासृग्मांसादिसाररसपरिणामं मूत्रपुरीषरूपं खलपरिणामं च युगपद्गच्छतीत्यर्थः तथा क
र्मणोप्यविशिष्टस्य गृहीतस्य परिणामवशात् शुभाशुभविभागो द्रष्टव्य इति॥ तदेवं पुण्यपापयोर्लक्षणादिभिर्भेदं प्रसाध्य तद्भेदभूतप्रकृतिभेदेनापि
तयोर्भेदमुपदर्शयन्नाह। सायं सम्मं हासं। पुरिसरइसुहाउ नामगोत्ताइं। पुन्नं सेसं पावं। नेयं सविवागमविवागं॥ सातवेदनीयं शोधितमिथ्यात्वपुद्गलरूपं
सम्यक्त्वहास्यं पुरुषवेदो रतिः शुभायुर्नामगोत्राणि चेत्येतत्सर्वं पुण्यमभिधीयते तत्र नारकायुर्वर्जं शेषमायुस्त्रयं शुभं देवद्धिकयशःकीर्तितीर्थकरना
माद्याः सप्तत्रिंशत्प्रकृतयो नामकर्मणि शुभाः गोत्रे तु नरूच्चैर्गोत्रं शुभं एताः षट्चत्वारिंशत्प्रकृतयः किल शुभत्वात्पुण्यं अन्ये तु मोहनीयभेदास्सर्वानपि जीव
स्य विपर्यासहेतुत्वात्पापमेवमन्यंते ततः सम्यक्त्वहास्यपुरुषवेदरतिवर्जा द्विचत्वारिंशदेव प्रकृतयः पुण्यं॥ तद्यथा॥ सायं उच्चागोयं॥ नरतिरिदेवाउयाइ त
ह नामि। देवदुगं मणुयदुगं। पणिदिजाई य तणुपणगं। अंगोवंगाण तिगं। पढमं संघयणमेव संठाणं। सुभवण्णाइचउक्कं। अगुरुलहु तह य परघायं। उसासं
आयावं उज्जोयं विहागगई य विय पसत्था। तसबायरपज्जत्तं पत्तेय थिरं सुभं सुभगं। सुस्सर आएज्ज जसं। निम्मेण तित्थयरमेव एयाउ। बायालं पगई
उ॥ पुण्णत्ति जिणेहिं भणियाउ॥ भणिता शेषास्तु द्व्यशीतिप्रकृतयस्तत्सर्वमशुभत्वात्पापं विज्ञेयं। सम्यक्त्वं कथमशुभं कथं तत्पापमिति चेदुच्यते॥

यबंधिन्यस्तासां निजैकमूलप्रकृत्यभेदवर्त्तिनीनामपि बध्यमानायामबध्यमानासंक्रामति न त्वबध्यमानायां बध्यमाना यथा साते बध्यमानेऽसातम
बध्यमानं संक्रामति न तु बध्यमानमबध्यमाने इत्यादि वाच्य॥ मिथ्येषप्रकृतिसंक्रमविधिः॥ शेषस्तु प्रदेशादिसंक्रमविधिः मूलप्रकृत्यभिन्नासु वेद्यमा
नासु संक्रमो भवतीत्यादिनास्थानांतरादवसेय इत्यलं प्रसंगेनेति तदेवं पुण्यपापे पृथक्व्यवस्थाप्येदानीं तयोरेव पृथग्लक्षणमाह॥ सोहणवण्ण
इगुणं सुभाणुभावं च जं तयं पुण्णं। विवरीयमऊ पावं। न बायरं नाइसुहमं च॥ शोभनाः शुभावर्णादयो गंधरसस्पर्शलक्षणा गुणा यस्य तच्छोभनव
र्णादिगुणं तथा यच्छुभानुभावं शुभविपाकमित्यर्थः तत्पुण्यमभिधीयते यत्पुनरतः पुण्याद्विपरीतलक्षणं अशुभवर्णादिगुणमशुभविपाकं चेत्यर्थः तत्पाप
मुच्यते एतच्चोभयमपि कथंभूतमित्याह नमेर्वादिभावेन परिणतस्कंधवदतिबादरं सूक्ष्मेण कर्मवर्गणाद्रव्येण निःष्पन्नत्वान्नापि परमाण्वादिवद
तिसूक्ष्मं चैतदिति॥ आह॥ ननु तत्पुण्यपापरूपं कर्म कथं गृह्णाति जीवः कीदृशं गृह्णाति॥ कथं च गृह्णातीत्याह॥ गिण्हइ तज्जोग्गं चिय रेणुं पुरिसो ज
हा कयब्भंगो। एगखेत्तोगाढं जीवो सव्वप्पएसेहिं॥ तस्य पुण्यपापात्मकस्य कर्मणो योग्यमेव कर्मवर्गणागतं द्रव्यं जीवो गृह्णाति न तु परमाण्वादिकमौ
दारिकादिवर्गणागतं वाऽयोग्यमित्यर्थः तदप्येकक्षेत्रावगाढमेव गृह्णाति न तु स्वावगाढप्रदेशेभ्यो भिन्नप्रदेशावगाढमित्यर्थः तच्च यथा तैलादिर
ताभ्यंगः पुरुषो रेणुं गृह्णाति तथा रागद्वेषक्लिन्नस्वरूपो जीवोपि गृह्णाति न तु निर्हेतुकमिति भावः इदं च सर्वैरपि स्वप्रदेशैर्जीवो गृह्णाति न तु कैश्चिदित्य
र्थः॥ उक्तं च॥ एगपएसोगाढं सव्वपएसेहिं कम्मुणो जोग्गं। बंधइ जहुत्तहेउं साइयमणाइयं वावि॥ उपशमश्रेण्याः प्रतिपतितो मोहनीयादिकं कर्म सादि बध्ना
ति। शेषस्त्वनवाप्तोपशमश्रेणिर्जीवोऽनादि बध्नातीत्यर्थः॥ इति अथ प्रेरकः प्राह॥ अविसिट्ठ पोग्गलघणे लोए थूलतणुकम्मपविभागो। जुज्जेज्ज गहण
काले सुभासुभविवेयणं कत्तो। नन्वविशिष्टैः प्रत्याकाशप्रदेशमनंतानंतैः शुभाशुभादिभेदेनाव्यवस्थितैः पुद्गलैर्घनो निरंतरव्याप्तो योऽयं लोकस्तत्र ग्र
हणकाले गृह्णतो जीवस्य स्थूलसूक्ष्मकर्मप्रविभागो युज्येत ततो न बायरं नाइसुहुमं चेति विशेषणमुपपन्नं एतद्विशेषणविशिष्टादन्यस्य स्वभा
वत एव जीवैरग्रहणात् शुभसोहणवण्णाइगुणमित्यादि विशेषणं न युज्यत इति प्रेरकाकूतमिति॥ आचार्यः प्राह॥ अविसिट्ठं चिय तं सो। परिणामासयस
भावउ खिप्पं कुरुते सुभमसुभं वा। गहणे जीवो जहाहारं। स जीवस्तत्कर्म ग्रहणे ग्रहणकाले शुभाशुभादिविशेषणाविशिष्टमपि गृह्णन् क्षिप्रं तत्क्षण
मेव शुभमशुभं वा कुरुते शुभाशुभविभागेन स्थापयतीत्यर्थः कुत इत्याह परिणामासयसभावउत्ति इहाश्रयो द्विविधः कर्मणो जीव आश्रयः कर्म तु
शुभाशुभत्वस्य तस्य हि द्विविधस्याप्याश्रयस्य स्वभावः आश्रयस्वभावः परिणामश्चाश्रयस्वभावश्च परिणामाश्रयस्वभावौ ताभ्यामेतत्कुरुते। इदमु
क्तं भवति॥ जीवस्य शुभोऽशुभो वा परिणामोऽध्यवसायस्तद्वशाद्ग्रहणसमय एव कर्मणः शुभत्वमशुभत्वं वा जनयति तथा जीवस्यापि कर्माश्रयभू २९६

तस्य स कोपि स्वभावोस्ति येन शुभाशुभत्वेन परिणामयन्नेव कर्म गृह्णाति तथा कर्मणोपि शुभाशुभभावाद्याश्रयस्य स स्वभावः स कश्चिद्योग्यताविशे
षोस्ति येन शुभाशुभपरिणामान्वितजीवेन गृह्यमाणमेव तद्रूपतया परिणमति उपलक्षणं चैतत्प्रकृतिस्थित्यनुभागवैचित्र्यं प्रदेशानामल्पबहुभा
गवैचित्र्यं च जीवः कर्मणो ग्रहणसमय एव सर्वं करोतीत्युक्तं च॥ गहणसमयम्मि जीवो उप्पाएइ य गुणे सपच्चयउ। सव्वजियाणं भागो अहिगोउकार
णं किंतु। सहदुःखकारणत्ता ठिईविसेसेण सेसाकत्ति॥ एतत्सर्वं कर्मणो ग्रहणसमये आहारदृष्टांतेन जीवः करोतीति। आहारदृष्टांतमेव भाव
यति। परिणामासयवसउ धेणूए जह पउ विसमहिस्स। तुल्लो वि तदाहारो। तह पुण्णापुण्णपरिणामो॥ तदाहारोत्ति तयोरहिधेन्वोराहारस्तदाहारः
स तुल्योपि दुग्धादिको गृहीतः परिणामाश्रयवशाद्यथा धेन्वाः पयो दुग्धं भवति अहेस्तु स एव विषं विषरूपतया परिणमति तथा तेनैव प्रकारेण
पुण्यापुण्यपरिणामः इदमुक्तं भवति॥ अस्ति स कश्चित्तस्याहारस्य परिणामो येन तुल्योपि स त्वाश्रयवैचित्र्याद्विचित्रतया परिणमति आश्रयस्याप्य
हिधेनुलक्षणस्यास्ति तन्निजसामर्थ्यं येन तुल्योपि गृहीत आहारस्तत्तद्रूपतया परिणमति तथा पुण्यपापयोरुपनययोजना स्वतैवेति॥ अथवा
अयमेवाहारदृष्टांतोऽन्यथा भाव्यते। तद्यथा॥ जह वेगम्मि सरीरम्मि वि सारासारपरिणामयामेवि। अविसिट्ठो आहारो। तह कम्मसुभासुभविभागो
धेनुविषधरयोर्भिन्नशरीरे आहारस्य परिणामवैचित्र्यं दर्शितं इह तु यथा एकस्मिन्नपि पुरुषादिशरीरेऽविशिष्ट एकरूपोप्याहा
रो गृहीतस्तत्क्षण एव सारासारपरिणामतामेति रसासृग्मांसादि सारपरिणामं मूत्रपुरीषरूपमसारपरिणामं च युगपदागच्छतीत्यर्थः तथा क
र्मणोप्यविशिष्टस्य गृहीतस्य परिणामवशात् शुभाशुभविभागो द्रष्टव्य इति॥ तदेवं पुण्यपापयोर्लक्षणादिभिर्भेदं प्रसाध्य तद्भेदभूतप्रकृतिभेदेनापि
तयोर्भेदमुपदर्शयन्नाह॥ सायं सम्मं हासं। पुरिसरइसुभाउनामगोत्ताइं पुण्णं सेसं पावं। नेयं सविवागमविवागं॥ सातवेदनीयं शोधितमिथ्यात्वपुद्गलरूपं
सम्यक्त्वं हास्यं पुरुषवेदो रतिः शुभायुर्नामगोत्राणि चेत्येतत्सर्वं पुण्यमभिधीयते तत्र नारकायुर्वर्जं शेषमायुस्त्रयं शुभं देवद्धिकयशःकीर्तितीर्थकरना
माद्याः सप्तत्रिंशत्प्रकृतयो नामकर्मणि शुभाः गोत्रे पुनरुच्चैर्गोत्रं शुभं एताः षट्चत्वारिंशत्प्रकृतयः किल शुभत्वात्पुण्यं अन्ये तु मोहनीयभेदान् सर्वानपि जीव
स्य विपर्यासहेतुत्वात्पापमेवमन्यंते तन्मते सम्यक्त्वहास्यपुरुषवेदरतिवर्जा द्विचत्वारिंशदेव प्रकृतयः पुण्यं॥ तद्यथा॥ सायं उच्चागोयं॥ नरतिरिदेवाउयाइं त
ह नामे॥ देवदुगं मणुयदुगं। पणिंदिजाई य तणुपणगं॥ अंगोवंगाण तिगं। पढमं संघयणमेव संठाणं। सुभवण्णाइचउक्कं। अगुरुलहु तह य परघायं उसासं
आयावं उज्जोयं विहायगई विय पसत्था। तसबायरपज्जत्तं पत्तेय थिरं सुभं सुभगं। सुस्सरआएज्जजसं। निम्मेण तित्थयरमेव एयाउ। बायालं पगई
उ॥ पुण्णंति जिणेहिं भणियाउ॥ भणितशेषास्तु याद्यशीतिप्रकृतयस्ताः सर्वमशुभत्वात्पापं विज्ञेयं॥ सम्यक्त्वं कथमशुभं कथं तत्पापमिति चेदुच्यते॥

विशेषावि·वृ·
२५७ ए२

रुचिरूपमेव हि सम्यक्त्वं शुभं तच्चेह न विचार्यते किंतु शोधितमिथ्यात्वपुद्गलरूपं तच्च शंकाद्यनर्थहेतुत्वादशुभमेव अशुभत्वाच्च पापं सम्यक्त्वे चातिशये
नानाकारकत्वादुपचारमात्रेणेदं सम्यक्त्वमुच्यते परमार्थतस्तु मिथ्यात्वमेवैतदित्यलं प्रसंगेनेदं च पुण्यपापलक्षणमुभयमपि सविपाकमविपाकं च
मंतव्यं यथाबद्धं तथैव विपाकतः किंचिद्वेद्यते किंचित्तु मंदरसं नीरसं वा कृत्वा प्रदेशोदयेनाविपाकं वेद्यत इत्यर्थः॥ तदेवं पुण्यं पापं च भेदेन व्यव
स्थाप्य निरस्तः संकीर्णपुण्यपापपक्षः॥ इतश्चायमयुक्तः सर्वस्यापि संमिश्रसुखदुःखाख्यकार्यप्रसंगान्न चैतदस्ति देवादीनां केवलसुखाधिक्य
दर्शनान्नारकादीनां केवलदुःखप्राचुर्यनिर्णयान्न च सर्वथा संमिश्रैकरूपस्य हेतोरल्पबहुत्वभेदेरपि कार्यस्य प्रमाणतोऽल्पबहुत्वं विहाय स्वरूपतो
द्रायज्यते न हि मेचककारणप्रभवं कार्यमन्यतमवर्णोत्कटं घटते तस्मात्सुखातिशयस्यान्यन्निमित्तमन्यच्च दुःखातिशयस्येति न च सर्वथैकरूपस्य
संकीर्णपुण्यपापलक्षणस्य हेतोः सुखातिशयनिबंधनपुण्यांशवृद्धिर्दुःखातिशयकारणपापांशहान्या सुखातिशयप्रभवाय कल्पयितुं न्याय्या पुण्यां
शपापांशयोर्भेदप्रसंगात्तथाहि यद्वृद्धावपि यन्न वर्द्धते तत्ततो भिन्नं यथा देवदत्तवृद्धावप्यवर्द्धमानो यज्ञदत्तः न वर्द्धते पुण्यांशवृद्धौ पापांशस्तस्मा
त्ततो भिन्नोसाविति तस्मान्न सर्वथैकरूपतापुण्यपापांशयोर्घटते कर्मसामान्यरूपतया तु यद्यसौ तयोरिष्यते तदा सिद्धसाध्यता सातयशःशुभा
द्यादेः पुण्यस्य असातायशःकीर्त्यादेस्तु पापस्य अस्माभिरपि कर्मत्वेनैकताया अभ्युपगमात्तस्मात्पुण्यपापतया विविक्ते एव पुण्यपापे स्त इति। ततः सुख
दुःखवैचित्र्यनिबंधनयोः पुण्यपापयोर्यथोक्तनीत्या साधितत्वान्न कर्त्तव्यस्तत्संशयः। किं वा सत्त्वे पुण्यपापयोर्वेदोक्तस्याग्निहोत्रादेर्लौकिकप्रसिद्धस्य च दानादि
कफलं स्यादिति दर्शयन्नाह। असइ इहहि पुण्णपावे। जमग्गिहोत्ताइ सग्गकामस्स। तदसंबंधं सव्वं। दाणाइ फलं च लोयंमि॥ पुण्यपापयोरसत्त्वे यदेतद्धि
रग्निहोत्राद्यनुष्ठानं स्वर्गकामस्य यच्च दानहिंसादिफलं पुण्यपापात्मकं लौकिकप्रसिद्धं तत्सर्वमसंबद्धं स्यात्स्वर्गमपि पुण्यफलत्वात्पुण्यपापयोश्च भवद
भिप्रायेणासत्त्वात्तस्मादभ्युपगंतव्ये एव पुण्यपापे। तदेवं वेदवचनप्रामाण्याद्युक्तितश्च छिन्नस्तस्य संशय इति। ततः किं कृतवानसावित्याह॥ छिन्नंमि
संसयम्मी। जिणेण जरमरणविप्पमुक्केण। सो समणो पव्वइउ। तिहिं उसह खंडियसएहिं। गतार्था॥ इति चतुश्चत्वारिंशद्गाथार्थः॥ ४ ॥ इति नवमो ग
णधरवादः समाप्तः॥ ९॥ अथ दशमगणधरवक्तव्यतामाह॥ ते पव्वइए सोउं। मेअज्जो आगच्छइ जिणसयासं। वच्चामि ण वंदामि। वंदित्ता पज्जुवा
सामि॥ मेतार्यनामा दशमो द्विजोपाध्यायः श्रीमज्जिनसकाशमागच्छतीति शेषं गतार्थमिति। ततः किमित्याह। आभट्ठो य जिणेणं॥ गाथा सव्याख्यानात
थैव॥ आभाष्य ततः किमुक्तोसावित्याह किं मन्ने परलोए अत्थी नत्थित्ति संसओ तुब्भं॥ वेयपयाण य अत्थं। तयाणसीतेसि मोअत्थो॥ आयुष्मन्मेता
र्य त्वमेवं मन्यसे किं भवांतरगतिगमनलक्षणः परलोकोस्ति नास्ति वेति अयं च संशयस्तव विरुद्धवेदपदश्रुतिनिबंधनो वर्त्तते तानि च विज्ञानघन एवे २५७

डाक्टर भाऊदाजी इत्यस्य सारस्वतसंग्रहः
DR. BHAU DAJI

तेभ्यो भूतेभ्य इत्यादीनि प्रथमगणधरोक्तानि द्रष्टव्यानि तेषां चार्थं न ज्ञानासीत्यादि तथैव चेति यथा च युक्त्या मेतार्यः परलोकनास्तित्वं मन्यते तां॥ भगवान्व्यक्ती
कुर्वन्नाह। मण्णसि जइ चेयण्णं। मज्जंगमउव्व भूयधम्मोत्ति। तो नत्थि परलोगो। तन्नासे जेण तन्नासो॥ सौम्य त्वमेवं मन्यसे यदि तावच्चैतन्यं पृथिव्यादिभू
तधर्म्मः भूतेभ्योनर्थांतरमित्यर्थः यथा गुडधातक्यादिमद्यांगेभ्योऽनर्थांतरं मदधर्मस्तर्हि नास्ति भवांतरगमनलक्षणः परलोकः येन तन्नाशे भूतना
शे तस्यापि चैतन्यस्य नाशो ध्वंसो जायते यो हि यदनर्थांतरभूतो धर्मः स तद्विनाशे नश्यत्येव यथा पटादिधर्माः शुक्लत्वादयस्ततो भूतैरेव सह प्रागेव
नष्टस्य चैतन्यस्य कुतो भवांतरगमनमिति। अथ भूतेभ्योऽर्थांतरं चैतन्यं तथापि न परलोक इत्याह। अह वि तदत्थंतरयं। न य निच्चत्तणमओ वि तदव
त्थं। अनलस्स वारणीओ। भिन्नस्स विणासधम्मस्स॥ अथापि तदर्थांतरता भूतेभ्योऽर्थांतरता चैतन्याभ्युपगम्यते नन्वतोपि तदवस्थो भवांतरगामि
त्वाभावलक्षणं दूषणं च शब्दो यस्मादर्थे यतोऽर्थांतरभूतस्यापि चैतन्यस्य न नित्यत्वं कथंभूतस्य उत्पत्तिमत्त्वेन विनाशधर्मकस्य कस्य २ यथा अनित्य
त्वमित्याह अनलस्य कथंभूतस्य भिन्नस्य कस्य अरणीतोरणेः॥ इदमुक्तं भवति॥ भूतेभ्योऽर्थांतरत्वेप्यनित्यं चैतन्यं उत्पत्तिधर्मकत्वादरणिकाष्ठोत्
पन्नतद्भिन्नानलवदिति यच्चानित्यं तत्कमपि कालं स्थित्वानलवदवश्यं ध्वंसते इति न तस्य भवांतरयायित्वमतश्चेत्थमपि न परलोकसिद्धिरिति अथ प्रतिपिंडभि
न्नानि भूतधर्मरूपाणि बहूनि चैतन्यानि नेष्यंते किं त्वेक एव समस्तचैतन्याश्रयः सर्वत्रिभुवनगतो निःक्रियश्चात्माभ्युपगम्यते। यत उक्तं॥ एक एव हि भू
तात्मा भूते २ व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचंद्रवत्॥ ननु तथापि न परलोकसिद्धिरिति दर्शयन्नाह। अह एगो सव्वगओ॥ निक्किरिओ तह वि
नत्थि परलोओ। संसरणाभावाओ। वोमस्सव सव्वपिंडेसु॥ अथैकः सर्वगतो निःक्रियश्चात्माभ्युपगम्यते न तथापि परलोकगमनसिद्धिस्तस्यात्मनः सर्वे
षु गोमनुष्यादिपिंडेषु सर्वगतत्वेन निःक्रियत्वेन च संसरणाभावाद्व्योमवदिति॥ इतोपि च परलोकाशंका कुतो [struck] इत्याह॥ इहलोगाओ व परो॥ सुरा
इ लोगो न सो वि पच्चक्खो। एवं पि न परलोगो। सुव्वइ य सुई सुतोसंका॥ अथवा इहलोकादिह लोकापेक्षया सुरनारकादिभवः परलोक उच्यते स च न प्र
त्यक्षो दृश्यते अत एवमपि न परलोकः सिध्यति श्रूयते चासौ श्रुतिषु शास्त्रेषु ततस्तच्छंका॥ किमस्ति नास्तीति दर्शितः पूर्वपक्षोत्र प्रतिविधीयते। यदुक्तं भूत
धर्म्मश्चैतन्यं तत्राह। भूइंदियाइरित्तस्स चेयणा सो य दव्वओ निच्चो। जाइस्सरणाईहिं। पडिवज्जसु वाउभूइव्व॥ इह भूतेंद्रियातिरिक्तस्य पूर्वाभिहितानु
मानादिप्रमाणसिद्धस्यात्मन एव संबंधिनी चेतना मंतव्या न तु भूतधर्मः स चात्मा जातिस्मरणादिहेतोर्द्रव्यतो नित्य इति वायुभूतिरिव प्रतिपद्यस्व। अनेन
कांतानित्यत्वपक्षोक्तो दोषः पर्याय एवास्यानित्यत्वादिति भावः॥ अथैकः सर्वगतो निःक्रियश्चात्मा कस्मान्नेष्यत इत्याह। न य एगो सव्वगओ। निक्किरिओ लक्खणाइभे
याओ। कुंभादओव्व बहवो। पडिवज्जतमिंदभूइव्व॥ न चास्माभिरेक आत्मा इष्यते किंतु बहवोऽनंताः कुतो लक्षणभेदादुपयोगलक्षणो हि जीवः स चोपयोगो रागद्वेषकषा

य विषयाऽध्यवसायादिभिर्भिद्यमानउपाधिभेदादानंत्यं प्रतिपद्यन्त इत्यनंता जीवाः लक्षणभेदाद्घटादिवदिति तथा न सर्वगत आत्मा किंतु शरीरमात्रव्यापकस्त
त्रैव तद्गुणोपलब्धेरित्यादिशेषोपान्तो हेतुः स्पर्शनवदिति दृष्टांतश्च एवं न निःक्रिय आत्मा भोक्तृत्वाद्देवदत्तवदिति तदेतदिंद्रभूतिप्रथमगणधरव
प्रतिपत्तव्यमिति यदुक्तं॥ देवनारकाणां प्रत्यक्षाविषयत्वात्संदिग्धः परलोक इति तदयुक्तं मौर्यकंपितवादे यौ देवनारकाणां साधितत्वादिति दर्शयन्नाह॥ इहलो न
गाऊ अपरो। सोम्म सुरानारगाय परलोऊ। पडिवज्ज मेथियाकंपिऊव्व दिहियय्यमाणाउ॥ गतार्था॥ अथ प्रेरकः प्राह॥ जीवो विण्णाणमऊ। तं चाणिच्चंति तो विन परलो
गो। अह विण्णाणाद्दण्णो। तो अणभिन्नो जहा गासं एत्तो च्चिय न स कत्ता। भोत्ता वि अऊ विनत्थि परलोगो। जं चन संसारी सो। अण्णाणामुत्तिऊ खंव॥ व्याख्या॥ जीवो
विज्ञानमयस्ता वद्भवद्भिरिष्यते विज्ञानादभिन्न इत्यर्थः तच्च विज्ञानमनित्यं विनश्वरं मतस्तद्भिन्नस्य जीवस्यापि विनश्वरत्वान्न भवांतरगमनलक्षणः
परलोकः अथ विज्ञानादन्यो जीवस्ततोऽनित्ये विज्ञाने जीवाद्भिन्ने सति स्वयं नित्योऽसाविति न परलोकाभावः यद्येवं तर्हि अनभिज्ञो जीवः विज्ञानाद
न्यत्वादाकाशवत्काष्ठादिवद्वा अत एव च नित्यत्वाद्वासौ जीवो न कर्ता नापि भोक्ता नित्यस्य कर्तृत्वाद्यभ्युपगमे हि सर्वदैव तद्भावप्रसंगस्तस्य सदैवैकरूपत्वात्कर्तृ
त्वाभावे च न परलोकः कृतस्याभ्युपगमे सिद्धानामपि तत्प्रसंगः भोक्तृत्वाभावेऽपि न परलोको भोक्तुः परलोकहेतुभूतकर्मभोगादितोऽपि च न परलोकः कुत इत्या
ह। जं चेत्यादि॥ यस्माच्च नासौ संसारी नास्य ज्ञानाद्भिन्नस्य जीवस्य भवाद्भवांतरगमनलक्षणं संसरणमस्तीत्यर्थः॥ कुत इत्याह॥ स्वयमज्ञानात्काष्ठखंडवत्तथा अ
मूर्तत्वादाकाशवदिति॥ अत्रोत्तरमाह॥ मन्नसि विणासि चेऊ। उप्पत्तिमदादिऊ जह कुंभो। नणु एयं चिय साहणमविणासित्ते वि से सोम्म॥ ननु जीवो वि
ण्णाणमऊ तं चाणिच्चमिति ब्रुवाणो नूनं त्वमेवं मन्यसे विनाशि विनश्वरं चेतश्चेतना चैतन्यं विज्ञानमिति यावदुत्पत्तिमत्त्वादिति हेतुर्यथा कुंभ इति दृष्टां
तः आदिशब्दात्पर्यायत्वादित्यादिकोऽपि हेतुर्वक्तव्यः यो हि पर्यायः स सर्वोऽप्यनित्यो यथा स्तंभादीनां नवपुराणादिपर्यायस्ततश्चानित्याच्चैतन्या
दभिन्नत्वे जीवस्याप्यनित्यत्वात्परलोकाभाव इति तवाभिप्रायः। न चायमुक्तः॥ यतो हंत नैकांतेन विज्ञानमनित्यं यतोऽनेनैव विनाशित्वेऽपि सतस्य विज्ञा
नस्य एतदेव सौम्य त्वदुक्तं साधनं प्रमाणं वर्तते ततो नैकांतिकस्त्वदुक्तो हेतुरिति भावः॥ इदमुक्तं भवति॥ उत्पादव्ययध्रौव्यात्मकं वस्तु ततश्च यथा उत्पत्तिमत्त्वाद्विना
शित्वं सिध्यति तथा ध्रौव्यात्मकत्वाद्वस्तुनः कथंचिन्नित्यत्वमपि सिध्यति ततश्चेदमपि शक्यते वक्तुं नित्यं विज्ञानमुत्पत्तिमत्त्वाद्घटवत्ततश्च कथंचिन्नित्याद्विज्ञानादभि
न्नस्य जीवस्य नित्यत्वान्न परलोकाभाव इति॥ अथवा विरुद्धाव्यभिचार्यप्ययमुत्पत्तिमत्त्वरूपो हेतुः प्रत्यनुमानसद्भावादिति पुनस्तत्प्रत्यनुमानमित्याह।
अह वा वत्थुत्तणउ। विणासि चेऊ न होइ कुंभो व्व। उप्पत्तिमदादित्ते। कह मविणासी घडो बुद्धी॥ एकांतेन विनाशि विनश्वरं चेतो विज्ञानं न भवति २५८
वस्तुत्वात्कुंभवत्ततोऽस्य प्रत्यनुमानस्योपस्थानाद्विरुद्धाव्यभिचार्युत्पत्तिमत्त्वलक्षणो हेतुः॥ यदुक्तं॥ नणु एयं चिय साहणमविनासित्ते वीत्यादि तत्र

परस्येयं बुद्धिः स्यात्कथं भूतानुद्धिरित्याह कथमुत्पत्तिमत्त्वाद्दृष्टांतत्वेनोपन्यस्तोऽविनाशी घटः सिध्यति न कथंचिद्घटस्य विनाशित्वेन सुप्रतीतत्वात्ततश्च दृष्टां
ते अविनाशित्वस्यासिद्धेर्दार्ष्टांतिके विज्ञाने तन्न सिध्यतीति परस्याभिप्राय इति॥ अत्रोत्तरमाह॥ रूवरसगंधफासा संखासंठाणदव्वसत्तीउ। कुंभो त्ति जऊ
ताऊ। पसूइविच्छित्तिधुवधम्मा॥ इह रूपरसगंधस्पर्शलक्षणो गुणसमुदायः एकलक्षणा संख्या पृथुबुध्नोदराद्याकारलक्षणं संस्थानं मृद्द्रव्यं जला
हरणादिशक्तिश्चैतानि समुदितानि यतः कुंभ इत्युच्यते ताश्च रूपरसगंधस्पर्शसंख्यासंस्थानद्रव्यशक्तयः प्रसूतिविच्छित्तिध्रौव्यधर्मिण्यः॥
उत्पादव्ययध्रौव्यस्वरूपास्ततउत्पत्तिमत्त्वादविनाश्यपि घटः सिध्यतीति॥ एतदेव विस्तरतो भावयन्नाह॥ इह पिंडो पिंडागार। सत्ति पज्जाय विलयसमकालं। उप्प
ज्जइ कुंभागार। सत्तिपज्जायरूवेण। रूवाइ दव्वयाए। न जाइ न य वेइ तेण सो निच्चो। एवं उप्पायव्वय। धुवस्सहावं मयं सव्वं॥ इह मृत्पिंडः कर्तार्यायं वृत्तसंस्थानरू
पः स्वकीयो मृत्पिंडाकारः शक्तिश्च या काचिदात्मीया एतदुभयलक्षणो यः पर्यायः तस्य यो विलयो विनाशस्तत्समकालमेवासौ उत्पद्यते। मृत्पिंडः किं
त्याह पृथुबुध्नोदरादिको यः कुंभाकारस्तच्छक्तिश्च या जलहरणादिविषया एतदुभयलक्षणो यः पर्यायस्तेनोत्पद्यते रूपरसगंधस्पर्शरूपतया मृद्द्रव्यरू
पतया देवं मृत्पिंडो निजाकारस्वशक्तिरूपतया विनश्यति घटाकारतच्छक्तिरूपतयोत्पद्यते रूपादिभावेन मृद्द्रव्यरूपतया चावतिष्ठत इत्युत्पादव्यय
ध्रौव्यस्वभावो यमुच्यते एवं घटोऽपि पूर्वपर्यायेण विनश्यति घटाकारतयोत्पद्यते रूपादित्वेन मृद्द्रव्यतया चावतिष्ठ तद्वत्सावफसा द्व्ययध्रौव्यस्वभावः एव
मन्यदपि यदस्ति वस्तु तत्सर्वमप्युत्पादव्ययध्रौव्यस्वभावमेवाभिमतं तीर्थकृतां ततश्च यथा उत्पत्तिमत्त्वाद्विनाशित्वं घटे सिध्यति तथा अविनाशित्वमपि त
था च सति साध्यधर्मिणि चैतन्येऽपि तत्सिद्धिरिति तदेवं चैतन्याद्व्यतिरिक्तो जीवः कथंचिन्नित्य एव ततश्च न परलोकाभाव इति॥ दर्शयन्नाह॥ घडचे
यणमानासो। पडचेयणयासमुब्भवो समयं। संताणेणावत्था। तदेह परलोयजीवाणं। मणुएहलोगनासो। सुराइ परलोगसंभवो समयं जीवतयावत्थाणं
। नेह भवो नेह परलोऊ॥ घटविषयं विज्ञानं घटचेतनोच्यते पटविषयं तु विज्ञानं पटचेतना यदा च घटविज्ञानानंतरं पटविज्ञानमुपजायते जीवस्य त
दा घटचेतनया घटविषयविज्ञानरूपेण तस्य नाश उच्यते पटचेतनया तु पटविज्ञानरूपेण समकं युगपदेव समुद्भव उत्पादः अनादिकालप्रवृत्तेन तु चेतना
संताने न निर्विशेषणेन जीवत्वमात्रेणावस्थानमिति एवं च यथेह भवेऽपि तिष्ठतो जीवस्योत्पादव्ययध्रौव्यस्वभावत्वं च यं दर्शितं तथा परलोकं गतो जीवः परलोक
जीवास्तियामप्यतत्स्वभावत्रयं द्रष्टव्यं तद्यथा यदा मनुष्यो मृत्वा सुरलोकादावुत्पद्यते तदा मनुष्यरूप इहलोको मनुष्यो हि इहलोकस्तस्य नाशः तत्समकाल
मेव सुरादिपरलोकस्य संभव उत्पादः जीवतया त्ववस्थानं तस्यां च जीवावस्थायां विवक्षितायां नेह भवो विवक्ष्यते नापि सुरादिपरलोको विवक्ष्यते किं
तु निःपर्यायं जीवद्रव्यमात्रमेव विवक्ष्यते तदेवमुत्पादव्ययध्रौव्यस्वभावत्वे जीवस्य न परलोकाभाव इति॥ आह ननु कथं सर्वस्यापि वस्तुन इयं त्रिस्वभा

वतादत्यत्रयुक्तिमाह। असऊ नत्थि पसूई॥ होज्ज व जइ होउ खरविसाणस्स। न य सव्वहा विणासो। सव्वुच्छेयप्पसंगाऊ॥ नो वत्थियस्स केणवि। विलऊध
म्मेण भवणमन्नेण। सव्वुच्छेऊ न मऊ। संववहारोवरोहाऊ॥ इहैकांतेन सर्वथाऽसतो वस्तुनः प्रसूतिरुत्पत्तिर्नास्ति न घटते अथ भवति तर्हि खरविषा
णस्यापि भवतु सत्वाविशेषात्तस्मात्केनापि रूपेण सदेवोत्पद्यते न च सतः सर्वथा विनाशः क्रमशः सर्वस्यापि नारकतिर्यगादेरुच्छेदप्रसंगात्तस्मात्त
स्यावस्थितस्य जीवादेरस्ति केनापि मनुष्यादिधर्मेण विलयो विनाशः अन्येन तु सुरादिरूपेण भवनमुत्पादः सर्वोच्छेदस्तु न मतस्तीर्थकृतां संव्यवहारो
परोधादन्यथा व्यवहारोच्छेदप्रसंगादित्यर्थः॥ तथाहि॥ राजपुत्र्याः क्रीडाहेतुभूतं सौवर्णकलशं कश्चित्काराजतनयस्य क्रीडार्थमेव कंदुको घटितः ततो राजपुत्र्याः
शोकः कुमारस्य तु हर्षः सुवर्णस्वामिनश्च न परं तैरौदास्यं सुवर्णस्योभयावस्थायामप्यविनष्टत्वादित्यादिको योऽसौ लोकव्यवहारस्तस्य सर्वस्याप्युत्पादव्यय
ध्रौव्यात्मकवस्त्वनुपगमे समुच्छेदः स्यात्तस्मात्कथंचिदवस्थितत्वे जीवस्य न परलोकाभाव इति॥ किंच स्वर्गादिपरलोकाभावेऽग्निहोत्रदानादीनामान
र्थक्यं स्यादिति दर्शयन्नाह। असइ व परम्मि लोए। जमग्गिहोत्ताइ सग्गकामस्स। तदसंबद्धं सव्वं। दाणाइफलं च लोयम्मि॥ गतार्था। तदेवं छिन्नोऽस्य विसं
शयस्ततः किं कृतवानित्याह॥ छिन्नंमि संसयम्मी। जिणेण जरमरणविप्पमुक्केण। सो समणो पव्वइऊ। तिहिउ सह खंडियसएहिं॥ अर्थः स एवेति
त्रयोविंशतिगाथार्थः॥४२३॥ इति दशमो गणधरवादः समाप्तः॥१०॥ अथैकादशगणधरवक्तव्यतामाह। ते पव्वइए सोउं। पहासो आगच्छ
इ जिणसयासं। वच्चामि ण वंदामी। वंदित्ता पज्जुवासामि। सगमा। ततः किमित्याह॥ आभट्ठो य जिणेणमित्यादि गाथा तथैव। आभाष्य ततः कि
मुक्तोऽसावित्याह॥ किं मन्ने निव्वाणं। अत्थी नत्थित्ति संसऊ तुज्झ। वेयपयाण य अत्थं। न याणसी तेसिमो अत्थो॥ हे आयुष्मन् प्रभास त्वमेवं मन्यसे
किं निर्वाणमस्ति न वेति अयं च संशयस्तव विरुद्धवेदपदश्रवणनिबंधनः तानि चामूनि वेदपदानि जरामर्यं वा एतत्सर्वं यदग्निहोत्रं तथा सैषा गु
हा दुरवगाहा तथा द्वे ब्रह्मणी परमपरं च तत्र परं सत्यं ज्ञानमनंतरं ब्रह्मेति एतेषां चायमर्थः त्वच्चेतसि वर्तते यदेतदग्निहोत्रं तज्जरामर्यमेव या
वज्जीवं कर्तव्यमिति अग्निहोत्रक्रिया च भूतवधहेतुत्वाच्छबलरूपा सा च स्वर्गफलैव स्यान्नापवर्गफला यावज्जीवमिति चोक्तेः कालांतरं नास्ति यत्रापवर्गहेतु
भूतक्रियांतरारंभः स्यात्तस्मात्साधनाभावान्मोक्षाभावस्तत एवेत्यादिकानि किल मोक्षाभावप्रतिपादकानि शेषाणि तु तदस्तित्वसूचकानि यतो गुहा च मुक्तिरूपा
सा च संसाराभिनंदिनां दुरवगाहा दुःप्रवेशा तथा परं ब्रह्म सत्यं मोक्षः अनंतरं तु ब्रह्म ज्ञानमिति ततो मोक्षास्तित्वं नास्तित्वं च वेदपदप्रतिपादितमवगम्यत
व संशयस्तत्र तेषां वेदपदानामर्थं त्वं न जानासि यतस्तेषामयमर्थो वक्ष्यमाणलक्षण इति॥ युक्तिमपि मोक्षाभावप्रतिपादने प्रभासाध्यवसितां दूषयितुं भगवा २५९
न्प्रकटयितुमाह। मन्नसि किं दीवस्सव। नासो निव्वाणमस्स जीवस्स। दुक्खक्खयाइरूवा। किं होज्ज व सेस ऊ वक्खा॥ आयुष्मन् प्रभास त्वमेवं मन्यसे किं दीपस्ये

वास्य जीवस्य नाशो ध्वंस एव निर्वाणं। यथाहुः सौगतविशेषाः केचित्तद्यथा॥ दीपो यथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नांतरिक्षं दिशं न कांचिद्विदिशं न कांचित्स्नेह
क्षयात्केवलमेति शांतिं जीवस्तथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नांतरिक्षं दिशं न कांचिद्विदिशं न कांचित् क्लेशक्षयात्केवलमेति शांतिमिति किंवा यथाऽन्ये
नाः प्राहुः तथा निर्वाणं भवेत्किं तदित्याह सतो विद्यमानस्य जीवस्य विशिष्टा काचिदवस्था कथंभूता रागद्वेषमदमोहजन्मजरारोगादिदुःखक्षयरूपा॥ उक्तं च॥ के
वलसंविद्दर्शनरूपाः सर्वार्त्तिदुःखपरिमुक्ता मोदंते मुक्तिगता जीवाः क्षीणांतरारिगणा इति। प्रकारांतरमपि संशयकारणमाह॥ अहवा नाइत्तणऊ। खस्सव
किं कम्मजीवजोगस्स। अविऊगाऊ न भवे। संसाराभाव एवत्ति॥ अथ वा त्वमेवं मन्यसे नूनं संसाराभाव एव न भवेत् कुतोऽवियोगाद्वियोगात् योगाद्वा लक
स्य कर्मजीवयोः संयोगस्य कुतोऽनादित्वात् खस्येव इह ययोरनादिसंयोगस्तयोर्वियोगो नास्ति यथा जीवाकाशयोरनादिश्च जीवकर्मणोः संयोगस्ततो
वियोगानुपपत्तिस्ततश्च न संसाराभावस्तथा च सति कुतो मोक्ष इति। अथ प्रत्यासत्तेरेवानंतरोक्तस्यैव प्रतिविधानमाह। पडिवज्ज मंडिऊ इव। विऊगमिह कम्मजी
वजोगस्स। तमणाइणोवि कंचणधाउपाणाण किरियाहिं॥ अणाइणोवित्ति अनादेरपि जीवकर्मसंयोगस्य तमिति त्वं प्रतिपद्यस्व वियोगं बंधमोक्षवादे मंडिक
वत्कयोरिव योर्वियोगः कांचनधातुपाषाणयोरिव किं निर्हेतुक एव जीवकर्मणोर्वियोगो नेत्याह ज्ञानक्रियाभ्यां। इदमुक्तं भवति। नायमेकांतो यदनादिसंयोगो न
विघटते। यतः॥ कांचनधातुपाषाणयोरनादिरपि संयोगोऽग्न्यादिसंपर्केण विघटत एव तद्वज्जीवकर्मसंयोगस्यापि सम्यग्ज्ञानक्रियाभ्यां वियोगं मंडिकवत्त्वमपी
ह प्रतिपद्यस्वेति॥ अथ प्रकारांतरेणापि मोक्षाभावप्रतिपादकं प्रभासाभिप्रायं भगवान्प्रकटयितुमाह। जं नारगाइभावो। संसारो नारगाइभिण्णो य। को व्वी
वोतं मन्नसि। तन्नासे जीवनासोत्ति॥ यद्यस्मान्नारकतिर्यग्नरामरभावनारकादित्वमेव संसार उच्यते नान्यः नारकादिपर्यायभिन्नश्च कोऽप्यजीवो न कोपी
त्यर्थः नारकादिभावादन्यत्वेन कदाचिदपि जीवस्यानुपलंभादिति भावस्ततस्तन्नाशे नारकादिभावरूपसंसारनाशे जीवस्य स्वस्वरूपनाशात्सर्वथा नाश ए
व भवति ततः कस्यासौ मोक्ष इति त्वं मन्यसे। तदेतदयुक्तं कुत इत्याह। नहि नारगाइपज्जाय। मित्तनासंमि सव्वहा नासो। जीवद्दव्वस्स मऊ। मुद्दानासेव हेमस्स। क
म्मकऊ संसारो। तन्नासे तस्स जुज्जए नासो। जीवत्तमकम्मकयं। तन्नासे तस्स को नासो॥ नारकतिर्यगादिरूपेण यो भावः स जीवस्य पर्याय एव न च पर्यायमात्र
नाशे पर्यायिणो जीवद्रव्यस्यापि सर्वथा नाशो मतः कथंचिद्भवत्यपि न हि मुद्रादिपर्यायनाशे हेम्नः सुवर्णस्य सर्वथा नाशो मतः कथंचित्तु दृष्टस्ततो नारकादि
संसारपर्यायनिवृत्तौ मुक्तिपर्यायांतरोत्पत्तिर्जीवस्य मुद्रापर्यायनिवृत्तौ कर्णपूरपर्यायांतरोत्पत्तिरिव सुवर्णस्य न किंचिद्विरुध्यत इति ननु यथा कर्मणो नाशे
संसारो नश्यति तथा तन्नाशे जीवत्वस्यापि नाशान्मोक्षाभावो भविष्यति॥ एतदप्यसारं कुत इत्याह॥ कम्मकऊ इत्यादि॥ कर्मकृतः कर्मजनितः संसारस्त
तस्तन्नाशे कर्मनाशे तस्य संसारस्य नाशो युज्यत एव कारणाभावे कार्याभावस्य सुप्रतीतत्वात् जीवत्वं पुनरनादिकालप्रवृत्तत्वात्कर्मकृतं न भवत्यतस्त

नाशोकर्मनाशेतस्यजीवत्वस्यकोनाशोनकश्चित्कारणव्यापकयोरेवकार्यव्याप्यनिर्वर्त्तकत्वात्कर्मतुजीवत्वस्यनकारणं नापिव्यापकमितिभावः॥इतश्चजीवोन
विनश्यति।कुतइत्याह।नविगाराणुवलंभा।दागासंपिवविणासधम्मोसो।इहनास्सिणोविगारो।दीसइकुंभस्सवावयवा॥नविनाशधर्मोजीवइतिप्रतिज्ञा
विकारानुपलंभादितिहेतुः इहयोविनाशीतस्यविकारोदृश्यते यथामुद्गरादिध्वस्तस्यकुंभस्यकपाललक्षणा अवयवायस्त्वविनाशीनतस्यविकारदर्शनं
यथाआकाशस्येति ततोमुक्तस्यजीवस्यनित्यत्वान्नित्योमोक्षइति॥स्यन्मतिस्तर्हिप्रतिक्षणध्वंसीमोक्षोमाभूत्कालांतरविनाशीभविष्यति कृतकत्वाद्घटवत्त
दयुक्तं॥घटप्रध्वंसाभावेनानैकांतिकत्वादितिदर्शयन्नाह।कालंतरनासीबाघडोव्वकयगाईऊमईहोज्जा।नोपद्धंसाभावोभुवितद्धम्माविजंनिच्चो।प्राग्व्याख्यात
।अत्रप्रेर्यपरिहारंचाह।अणुदाहरणमभावो।खरस्सिंगंपिचमईनतंजम्हा।कुंभविणासविसिठ्ठो।भावोच्चियपोग्गलमऊसो॥घट्टाकृतकत्वंमोक्षस्याभ्युपग
म्योक्तं इदानींतदेवतस्यनास्तीति।सोदाहरणमुपदर्शयन्नाह॥किंवेगंतेणकयंपोग्गलमेत्तविलयंमिजीवस्स किंनिव्वत्तियमहियं नेभसोघडमेत्तवि
लयम्मि।अनुमानात्पुनरपिमुक्तस्यनित्यत्वंसाधयति।दव्वामुत्तत्तणऊ।मुत्तोनिच्चोनभंवदव्वतया।नणुविभुताइपसंगो।एवंसइनाणुमाणाऊ॥नित्यामुक्ता
त्माद्रव्यत्वेसत्यमूर्त्तत्वात् इहतयन्ति यथाद्रव्यत्वेसत्यमूर्त्तत्वान्नित्यंनभः॥आह॥नन्वनेनदृष्टांतेनव्यापकत्वाद्यपिसिध्यतिजीवस्य॥तथाहि॥विभुर्व्यापकः
सर्वगतोजीवःद्रव्यत्वेसत्यमूर्त्तत्वाद्यथानभःतदेतन्नकुतःसर्वगतत्वबाधकानुमानसद्भावात्तथाहि एकांतदेहमात्रव्यापकोजीवस्तत्रैवतद्गुणोपलब्धेःस्पर्शन
वदित्यनुमानाद्बाधते स्वर्गगतत्वंजीवस्य एवंनबध्यते नापिमुच्यतेजीवःद्रव्यत्वेसत्यमूर्त्तत्वान्नभोवदित्याद्यपिदूषणं॥बध्यतेपुण्यपापकर्मणाजीवोहि
नहिंसादिक्रियाणांसफलत्वात्कृष्यादिक्रियावत्तथाविघटतेसम्यगुपायात्कोपिजीवकर्मसंयोगःसंयोगत्वात्कांचनपाषाणयोःसंयोगवदित्याद्यनुमानात्परिहर्त्त
व्यमिति॥अथवाकिमेकांतेनबध्दाग्रहेर्मोक्षस्यनित्यत्वंसाध्यतेसर्वस्यापिवस्तुनःपरमार्थतोनित्यानित्यरूपत्वादुत्कटानुत्कटपर्यायविशेषविवक्षामात्रेणैवहि
केवलनित्यादिव्यपदेशइतिदर्शयन्नाह।कोवानिच्चग्गाहो।सव्वंचियविभवभंगठिइमइयं॥पज्जायंतरमेत्तप्पणादनिच्चाइववएसो॥अथकथंचिदनित्यत्वे
पिमोक्षस्यनकिंचित्क्षूयतइतिभावः इहकालंतरनासीबाघडोव्वेत्यादिगाथाःप्रागपिषष्ठगणधरेबंधमोक्षविचारेव्याख्याताएवततोयदिहनव्याख्याततत
स्ततोऽवगंतव्यमिति॥अथप्रथमपक्षेयदुक्तंकिंदीवस्सवनासोनिव्वाणमित्यादि।तत्रोत्तरमाह।नयसव्वहाविणासो।नलस्सपरिणामऊपयस्सेव।कुंभस्सक र
वालाणव।तहाविगारोवलंभाऊ॥नप्रदीपानलस्यसर्वथासर्वप्रकारैर्विनाशःपरिणामवत्वात्पयसोदुग्धस्येव अथवायथामुद्गराहतस्यकपालतया परिणतस्य
घटस्य यथावाचूर्णीकृतानांकपालानांकुतोनुसर्वथाविनाशइत्याह तथानेनरूपांतरप्रकारेणविकारस्यप्रत्यक्षादिप्रमाणोपलंभादिति।अथप्रेर्यपरिहारं २६०
चाह।जइसव्वहाणनासोणलस्सकिंदीसएनसोसरकं।परिणामसुहुमयाऊ।जलयविगारंजणरऊव्व॥यदिसर्वथानलस्यननाशस्तर्हिविध्यातानंतरंकिमित्त

सौसाक्षान्नदृश्यते॥अत्रोत्तरमाह॥परिणामेत्यादिविध्यातेप्रदीपेनंतरमेवतामसपुद्गलरूपोविकारःसमुपलभ्यतएवचिरंत्वाच्चासौपुरस्ताद्यन्नो
पलभ्यते तत्सूक्ष्मतरपरिणामभावात्तथाहिविशीर्यमाणस्यजलदस्यापियःकृष्णाभ्रपुद्गलविकारःसपरिणामसौक्ष्म्यान्नोपलभ्यते तथांजनस्या
पिपवनेनापन्हियमाणस्ययत्कृष्णंरजउड्डीयतेतदपिपरिणामसौक्ष्म्यान्नोपलभ्यते नपुनरसत्वादिति॥चित्ररूपश्चपुद्गलपरिणामइतिदर्शयन्नाह
।होऊणइंदियंतर।गज्झापुणरिंदियंतरग्गहणं।खंधाएंतिनएंतिय॥पोग्गलपरिणामयाचिन्ना॥इहकवर्णपनलवणसंठिहरीतकीचित्रकगुडादयःस्क
धा पूर्वमिन्द्रियांतरग्राह्याश्चक्षुरादीन्द्रियविषयीभूतापुनर्द्रव्यक्षेत्रकालादिसामग्र्यंतरंप्राप्यपुद्गलपरिणामवैचित्र्यादिन्द्रियांतरग्रहणंस्पर्शनरस
नादीन्द्रियग्राह्यतामायांति।तथाहि।कवर्णंपत्रीकृतंचक्षुर्ग्राह्यंभूत्वाशोधनार्थमग्नौप्रक्षिप्तंभस्मनोमिलितंतत्स्पर्शनेन्द्रियग्राह्यतामेति पुनःप्रयोगे
नभस्मनःपृथक्कृतंचक्षुर्विषयतामुपगच्छति लवणसंठिहरीतकीचित्रकगुडादयोपिप्राक्चक्षुरिन्द्रियग्राह्याभूत्वापश्चात्सूपाद्यन्ने वन्हौषधसमु
दयेचक्वाथेवर्णावलेहादिपरिणामांतरमापन्नाःसंतोरसनेन्द्रियसंवेद्याभवंतिकर्पूरकस्तूरिकादीनामपिपुद्गलाश्चक्षुर्ग्राह्याअपिवायुनादूरमुपनीता
घ्राणसंवेद्याभवंति योजननवकात्परतोगतास्तथाविधंकंचित्सूक्ष्मपरिणाममापन्नानेकस्यापीन्द्रियस्यविषयतांप्रतिपद्यंतइत्येवमादिशान्यापिपुद्ग
लपरिणामतावित्राभावनीयेति॥अथास्यैवपुद्गलपरिणामस्यवैचित्र्यं।प्रस्तुतेयोजनार्थमाह।एगेगिंदियगप्पा।जहवायवादयोतहाग्गेयालोउ।चक्खुगप्पा
घाणिंदियगप्पयाम्मिंति॥वायुःस्पर्शनेन्द्रियस्यग्राह्यः रसोरसनस्यैवगंधोघ्राणस्यैवरूपंचक्षुषएवशब्दस्तुश्रोत्रेन्द्रियग्राह्यः तदेवंयथावायव्यादयः पुद्गला
एकैकस्यप्रतिनियतस्येन्द्रियस्यग्राह्याभूत्वापश्चात्परिणामांतरकम्यामपन्नाःइन्द्रियांतरग्राह्याअपिभवंतीतिस्वयमेवगम्यते तथाप्रस्तुताअपिप्रदीपतामस
गेयाःपुद्गलाश्चक्षुर्ग्राह्याभूत्वापश्चाद्विध्यातेतस्मिन्प्रदीपेतएवतामसीभूताःसंतोघ्राणेन्द्रियग्राह्यतामुपयांति तत्किमुच्यते किंदीसएनसोसरकंति ननुघ्राणे
न्द्रियेनोपलभ्यतएवविध्यातप्रदीपविकारइति।यद्येवंततःप्रस्तुतेकिमित्याह।जहदीवोनिव्वाणो परिणामंतरमिऊतहजीवो।भण्णइपरिनिव्वाणोपत्तोणाबा
हपरिणामं॥यथाऽनंतरोक्तस्वरूपपरिणामांतरंप्राप्तःप्रदीपोनिर्वाणइत्युच्यते तथाजीवोपिकर्मविरहितकेवलामूर्त्तजीवस्वरूपभावलक्षणमबाधंपरि
णामांतरंप्राप्तोनिर्वाणोनिर्वृत्तिंप्राप्तउच्यते तस्मादुःखादिक्षयरूपासत्तोऽवस्थानिर्वाणमितिस्थितं॥तर्हिशब्दादिविषयोपभोगाभावान्निःसुखएवायमि
तिचेन्नैवं कुतइत्याह मुत्तस्सपरंसोक्खं णाणाणाबाहऊजहामुणिणो।तद्धम्मापुणविरहा।दावरणाबाहहेऊणं॥मुक्तस्यजंतोःपरंप्रकृष्टमकृत्रिममि
थ्याभिमानजंस्वाभाविकंसुखमितिप्रतिज्ञाणाणाणाबाहऊत्ति ज्ञानप्रकर्षसति जन्मजराव्याधिमरणेष्टवियोगाऽरतिशोकक्षुत्पिपासाशीतोष्णकाम
क्रोधमदशाठ्यतृष्णारागद्वेषचिंतौत्सुक्यादिनिःशेषाबाधविरहितत्वादितिहेतुस्तथाविधप्रकृष्टमुनेरिवयथोक्ताबाधरहितानिकाष्ठादीन्यपिव

नंते परं तेषां ज्ञानाभावान्न स्वरूपमतस्तद्व्यवच्छेदार्थं ज्ञानग्रहणं ॥ कथं पुनरसौ प्रकृष्टज्ञानवानाबाधरहितश्चेत्याह ॥ तद्धर्मेत्यादि तद्धर्मा प्रकृष्टज्ञाना
नाबाधवान्मुक्तात्मा कुतो विरहाद्भावात्केषामावरणहेतूनामाबाधाहेतूनां च ॥ एतदुक्तं भवति ॥ क्षीणनिःशेषावरणत्वात्प्रकृष्टज्ञानवानसौ वेदनीयक
र्मादीनां सर्वेषामप्याबाधहेतूनां सर्वथापगमात्सर्वाबाधरहितोयमिति प्रयोगः स्वाभाविकेन स्वेन प्रकाशेन प्रकाशवान्मुक्तात्मा समस्तप्रकाशावरण
रहितत्वात्तुहिनांशुवत्तथा चाह । स्थितः शीतांशुवज्जीवः प्रकृत्या भावशुद्धया चंद्रिकावच्च विज्ञानं तदावरणमभ्रवदिति तथाप्यनाबाधस्वरूपोमु
क्तात्मा समस्ताबाधहेतुरहितत्वात्सुराद्यपगमे स्वस्थातुरवत्तथा चोक्तं ॥ सव्याबाधाभावात्सर्वज्ञत्वाच्च भवति परमसुखी व्याबाधाभावोऽत्र स्वस्थ
स्य ज्ञस्य परमसुखमिति श्च परस्त्वाह । मुत्तो करणाभावा । दण्णाणी खंवणणु विरुद्धो यं । जमजीवयाविपावइ । एगंतेणिंदियभणइन्नाम ॥ नन्वज्ञानी मुक्ता
त्मा करणाभावादाकाशवदत्राचार्यः प्राह ननु धर्मिस्वरूपविपरीतसाधनाद्विरुद्धोयं हेतुस्तथात्वेनैनैतदपि सिध्यति अजीवो मुक्तात्मा करणाभावादा
काशवदथ परः प्रोत्कर्षभणति तन्नाम नाम इत्याश्वनुज्ञायामस्त्वेतन्नः किमपि क्षूयते नहि मुक्तात्मनामजीवत्वेऽस्माकं किंचिन्नश्यति येन हेतोर्विरुद्ध
तामीर्यमाणाक्षोभेत ॥ अत्राह कश्चित् ॥ ननु मुक्तस्याजीवत्वमार्हतानामप्यनिष्टमेव तत एवैतद्दूषणमाचार्येणापि परिहर्तव्यमेव यच्चात्मनोपि दूषणं समा
पतति तत्कथं परस्यैवैकस्योद्भाव्यते सत्यमेतत्किंतु परज्ञानपरीक्षार्थं प्रेर्यमावाभ्यां कृतवान्केदाचित्क्षोभाद्दुदिग्गलितप्रतिभः परो चापि प्रतिविधानेस्ख
लितस्तूष्णींविदध्यात्परमार्थतस्तु जीवस्याजीवत्वं कदाचिदपि न भवति । कुत इत्याह । दव्वामुत्तत्तसहावजाइउ तस्स दूरविवरीयं । नहि जच्चंतरगमणं जु
त्तं नभसो व जीवत्तं ॥ तस्य मुक्तात्मनो हि यस्मात्कारणान्न युक्तमिति संबंधः ॥ किं तन्न युक्तमित्याह ॥ एकस्याजीवत्वलक्षणायां जातेर्यदजीवत्वलक्षणं जा
त्यंतरं तत्र गमनं तन्न युक्तं । कथंभूतं जात्यंतरमित्याह ॥ दूरमत्यर्थं विपरीतं दूरविपरीतं ॥ कस्या दूरविपरीतमित्याह । सहावजाइउत्ति जीवत्वलक्षणा
यास्तात्त्विकी स्वभावभूता जातिः स्वभावजातिस्तस्याः किं विशिष्टा स्वभावजातिरित्याह उपमानप्रधानत्वान्निर्देशस्य द्रव्यामूर्तत्ववदिति द्रव्यत्ववदमूर्त
त्ववच्चेत्यर्थः स्वभावजातेर्दूरविपरीतं तत्कस्य यथा किं न युक्तमित्याह नभस इव जीवत्वं ॥ इदमत्र हृदयं ॥ द्रव्यत्वममूर्तत्वं च जीवस्य तावत्स्वभावभूता
जातिस्तथा च यद्दूरविपरीतं जात्यंतरं अद्रव्यत्वं मूर्तत्वं च तत्र गमनं तस्य कस्यामप्यवस्थायां न भवति एवं जीवत्वमपि जीवस्य स्वभावभूतैव जातिस्तत
स्तस्या अपि स्वभावजातेर्यद्दूरविपरीतं अजीवत्वलक्षणं जात्यंतरं तत्र गमनं मुक्तावस्थायामपि तस्य न युज्यते नत्यजीवस्य संतानभसः कदाचिदपि जीव
त्वावाप्तिर्भवति तस्मान्मुक्तोपि जीवो यथा द्रव्यत्वं मूर्तश्च न भवति तद्विपक्षस्वभावत्वादेवं जीवत्वादपि गच्छादजीवोप्यसौ कदाचिदपि न भवत्यन्यथान २६१
भः परमाण्वादीनामपि स्वस्वभावत्यागेन वैपरीत्यापत्त्याऽतिप्रसंगादिति ॥ अत्राह ॥ यद्येवं तर्हि यद्भवतैवोक्तं अजीवो मुक्तात्मा करणाभावादाका

शवदिति तत्कथं नेतव्यं ॥ अत्रोच्यते ॥ परस्य प्रसंगापादनमेव तदस्माभिः कृतं तत्करणेच्च कारणमुक्तमेव न पुनरनेन हेतुना मुक्तस्याजीवत्वं सिध्यति प्रतिबंधा
भावात्तथाहि यदि करणैर्जीवत्वं कृतं भवेद्यथा दहनेन धूमः व्यापकानि वा जीवत्वस्य करणानि यदि भवेयुर्यथा शिंशपायाः वृक्षत्वं तदा करणनिवृत्तौ भवेत्जी
वत्वनिवृत्तिर्यथाग्निवृक्षत्वनिवृत्तौ धूमशिंशपात्वयोर्न चैतदस्ति जीवत्वस्यानादिपारिणामिकभावरूपत्वेनाकृतकत्वात्तद्व्याप्यव्यापकभावोपींद्रियाणां शरी
रेणैव सह द्युत्यंत उभयस्यापि पौद्गलिकत्वान्न तु जीवत्वेन जीवस्यामूर्तत्वेनात्यंतं तद्विलक्षणत्वात्तस्मात्करणनिवृत्तावप्यनिवृत्तमेव मुक्तस्य जीवत्वमिति
॥ आह ॥ यद्येवमज्ञानी मुक्तात्मा करणाभावादाकाशवदित्यत्र धर्मिस्वरूपविपरीतसाधनाद्धेतोर्विरुद्धतोद्भाविता सा न भवद्भिरपि परिहृता । ऽतस्तत्रान्यः
किमपरमुत्तरमुत्थनामित्याशंक्याह । मुत्ताइभावउ नोवलद्धिमंतिंदियाइं कुंभाव्व । उवलंभद्दाराणिउं । ताइं जीवो तदुवलद्धा ॥ तदुवरमे वि सरणउ ॥ तव्वा
वारविरमे वलंभाउ । इंदियविसोवत्रायी पंचगवक्खो वलद्धावा ॥ अनयोर्व्याख्यापूर्ववत्केवलं प्रस्तुतभावार्थ उच्यते यदींद्रियाण्युपलब्धिमंति भवेयुस्तदा
तन्निवृत्तावप्युपलब्धिर्न भवेन्न चैतदस्ति अन्वयव्यतिरेकाभ्यां जीवस्यैवोपलब्धिमत्त्वनिश्चयादिति स्वभावभूतं च ज्ञानं जीवस्येति । कथं करणनिवृत्तौ
मुक्तस्य तन्निवर्ततइति दर्शयन्नाह । नाणरहिऊ न जीवो । सरूवऊ णुव्व मुत्तिभावेण । जं तेण विरुद्धमिदं अत्थियसो नाणरहिऊय ॥ यद्यस्माद्ज्ञानरहि
तो जीवः कदाचिदपि न भवति ज्ञानस्य तत्स्वरूपत्वाद्यथा मूर्तिभावेन रहितोणुर्न भवति तेन तस्मात्कारणाद्विरुद्धमेतदस्ति चासौ मुक्तो जीवोऽथ च ज्ञानर
हित इति नहि स्वरूपस्याभावे स्वरूपवतोऽवस्थानं युज्यते तद्व्यतिरिक्तस्य तस्यासत्वात्तथा चानंतरमेवोक्तं नहि जच्चंतरगमणं जुत्तं नभसो व जीवत्त
मिति ॥ पराभिप्रायमाशंक्य एतदेव समर्थयन्नाह । किह सो नाणसरूवो । नणुपच्चक्खाणुभूइउ नियए । परदेहम्मि विगम्मो । सपवित्तिनिवित्तिलिंगाउ ॥ न
नु कथमसौ जीवो ज्ञानस्वरूप इति निश्चीयते ॥ अत्रोत्तरमाह ॥ नन्वित्यक्षमायां ननु निजदेहे तावत्प्रत्यक्षानुभवादेव ज्ञानस्वरूपो जीवस्तज्ज्ञायते इंद्रिय
व्यापारोपरमेपि तद्व्यापारोपलब्धार्थानुस्मरणात्तद्व्यापारेपि चान्यमनस्कतायामनुपलंभाद्दृष्टश्रुतानामपि चार्थानां तथाविधक्षयोपशमपाटवात्कदाचिद्वा
ख्यानावस्थायां चेतसि स्फुरणादेतच्च स्वसंवेदनसिद्धमपि भवतः पृष्टव्यतां गतं तथा सजंतुः परदेहेपि ज्ञानस्वरूप एवेति ग्राह्यः कुतस्तथाविधप्रवृत्तिनिवृत्ति
लिंगादिति । अपि च । मुक्तावज्ञानित्वापादनेमहान्विपर्यासः कुत इत्याह । सव्वावरणावगमे । सो कह थय रो भवे य वरोव्व । तम्मयभावा २ दण्णाणित्तं न जुत्तं से ॥ सेंद्रि
यो जंतुर्देशतोप्यावरणक्षये तावत्तारतम्येन ज्ञानयुक्त एव भवति तस्य तत्तींद्रियस्य सर्वमप्यावरणं क्षीणं सनिःशेषावरणापगमे शुद्धतर एव भवति संपूर्णज्ञा
नप्रकाशयुक्त एव भवतीत्यर्थः यथा समस्ताभ्रावरणापगमे संपूर्णप्रकाशमयः सूर्यस्ततस्तन्मयभावस्य प्रकाशमयत्वस्य करणाभावेनाभावाद्धेतोः सत
स्य मुक्तस्य यदज्ञानित्वं प्रेर्यते भवता तन्न युक्तं आवारकाभावे तस्यैव प्रकर्षवतो ज्ञानप्रकाशस्य सद्भावादिति । तदेवं सति किमिह स्थितमित्याह । एवं पगास

अट्टेऊ। जीवो छिद्दावभासयत्ताऊ। किं चिम्मेत्तं भासइ। छिद्दावरणाए ईवोव्व। सुबहुयतरं वियाणइ। मुत्तो सव्वप्पिहाणविगमाऊ। अवणीयघरो व्व नरो। वि
गयावरणप्पईवो वा॥ तदेवं सति सर्वथा प्रकाशमयः प्रकाशस्वभाव एव जीवः केवलं संसार्यवस्थायां छद्मस्थः किंचिन्मात्रमवभासयति क्षीणावरणच्छिद्रै
रिंद्रियच्छिद्रैश्चावभासनात् सच्छिद्रकटकुड्यांतरितप्रदीपवदिति मुक्तस्तु मुक्तावस्थायां प्राप्तो जीवः सुबहुतरं विजानाति यदस्ति तत्सर्वं प्रकाशयतीत्यर्थः
सर्वपिधानविगमात् सर्वावरणक्षयादित्यर्थः अपनीतसमस्तगृहः पुरुष इव विगतसमस्तकटकुड्याद्यावरणप्रदीप इव वेति यो हि सच्छिद्रावरणांतरितः
स्तोकं प्रकाशयति स निःशेषावरणापगमे सुबहुतरमेव प्रकाशयति न तु तस्य सर्वथा प्रकाशाभाव इति भावः। तस्मान्नूनं तस्स परं सोक्खं नाणाणाबाहऊ इत्यादि स्थि
भंते सामाइयं सव्वं सावज्जं जोगं पच्चक्खामि इत्यादिकमुच्चारणीयं अस्य चार्थो मूलावश्यकटीकातोवसेयः अत्रापि च प्रतिपदं व्याख्यानं वक्ष्यत इति
ननु तस्योच्चारितस्य सूत्रस्य किमिह वक्तव्यमित्याह। तस्स कयपयच्छेओ। सुत्तप्फासं भणामि तत्थेव। सुत्तालावन्नासं। नएय वोच्छामि संभ
वउ॥ तस्य च सूत्रस्य कृतपदन्यासोऽहं सूत्रस्पर्शं भणिष्यामि यदनुच्चार्यते ततः सूत्रस्पर्शं भणिष्यामीत्यर्थः तथा तत्रैव सूत्रे सूत्रालापकानां
न्यासं निक्षेपं नयांश्च यथासंभवं वक्ष्यामीति गाथात्रयार्थः॥४९४॥ तत्र पदानि विच्छिद्य दर्शयन्नाह। करेमि भंते॥ सामाइयं सव्वं एय

वज्जेया। जोगं पच्चक्खामि जावज्जीवाए तिविहेण॥ इयं च निर्युक्तिगाथा॥ अत्र कश्चिदाह॥ ननु करेमि भंते सामाइयमित्यादिके सूत्रे करो
मीति पदमादौ वर्त्तते तत्कथं करणमिति दर्शितमित्यत्रोच्यते॥ भाष्यकार आह। सुत्तं करेमि भंते। भणिए धाऊ विहिउ जउ डुकृञ् करणे। तेण
करेमि वयणउ। गम्मइ करणं तदत्थोत्ति॥ सूत्रं यदुच्चारितं तत्र करोमीति भणितं यतो धातुर्डुकृञ् करणे करणार्थे विहित पठितस्तेन तस्मात्करो
मीति वचनतस्तदर्थभूतं करणमत्र गम्यते अतस्तदादौ करणं पदमिह दर्शितमिति। तत्रास्य करणपदस्य ग्राह्यार्थभेदं चाह। करणं किरियाभावो
संभवउ वेह छव्विहं तं च। नामं ठवणा दविए। खेत्ते काले य भाविय॥ करणं क्रियेति भावो वा भावमात्रमिह नान्यसंभवउ वेहत्ति अथवा संभवतो यथा
संभवमिह ग्राह्यार्थोवक्तव्य। तद्यथा॥ क्रियते तदिति करणं क्रियतेऽनेनेति करणं क्रियतेऽस्मादिति करणं क्रियतेऽस्मिन्निति वा करणमित्यादि त
च्च करणं नामादिभेदात्षड्विधमिति॥ तत्र नामस्थापनाकरणमाह। नाम नाम सव्वनाम उ व करेति नाम करणानि। ठवणा करणं नासो करणा
गारो वजो जस्स॥ नाम तिनामैव करणं नामकरणमिति सामानाधिकरण्यं द्रष्टव्यं अथवा नाम्नः करणं नामकरणं नामतो वा करणं नामक
रणं करणं तीत्पयं करणग्राह्यः प्रत्येकं योजनीयः स च योजित एव नामकरणं तिह्योपरामर्शः ठवणत्ति स्थापनाकरणमुच्यत इत्यर्थः किंत
दित्याह॥ करणस्य करणग्राह्यस्य न्यासः करणन्यासः अथवा यो यस्य करणस्य दात्रादेराकारः काष्ठादौ विन्यस्तः स स्थापनाकरणमिति
। अथ द्रव्यकरणमभिधित्सुर्द्रव्यकरणग्राह्यस्य व्युत्पादनार्थमाह। तं तेण तस्स तम्मि व। संभवउ य किरियामया करणं। दव्वस्स व दव्वेण व
। दव्वंमि य दव्वकरणंति॥ क्रियते तदिति करणमिति करणग्राह्यः कर्मसाधनः क्रियतेऽनेनेति करणसाधनः तस्य द्रव्यस्य कृतिः करणमि
ति भावसाधनः क्रियते तस्मिन्निलधिकरणसाधनः तत्र कर्मकरणाधिकरणपक्षेषु द्रव्यं च द्रव्यकरणं तत्करणं च द्रव्यकरणमिति क
र्मधारय एव समासः इत्येतत्त्रयमेव द्रष्टव्यं संभवउ च किरियामया करणमिति अथवा संभवतो यथासंभवमपरं षष्ठीतत्पुरुषादिकं
समासमपेक्ष्य किंचिन्मतं करणं सर्वकारकैर्निष्पाद्यत्वात् द्रव्यस्येति तमेव षष्ठीतत्पुरुषादिकं समासं दर्शयति द्रव्यस्य करणं द्रव्यकर
णं द्रव्येण वा करणं द्रव्यकरणं द्रव्ये करणं द्रव्यकरणमिति अस्य च द्रव्यकरणस्यागमतो नोआगमतश्चेत्यादिविचारः सुकर एव
भावद्यावद्ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यकरणं द्विधा संज्ञाकरणं नोसंज्ञाकरणं च॥ तत्र संज्ञाकरणमाह। दव्वकरणं तु सण्णा। क
रणं पेलुकरणाइयं बहुहा। सण्णा नामं ति मई। तं नो नामं जमभिहाणं। जं वा तदत्थविगले। कीरइ दव्वं तु दविणपरिणामं येलुंकरणाइनहि
तं। तद्दसकत्तं न वासद्दो। जइ न तदत्थविहीणं। तो किं दव्वकरणं जउ तेणं। दव्वं कीरइ सण्णा। करणं तिम करणरूढीउ॥ व्याख्या॥ द्रव्य

करणं तु यत्तावत्संज्ञाकरणं तत्पेल्लुकरणादिकं बहुधा बहुभेदं तत्र लाटदेशे रूतसंबंधिनी या पूणिके निप्रसिद्धा सैव महाराष्ट्रकविषये पेलु
रित्युच्यते तस्याः करणं निर्वर्तकं वंशादिमयी शिलाका पेलुकरणं आदिशब्दात्कुरकरणं याइल्कादि तथा वार्त्ताकरणं बालानामधीयाना
नां वर्त्तनकं तथा कांडुकारकाणभूपकरण्णविशेषरूपं कांडकरणं परिगृह्यते एवमन्यदपि लोके प्रसिद्धं संज्ञाविशिष्टं संज्ञाकरणं वेदितव्यं ॥
ननु ॥ संज्ञामेवोच्यते ततश्च संज्ञाकरणनामकरणयोर्विशेषो न प्राप्नोति परस्य मतिर्भवेत्तदेतच्चो नैव युक्तं ॥ यस्मात्करणमित्यक्षरत्रयात्म
कमभिधानमात्रमेव नाम न तु द्रव्यं ॥ अथवा ॥ यत्तदर्थविकलं करणार्थविकले वस्तुनि संकेतमात्रतः करणमिति नाम क्रियते तन्नामक
रणमुच्यते संज्ञाकरणं तु पेलुकरणादिकं पूणिकावलनकशिलाकादि द्रव्यं तेन श्पूणिकाकरणरूपेण यद्द्रव्यं गमनं तत्परिणामतत्स्वभा
वमभिधीयते ह्यियस्मान्नतत्पेलुकरणादि द्रव्यं तदर्थशून्यं करणशब्दार्थविकलं पूणिकादिकरणपरिणामान्वितत्वात् नापि शब्दः करणाभिधा
नमात्ररूपः इति नामकरणसंज्ञाकरणयोर्भेद इति ॥ आह ॥ ननु यदि तदर्थविहीनं करणशब्दार्थरहितं संज्ञाकरणं न भवति ततस्तर्हि किं कस्मादू
व्यकरणमेतत् किमिति द्रव्यविचारे इदं प्ररूप्यते ननु भावकरणमेवास्त्वित्यभिप्रायः ॥ उच्यते ॥ यतस्तेन पेलुकरणादिना संज्ञाकरणेन द्रव्यं पूणिका
दिकं क्रियते निवर्त्यते अतो द्रव्यस्य करणं द्रव्यकरणमिति व्युत्पत्त्यर्थमाश्रित्य द्रव्यकरणमिदमुच्यते संज्ञाकरणं त्विदं करणरूढितो भण्यते क
रणसंज्ञया लोके ऽस्य रूढत्वादित्यर्थः ॥ अथ नोसंज्ञाकरणमाह । नोसन्नाकरणं पुण । दव्वस्स रूढकरणसन्नं पि । तक्किरियाभावाउ पउगउ
वीससाउय । साइयमणाइयं वा । आजीवदव्वाण वीससाकरणं । धम्माधम्मनहाणं । अणाइसंघायणाकरणं । ॥ व्याख्या ॥ नोसंज्ञाकरणं तु
द्रव्यस्य प्रयोगतो विस्रसातश्च भवति । कथंभूतमित्याह ॥ अरूढकरणसंज्ञमप्यरूढा अप्रसिद्धा करणमिति संज्ञा यत्र तदरूढकरणमिति संज्ञा
यत्र तदरूढसंज्ञमपि अतएव करणसंज्ञायास्तत्राभावान्नोसंज्ञाकरणमुच्यते अरूढकरणसंज्ञं करणमिदमित्यर्थः । यदि करणसंज्ञात
त्र नास्ति तर्हि करणमपि कथमुच्यते ॥ इत्याह ॥ तक्किरियाभावाउत्ति सचासौ करणलक्षणक्रिया च तत्क्रिया तस्याः सद्भावादिति । इदमुक्तं भ
वति यद्यपि शरीरादीं द्रधनुरादौ करणसंज्ञा नास्ति तथापि प्रयोगविस्रसाजनितकरणक्रिया विद्यते अतस्तदपेक्षमेतेषां करणत्वं न विरु
ध्यत इति तथाजीवद्रव्याणां विस्रसाकरणं साद्यनादि च भवति तत्र धर्मास्तिकायनभसां संघातनाकरणं प्रदेशानां परस्परसं
हतावस्थानरूपकरणमनादिरूपं विज्ञेयमिति । अत्र परः प्राह । नणु करणमणाइयं च विरुद्धं भण्णए न दोसो नि । अन्नोन्नसमा ३८८
हाणं । जमिहं करणं न निव्वत्ती । ननु ॥ कृतिर्निर्वृत्तिर्वस्तुनः करणमुच्यते तच्च साद्येव भवति घटकटशकटादि करणवत्तत्र करण

मनादि चेदित्युच्यमानं विरुद्धमेव मातामे वंध्येत्यादिवचनवदिति । भण्यते अत्रोत्तरं ॥ नायं दोषो यस्माद्धर्मास्तिकायादेः प्रदेशानाम
न्योन्यं परस्परं यदभ्यग्गाधानं समाधानमनादिकालात्संहत्यावस्थानं धातूनामनेकार्थत्वात्तदेवेह करणं न पुनरपूर्वा निर्वृत्तिः अभिप्रे
तं धर्मास्तिकायादिप्रदेशानामेवं यत्संहत्यावस्थानं तस्यानादित्वं न किंचिद्विरुध्यते अनादिकालीनत्वादस्येति । अथवा धर्माधर्मनभ
सां सादिकमपि करणं भवतीति दर्शयन्नाह अहवपरपच्चयाउ । संजोगादि करणं न भाईणं । साइयमुवयाराउ । पज्जायादेसउ वावि
॥ अथवा उपचारान्नभःप्रभृतीनां करणं सादिकं विज्ञेयं । उपचारो पि कुत इत्याह ॥ परप्रत्ययाद्घटादि वस्तून्याश्रित्येत्यर्थः कथंभूतं करणं
संयोगादि आदिशब्दाद्विभागादि परिग्रहः इदमुक्तं भवति आकाशादीनां घटादिसंयोगाद्यः सादयः सपर्यवसानाश्च ततो यत्तेषां घटा
दिभिः सह संयोगादि करणं तत्सादिकं भवत्येव ॥ अथवा ॥ पर्यायरूपतया सर्वमपि वस्तु जैनानां सादिसपर्यवसितमेव भवति अतः
पर्यायादेशतः पर्यायानाश्रित्य नभःप्रभृतीनामपि करणं सादिकं बोद्धव्यमिति । तदेवमरूपिणामजीवद्रव्याणां साद्यनादि च विस्रसाक
रणमुक्तं अथ रूप्यजीवद्रव्याण्याश्रित्याह । चक्कुसमचक्कुसपि य । साइयरूवि वीससाकरणं । अब्भाणप्पभिईणं । बहुहा संघायभेय
कयं ॥ इहाभेंद्रधनुःपरमाणुप्रभृतीनां रूप्यजीवद्रव्याणां विस्रसाकरणं चक्षुर्भ्यां दृश्यते इति चाक्षुषमभ्रादीनां चक्षुरग्राह्यतीतमचाक्षुषं प
रमाणुद्व्यणुकादीनां एतद्द्विविधमपि संघातभेदकृतं बहुधा बहुभेदं सादि च भवति अभ्रादीनां तु केचित्पुद्गलाः संहन्यंते केचिद्भिद्यंते ततस्ते
षां नानारूपता भवति एवं द्व्यणुकादिस्कंधेष्वपि वाच्यं परमाणोस्तु स्कंधाद्भेदकृतमेव करणं भेदादणुरिति वचनादिति करणं चेह कृतिः स्वभा
वत एव निर्वृत्तिर्गृह्यते न पुनः क्रियत इति करणमिति ॥ उक्तं विस्रसाकरणमथ प्रयोगकरणमाह । होइ पउगो जीववावारो तेण जं विणिम्मा
णं । सज्जीवमजीवं वा । पउगकरणं तयं बहुहा । सज्जीवं मूलुत्तरकरणं मूलकरणं जमाइयं । पंचण्ह देहाणं । उत्तरमाइंदियसेव ॥ व्याख्या
॥ प्रयोजनं प्रयोगो भवति । क इत्याह ॥ जीवव्यापारस्तेन यदि निर्माणं निर्मापणं तत्प्रयोगकरणं भण्यते तच्च सज्जीवमजीवं च बहुधा भ
वति इह च सन्विद्यमानो जीवो यत्र तत्सज्जीवं प्रयोगकरणं पंचानामौदारिकादिशरीराणां द्रष्टव्यं इदं च मूलकरणोत्तरकरणभेदाद्द्वि
विधं । अतएवाह ॥ सज्जीवं मूलुत्तरकरणंति सज्जीवप्रयोगकरणं द्विभेदं । तद्यथा ॥ मूलकरणं उत्तरकरणं च तत्र मूलकरणं जमाइ
यंति पंचानामपि शरीराणां यदाद्यं पुद्गलसंघातकरणं तन्मूलकरणं वेदितव्यं उत्तरमाइंदियसेचत्ति उत्तरकरणत्वादित्रिकस्यैव आद्याना
मौदारिकवैक्रियाहारकशरीराणां भवति न तु तैजसकार्मणयोरित्यर्थः । नन्वस्याद्यशरीरत्रयस्य शिरउरःप्रभृतीन्यंगानि करचरणांगु

विशेषा॰वि॰ ङ्गुल्यादीनि चोपांगानि भवंति तत्रापि कियदिह मूलकरणं कियच्चोत्तरकरणमिति विभागेन कथ्यतामित्याह ॥ मूलकरणं शिरोउरसापट्ठीबाहो
३८६ दूरोरुनिम्माणं। उत्तरमवसेसाणं। करणं केसाइकम्मं च ॥ इहौदारिकादिशरीरत्रयस्य शिर उरः पृष्ठि बाहू द्वे उदरोरू इत्यष्टलक्षणानामष्टाना
मंगानां निर्माणं निःपादनं तन्मूलकरणं अवशेषाणां तु कर्णचरणांगुल्यादीनामुपांगानां यन्निर्माणं तदुत्तरकरणं तथौदारिकवैक्रियश
रीरयोः केशनखदन्तादिसंस्काररूपं यत्केशादिकर्म तदपि तयोरुत्तरकरणमिति। अपरमप्यौदारिकवैक्रियशरीरयोरुत्तरकरणं दर्शयन्ना
ह। संठवणमवोगाविहं। दोण्हं पढमस्स भेसयाईहिं पि। वन्नाईणं करणं। परिकम्मं तदुपयनथि विनष्टकर्णाद्यवयवसंधानादिरूपमौदारि
के केशादिकल्परचनरूपं तु संस्थापनं वैक्रिये इत्येवं द्वयोराद्यशरीरयोः संस्थापनं संस्करणमनेकविधं भवति प्रथमस्य पुनरौदारिकशरी
रस्यान्योपि विशेषः। क इत्याह ॥ भेषजैरपि लक्षपाकतैलादिभिर्यद्वर्णादीनां विशेषापादनं तदुत्तरकरणं तृतीयत्वाहारकशरीरे केशन
खदंतादिपरिकर्म नास्त्येव स्वरूपेणैव विशिष्टत्वात्प्रयोजनाभावाच्चेति। अथवा प्रकारान्तरेणापि त्रिविधं जीवप्रयोगकरणं विज्ञेयं
कथमित्याह। संघायणपरिसाडण। मुभयं करणमहव सरीराणं। आदाणमुयणसमगंतदंतरालं च कालो सिं ॥ अथवौदारिकशरी
राणां संघातनं परिशाटनं संघातपरिशाटोभयलक्षणमुभयं चेत्येवं त्रिविधं करणं विज्ञेयं तत्र पूर्वापरविकमौदारिकादिशरीरं परित्यज्य
अग्रेतनभवे पुनरपि तद्ग्रहीतां यत्पुद्गलानां संघातनं ग्रहणं स संघातः यस्तु तदौदारिकादिशरीरं परित्यजतश्चरमसमये सर्वथा तत्पुद्गलानां
परित्यागः सृशाट रुजावशरणगत्यवसादनेष्विति धातोः पुद्गलानां परिशाटनमवसादनं परिशाटः संघातपरिशाटसमययोश्चापांतराल
समयेषु सर्वेष्वपि संघातपरिशाटोभयं दृष्टव्यं सर्वत्र पूर्वगृहीतपुद्गलानां मोचनादन्येषां च ग्रहणादिति तत्राद्यशरीरत्रयस्य संघातपरिशा
टोभयलक्षणं त्रिविधमपि करणं भवति तैजसकार्मणयोस्तु संघातो न भवत्येव परित्यक्तयोस्तयोः पुनर्ग्रहणाभावादिति ॥ अथ संघाता
दीनां कालप्रमाणमभिधित्सुराह ॥ सिंति एतेषां संघातपरिशाटोभयानां कालोऽभिधीयते कियानित्याह आयाणमुयणसमउत्ति
आदानमौदारिकादिशरीरपुद्गलानां प्रथमं ग्रहणं संघातनं संघात इत्यर्थः अयमेकमेव समयं भवति ततः परं संघातपरिशाटो
भयप्रवृत्तेः मोचनं पुद्गलानां परिशाटनं परिशाटः सोप्येकमेव समयं भवति तदन्तरालं संघातपरिशाटोभयलक्षणमिहगृह्य
ते तस्य कालो वक्ष्यत इति शेषः चशब्दात्संघातादीनामंतरालकालश्च वक्ष्यत इति हृदयमिति ॥ तत्रौदारिकशरीरस्य संघातपरिशाटो ३८६
भयकालमाह। खुड्डागभवग्गहणं। तिसमयहीणं जहन्नमुभयस्स। पल्लतियं समऊणं। उक्कोसोरालकालो यं ॥ अत्र संघातपरिशाटो

MEMORIAL

भयस्य जघन्यकाले प्रतिपाद्ये विग्रहे योत्पादनीयो ॥ तत्राह। दो विग्गहम्मि समया। समओ संघायणाए तेसाहूणं। खुड्डागभवग्गहणं। सव्वजह
न्नठिईकालो इह षट्पञ्चाशदधिकावलिकाशतद्वयमानमायुष्को जघन्यस्थितिरूपं क्षुल्लकभवग्रहणमुच्यते तथा च वृद्धोक्तं दोयसयाइं छ
प्पन्ना आवलियाणं तु खुड्डभवमाणं जियरागदोसमोहेहिं जिणवरेहिं विणिद्दिट्ठं इदं च क्षुल्लकभवग्रहणं द्वाभ्यां विग्रहसमयाभ्यामेकेन
च संघातसमयेन न्यूनं संघातपरिशाटलक्षणस्योभयस्य जघन्यस्थितिमानं जघन्यतोपि संघातपरिशाटोभयमेतावंतं कालं भवतीत्यर्थः।
। अत्राह कश्चित् ॥ ननु विदिसाउ दिसिं पढमे बीए पविसइ लोगमज्झम्मि तइए उप्पिं धावइ नाडिवहिं जायइ चउत्थे इति वचनाद्यदा अधस्त्रसनाड्या
बहिर्देशादूर्द्धलोके त्रसनाड्या बहिरेव निगोदादिजीवश्चतुर्भिः समयैरुत्पद्यते तदा विग्रहगतावपांतरालगतौ आद्यास्त्रयः समयाश्चतुर्थ
स्तु संघातसमय इत्येवं चतुर्भिरपि समयैर्न्यूनं क्षुल्लकभवग्रहणं संघातपरिशाटोभयस्य जघन्यकालः प्राप्नोति तत्किमितीह त्रिभिरेव समयैर्न्यू
नं क्षुल्लकभवग्रहणं जघन्यस्तत्काल उक्तः। सत्यं ॥ किं त्वस्यां चतुःसमयायां विग्रहगतौ य आद्यसमयः स इह परभवप्रथमसमयो न विवक्षितः
किं तु पूर्वभवचरमसमय एव पूर्वभवशरीरस्य तत्र मुच्यमानत्वान्मुच्यमानं चामुक्तमिति व्यवहारनयमताश्रयणादिति अथवात्र सजीवसं
बंधिन्येव द्विसामयिकांतरालगतिर्विवक्षिता त्रसजीवाश्चोत्कृष्टतोपि तृतीयसमये उत्पत्तिस्थानं प्राप्नुवंतीत्यदोष इति नावद्यमवगच्छामः तत्त्वं तु बहु
श्रुता विदंतीति इह चैतानि क्षुल्लकभवग्रहणान्येकस्मिन्नुच्छ्वासनिःश्वासे सातिरेकाणि सप्तदश मंतव्यानि। यत उक्तं ॥ खुड्डागभवग्गहणा सत्तर
स हवंति आणुपाणम्मीत्यादि ॥ अथ पल्लतियमित्याद्युत्कृष्टसंघातपरिशाटोभयकालभावनामाह। उक्कोसो समऊणो। जो सो संघायणा
समयहीणो। किह न दुसमयविहीणो। साडणसमएण वणीयम्मि। इह यो देवकुर्वादिषूत्पन्न औदारिकशरीरस्य प्रथमसमये संघातं कृत्वा त्री
णि पल्योपमानि उत्कृष्टमायुः परिपाल्य म्रियते तस्य संघातसमयन्यूनानि त्रीणि पल्योपमानि उत्कृष्टसंघातपरिशाटोभयकालः प्राप्त
तैः सूत्राह ॥ ननु कथमेकेनैव समयेन न्यूनोयमभिधीयते यावता यथा शरीरग्रहणप्रथमसमये सर्वसंघातस्तथा तन्मोक्षसमये सर्वपरि
शाटोपि भवति ततस्तस्मिन्नपि परिशाटसमयेऽपनीते समयद्वयहीन एवासौ प्राप्नोतीति। अत्र प्रतिविधित्सुराह। भण्णइ भवचरिमंमि वि
समये संघायसाडणो चेव। परभवपढमे साडण। मउ तदूणो न कालोत्ति। भण्यते अत्रोत्तरं भवस्य चरमेपि समये संघातपरिशाटोभयमे
व प्रवर्तते न तु शरीरपुद्गलानां केवलं परिशाटनमेव तत्परभवस्य प्रथमसमये एव मंतव्यं परभवपढमे साडणमिति निश्चयनयमताश्र

णादतस्तेन परिशाटसमयेनन्यूनं संघातपरिशाटोभयकालो न भवतीति॥ अत्र व्यवहारनयवादी प्रेरयति। जइ परपढमे साडो। निव्विग्गहओ य तंमि संघा
ओ। नणु सव्वसाडसंघायणाउ। समयम्मि विरुद्धाउ॥ ननु निश्चयनयवादिन्यदि परभवप्रथमसमये शाटोऽभ्युपगम्यते निर्विग्रहतश्चऋजुश्रेण्यैवोत्पद्य
मानस्य तस्मिन्नेव समये संघातश्चेष्यते तदानन्वहो सर्वशाटसंघातौ युगपदेकस्मिन्समये विरुद्धौ न च प्राद्गुतः सर्वशाटस्य पूर्वभवशरीरसंबंधित्वा
त्सर्वसंघातस्य भवांतरगतशरीरविषयत्वाद्भवद्वयशरीरयोर्युगपदसत्वस्य दूरविरुद्धत्वादिति॥ निश्चयनयवादी प्रतिविधानमाह॥ जम्हा विगच्छमा
णं। विगयं उप्पज्जमाणमुप्पन्नं। तो परभवादसमए। मोक्खादाणाण्णविरोहो॥ यस्मात्पूर्वभवशरीरं परभवाद्यसमये विगच्छद्विगतं उत्पद्यमानं त्वग्रे
तनभवशरीरमुत्पन्नं क्रियाकालनिष्ठाकालयोरभेदात्ततस्तत्र मोक्षादानयोरिष्यमानयोर्न कश्चिद्विरोधो मुच्यमानस्य मुक्तत्वेनैकस्यैवाग्रेतनभव
शरीरस्य तत्र सद्भावादिति। अपि च मरणसमयः परभवाद्यसमयत्वेनाभ्युपगंतव्य एवान्यथा दोषसंभवादित्याह। चुइ समये नेहभवो। इहभवदेह
विमोक्खउ जहातीए। जइ न परभवो वि तहिं। तो सो को होउ संसारी॥ च्युतिसमये इहभवशरीरायुःपुद्गलसर्वपरिशाटसमये तावदिहभवो न भवति
इहभवदेहस्यायुषश्च मुच्यमानत्वात्मुच्यमानस्य च सर्वथा विमोक्षात्क्रियाकालनिष्ठाकालयोरभेदादिति। जहातीते त्ति॥ यथा अतीतजन्मनीह
भवो नास्त्यत्र सदेहाभावात्तथा च्युतिसमयेप्यसौ न भवत्येव इहभवदेहाभावस्याविशेषादित्यर्थः एवं च सति यदि तस्मिंश्च्युतिसमये परभवोपि भ
वतां नाभ्युपगम्यते तदासौ संसारी जीवः को भवतु इहभवत्वस्य तावत्कृतएव निषेधात्परभवत्वस्य तु त्वयाप्यनभ्युपगम्यमानत्वात्संसारित्वे न च मुक्त
व्यपदेशाभावान्निर्व्यपदेश एवासौ स्यादिति। व्यवहारनयवादी प्राह। नणु जह विग्गहकाले। देहाभावे वि परभवग्गहणं तह देहाभावम्मि विहो
ज्जेहभवो वि को दोसो॥ ननु यथा विग्रहकाले विग्रहे परभवगमनकाले पारभविकदेहाभावेपि जीवस्य परभवग्रहणं नारकादिपारभविकव्य
पदेशः तथा च्युतिसमयेपीहभवशरीराभावेपीहभवोयदि भवेदिहभवव्यपदेशोपि यदि स्यात्तर्हि को दोषो न कश्चिन्न्यायस्य समानत्वादितिनि
श्चयवादी प्रतिविधानमाह। जं चिय विग्गहकालो। देहाभावे वि तो परो वि सो। चुइसमए उ न देहो। न विग्गहो जइ स को होउ॥ हंत यत एवायांतरालग
तो जीवस्य विग्रहकालो न तु पूर्वभवकालः तत एव देहाभावेप्यसौ परभवः परभवसंबंधित्वेन व्यपदेश्यः परभवायुष उदीर्णत्वात्पूर्वभवायुषस्तु प्रा
गेव निर्जीर्णत्वान्नि राप्युषश्च जीवस्य संसारे असंभवादिति च्युतिसमये तु न पूर्वभवदेहः तस्य त्यक्तत्वान्नापि विग्रहो वक्राभावाद्यद्येवं तर्हि स च्युति
समये इह पारत्रिकभवसमग्रानामध्यात्को भवत्विति कथ्यतां ननु प्रोक्तं मया यथा विग्रहकाले परभवदेहाभावेपि परभवस्तथा च्युतिसमये

इहभवदेहाभावेपि इहभवोस्तु कोऽपि दोषः। सत्यमुक्तमिदं त्वया॥ ननु युक्तं दृष्टांतदार्ष्टांतिकयोर्वैषम्याद्यथाहि च्युतिसमये इहत्यदेहाभावस्तथाइह
त्यायुषोप्यभाव एव तस्यापि निर्जीर्यमाणस्य तत्र निर्जीर्णत्वात्ततः कथमसौ च्युतिसमय इहभवो भवतु इहत्यायुष्कोदयाभावाद्विग्रहकाले
तु युक्तं परभवत्वं परभवायुष्कोदयसद्भावादिति तस्मात्परभवश्च्युतिसमयः परभवायुष्कोदयभावाद्विग्रहकालवदन्यथा तस्य निर्व्यपदेशा
त्वप्रसंगादतः परभवपढमे साडमिति स्थितं। तदेवमौदारिकसंघातपरिशाटोभयानां कालउक्तोऽथ तेषामेवांतरकालमभिधित्सुः संघा
तस्य तावज्जघन्यमंतरकालमाह। संघायंतरकालो। जहन्नउ खुड्डयं तिसमऊणं। दो विग्गहम्मि समया। तइउ संघायणासमउ। ते हीणो खुड्डभवो। धुणि
उं परभवमविग्रहेणेव। गंतूणापढमसमये। संघायउ स विन्नेउ॥ एकदा औदारिकशरीरस्य संघातं कृत्वा पुनस्तत्संघातं कुर्वतस्त्रिभिः समयै
र्न्यूनं क्षुल्लकभवग्रहणं जघन्योऽतरकालः प्राप्यते स च यदा कश्चिद्द्वींद्रियादिर्जीवो मृतः समयद्वयं विग्रहे कृत्वा क्षुल्लकभवग्रहणायुष्केषु पृ
थिव्यादिषूत्पन्नस्तृतीयसमये औदारिकस्य संघातं कृत्वा यथोक्तैस्त्रिभिः समयैर्न्यूनं क्षुल्लकभवग्रहणं संघातपरिशाटोभयं विधाय मृतो नि
र्विग्रहेणैव ऋजुश्रेण्या अग्रेतनभवे पृथिव्यादिषूत्पन्न औदारिकशरीरस्य संघातं करोति तदानस्य जंतोरौदारिकशरीरसंघातस्य त्रिसमयन्यून
क्षुल्लकभवग्रहणलक्षणो जघन्योऽतरकालो विज्ञेयः इह च जघन्यांतरकालस्य प्रतिपादयितुं प्रस्तुतत्वात्प्रथमं विग्रहेणाग्रेतनभवे तु निर्विग्रहे
णोत्पादितोऽन्यथा मध्यमांतरकालप्रसंगादिति। अथौदारिकस्यैवोत्कृष्टं संघातांतरकालमाह। उक्कोसं तेत्तीसं। समया हियपुव्वकोडिसहि
याइं। सो सागराइ वमाइं। अविग्गहेणेव संघायं। काऊण पुव्वकोडिं। धरिउं सुरजेट्ठमाउयं तत्तो। भोत्तूण इहं तइए। समए संघायर्यतस्स॥ व्या
ख्या॥ सागरोपमाणीत्यस्य व्यवहितः संबंधः ततश्चायमर्थस्त्रयस्त्रिंशत्सागरोपमाणि समयाधिकपूर्वकोट्याभ्यधिकान्यौदारिकसंघातांतरमुत्क
ष्टं भवतीति गम्यते॥ कथं पुनरयं संघातांतरकालो लभ्यत इत्याह॥ स उत्कलक्षणः कालइह तृतीयसमये संघातयतः औदारिकशरीरस्य
संघातं कुर्वतो लभ्यत इति द्वितीयगाथायां संटंकः किं कृत्वा इत्याह॥ कुतश्चित्पूर्वभवादविग्रहेणैतावन्मनुष्यभवे समागत्य प्रथमसमये
संघातं कृत्वा पूर्वकोटिं धृत्वा पूर्वकोटिप्रमाणमिहायुष्कं परिपाल्येत्यर्थः ततश्च ज्येष्ठमायुष्कं त्रयस्त्रिंशत्सागरोपमलक्षणमनुत्तरसुरेष्वनुभूय
ततश्च्युत्वा समयद्वयं विग्रहे विधायेति अत्र च विग्रहसत्कसमयद्वयमध्यादेकः प्राक्तनपूर्वकोट्यां प्रक्षिप्यते एवं च सति त्रयस्त्रिंशत्साग
रोपमाणि समयाधिकपूर्वकोट्यधिकानि उत्कृष्टमौदारिकशरीरसंघातांतरं सिद्धं भवति अस्य चौघलक्षणत्वात्पूर्वकोट्यायुषो मत्स्य
स्याप्यप्रतिष्ठानं नरके समुत्पद्येह पुनर्मत्स्येषूत्पन्नस्येदमंतरं मंतव्यमिति। अथौदारिकस्यैव संघातपरिशाटोभयस्य जघन्यमुत्कृष्टं चांत

रकालमाह । अंतरं जहन्नं । समउ निव्विग्गहेण संघाए । परमं सुत्तिसमयाई तेत्तीसं उदहिनामाई ॥ संघातपरिशाटोभयस्यैकः समयो जघन्य
मंतरं भवति कुनिर्विग्रहेण संघाते सति । इदमुक्तं भवति ॥ इह औदारिकशरीरी आयुःपर्यंतं यावत्संघातपरिशाटोभयं कृत्वा अग्रेतनभवे
विग्रहिणोत्पद्यौदारिकस्यैव संघातं कृत्वा पुनरपि तदुभयमारभते तस्यैव एकः संघातसमयो जघन्यमुभयांतरं भवति परमं तूत्कृष्टमे
तदंतरं सह त्रिभिः समयैर्वर्तंते सति समयानि त्रयस्त्रिंशदुदधिनामानि सागराभिधानानि सागरोपमाणि भवंतीत्यर्थः । कदा पुनरेतानि प्राप्य
तद्व्याह । अणुभविउं देवाइसु । तेत्तीसमिहागयस्स तइयम्मि । समये संघायउ । दुविहं सा ढंतरं वोछं ॥ देवादिष्वादिशब्दादप्रतिष्ठाने वा त्रय
स्त्रिंशत्सागरोपमाण्यनुभूयेहागतस्य तृतीयसमये संघातपतो लभ्यंते ॥ अयमत्र भावार्थः ॥ इह कश्चिन्मनुष्यादिः स्वभवचरमसमये संघात
परिशाटोभयं कृत्वा अनुत्तरस्करेष्वप्रतिष्ठाने वा यदा त्रयस्त्रिंशत्सागरोपमान्यनुभूय पुनरपीह समयद्वयविग्रहेणागत्य तृतीयसमये औ
दारिकस्य संघातं करोति कृत्वा ततउभयमारभते तदाद्यौ विग्रहसमयावेकश्च संघातसमयो देवादिभवसंबंधिनां च त्रयस्त्रिंशत्सागरोपमाण्यु
त्कृष्टोभयांतरे प्राप्यंत इति ॥ तदेवमौदारिकविषयस्य संघातस्योभयस्य जघन्यमुत्कृष्टं चांतरमुक्तमथ परिशाटस्य तदभिधित्सुराह ॥
दुविहमित्यादि ॥ द्विविधं जघन्यमुत्कृष्टं च शाटस्यांतरं वक्ष्यत इति । यथाप्रतिज्ञातमेवाह । खुड्डागभवग्गहणं । जहन्नमुक्कोसयं च तेत्तीसं तं सागरोव
माइं । संपुन्ना पुव्वकोडीय ॥ इहौदारिकशाटस्य २ चांतरं जघन्यतः क्षुल्लकभवग्रहणं भवति उत्कृष्टं तु तत्शाटांतरं पूर्वकोट्यधिकानि त्रयस्त्रि
शत्सागरोपमाणि भवंति ॥ अत्राह ॥ नन्वेतन्नावगच्छामो जघन्यपक्षे समयोनक्षुल्लकभवग्रहणप्राप्ते उत्कृष्टपक्षेपि समयोनपूर्वकोट्यधिकत्रय
स्त्रिंशत्सागरोपमावाप्तेरिति ॥ तथाहि ॥ यः क्षुल्लकभवग्रहणायुष्केषु वनस्पत्यादिषूत्पद्यते स परभवपढमे साडणमिति वचनात्तस्य क्षुल्लक
भवग्रहणस्याद्यसमये प्राक्तनौदारिकशरीरस्य सर्वपरिशाटं करोति ततः क्षुल्लकभवग्रहणपर्यंते मृतः पुनरपि परभवाद्यसमये औदारिक
स्य सर्वशाटं विधत्ते इत्येवमौदारिकशाटस्य २ चांतरे जघन्यतः समयोनं क्षुल्लकभवग्रहणं प्राप्नोति उत्कृष्टपक्षेपि संयतमनुष्यः कश्चि
न्मृतो देवभवाद्यसमये औदारिकस्य सर्वशाटं कृत्वा त्रयस्त्रिंशत्सागरोपमाण्यनुत्तरस्करेष्वायुरतिवाह्य च पूर्वकोट्यायुष्केषु मनुष्येषूत्पद्य
मृतो यदा पुनरपि भवाद्यसमये औदारिकस्य सर्वशाटं करोति पूर्वकोटिमध्याच्च समयो देवभवायुष्के क्षिप्यते तदा औदारिकस्य शाटस्य २ ३८८
चांतरे उत्कृष्टतः समयोनपूर्वकोट्यधिकानि त्रयस्त्रिंशत्सागरोपमाणि लभ्यंते तत्कथमिदं नेतव्यमिति । सत्यमुक्तं ॥ किंत्विह क्षुल्लकभवग्र
हणाद्यसमये परिशाटो नेष्यते किंतु पूर्वभवचरमसमये विगच्छदूषितमिति व्यवहारनयमताश्रयणाद्देवभवाद्यसमयेपि परिशाटो न क्रिय

ते किंतु संयतभवचरमसमये अत्रापि व्यवहारनयमताश्रयणात्तत एवं जघन्यपदे उत्कृष्टपदे चादोष्य व्यवहारनयमताश्रयणे पर्यंते तु निश्च
यनयमतांगीकारे सर्वमपि भाष्यकारोक्तमविरोधेन गच्छतीति विद्वद्व्याचक्षते तत्त्वं तु गंभीरभाषितानां परमगुरव एव विदंति । तदेवमौदारि
कसंघातपरिशाटोभयाभयानां कालोंतरं चोक्तं अथ वैक्रियशरीरस्य जघन्यं संघातकालमाह । वेउव्विय संघाउ । समउ सो पुण विउव्वणा
ईए । उरालियाणमहवा । देवाईणाइगहणम्मि ॥ वैक्रियशरीरस्य संघातो जघन्यतः एकसमयः स चौरालियाणंति औदारिकशरीरि
णामुत्तरवैक्रियलब्धिमतां तिर्यग्मनुष्याणां विकुर्वणामुत्तरवैक्रियकरणं तस्यादिर्विकुर्वणादिस्तस्मिन्विज्ञेयः तिर्यग्मनुष्यस्य वाउ
त्तरवैक्रियं कुर्वत एकस्मिन्प्रथमसमये संघातो भवतीत्यर्थः अथवा देवादीनां देवनारकाणां वैक्रियशरीरग्रहणस्यादावेकस्मिन्समये संघा
तो भवतीति ॥ अथोत्कृष्टं वैक्रियसंघातकालमाह । उक्कोसो समयदुगं । जो समय उ विउव्विउमउ विइए । समए सुरेसु वच्चइ । निव्विग्गहउ ताइ
यं तस्स ॥ उत्कृष्टः संघातकालः समयद्वयं भवति तद्व्यतस्मिन्ति तच्च समयद्वयं तस्य भवति य औदारिकशरीरी समयमेकमुत्तरवैक्रियं कृत्वा
मृतो द्वितीयसमये निर्विग्रहेणर्जुगत्या सुरेषु व्रजति तत्र च प्रथमसमये वैक्रियस्य संघातं करोति तस्यैको वैक्रियसंघातसमयोऽन्यद्वि
तीयस्तु देवसंबंधीति ॥ अथ वैक्रियस्यैव जघन्यमुत्कृष्टं च संघातपरिशाटोभयकालमाह ॥ उभय जहन्नं समउ । सो पुण दुसमयविउव्वि
यमयस्स । परममपराईसंघाय । समयहीणाइं तेत्तीसं ॥ वैक्रियसंघातपरिशाटोभयस्य च जघन्यतः समयो भवति स च समयः समय
द्वयं वैक्रियं कृत्वा मृतस्य द्रष्टव्यः । इदमुक्तं भवति ॥ केनचिदौदारिकशरीरिणोत्तरवैक्रियमारब्धं स च तत्र प्रथमसमये संघातं द्वितीयसम
ये तु संघातपरिशाटोभयं कृत्वा यदा म्रियते तदा तस्य संघातपरिशाटोभयस्य समयलक्षणो जघन्यकालः प्राप्यत इति परमुत्कृष्टमुभयस्य स्थिति
मानं तरीतुं लंघयितुमशक्यान्यतराणि सागरोपमाणि एकेन संघातसमयेन हीनानि त्रयस्त्रिंशदनुत्तरसुरेष्वप्रतिष्ठाने नरके वा बोद्धव्यानी
ति ॥ तदेवं वैक्रियसंघातस्योभयस्य च कालउक्तः ॥ परिशाटनस्य त्वेकसमयलक्षणः कालः स्वयमेव द्रष्टव्यः अथ वैक्रियसंघातस्य जघन्य
मंतरकालमानमाह । संघायंतरसमउ । समयविउव्विय मइस्स तइयम्मि । सो दिवि संघायमउ । तइयए व मयस्स तइयम्मि ॥ वैक्रियसंघातस्य च २
जघन्यमंतरं समयो भवति स च औदारिकशरीरिणः समयमेकमुत्तरवैक्रियं कृत्वा मृतस्य द्वितीयं समयं विग्रहे विधाय तृतीयसमये दिवि
देवलोके संघातयतो वैक्रियशरीरसंघातं कुर्वतो विज्ञेयः अत्र हि प्राक्तनोत्तरवैक्रियसंघातस्य देववैक्रियसंघातस्य च विग्रहसमयोंतरं भ
वति अथवा तस्यौदारिकशरीरिणः समयद्वयमुत्तरवैक्रियं कृत्वा तृतीयसमये मृतस्य निर्विग्रहेण च दिवि समुत्पन्नस्य तस्मिन्नेव तृतीयसम

विशेषा·वि· यदा वैक्रियसंघातं कुर्वत एकः संघातपरिशाटोभयसमयः संघातान्तरं भवतीति। अथ वैक्रियसंघातपरिशाटोभयस्य च जघन्यमंतरकालमा
३८० ह उभयस्स चिरविउव्विय।गयस्स देवस्स विग्गहगयस्स। साडस्संतमुहुत्तं।तिण्हवि तरुकालमुक्कोसं॥ उभयस्य वैक्रियस्य संबंधिनः संघातप
रिशाटलक्षणस्य समयस्यैको जघन्यमंतरं भवतीत्यध्याहारः। कस्य पुनस्तोदित्यवाप्यतद्इत्याह॥ चिरमंतर्मुहूर्तमानं कालं विकुर्व्य वैक्रियवपुषि
स्थित्वा मृतस्य देवेषु विग्रहगतस्य जंतोः संघातसमयोंऽतरे प्राप्यते। अयमत्र भावार्थः। य औदारिकशरीरी वैक्रियलब्धिमानुपकल्पितवैक्रि
यशरीरः परिपूर्णतिर्यङ्मनुष्यवैक्रियशरीरस्थितिकालं यावत्संघातपरिशाटौ विधाय म्रियते अविग्रहेण च सुरालये समुत्पद्य प्रथमस
मये वैक्रियसंघातं करोति द्वितीयादिसमयेषु तु संघातपरिशाटौ तत्संबंधिन उभयस्य उभयस्य चांतरे स एवानंतरोक्तः संघातसमयो भ
वतीति॥ ननु॥ यद्येवं चिरविउव्वियमयस्सेत्यत्र चिरग्रहणमपार्थकमिहहि मनुष्यादिषु यश्चिरं स्तोकं वा कालं वैक्रियसंघातपरिशाटौ कृत्वा
अविग्रहेणादिवि समुत्पद्यते तेनैव प्रयोजनं किं चिरशब्दविशेषणेन॥ सत्यं॥ किंतु प्रथमसमयेपि मरणनिषेधार्थमिदमुक्तं यदिवात्र
नंतरं वैक्रियसंघातांतरं भावयतासप्रयोजनत्वाद्द्वितीयादिसमयेष्वाकस्मिकमसमाप्तवैक्रियस्यापि मरणमुक्तमत्र त्वसमाप्तवैक्रियस्यापि
मरणोपदर्शनेन न किंचित्प्रयोजनमिति ख्यापनार्थं चिरग्रहणेन परिपूर्णांतर्मुहूर्तिकमनुष्यादिवैक्रियस्थितिकालानुज्ञापिकृतवानाचार्य
इत्यदोषः॥ साडस्संतमुहुत्तोत्ति॥ एकदा वैक्रियसर्वशाटं कृत्वा पुनरपि तत्सर्वशाटं कुर्वतोऽन्तर्मुहूर्तं जघन्यमंतरं भवति। कथमिति चेदुच्य
ते॥ कश्चिदौदारिकशरीरी वैक्रियलब्धिमान् क्वचित्प्रयोजने वैक्रियं शरीरं कृत्वा सिद्धकार्यपर्यंते तस्य सर्वपरिशाटं विधाय पुनरौदारिक
शरीरमाश्रयति तत्र चांतर्मुहूर्तं स्थित्वा पुनरप्युत्पन्नप्रयोजने वैक्रियं करोत्यंतर्मुहूर्तं च तत्र स्थित्वा पुनरप्यौदारिकमागच्छन् वैक्रियस्य सर्व
शाटं करोत्येवं च सति वैक्रियशरीरशाटस्य चांतरे औदारिक वैक्रियशरीरगतमंतर्मुहूर्तद्वयं भवति अनेन चांतर्मुहूर्तद्वयेनापि बृहत्तर
मेकमेवांतर्मुहूर्तं विवक्षितमतो युज्यते जघन्यं वैक्रियशाटांतरमंतर्मुहूर्तमिति तदेवं वैक्रियसंघातोभयशाटानां जघन्योऽन्तरकाल
उक्तोऽथ त्रयाणामप्येतेषामुत्कृष्टमंतरकालमाह॥ तिण्हवीत्यादि॥ इह यदा कश्चिज्जीवो वैक्रियशरीरस्य संघातादित्रयं कृत्वा वनस्पतिषूत्प
द्यते तत्र चानंतकालमतिवाह्य तत उद्वृत्तः पुनरपि कश्चिद्वैक्रियशरीरमासाद्य तत्संघातादित्रयं करोति तदा तत्संबंधिनः संघातपरिशाटोभयल ३८१
क्षणस्य त्रयस्यापि स एवानंतोत्सर्पिण्यवसर्पिणीरूपो वनस्पतिकालोऽन्तरं भवतीति। अथाहारकशरीरसंघातपरिशाटतदुभयानां कालो
अंतरं च वक्तव्यं तत्राह। आहारोभयकालो। दुविहो अंतरं तियं जहन्नंति। अंतोमुहुत्तमुक्कोसं।मद्धपरियट्टमूणं च॥ आहारकशरीरसंघातः

परिशाटश्च प्रत्येकं सामायिको भवति सच सुगमत्वाद्गाथायां न लिखितः स्वयमेव तु द्रष्टव्य इति संघातपरिशाटोभयकालस्तु द्विविधोऽज
घन्यत उत्कृष्टतश्च संघातपरिशाटोभयानां यदंतरत्रिकं अंतरकालत्रयं जघन्यं तदेतत्सर्वमंतर्मुहूर्तकालमानमवगंतव्यं केवलं तदेवांतर्मु
हूर्तं लघुबृहत्त्वतारतम्येनावसेयमिति आहारकशरीरं ह्यंतर्मुहूर्तकालस्थितिकमेव भवत्यतस्तत्संबंधिनः संघातपरिशाटोभयस्य जघ
न्यत उत्कृष्टश्चांतर्मुहूर्तकालभावित्वं सिद्धमेवेति एकदा कृत्वाहारकशरीरं प्रयोजनसिद्धौ परित्यज्य चतुर्दशपूर्वधरो जघन्यतोऽं
तर्मुहूर्तात्पुनरप्युत्पन्नप्रयोजनस्तत्करोत्यतस्तद्गतसंघातपरिशाटोभयानां भवति जघन्यमंतर्मुहूर्तमिति उत्कृष्टं त्वंतरं त्रयाणामपि संघा
तपरिशाटोभयानां किंचिन्न्यूनार्धपुद्गलपरावर्तरूपं भवति इदं च यदा चतुर्दशपूर्वधर आहारकशरीरं कृत्वा प्रमादात्प्रतिपतितो वनस्प
त्यादिषु यथोक्तकालं स्थित्वा पुनरपि चतुर्दशपूर्वधरत्वमवाप्याहारकशरीरं करोति तस्य द्रष्टव्यमिति॥ अथ तैजसकार्मणविषयं संघा
तादिविचारं चिकीर्षुराह। तेयाकम्माणं पुणो।संताणाणाईउ न संघाउ। भव्वाण हाज्य साडो। सेलेसीचरमसमयम्मि। उभयं अणाइनिहणं
। संतं भव्वाण होज्ज केसिंचि। अंतरमणाइभावा। अच्चंतविउगउ णेसिं॥ व्याख्या॥ तैजसकार्मणयोः पुनः संघातस्तावन्न भवत्येव तयोरना
दिकालसंतानेन प्रवृत्तत्वात्संघातस्तु उत्पद्यमानशरीरप्रथमसमयत्वादिति प्रागप्युक्तं सर्वपरिशाटोपि तैजसकार्मणयोरभव्यानां न भ
वत्येव तस्य मुच्यमानशरीरविषयत्वात्तयोश्च तत्त्यागासंभवात् भव्यानां तु केषांचित्सिद्धिगमनयोग्यानां शैलेशीचरमसमये भवेच्छाटः स च सामायिको द्रष्ट
व्यः उभयं तु संघातपरिशाटलक्षणं आदिश्च निधनं चादिनिधने न विद्येते आदिनिधने यस्य तदनादिनिधनमेवाभव्यानां भवति तत्त्या
गाभावात् भव्यानां तु केषांचित्सिद्धिगमनसमये सांतमुभयं भवेत्तदानीं सर्वथा तत्त्यागादंतरं णेसिंति एतयोर्न भवत्येव अभव्यानामनादि
निधनत्वात्तयोर्भव्यानां तु सनिधनत्वेप्युत्पत्तिवियोगेन त्यागात्पुनस्तद्ग्रहणाभावात् सकृत्स्य पुनर्ग्रहणाच्चांतरकालसंभवादिति। संघातपरि
शाटवक्तव्यता समाप्ता॥ ६५॥ तदेवमुक्तः सजीवप्रयोगकरणमथाजीवप्रयोगकरणमभिधित्सुराह॥ अजीवाणं करणं। नेयं पमुसंखस
गडथूणाणं। संघायणपरिसाडण।उभयं तहनोभयं चेव॥ अजीवानां करणं ज्ञेयं किं तदित्याह संघातनं तंतूनां पटे परिशाटनमेव केव
लं श्लक्ष्णीकरणं शंखस्य॥ उभयं संघातपरिशाटलक्षणं तक्षणकीलिकादियोगाच्छकटस्य॥ नोभयंति संघातपरिशाटोभयनिषेधः स्थू
णायाः केवलोर्ध्वकरणादिभावेन तदभावादिति एवमन्यदपि यज्जीवप्रयोगादजीवानां क्रियते तत्सर्वमजीवकरणमिति दर्शयन्नाह॥ ज
ं तं निज्जीवाणं। कीरइ जीवप्पओगउ तं तं। वन्नाइरूवकम्माइ या वितदजीवकरणंति॥ एवं यच्चदजीवानां वस्त्रकाष्ठपाषाणादीनामजीवप्रयोग

विशेषा·वि· जीवव्यापारेण कुसंभमंजिष्ठादिभिर्वर्णादि क्रियते पुत्तलिकादिकं रूपकर्म्मादि वा विधीयते तत्सर्वमजीवकरणमिति। तदेवमुक्तं द्रव्यकरण
३०० मथ क्षेत्रकरणमभिधित्सुराह। इह दव्वं चेव निवासमेत्तपज्जायभावउ खेत्तं। भन्नइ नाभन्नत्तस्स य। करणं निव्वत्तिउ भिहियं। होज्ज व पज्जाया
उ। पज्जाउ जेण दव्वउ णन्नो। उवयारमेत्तउ वा। जह लोए सालिकरणाई। खेत्ते व तत्थ करणं। निरिवित्तकरणं तहं जहासिद्धं। खेत्तं पुन्नमिणं पुन्न
करणसंबंधिमेत्तेणं। व्याख्या॥ इह द्रव्यमेव सन्नभःक्षेत्रं भण्यते। कुत इत्याह। निवासेत्यादि मात्रशब्दस्य व्यवहितः प्रयोगो निवासपर्यायभा
वमात्रत इत्यर्थः। इदमुक्तं भवति। क्षिति वास गत्योः इति क्षियंति निवसंति जीवा अजीवाश्चात्रेत्यौणादिके त्र प्रत्यये क्षेत्रमित्यस्मादन्वर्थाद्द्रव्य
मपि नभःक्षेत्रमुच्यते तस्य च नाभासा निवृत्तिर्नोनिःपादनेन करणं नाभिहितमकृतिमत्वादस्येति। यदि तस्य करणं नास्ति तर्हि करणभेदेषु पाठः
किमर्थमित्याशंक्याह॥ होज्ज वेत्यादि भवेद्वा क्षेत्रस्यापि करणं पज्जायाउत्ति घटपटादिसंयोगवियोगादिपर्यायानाश्रित्येत्यर्थः पर्याया हि सर्वे
षामपि वस्तूनामनित्या इत्यतस्तेषां करणमपि संभवति यदि नाम पर्यायाणां करणं संभवति। तर्हि द्रव्यस्य किमायातमित्याह॥ पर्यायो येन द्रव्या
दनन्यो ऽभिन्नस्तेन पर्यायस्य करणे द्रव्यस्यापि करणं भवत्येवेति उपचारतो वा क्षेत्रस्य करणं भण्यते जह लोए सालिकरणाइत्ति यथा लो
के वक्तारो भवंति शालिक्षेत्रमिक्षुक्षेत्रं वा मया कृतमित्यादि अथ वा क्षेत्रस्य करणमिति षष्ठीतत्पुरुषो न क्रियते किंतु क्षेत्रे करणं क्षेत्रकर
णं सप्तमीतत्पुरुष इति दर्शयन्नाह। खेत्ते वेत्यादि॥ अथवा यत्र क्षेत्रे करणं पुण्यादिस्तत्क्षेत्रकरणं यथा लोकेपि सिद्धमेतत्पुण्यमिदमुज्जयं
तशत्रुंजयादिक्षेत्रं पुण्यकरणसंबंधमात्रेण तत्र हि ये दानानशनादिकं कुर्वंति तेषां महत्पुण्यं भवतीत्यतः पुण्यस्य तत्र करणात्पुण्यं क्षेत्रं त
दिति। उक्तं क्षेत्रकरणमथ कालकरणं वाच्यं॥ तत्र कालस्याप्यकृत्रिमत्वात्करणं नास्ति द्रव्यपर्यायत्वविवक्षयात्स्यात् तद्भवे हाउ इति दर्शय
ति। जं वत्तणाइरूवो। कालो दव्वस्स चेव पज्जाउ। तो तेण तस्स तम्मि व। न विरुद्धं सव्वहा करणं॥ यस्मात्प्रागुक्तस्वरूपो वर्तनादिरूपः कालो
द्रव्यस्यैव पर्यायः पर्यायश्च द्रव्यादभिन्नस्ततो यथा द्रव्यस्य तथा तस्यापि करणं न विरुद्धं। कथमित्याह॥ तेन कालेन तस्य वा तस्मिन्वेत्या
दिभिः सर्वथा सर्वैरपि प्रकारैरिति॥ अथवा ज्योतिष्करमार्गप्रसिद्धमेवेह कालकरणं गृह्यत इति दर्शयति। अहवेह कालकरणं। ववाइ
जोइसियगइविसेसेणं। सत्तविहं तत्थ चरं चउव्विहं थिरमसव्वायं॥ अथवा बवबालवादिरूपं चंद्रादित्यादिज्योतिषिकदेवगतिविशेषणायद्भ ३००
वति। तत्र सप्तविधं चरं तदाह। बवं च बालवं चेव। कोलवं थीविलोयणं॥ गरादि वणियं चेव विट्ठी हवइ सत्तमा॥ अस्य सप्तविधस्यापि
चरस्य करणस्यानयनोपायमाह। पक्खतिहउ दुगुणिया। दुरूवरहिया य सुक्कपक्खम्मि। सत्तहिए देवसियं। तं चिय रूवाहियं रत्तिं। कृष्णस्य

शुक्लस्य वा प्रस्तुतपक्षस्य याः तिथयो ऽतिक्रांतास्ता द्विगुणीक्रियंते ततश्चागतराशेः सप्तभिर्भागो ह्रियते एवं च कृते यत्करणमागच्छति तत्प्रस्तु
ततिथौ कृष्णपक्षे दैवसिकं विज्ञेयं रूपाधिकं तु दैवरात्रौ यथा कृष्णाष्टम्यां द्विगुणिता या विंशतिर्भवति ततः सप्तभागे हृते षट् शेषा भ
वंति तथा चेदं षष्ठं वणिजाभिधानं दैवसिकं करणं लब्धं रूपे तत्र प्रक्षिप्ते रात्रिगतं विष्ट्यभिधानं सप्तमं करणं लभ्यते एवमन्यत्रापि कृष्णपक्षे
द्रष्टव्यं। शुक्लपक्षे विशेषमाह। दुरूवरहिमाय सुक्कपक्खम्मित्ति शुक्लपक्षे द्विगुणिततिथिराशेर्द्वे रूपे पात्येते ततो दैवसिकं करणमागच्छति
रूपाधिकं तु रात्रिगतं भवति यथा शुक्लचतुर्थ्यां द्विगुणितायामष्टौ भवंति द्वयोश्च पातितयोः षड्भवंति सप्तभिश्च भागो न पूर्यते ततस्तदैव दैव
सिकं षष्ठं करणं लब्धं रूपे तु प्रक्षिप्ते सप्तमं विष्ट्यभिधानं रात्रिगतं करणं लभ्यते एवमन्यत्रापि शुक्लपक्षे भावनीयं इह च लोके प्रसिद्धः कर
णानयनोपायो ऽन्योपि विद्यते। तद्यथा॥ तिहिं दुगुणीएकिहिं ऊणा सत्तहिं हरणं सेसं करणमिति। अयमपि युक्तः। केवलमिह मासतिथयो
द्विगुणयितव्या यदागच्छति तद्रात्रिगतकरणं रूपे तु पातिते दिवसगतं द्रष्टव्यमिति। अथ चतुर्विधं स्थिरकरणमाह। सउणि चउप्पय नागं
किंथुग्घं करणं थिरं चउहा। बहुलचउद्दसि रत्तिं। सउणि सेसं तियं कमसो॥ कृष्णचतुर्दशीरात्रौ सदावस्थितं शकुनिनामकं भवति अमावा
स्यायां दिवसे चतुष्पदं रात्रौ नागं प्रतिपद्दिवा किंस्तुघ्नं शेषरजनीदिनयोर्यथोक्तोपायात् चरं करणमवसेयमिति। अथ भावकरणमाह॥ भा
वस्स व भावेण व। भावे करणं ति भावकरणंति। तं जीवाजीवं। पज्जायविससउ बहुहा॥ भावस्य पर्यायस्य करणं भावकरणं भावेन वा करणं
भावे वा करणं तच्च भावकरणं जीवाजीवानां पर्यायविशेषतः पर्यायविशेषानाश्रित्य बहुधा बहुभेदं भवतीति। तत्राल्पवक्तव्यत्वादजीवभावक
रणं तावदाह। अपरप्पउगजं जं अजीवरूवाइ पज्जयावत्थं। तमजीवभावकरणं। तप्पज्जायप्पणा वेक्खं॥ परप्रयोगाज्जातं परप्रयोगजं न
परप्रयोगजं स्वाभाविकमित्यर्थः यदपरप्रयोगजं तदजीवभावकरणमिति संबंधः। कथंभूतमित्याह अजीवरूवाइपज्जयावत्थंति अ
जीवानामभ्रेंद्रधनुरादीनां रूपादिपर्याया अजीवरूपादिपर्यायास्त एवावस्था स्वरूपं यस्याजीवभावकरणस्य तदजीवरूपादिपर्याया
वस्थं परप्रयोगमंतरेण यदभ्रादजीवानां स्वाभाविकं रूपरसगंधस्पर्शसंस्थानादिपर्यायकरणं तदजीवभावकरणमित्यर्थः। तर्हि द्रव्य
विस्रसाकरणादस्य को भेद इत्याशंक्याह। तप्पज्जायप्पणावेक्खंति॥ तेषामजीवानां पर्याया रूपादयस्तत्पर्यायास्तेषामर्पणं प्राधान्येन
विवक्षणं तत्पर्यायार्पणं तस्यापेक्षा यत्र तत्पर्यायार्पणापेक्षं। इदमुक्तं भवति पूर्वं द्रव्यप्राधान्यविवक्षया द्रव्यविस्रसाकरणमिदमुक्तं
इह तु रूपादिपर्यायप्राधान्यमपेक्ष्यैतदेव भावकरणमभिहितमिति॥ इदं च तप्पज्जायप्पणावेक्खमित्यनेनेदमप्युत्तरमनवगच्छतः पर

स्य मतमाशंक्य परिहरन्नाह। कीरइ व वीससा करणं उ। विमिमी इमस्स न नु भणियं। इह पज्जायावेरका। दव्वठियनयमयं तं च ॥ गतार्था ॥ अथ जीव
भावकरणमाह ॥ इह जीवभावकरणं। सुयकरणं नोसुयभिहाणं च। सुयकरणं दुवियप्पं। लोइयलोउत्तरं चेव। बद्धाबद्धं च पुणो। सत्था
सत्थोवएसतो याउ। एक्केक्कं सइ निसीह करणाभेयं मुणेयव्वं ॥ व्याख्या ॥ जीवस्य भावो जीवभावः तस्य करणं जीवभावकरणं तच्च द्विविधं
श्रुतज्ञानभावकरणं नोश्रुताभिधानं च नोश्रुतज्ञानभावकरणं चेत्यर्थः। आह ॥ ननु यथा श्रुतज्ञानं जीवस्य भावस्तथा शेषज्ञानान्यपि विद्यंते
ततो मत्यादिज्ञानभावकरणमपि कस्मान्नोक्तं। सत्यं ॥ किंतु यथा परायत्तत्वाद् गुरूपदेशादिना श्रुतज्ञानं क्रियते नैवं शेषज्ञानानि तेषां स्वाव
रणक्षयोपशमक्षयाभ्यां स्वत एव जायमानत्वात् एवं सम्यक्त्वादयोपि जीवभावा नैकांतेन परायत्ताः तेषां नारकादिष्वन्यथापि भावादिति श्रु
तज्ञानकरणमपि द्विविधं लौकिकं लोकोत्तरं च पुनरप्येकैकं द्विधा बद्धमबद्धं च तत्र गद्यपद्यरूपतया ग्रथितं बद्धं इदं च शास्त्रोपदेशरूपं भवति यत्पुन
रशास्त्रोपदेशरूपं कंठाद्वचश्रूयते तदबद्धं इदं च बद्धमबद्धं चैकैकं द्विधा भवति शब्दकरणं निशीथकरणं चेति। अथ शब्दकरणस्य निशीथकरणस्य
च व्याख्यानमाह। उत्ताउ सद्दकरणं। पगासपाढं व सरविसेसो। वा गूढ अत्थं तु निसीहं। रहस्सं सुत्तं च महवा तं ॥ उत्ताउ सद्दकरणंति उक्तिविशेषः शब्दक
रणं अथवा प्रकाशपाठं शब्दकरणं यदि वा उदात्तादिस्वरविशेषः शब्दकरणमुच्यत इति गूढो गुप्तोऽनवगम्यमानो योर्थः यस्य तद्गूढार्थं पुनर्निशीथ
करणमुच्यते अथवा यद्रहस्यसूत्रार्थं तन्निशीथकरणमुच्यते यथा निशीथाध्ययनं रहस्यमप्रकाशं यत्सूत्रमर्थश्च यस्य तद्रहस्यसूत्रार्थमिति स
मासः ॥ किं पुनस्तल्लौकिकं लोकोत्तरं वा बद्धश्रुतमित्याह। लोए अणिबद्धाइं। अड्डियपच्छिड्डियाइं करणाइं। पंचादेससयाइं मरुदेवाईणि उ
त्तरिणं। लौकिकानि बद्धान्युपदेशमात्ररूपाणि न पुनः शास्त्रनिबद्धानि महत्त्वानां करणविशेषरूपाण्यङ्कितिकाप्रत्यङ्कितिकादीनि विज्ञेयानि लोको
त्तरे त्वनिबद्धानि पंचाशतान्यादेशानां बोद्धव्यानि। मरुदेवाईणि ॥ मरुदेव्यादेशा आदौ येषां तानि मरुदेव्यादीनि पंचादेशशतानि यथात्र
स्यां तस्थावरा अनादिवनस्पतिकायादुद्धृत्य मरुदेवी प्रथमजिनमाता सिद्धेति। यदुक्तं ॥ उत्ताउ सद्दकरणमित्यादि। तत्र प्रेर्यपरिहारं चाह। भाव
करणाहिगारे। किमिहं सद्दाइ दव्वकरणेणं। भण्णइ तत्थ विभावो। विवक्खिउ तत्थ सिद्धाउ ॥ ननु इह भावकरणाधिकारे किमप्रस्तुतेन शब्दादिद्रव्य
करणोपन्यासेन शब्दादि शब्दगतानेकभेदसंग्राहकेन गण्यते अत्रोत्तरं तत्रापि शब्दद्रव्यकरणे भाव एव भावश्रुतमेव विवक्षितं। कथंभूतो भा
वः तद्विशिष्टः शब्दविशिष्टः अयमभिप्रायः प्रकाशपाठादिके शब्दकरणेपि न केवलं शब्द एव विवक्षितः किंतु यत्तस्य शब्दस्य कारणरूपं कार्य ३९१
रूपं भावश्रुतं तदेव शब्दविशिष्टमिह विवक्षितमित्यदोष इति। उक्तं श्रुतकरणमथ नोश्रुतकरणमाह। नोसुयकरणं दुविहं। गुणकरणं जुंज

णाभिहाणं च। गुणकरणं तवसंयम। करणं मूलुत्तरगुणा वा ॥ नोशब्दस्य सर्वनिषेधवचनत्वाच्छ्रुतव्यतिरिक्तं यत्तपःसंयमादिरूपस्य जीव
भावस्य करणं तन्नोश्रुतभावकरणं तच्च द्विविधं गुणकरणं तथा जुंजणाभिहाणंति युज्यंत इति योगा मनःप्रभृतयस्तेषां यत्करणं तद्योजना
भिधानं करणमिति तत्र गुणकरणं तपःसंयमयोः करणं अथवा मूलगुणकरणमुत्तरगुणकरणं वा गुणकरणमुच्यत इति। अथ योगक
रणव्याख्यानमाह। मणवयणकायकिरिया। पनरसविहा उ जुंजणाकरणं। समाईयकरणमिणं। किं नामाईण होज्जाहि ॥ सत्यादिभेदत
श्चतुर्विधं मनः चतुर्विधं वचनं औदारिक २ मिश्रादिभेदात्सप्तविधः कायः इत्येवमेतत्क्रियापि पंचदशविधा योजनाकरणं तेनावगंत
व्या तदेवमभिहितं भावकरणं तदवसाने चोक्तं नामादिभेदतः षड्विधमपि करणमिति। अथ विनेयः पृच्छति ॥ ननूक्तस्वरूपाणां नामादीनां
षण्णां करणभेदानां मध्ये सामायिकं करणमिदं किं भवेत्कस्मिन् भेदे अवतरेदित्यर्थः अत्र गुरुराह। सच्चं पि जहाजोगं नेयं भावकरणंवि
सेसेणं। सुयमहव सद्दकरणं सुयसामइयं न चारित्तं ॥ इदं सामायिककरणं सर्वमपि षड्विधमपि नामादिकरणं ज्ञेयं सर्वेष्वपि नामादिभे
देष्ववतरेदित्यर्थः कथं यथायोगं यथासंभवं तत्र सम्यक्त्वश्रुततपःसंयमादिगुणानां जीवद्रव्यपर्यायत्वात्पर्यायस्य च द्रव्यानन्यत्वाद्द्रव्यक
रणे तदंभवत्येव एवं नामादिकरणेष्वप्यथासंभवं भावनीया भावकरणे त्विदं विशेषतो भवति सम्यक्त्वादिसामायिकानां जीवभाव
त्वादिति ॥ आह ॥ ननु भावकरणं पूर्वं बहुभेदमुक्तं तत्किं सर्वेष्वपि भावकरणभेदेषु सर्वमपि सामायिकमवतरति नेत्याह। सुयमित्यादि। श्रुत
करणं तथा बद्धश्रुतकरणं शब्दकरणं च श्रुतसामायिकमेव भवति तस्यैवैतद्भेदरूपताघटनात् न तु चारित्रसामायिकं तस्यैतद्रूपासंभवा
दिति। चारित्रसामायिकं तर्हि कस्मिन् भावकरणभेदे अवतरतीत्याह। गुणकरणे चारित्तं। तवसंयमगुणमयंति काऊणं। संभवेउ सुय
करणं। सुयसत्थं जुंजणाकरणं ॥ गुणकरणं चारित्रसामायिकं गुणकरणलक्षणे नोश्रुतभावकरणे प्रथमभेदे एतदवतरतीत्यर्थः
तपःसंयमगुणात्मकमिति कृत्वा तथा संभवतो यथासंभवं श्रुतकरणमप्येतद्भवति प्रशस्तवाग्रूपायाश्चारित्रभेदभूताया वाचोपि
तेरत्रावतारादिति तथा सुप्रशस्तयोजनाकरणमिति नोश्रुतभावकरणद्वितीयभेदेप्येतदवतरतीत्यर्थः सुप्रशस्तमनोवाक्कायरूपता
चारित्रस्येति चतुःषष्टी गाथार्थः ५५८ इह करणे भण्णं तं इत्यादिगाथायाः समनंतरं नामं ठवणा दविए इत्यादिका चतुर्दश गाथा नि
र्युक्तौ दृश्यंते ताश्च भाष्यकारेण प्रक्षेपरूपत्वादिना केनापि कारणेन भाष्ये न लिखिताः केवलं तदर्थ एव भाष्यगाथाभिर्लिखितस्तस्मा
त्कारणं स्वधिया मन्तव्यमिति। तदेवं व्याख्यातं करणे भए अ भंते इत्यादिगाथायाः करणलक्षणं प्रथमपदं करणं चेह सामायिकस्यैव

MEMORIAL

प्रस्तुतं करोमि भदंत सामायिकमिति संबंधात् तस्तदेव सामायिककरणमव्युत्पन्नविनेयवर्गव्युत्पादनार्थं। सप्तभिरनुयोगद्वारैः कृताऽ
दिभिर्निरूपयन्नाह। कयाकयं केण कयं केसु दव्वेसु कीरई वावि। काहे व कारउ नयउ। करणं कइविहं कहं॥ ननु करणक्रियायाः पूर्वं सामायिकं किं कृ
तं क्रियते अकृतं वाउभयथापि वक्ष्यमाणदोषो। अत्रोत्तरमाह॥ कयाकयंति नैकांतेन कृतं क्रियते नाप्यकृतं किंतु कृताकृतं क्रियत इति तथा के
न कृतमिति वक्तव्यं तथा केषु द्रव्येषु शुद्धादिषु क्रियते कदा वा कारकोऽस्या भवति नयउत्ति नैगमादिनयमतेनात्रोत्तरं वक्तव्यं तथा करणं कतिवि
धं कतिभेदमिति वाच्यं तथा कथं केन प्रकारेणेदं सामायिककरणं लभ्यत इति वाभिधानीयमिति निर्युक्तिगाथासंक्षेपार्थः॥ ९९९। विस्तरा
र्थं भाष्यकार आह। किं कयमकयं कीरइ। किं वा नो भणइ सव्वहा दोसो। कयमिह सब्भावाउ। न किरए चिरकयघडव्व। निच्चकिरियापसंगो। किरि
यावेफल्लमपरिणिट्ठा वा। अकय कय कज्जमाणं च वाए स भावया निच्चो॥ व्याख्या॥ किं कृतं क्रियते सामायिकमकृतं वा किं वातः किमनेन प्र
श्नेनेति गुरुणा प्रोक्ते भणति परः सर्वथा पक्षद्वयेऽपि दोषः। तथाहि॥ कृतं तावन्न क्रियते सद्भावादग्रेऽपि विद्यमानत्वाच्चिरकृतघटवदिति
कृतस्य च करणे नित्यं क्रियायाः करणस्य प्रसंगः क्रियामात्रवैफल्यं कृतत्वादेवेति अथ कृतमपि क्रियते तर्हि करणस्यापरिनिष्ठाकृ
तत्वाविशेषादिति अपि च कृतं क्रियत इत्येवमाने वस्तुनः सर्वदैव सत्वमभ्युपगतं भवति यच्च सर्वदा सत्तदाकाशवन्नित्यं नित्ये च वस्तुन्य
कृतमिदं कृतं वा क्रियमाणं वेत्यादि व्यपदेशो न भवत्यनित्यत्वप्रसंगादिति॥ अकृतपक्षमंगीकृत्याह। अकयं पि नेय कीरइ। असंभावाउ व
पुप्फं व। निच्चं किरियाइ दोसा। स विसेसयरा य सत्थम्मि॥ स्पष्टा॥ अथ क्रियमाणं क्रियते तत्राह। सदसदुभयदोसाउ। सव्वं कीरइ न कज्जमा
णंपि। इय सव्वहा न कीरइ। सामइयमउ कउ करणं॥ तत्क्रियमाणं वस्तु सद्वा असद्वा परिकल्प्येत यदि सत्तर्हि कृतपक्षोक्ताः सर्वेऽपि दोषाः प्र
सजंति असत्पक्षेऽकृतपक्षदोषानुषंगः अथ सदसत्क्रियमाणमिष्यते तदप्ययुक्तमुभयपक्षोक्तदोषप्रसंगादित्येवं सर्वथा सर्वप्रकारैः
सामायिकं न क्रियते अतः कस्मात्तस्य करणमिति। अत्रोत्तरमाह। नणु सव्वहा न कीरइ। पडिसेहम्मि विसमाणमेवेदं। पडिसेहसाभावे। परि
सिद्धं केण सामइयं। अह कयमकयं न कयं। न कज्जमाणं कयं तहा वि कयं। पडिसेहवयणमेयं। तह सामइयं पि को दोसो॥ व्याख्या॥ ननु सर्वथा
सर्वप्रकारैः सामायिकं न क्रियत इत्येवं यस्त्वया प्रतिषेधो विधीयते तत्रापि प्रतिषेधे समानमेवेदं किमसौ कृतः क्रियते अकृतः क्रियमाणो वे
त्यादिकल्पनायेन सोऽपि सर्वथा न क्रियते अथ प्रतिषेधाभावे केन प्रतिषिद्धं सामायिकं न केनचिदतः क्रियत एतदिति अथैवं ब्रूषे प्रतिषेधव ३९२
चनं मे तत्कृतं वा सदकृतं वा सन्नकृतं नापि क्रियमाणं कृतं तथापि कृतं तावत्केनापि उच्चारणादिना प्रकारेण हंत यथा केनापि प्रकारेण त्वं येन

कृतं तथा सामायिकमपि केनापि प्रकारेण कृतमतस्तत्रापि को दोषस्त्वयाऽदीयत इति। अथ कृताकृतपक्षं नयमतेनोपदर्शितिसांतपक्षमुपदर्शयन्ना
ह। अकयमसुद्धनयाणं। निच्चत्तणउ नभं व सामइयं। सुद्धाण कयं घडइ व। कयाकयं समयसब्भावो॥ द्रव्यार्थिकरूपाणामशुद्धनयानां नैगमसंग्र
हव्यवहाराणामकृतं सामायिकं नित्यत्वान्नभोवदिति शुद्धानां तु निश्चयनयरूपाणामृजुसूत्रादीनां कृतं तद्घटवदिति समयसद्भावस्त्वयं नैकांते
न कृतं सामायिकं क्रियते नाप्यकृतं किंतु कृताकृतं क्रियत इति। यदि वा शिष्टानां स्थित्यादिविवक्षा चत्वारः कृतादिभिश्चतुर्भिर्भंगैः किंचिद्वस्तु क्रियते किं
चित्त्वेतैश्चतुर्भिरपि भंगैर्न क्रियत इत्यवेति दर्शयन्नाह। कीरइ कयमकयं वा। कयाकयं च हमज्जमाणं वा। कज्जमिह विवक्खाए। न कीरए सव्वहा किंचि
॥ इह किंचित्कार्यं केनापि रूपेण कृतं क्रियते केनचिद्रूपेणाकृतं क्रियते केनापि रूपेण कृताकृतं क्रियते केनचित्प्रकारेण क्रियमाणं वा किंचि
त्क्रियते अन्यत्तु किंचिद्विवक्षया सर्वथाप्येतैरपि कृतादिभिः प्रकारैर्न क्रियत इति। अत्र यथासंख्यमुदाहरणं। रूवित्ति कीरइ कउ। कुंभो संठाणस
त्तिउ अ कउ। दोहिं वि कउ या कउ सो तस्समयं कज्जमाणोत्ति। पुव्वकउ उ घडतया। परपज्जाएहिं तदुभएहिं च। कज्जंतीयपडतया न कीरए सव्वहा कुं
भो॥ व्याख्या॥ रूपीति कृत्वा पूर्वकृत एव कुंभस्तद्रूपतया क्रियते मृत्पिंडावस्थायामपि रूपादीनां सद्भावादिति संस्थानजलाहरणशक्तिभ्यां
तु पूर्वमकृतः क्रियते रूपितया संस्थानशक्तितश्चेति रूपद्वयेनापि विवक्षितोऽसौ पूर्वं कृताकृतः क्रियते तत्समयमुत्पत्तिसमये क्रियमाणो
सौ क्रियत इति पूर्वं कृतस्तु पूर्वं निष्पन्नो घटो घटतया घटपर्यायेण न क्रियते परपर्यायैस्तु पटादिधर्मैः पूर्वमकृतो घटो न क्रियते परपर्यायैर्वस्तु
नः कर्तुमशक्यत्वात् तदुभयैश्च स्वपरपर्यायैर्विवक्षितः कृताकृतोऽसौ न क्रियते स्वपर्यायाणां पूर्वमेव कृतत्वात्परपर्यायाणां तु पूर्वमप्यकृतानां
कर्तुमशक्यत्वात् क्रियमाणश्चोत्पत्तिसमये कुंभः पटतया न क्रियते अशक्यत्वात् तदेवं सर्वथा सर्वैरपि कृतादिप्रकारैः कुंभो न क्रियते यथोक्तविवक्ष
या कृतोऽकृतः कृताकृतः क्रियमाणश्च कुंभो न क्रियत इत्यर्थः तदेवं यथाभिहितविवक्षया क्रियमाणत्वमक्रियमाणत्वं च वस्तुनः प्रोक्तं। अथवा
विवक्षांतरेण सर्ववस्तूनां क्रियमाणत्वमक्रियमाणत्वं च दर्शयितुमाह। वोमाइ निच्चयाउ न कीरइ सव्वपज्जायवा सव्वं। कीरइ य कज्जमाणं। समएस
व्वं स पज्जयउ। इह व्योमात्मकालदिगादिकं वस्तु न क्रियते नित्यत्वात् अथवा व्याख्या सर्वमपि व्योमादि घटविघटनकुसुमादिवत् वस्तु न क्रियते
इत्यतया सर्वस्य सर्वदा अवस्थितत्वात्पर्यायतया तु प्रतिसमयं सर्वं वस्तु क्रियमाणं क्रियते सर्वस्मापि समये अपरापरस्व पर्यायाणामुत्पादा
दिति। समयसद्भावव्यक्तीकरणपूर्वकं प्रकृतयोजनामाह उप्पायट्ठिइभंगस्स। भावउ इय कयाकयं सव्वं। सामाइयं पि एवं। उप्पायाइस्स
भावंति॥ उत्पादस्थितिभंगस्वभावत्वादित्यनेक प्रकारेण सर्वमपि वस्तु कृताकृतस्वरूपं एवं सामायिकमपि उत्पादादिस्वभावत्वात्कृताकृ

नस्वरूपंद्रव्यमतःकृताकृतंतत क्रियतइतिस्थितं अत्रपरःप्राह। दव्वमणत्थंतरपज्जायंतरविसेसणाहिंजुज्जेज्जाउप्पायाइसहावं। नउसामइयं
गुणोजम्हा। सोउप्पन्नोउप्पन्नाएवविगउयविगयाएवेह। किंसेसमस्सजेणिह। कयाश्देसयाहोज्जा॥ ननुद्रव्यमनर्थांतरभूतपर्यायांतरविशेषे
णोत्पादादित्रिस्वभावंयुज्येतनतुसामायिकं गुणोजम्हत्ति गुणमात्ररूपत्वादिति सहिगुणउत्पन्नःसन्नुत्पन्नएवनतुविगतो ऽवस्थितोवाय
दातुविगतस्तदाविगतएवनतूत्पन्नो ऽवस्थितोवा अतःकिंशेषमस्याद्धरितं येनेहकृताश्देशाताकृताकृतरूपतास्यादिति॥ सूरिरुत्तरमाह
अंबियदव्वाणन्नो। पज्जाउतंचतिनिहसब्भावं। तोसोविथितिरूवोव्विय। तत्तोयकयाकयसभावो॥ यस्मादेवपर्यायोद्रव्यादनन्यस्तस्माद्द्रव्यमुत्पा
दव्ययध्रौव्यलक्षणत्रिविधस्वभावं ततोद्रव्यादनन्यत्वात्सोपिपर्यायस्त्रिस्वरूपएवअतश्चद्रव्यवत्कृताकृतःस्वभावस्यादेवेति अथवा
स्वतंत्रस्यापिसामायिकगुणस्यत्रिरूपताघटतएवेति। कथमित्याह। जहवारूवंतरउ। विगयमुप्पाएयरूवमासन्नं निच्चंकमाकमकउ। रू
वंपरपज्जयाउवा। तहपरिणामंतरउ। वयविभवेविपरिणामसामन्नं। निच्चंकयाकयमउ। सामन्नइयंपरगुणाउवा॥ यथावाघटादेरक्तत्वादि
रूपाच्छुक्लत्वादिरूपांतरोत्पत्तौपूर्वरूपस्यविगमेउत्तररूपस्योत्पादेपिरूपसामान्यंनित्यमवतिष्ठति अतोरूपगुणस्यत्रिरूपताअस्मादेवत्रैरू
प्यात्कृताकृतरूपंयुज्यते परपर्यायाद्वापरपर्यायमाश्रित्यकृताकृतंयुज्यतइति तथोत्तरोत्तरशुद्ध्यापरिणमतःसामायिकगुणस्यपरिणा
मांतरात्परिणामांतरोत्पत्तौपूर्वपरिणामस्यव्ययेविगमेउत्तरपरिणामस्यतुवित्तिवेप्युत्पादेपिपरिणामसामान्यंनित्यमवतिष्ठते ततःसामायि
कगुणस्यत्रिरूपता अस्मात्त्रैरूप्यात्तस्यकृताकृतत्वंपरगुणाद्वापरगुणमाश्रित्यकृताकृतत्वमिति। अथवाअन्यथापिसामायिकस्यकृ
ताकृतत्वंवक्तव्यंकथमित्याह। दव्वाइचउक्कंवा। पमुच्चकयमकयमहवसामइयं। एगपुरिसाइउकयमकयंनाणानराईहिं॥ अथवाद्रव्यादि
चतुष्कंद्रव्यक्षेत्रकालभावचतुष्टयंप्रतीत्यकृतमकृतंचसामायिकंभावनीयं। तथाहि॥ एकंविवक्षितंपुरुषद्रव्यंप्रतीत्यकृतंसामायिकंसा
दिसपर्यवसितत्वात्नानापुरुषद्रव्याण्याश्रित्यपुनरकृतंअनादिअपर्यवसितत्वादिति आदित्राद्वाद्भरतैरावतक्षेत्राण्यपिप्रतीत्यकृतंमहावि
देहक्षेत्रेष्वकृतंअव्यवच्छिन्नप्रवाहत्वेननित्यत्वादिति तथाउत्सर्प्पिण्यवसर्प्पिणीकालमाश्रित्यकृतंव्यवच्छिद्यमानत्वेनानित्यत्वान्नोउत्सर्पि
ण्यवसर्पिणीकालंत्वाश्रित्याकृतं अव्यवच्छिन्नत्वेननित्यत्वाद्भावंत्वेकपुरुषोपयोगंप्रतीत्यकृतं नानापुरुषोपयोगानाश्रित्यपुनरकृत
मित्येवंकृताकृतंसामायिकमिति। तदेवमुक्तंकृताकृतद्वारमर्थकेनकृतमितिद्वारंविवरिषुराह। केणाकयंतियववहारउ। जिणिंदेणग ३९३
हरेहिंच। तस्सामिणाउनिच्छय। नयस्सतत्तोजउणन्नं॥ पाठसिद्धा॥ अत्राक्षेपपरिहारौप्राह। नणुनियमेकयंचिय। केणकयंतंतिकापु

णोपुच्छा भणइसवन्नकत्ताइहंतरंगोविसेसेणं॥ आहननुउद्देसेनिद्देसेयनिर्गमेइत्यत्रसामायिकस्यनिर्गमेभण्यमानेमहावीरात्तन्निर्गतमित्या
प्रतिपादनेनकेनकृतंनदित्येतद्गतमेवोक्तार्थमेवपुनरपीहकापृच्छाभण्यते॥ अत्रोत्तरं॥ सतीर्थकरादिःसामायिकस्यबाह्यकर्त्तातत्रोक्तः
इहतुविशेषांतरंगकर्त्ताजिज्ञासितःसचनैश्चयिकःसामायिकानुष्ठातासाध्वादिर्द्रष्टव्यः सामायिकपरिणामानन्यत्वादिति॥ परिहारांतरमा
ह॥ अहवासतंतकत्ता। तद्देहपउज्जकारगोभिमउ। अहवेहसव्वकारग। परिणामापन्नरूवोत्ति॥ अथवातत्रनिर्गमेभगवांस्तीर्थकरःस्वयंबु
द्धत्वात्स्वतंत्रःकर्त्ताभिहिता इहतुतस्यैवभगवतस्तीर्थकरस्ययःप्रयोज्यःप्रबोधनीयःसन्कारकःसाध्वादिःसकर्त्ताभिमतः अथवेहकर्त्तास
र्वकारकपरिणामानन्यरूपोभिमतःसचसाध्वादिरेवसामायिकानुष्ठातामंतव्यः। तथाहि॥ सामायिकंकुर्वन्नसौकर्त्ताक्रियमाणत्वेनचकर्मरू
पात्सामायिकादनन्यत्वात्कर्मसामायिकंयेनाध्यवसायेनकरणभूतेनासौकरोति तस्मादनन्यत्वात्करणंगुरुणाचासौसामायिकंप्रदीयतइति
संप्रदानंसामायिकंचास्माच्छिष्यप्रशिष्यपरंपरयाप्रवर्त्तिष्यतइत्यपादानंस्वपरिणामेचसामायिकमव्यवच्छिन्नंधरतीत्यधिकरणमित्येवंस
र्वकारकपरिणामानन्यरूपःकर्त्ताभवत्यसादिति॥ आह॥ ननुयद्यंतरंगःप्रयोज्यःसर्वकारकपरिणामानन्यरूपश्चकर्त्तासाध्वादिरिहविवक्षित
स्तर्हिजिनेंद्रेणगणधरैश्चकृतंतदिति कस्मादुक्तंजिनेंद्रगणधराणामिहाविवक्षितत्वात्सत्यं॥ किंतुजिनेंद्रस्यापिसामायिकस्यांतरंगकर्तृत्वंसर्वका
रकपरिणामानन्यरूपकर्तृत्वंचप्रायोनविरुध्यते तेनापितस्यानुष्ठितत्वाद्गणधराणांतुप्रयोज्यकर्तृत्वमपियुज्यतएव जिनेंद्रप्रयोज्यत्वात्तेषा
मित्यतोजिनेंद्रगणधराण्यमप्युपन्यासोऽत्रनविरुध्यतइति। गतंकेनकृतमितिद्वारमथकेषुद्रव्येषुतत्क्रियतइतिद्वारमभिधित्सुराह। दव
एकेसुकीरइ। सामइयंनेगमोमणुन्नेसु। सयणाइएसुभासइ। मणुन्नपरिणामकारणउ। नेगंतेणमणोन्नं। मणोन्नपरिणामकारणंदव्वं। वभि
चाराउसेसा। नेतितउसव्वदव्वेसु॥ व्याख्या॥ केषुद्रव्येषुव्यवस्थितस्यसामायिकंक्रियते निर्वर्त्यते ऽत्रनैगमनयोभाषते मनोज्ञेषुशयनास
नादिषुस्थितस्यतत्क्रियते मनोज्ञपरिणामकारणत्वात्तथाचकेश्चिदुक्तं॥ मणुन्नंभोयणंभोच्चामणुन्नंसयणासणं मणोन्नंसिअगारंसिम
णोन्नंझायएमुणीत्यादिशेषास्तुसंग्रहादयोब्रुवते नैकांतेनमनोज्ञंद्रव्यंमनोज्ञपरिणामकारणंभवति व्यभिचारात्मनोज्ञेपिकस्यापिस्वा
भिप्रायेणामनोज्ञपरिणामभावादमनोज्ञेपिचकस्यापिमनोज्ञपरिणामसद्भावात्ततः सर्वद्रव्येषुव्यवस्थितस्यसामायिकंक्रियते। अत्राक्षे
पपरिहारावाह। नणुभणियमुन्नवत्थाए केसुत्तीइहंकुकउपुणोपुच्छा। केसुत्तितत्थविसउ। इहकेसुठियस्सतल्लाभो॥ ननूपोद्घातेकिंकइ
विहमित्यादिगाथायांकेषुसामायिकंभवतीतिप्रागुक्तमेव इहकुतःपुनरपिपृच्छावसरः नैवंतत्रहिकेद्रव्यपर्यायाःसामायिकस्यविष

योभवतीत्युक्तं तथा च तत्र निर्वचनं मत्वनयं सम्मत्तमित्यादि इह तु केषु द्रव्येषु सिमतस्य सामायिकस्य लाभो भवतीत्युच्यत इति महा भेद इति य
दिनं पौनरुक्त्यं तर्ह्यन्यद्दूषणं किं न दूषित्याह। तो किह सव्वदव्वा। वश्याणं जा यमेत्तवयणाउ। धम्माइ सव्वदव्वा। धारा सव्वोजउ च रसे॥ ननु तर्हि कथं
सर्वद्रव्यव्यवस्थानं संभवति येनोच्यते संसार्वेति तउ सव्वदव्वस्मन्ति नहि सर्वेषाकाशादिद्रव्येषु कोऽप्यवतिष्ठत इति उच्यते जातिमात्रवचना
त्सर्वद्रव्यजातिमात्रस्येह विवक्षणा त्यातिमायं च सर्वद्रव्येकदेशोऽपि प्राप्यत इति ननु देशतोऽपि किं सर्वद्रव्याधारः कोऽपि प्राप्यते उच्यते प्राप्य
त एव यतो धर्मास्तिकायाधर्मास्तिकायाकाशास्तिकाया जीवपुद्गलाधारः सर्वोऽप्ययं त्रयं जीवलोक इति। परिहृतं प्रासंगिकं दूषणमथ प्रस्तुत
प्रर्यस्य परिहारांतरमाह विसउ च उ बन्धाए। केसन्ति इह संसएव हेउत्ति मंदेयं नय किरिया निबंधणं जेण सामइयं॥ अथवोपोद्घाते सर्वद्रव्या
णि सामायिकस्य विषयो भवतीत्युक्तं इह तु स एव सामायिकलाभः सर्वद्रव्येषु हेतुभूतेषु भवतीत्युच्यत इति कथं पुनः सर्वाण्यपि द्रव्याणि सामायि
कस्य हेतुर्भवतीत्याह सद्देयेत्यादि श्रद्धेयानि ज्ञेयानि च चारित्रक्रियाहेतुभूतानि च यानि द्रव्याणि तन्निबंधनं तद्धेतुकं यतः सामायिकं मन्व श्रद्धे
यादिभ्योऽन्यानि सर्वद्रव्याणीति नापि विषयहेत्वोरेकत्वमवगंतव्यं विषयस्य गोचररूपत्वात् जीवघातनिवृत्तेः सर्वजीववधच्छेदोपष्टंभकत्वाद
आदिवदिति। अन्यदपि परिहारांतरमाह। अहवा कया इ ड। सकउपकेणव कयं व कत्तत्ति। केसन्ति करणभावितइ पृथे सन्तामिं कारं॥ अथवा कृता
२ द्विद्वारेषु प्रथमे कृताकृतद्वारे कर्त्रा यत्क्रियते तत्कार्यं सामायिकमुक्तं केन कृतमिति च द्वितीयद्वारे सामायिकस्यैव कर्त्ता निर्दिष्टः केचिति तृती
यद्वारे तु तृतीयार्थे सप्तमीं कृत्वा करणमभिहितं कैर्द्रव्यैः करणभूतैः सामायिकं क्रियत इति नोपोद्घातेन स्यात् पौनरुक्त्यमिति॥ अथ कदाका
रको वा भवतीति नैगमनिरूपयन्नाह उद्दिट्ठंत्रिय नेगम। नयस्स कत्ताण हिज्जमाणो वि। जं कारणमुद्देसो। तम्मि य कज्जोवयारोत्ति॥ इहोद्दि
ष्ट एव गुरुणा सामायिके नैगमनयस्यानधीयानोऽपि शिष्यस्तस्य कर्त्ता भवति॥ आह॥ ननु कार्यस्य कर्त्ता भवति कार्यं च सामायिकमुद्देशकाले
नास्ति तत्कथं तस्यासौ कर्त्ता भवतीत्याह॥ जमित्यादि। यस्मात्सामायिकस्य कारणमुद्देशस्तस्मिंश्चोद्देशा[illegible]लक्षणे कारणे कार्यस्य सामायिक
स्योपचारः क्रियत इति सामायिकस्य कर्त्तासौ भवतीति। संग्रहव्यवहारनयमतमाह संगहववहाराणं पच्चासन्नयरकारणत्तणउ। उद्दिट्ठम्मि
तदट्ठं गुरुपामूले समासीणो। संग्रहव्यवहारयोरुद्दिष्टे सामायिके तत्पठनार्थं गुरुपादमूले समासीनः शिष्यः प्रत्यासन्नतरकारणत्वात्पूर्व ३९४
वत्तत्र सामायिककार्योपचारतः कर्त्ता भवतीति। ऋजुसूत्रमतमाह उज्जुसुयस्स पढंतो तं कुणमाणो विनिरुवउगोवि। आसन्नासाहारण
।कारणउ सह किरियाणं। ऋजुसूत्रस्यानुपयुक्तोऽपि सामायिकं पठंस्तथा कुर्वंस्तदर्थक्रियया अनुतिष्ठन्सामायिकस्य कर्त्ता भवति सामायि

कासन्नतरमसाधारणकारणत्वात्तद्विषयशब्दक्रिययोरिति शब्दादिमतं आह। सामाइउ वउत्तो कत्ता सद्दकिरियाविउत्तोवि। सद्दाईणमणु
न्नो। परिणामो जेण सामइयं॥ शब्दादिनयानां सामायिकोपयुक्तः शब्दक्रियावियुक्तोऽपि सामायिककर्त्ता भवति येन यस्मात्मनोज्ञोऽविशु
द्धपरिणामस्तेषां सामायिकमिति। अथ पूर्वोक्तमुपसंहरन्नुत्तरग्रंथसंबंधनार्थमाह। कत्ता नयउ भिहिउ। अहवा नयउत्ति नीइउ नेउ। सामा
इयहेउ पउज्ज। कारउ सो नउ य इमो॥ तदेवं सामायिकस्य कर्त्ता नयतो नयैरभिहितः अथवा केदावाकारकद्वस्मान्नय इति पृथगेव द्वा
रं तत्र चायमर्थो नयतो नीतितो विधिना सामायिकस्य हेतुः कर्त्ता सामायिकस्य प्रयोज्यकारको ज्ञेयः कः पुनरसौ नय इत्याह सत्त्वा एव नय इति
द्वात्रिंशद्गाथार्थः॥ ९०१॥ अत्रापि उप्पण्णानुप्पन्नं कम्हा कं पइ थज इन मोक्कारे इत्यादि निर्युक्तिगाथा नामग्रहणे कारणं पूर्वोक्तमवद्रष्ट
व्यं एवमुत्तरत्रापीति॥ अथ तमेव नयमष्टप्रकारमाह। आलोयणा य विणए। खेत्तदिसाभिग्गहे य काले य। रिक्खगुणासंपयाविय। अभिवाहारे
य अट्ठमए॥ इहाभिमुख्येन गुरोरात्मदोषप्रकाशनमालोचना विनयश्च बाह्य आसन्नदानाभ्युत्थानादिः आंतरस्तु बहुमानादिः तथा क्षेत्र
मिक्षुक्षेत्रादि तथा दिगभिग्रहश्च वक्ष्यमाणलक्षणः कालश्च दिवसादिः तथा ऋक्षं नक्षत्रं संपदिति गुणाः प्रियधर्मत्वादयस्तत्संपत्प्राप्ति
रिति अभिव्याहरणमभिव्याहारः कालिकादिश्रुतविषय उद्देशसमुद्देशादिरित्ययं चाष्टमो नय इति निर्युक्तिगाथासंक्षेपार्थः॥ ९०२॥ अथा
लोचनानयं भाष्यकारो विवृण्वन्नाह। सामाइयंमि उ सुवसं ययागिहत्थस्स होज्ज जइणो वा। उ यस्स पवन्नालोइयस्स सामइयं देज्जा। नवच
गृहस्थो। आलोइयं मिदिका रुहस्स गिहिणो चरित्तसामइयं। वाल्लाइदोसरहियस्स दिज्जपनियमानसेसाणं। स्पष्टेनवरं आलोइयमिति
आलोचितं आलोचितं विज्ञाते यथा द्रव्यतोऽज्ञातोऽसौ न नपुंसकादिः क्षेत्रतस्तु विज्ञातो यथानार्यमनार्यः कालतस्तु वगतो यथा शीतोष्णादिना
न क्लाम्यति भावतस्त्ववबुद्धो यथा नीरोगानलमादिरूपः ततश्चैवमालोकिते निश्चिते च दीक्षार्हस्य बालादिदोषरहितस्य गृहीणश्चारित्रसा
मायिकं दद्यादिति ननु ग्रहस्थस्य सामायिकसूत्रार्थमुपसंपदित्येव गम्यते श्रमणस्य तु व्रतग्रहणकाल एवाधीतसामायिकसूत्रत्वात्कथं तदु
र्थमुपसंपद्भवेदित्याह। सामाइयश्रुतवणे। वसंपयासा कुण्णाह वेज्जाहि। नाघायमसमकालेव॥ पइस्कमप्पंपिहोज्जाहि॥ यदा गुरुः सूत्रमात्रं विद
यभवति सूत्रं चादत्वा परलोकीभूतो भवेत् तदा तद्विष्यस्य साधोः सामायिकार्थश्रवणनिमित्तमन्यत्रोपसंपद्भवेदथवा सूत्रार्थं पिहोज्जाहित्तिव्या
घातमेष्यत्कालं वा प्रतीतो प्रतीत्येत्यर्थः सूत्रमात्रार्थमपि साधोरन्यत्रोपसंपद्भवेदिदमुक्तं भवति॥ ग्लानभावेन व्यंतरोपसर्गादिना वान्यथा
तेन पठितेऽपि विस्मृतसामायिकसूत्रेऽष्यति वादुष्यमाकाले प्रज्ञामांद्यादसमाप्तसामायिकसूत्रमात्रोऽपि साधर्वोभविष्यंतु तेनितिजगुर्वा॥

विशेषा.वि.
३९५

थीभवनादिनाकारणेनसर्वस्यापिसामायिकसूत्रस्यपठनार्थमसमाप्तस्यवासमाप्त्यर्थमन्यत्रसाधोरुपसंपद्भवेदिति तदेवंचारित्रसामायिक
मंगीकृत्यतदर्थश्रवणार्थंतस्यसूत्रमात्रपठनार्थंवासाधोरन्यत्रोपसंपदुक्ता॥अथवाश्रुतसामायिकमंगीकृत्यसमस्तद्वादशांगसूत्रार्थोभया
र्थमप्युपसंपद्भवेदितिदर्शयन्नाह।सव्वंचबारसंगं॥कयसामइयंतितदुभयत्थंति।होज्यालोइयभावस्स।इज्यकत्तंतदप्पंवा॥अथवासर्वम
पिद्वादशांगंश्रुतसामायिकंभण्यते अतस्तदुभयार्थसमस्तद्वादशांगसूत्रार्थोभयनिमित्तमप्युपसंपद्भवेदतत्रालोचितभावस्यदत्तविस
र्द्धालोचनस्यसूत्रमर्थंवादद्यादिति।उक्तमालोचनाद्वारमथविनयाद्वारमभिधित्सुराह।आलोयपासकइस्सवि।इज्यविणीयस्सनाविणी
यस्स।नहिदिज्यइआहरणं।पलियत्तियकन्नहत्थस्स।सुगमा॥किमितिविनीतस्यैवदीयतइत्याह।अणुरत्तोभत्तिगउ।अमुईअणुयत्त
उविसेसन्नू।उज्यूत्तोपरितंते।इच्छियमत्थंलहइसाहू॥सुबोधानवरंअमुयन्तिअमोचकः।उद्युक्तःउद्यमपरःअपरितांतोऽनिर्विन्नइति॥क्षे
त्रद्वारमभिधित्सुराह।विणयवउ।वियकयमंगलस्सतदविग्घपारगमणाय।इज्यमकउवउगो।खित्ताइसुमुप्पसत्थेसु।उच्छूवणेसालिव
णे पउमसरेकुसुमिएवणसंडे।गंभीरसाणुणाए पयाहिणजलेजिणहरेवा।दिज्यनउभग्गभग्गामिय।सुसाणसुन्नामणुन्नगेहेसु
ठारंगारकयारामेध्याईदव्वदुट्ठेवा॥तिसृष्वपिसुगमाःनवरमिक्षुवनादीनांसमीपेदद्यात्सामायिकंनतुभग्नध्यामितगृहादिप्रदेशेद्राक्षा
चंदनलतादिछादितःप्रदेशोगंभीरःयत्रजलंतांप्रतिशब्दउत्तिष्ठतेसप्रदेशःसानुनादइति॥दिगभिग्रहद्वारमाह।पुव्वाभिमुहोउत्त
रमुहोवदेज्याहवापडिच्छेज्या॥जाएजिणादउवा॥दिसाएजिणचेइयाइंव॥पाठसिद्धा॥कालद्वारमाह॥चाउद्दसिपन्नरसिं।वज्जेज्जाअ
ट्ठमिंचनवमिंच।छट्ठिंचचउत्थिं।बारसिंचसेसासुदेज्याहि॥सुबोधा॥नक्षत्रद्वारमाह॥मियसिरअद्दापुस्सो।तिन्निपुव्वाइंमूलमस्सेसा।हत्थो
चित्तायतहा।दसविड्ढिकराइंनाणस्स।संझागयंरविगयं।विड्डेरंसग्गहंविलंबिंच।राहुहयंगहभिन्नंच।वज्जईसत्तनक्खत्ते॥मृगसिरःप्रभृ
तिषुनक्षत्रेषुदद्यात्सामायिकंसंध्यागतादीनितुवर्ज्जयेत्तत्रसंध्यागतंयत्ररविःस्थास्यति यत्रनक्षत्रे सूर्यस्तिष्ठतितस्माच्चतुर्दशंपंचदशं
वानक्षत्रंसंध्यागतमित्यन्येरविगतंयत्ररविस्तिष्ठति पूर्वद्वारिकेषुनक्षत्रेषुपूर्वदिशागंतव्ये अपरयागच्छतोविड्डेरं सग्रहंचक्रूरग्रहाधि
ष्ठितं विलंबियद्भास्वतापरिभुज्यमुक्तं राहुहतंयत्रग्रहणमभूदितिग्रहभिन्नंग्रहविदारितमिति॥गुणसंपद्द्वारमाह।पियधम्मोदढधम्मो ३९५
संविग्गोवज्जभीरुअसढोय।खंतोदंतोगुत्तो थिरव्वयजिइंदिउउज्जू।असढोतुल्लासमाणो।समिउतहसाहुसंगयरउय।गुणसंपउववेउ।जो
ग्गोसीसोअजोग्गोय॥सुगमे॥अथाष्टममभिव्याहारमाह।नेउभिव्वाहारोभिव्वाहरणमहमस्ससाहुस्स।इयमुद्दिसामिसुत्तत्थो।भयउका

नय

लियसुयम्मि।गुणदव्वपज्जवेहिय।भूयावायंमिगुरुसमाइट्ठे।पेउहिट्ठिमियंमेइच्छामणुसासणंसीसो॥व्याख्या॥अभिव्याहरणमभिव्याहा
रःसामायिकश्रुतोद्देशादिविषयोगुरुशिष्ययोरुक्तिप्रत्युक्तिविशेषात्मकः।तद्यथा॥अहमस्यसाधोःकालिकश्रुते इदमंगश्रुतस्कंधमध्यय
नमुद्देशकंवाउद्दिसामिवाचयामिकथमित्याह सूत्रतोर्थतश्चतदुभयतश्चेति।२ ॰॰॰॰॥इदंचसूचनात्सूत्रस्यैवंभावनाद्रष्टव्या इदमंगा
दिकंममोद्दिशंतितिशिष्येणोक्तेगुरुर्वदत्युद्दिशामि।ततःशिष्योभणतिसंदिसतकिंभणामि।गुरुराह।वंदित्वाप्रवेदय।ततःशिष्योवदति॥भवद्भिर्ममेद
मंगादिकमुपदिष्टं।गुरुराह॥उपदिष्टंक्षमाश्रमणानांहस्तेनसूत्रेणार्थेनतदुभयेनच॥ततःशिष्यआह॥इच्छामोनुशास्तिं।ततश्चगुरुराह॥सम्यग्योगः
कर्त्तव्यइतिअत्रेच्छाकारक्षमाश्रमणदानप्रणिपातकायोत्सर्गकरणादिकःशेषोविधिःस्वयमेवद्रष्टव्यः समुद्देशानुज्ञयोरप्येषएवविधिर्नवरंतयोर्यथा
संख्यंसम्यग्धारयअन्येषांचप्रवेदयेति गुरुवचनंद्रष्टव्यमिति भवद्भिरादिष्टवादः तथाप्ययमेवोद्देशादिविधिः।केवलंद्रव्यैर्गुणैःपर्यायैश्चउ
द्दिष्टमिदमित्यादि गुरुःसमादिशति एवंगुरुःसमादिष्टेशिष्योवदतिउद्दिष्टमिदंमेइच्छाम्यनुशास्तिमित्यादीति।तदेवंव्याख्यातोभिव्याहारनय
स्तव्याख्यातानालोयणायविणएत्यादिप्रतिद्वारगाथा अथमूलद्वारगाथायांयदुक्तंकरणंकतिविधमितितत्राह करणंतच्चावारोगुरुसीसा
णंचउव्विहंतंच।उद्देसोवायणया।तहासमुद्देसणमणुन्ना।गुरुशिष्ययोस्तद्विषयःसामायिकविषयोव्यापारःकरणंसचगुरुशिष्ययोस्तद्व्याप
रश्चतुर्विधस्तस्माच्चतुर्विधव्यापारत्वरूपंकरणमपिचतुर्विधं॥तद्यथा॥वाचयामीतिगुरुप्रतिज्ञारूपउद्देशस्ततस्तत्प्रदत्तेनसूत्रस्यपरिपाटी
रूपावाचनातथासमुद्देशोनुज्ञाचेति।अत्राक्षेपपरिहारावाह।नणुभणियमणेगविहं।पुव्वंकरणमिहकिंपुणग्गहणं।तंपुव्वगहियव
रणं।इदमिहदाणग्गहणकाले॥ननुपूर्वनामादिभेदतोनेकविधंकरणमुक्तमिहकिंपुनरपिभेदकथनगर्भंकरणग्रहणं॥अत्रोच्यते॥तत्रागु
कंपूर्वंगृहीतस्यदानग्रहणकालादुत्तीर्णस्यसामायिकस्यसिद्धंकरणमुक्तं इदंत्विहगुरुशिष्ययोर्दानग्रहणकालेउद्देशादिविधिनासाध्यंकरणमुच्य
तइतिशेषःविशेषांतरमाह।पुव्वमविसेसियंवा।इहगुरुसीसक्कियाविसेसाउ।करणंववसरोवायं णेगंतमयंतुपन्नासो॥अथवापूर्वमविशेषितंकारण
मुक्तं इहतुनदेवगुरुशिष्योक्तिप्रत्युक्तिक्रियाविशेषाद्विशेषितमुच्यते अथवाअयमेवगुरुशिष्योक्तिप्रत्युक्तिकालेसामायिककरणस्यभणना
वसरःतत्रतर्हिकिमित्युक्तमितिचेदुच्यते।अनेकांतार्थव्यत्यासोऽन्यथानासणनंनत्थयंनियमोयदन्यत्रवक्तव्यंतदत्रनोच्यते विचित्राभगवतः
सूत्रस्यकृतिरिति।गतंकरणंकतिविधमिति।द्वारंइदानींकथमितिद्वारमभिधित्सुराह।लब्भइकहंतिभणिए।सुयसामइयंजहानमोक्कारोसेसा
इंतदावरण।क्खयउसमउहवोभवउ कथंसामायिकंलभ्यतइतिभणितेसत्युच्यते श्रुतसामायिकंतावद्यथानमस्कारःपूर्वमुक्तस्तथालभ्यते न

मस्कारस्यापिश्रुतांतर्गत्वान्नमस्कारलाभश्च पूर्वमिहाभिहितः मइसुयनाणावरणं दंसणमोहं च तदुवघाईणि तप्फड्डयाइं दुविहाइं सव्वदेसोवघाईणि
सव्वेसु सव्वघाईसु हएसु देसोवघाइयाणं च भागेहिं मुच्चमाणो समए २ अणंतेहिं पढमं लहइ नकारं एक्केक्कं वण्णमेवमणंपि कमसो विसुज्झ
माणो लहइ समत्तं नमोक्कारं इह च सम्यग्दर्शनमेव नमस्कारो भवतीति तावन्मात्रेणैव दर्शनमोहनीयस्य क्षयोपशम उक्तः मुख्यवृत्त्या तु न
मस्कारस्य मतिश्रुतरूपत्वात्तदावरणक्षयोपशमादेवासौ लभ्यत इत्यत्र द्रष्टव्यं एवं श्रुतसामायिकमपि मतिश्रुतक्षयोपशमाल्लभ्यत इति द्व
यं शेषाणि तु सम्यक्त्वदेशविरतिसर्वविरतिसामायिकानि तदावरणस्य यथासंभवं क्षयतः शमत उपशमत इत्यर्थः अथ वा भवतः क्षयोप
शमाद्भवतीति द्रष्टव्यमिति। अत्राक्षेपपरिहारावाह। नणु भणियमुवक्कमयारम्मि उवसमउ पुणो उवग्घाए। लब्भइ कहं ति भणिए। इहं कहं का पुणो पु
च्छा॥ आह ननु पूर्वमत्रैवोपक्रमतो उपक्रमप्रस्तावे भावोवक्कमउवसमिए दुबालसंगं पि होइ सुयनाणं तथा बीयकसायाणुदए अप्पच्चक्खाण
नामधेज्जाणं तथा तइयकसायाणुदए पच्चक्खाणावरणनामधेज्जाणं देसेक्कदेसविरइं तथा बारसविहे कसाए खविए उवसामिए व
जोगेहिं लब्भइ चरित्तलंभो इत्यादिवचनात्तदावरणस्य क्षयोपशमात्क्षयादितश्च सम्यक्त्वादिसामायिकानि लभ्यंत इति भणितं पुनरपि
चोपोद्घाते किं कइविहमित्यादिगाथायां कथं सामायिकं लभ्यते मनुष्यत्वादिभ्य इति भणितं ततश्चेह कथं सामायिकं लभ्यत इति का पुनः पृ
च्छा पुनरुक्तत्वान्नेयमिह युज्यत इति भावः। परिहारमाह। भणिए एव इउवसमउ। सएव लब्भइ कहं उवग्घाए। सो च्चिय खउवसमो इह केसिं होज्ज
कम्माणं॥ भावोवक्कमउवसमिए इत्यादिना उपक्रमे क्षयोपशमादिहेतोः सामायिकं लभ्यत इति भणितं पुनरप्युपोद्घाते स एव क्षयोपशमादि
हेतुः कथं लभ्यते मनुष्यादिसामग्रीवशादित्युक्तं इह तु स एव क्षयोपशमादिः केषां कर्मणां भवेदिति विविच्यत इति स्थानत्रयभणनस्यापि विषय
विभाग इति तदेवं व्याख्यातं कृता २ दिद्वारैः करणं अथ केनाभिहितं सामायिकमित्यत्र विनेयपृच्छामाशंक्योत्तरमाह। कोकारउ करेंतो। किंक
म्मं जं नु कीरई तेणं। किं कारउ य करणं च होइ अन्नं अणन्नं ते॥ कीदृशस्तावत्कारक इति कथ्यतां। सूरिराह॥ स्वतंत्रतया कुर्वन्सामायिकस्य कर्त्तेति
हि कर्म किमत्रेत्याह यत्तेन क्रियते तद्रागद्वेषात्मकं कारणं उच्यते नमः प्रभृतिश्चेत्यमुक्ते सत्याह ते न वस्तु सर्वं कारकः कारणं च शब्दात्कर्म चेत्येतत्र
यं परस्परमन्यमन्यद्भिन्नमनन्यद्वा अभिन्नं भवतीति॥ एतदेव विवृण्वन्नाह। कोकारउ त्तिभणिए। होइ करेंतो त्ति भण्णए गुरुणा। किं कम्मं
ति य भणिए। भण्णइ जं कीरए तेणं॥ गतार्था॥ अत्र कः कारक इत्यादितत्त्वप्रश्नमक्षममाणः परस्तावदाह। केणं कयं ति य कत्ता। नणु भणितं प
तथा का पुच्छा तच्चिव रणं चिय इमं। केणं ति वि होज्ज माकरणं॥ आह ननु कया कयमित्यादिगाथायां केन कृतमिति द्वितीयद्वारे कर्त्तेति भणितमेव तत्र

पुनरपीह कर्तुः पृच्छा॥ सत्यं॥ केन कृतमित्यत्र कर्त्तरि करणे च तृतीया संभवत्यनन्तद्विवरणमेवेदं केनेत्यत्र कर्त्तरि तृतीयामाश्रित्य करणमिति अ
थवा तेष्वेव कृता २ दिद्वारेषु सामायिकस्य कर्त्तारं कर्म करणभावं च श्रुत्वा कुलालघटदंडानामिव प्रस्तुत कर्तृकर्मकरणानां प्रविभागमय
उयन्पृच्छति कः कारकः सामायिकस्येत्यत्रोत्तरं कुर्वन्नयमस्य कारकः किं पुनः कर्मेत्यत्रोत्तरं यत्तेन कर्त्रा क्रियते तत्तु शब्दात्मनः प्रभृतिक
रणं च द्रष्टव्यमेतदेवाह॥ अहवा कयाइ दुसु कत्तारं कम्म करणभावं च। समाइयस्स सोउ। कुलालघडदंडगाणं च। पविभागमयाणंतो
पुच्छइ कोकारउ करेंतो य। किं कम्मं जं कीरइ। तेण तु मइ एण करणं च॥ इइ अपि गतार्थे॥ अत्राक्षेपमाह। किं कारउ य करणं च होइ कम्मं च तेच्चस
द्दाउ। अन्नमणन्नं भण्णइ। किं वा ह न सव्वहा जुत्तं॥ कारकः करणं च शब्दात्कर्म च तेतु य सर्वे परस्परं किमन्यद्भिन्नमनन्यद्वा अभिन्नमिति॥
भण्यते अत्रोत्तरं॥ किं चातः किमनेन तव पृष्टेनेति। अत्राह परः॥ अन्यत्वमनन्यत्वं चेति द्वयोरेकमपि सर्वथा न युक्तमिति। अत्रान्यत्वे भावदू
षणमाह। अन्नत्ते समाइ वा ३ उ। तप्पउ यणाभावापावइ मिच्छस्स वेससम्मामिच्छा विसेसो यं॥ कर्मभूतस्य सामायिकस्य कर्त्तुर्जीवादन्यत्वे मि
थ्यादृष्टेरिव सैतस्य कर्त्तृजीवस्य सामायिकाज्जन्यसमतावाभाव एवस्याद्न्यत्वाविशेषात्ततश्च तत्प्रयोजनभूतस्य मोक्षफलस्याभाव एवप्रा
प्नोति अपरश्चायं कृतसामायिकः सम्यग्दृष्टिरयं तु मिथ्यादृष्टिरित्ययमविशेष एव स्यादुभयोरपि सामायिकस्यान्यत्वाविशेषादिति। परएवा
चार्यमाशंकते अहव मई भिन्नेण वि धणेण सधणो त्ति होइ ववएसो। सधणो य धण्णाभागी। जह तह सामाइयस्सामी॥ अथ वा अत्रसूरेरत
वेयं मतिः स्याद्भिन्नेनापि धनेन सधन इति व्यपदेशो लोके भवति अपरं चासौ सधनो धनभागी धनफलभोक्ता यथा दृश्यते तथा भिन्न
स्यापि सामायिकस्य स्वामी सामायिकवांस्तत्फलभोक्ता भविष्यति न्यायस्य समानत्वादिति तदेतत्परः परिहरति। तं न जउ जीवगुणो सामा
इयं तेण विफलया तस्स। अन्नत्तेण उजुत्ता। परसामाइय सवाफलया॥ तदेतत्सर्वं दुष्कं यतो जीवगुणः सामायिकं तेन जीवगुणस्य सामा
यिकस्य गुणिनो जीवादन्यत्वे विफलतानिःफलतायुक्ता धनं तु धनिनो गुणो न भवति तेन तस्य भिन्नस्यापि सफलता स्थितिभावः यथा परसा
मायिकस्य विवक्षितजीवमपेक्ष्यान्यत्वाद्फलतेति। अपि च। जइ भिन्नं तन्नाणे वि तउ तस्स भावरहिउ त्ति। अन्नाणिव्व य निरत्थं। अधोवसमंपई
वेण॥ यदि कर्त्तुर्जीवाद्भिन्नं सामायिकं तदा तद्भावेपि भिन्नसम्यक्त्वादिसामायिकसद्भावेपि तत्कोसौ कर्त्ता जीवस्तत्स्वभावरहितः सम्यक्त्वादिसा
मायिकस्वभावरहित इति कृत्वा अज्ञानीवस्याद्यथा भिन्नेन प्रदीपेन समं वर्त्तमानोपि स्वस्वभावभूतः चक्षुर्विकलोंध इति॥ अथानन्यत्वपक्षं
दूषयन्नाह। एकत्ते तन्नासे। नासो जीवस्स संभवो भवणं। कारगसंकरदोसो। तदेक्कयाकप्पणा वा वि॥ सामायिकतत्कर्त्रोरेकत्वे ऽनन्यत्वे तन्ना

सेसामायिकनाशेसामायिकवतोजीवस्यापिनाशःप्राप्नोति घटस्वरूपनाशेघटस्येवेतिसंभवेचोत्पन्नोसामायिकस्यजीवस्यापिभवनमुत्पत्तिम
त्त्वस्यान्नचतस्यतदिष्यते नित्यत्वात्तथाकर्तृकर्मकरणकारकाणांशंकरदोषस्तदेकतान्वस्यात्कल्पनामात्ररूपतावाकारकाणांभवेदिति
॥अत्राचार्यउत्तरमाह॥आयाइकारउमे॥सामाइयकम्मकरणमायाए।तम्हाआयासामाइयं।चपरिणामउएक्कं॥आत्मैवतावत्सामायिकस्य
कारकःकर्त्तामेममसामायिकंमेवक्रियमाणत्वात्कर्मसामायिककर्मतद्व्याप्त्येवनपुनस्तद्व्यतिरिक्तमन्यत्किंचिदिति अथचात्मात्मनःप्र
भृतिकंकरणमप्यात्मैव तस्मादात्मासामायिकंचात्मात्मकरणंचेतित्रितयमप्येतदेकमेवकथंपरिणामतः आत्मपरिणामरूपत्वात्नहिसामा
यिकंमनःप्रभृतिकरणंचात्मपरिणामरूपत्वमतिक्रम्यवर्त्तते अतस्त्रितयमपिपरिणामरूपतयाएकमेवेदमिति एतदेवव्याचिख्यासुराह
॥जंनाणाइसभावं।सामाइयंजोगमाहकरणंच उभयंचसपरिणामो।परिणामाणन्नयाजंच॥यस्मात्सामायिकंसामान्येनज्ञानदर्शनचा
रणस्वभावंकरणमपिमनःप्रभृतिकंयोगमाहपरमगुरुःउभयंचैतदात्मनःस्वपरिणामःपरिणामतद्वतोश्चयस्मादन्यत्वंतेवेति॥ततःकिमि
त्याह।तणायासामइयं।करणंचसइदनभिन्नोई।नणुभणियमणन्नंते।तन्नासेजीवनासोत्ति॥तेनतस्मादात्मासामायिकंचात्मात्मकरणंचमनः
प्रभृतिनपरस्परमेतानिभिन्नानिआहनन्वनमनन्यत्वेतन्नाशेजीवनाशइत्यादिकंदूषणंभणितमेवेति।अत्रसूरिराह।जइतप्पज्जयनासो।कोदो
सोहोउसव्वहात्तम्मि।जंसोऽप्पायव्वय धुवधम्माणंतपज्जाउ॥सचासौसामायिकादिरूपःपर्यायश्चतत्पर्यायेणतत्पर्यायरूपेणनाशोजीवस्यतत्पर्याये
नाशेणयदिभवति तदाभवतुनामकोदोषोयस्तुपर्यायविनाशेजीवस्यसर्वथानाशःसनास्तिनेष्यते यस्मादसौजीवउत्पादव्ययध्रौव्यधर्माऽनंतप
र्यायःततश्चैकस्यसामायिकादिपर्यायस्यनाशेपिकथंतस्यसर्वथानाशःशेषानंतपर्यायैर्विशिष्टस्यतस्यसर्वदाऽवस्थानादिति।नकेवलमात्मा
किंतुसर्वमपिवस्तुजैनानामुत्पादव्ययनित्यतास्वरूपमेवेतिदर्शयन्नाह।सव्वंचियपइसमयं।उप्पज्जइनासएयनिच्चंच।एवंचेवयसुहदुक्ख।बंधमो
क्खाइसब्भावो॥आगसरुद्धावितार्थेवेति॥यदप्युक्तंकारकैकत्वंकारकैकताप्राप्नोत्यत्राप्याह।एक्कंचेवयवत्थुं।परिणामवसेणकारगंतरयं।पाव
इतेणदोसोविवरकयाकारगंजंच॥एकमेवहिवस्तुपरिणामवशेनकारकांतरतांप्राप्नोति तथाह्येकएवदेवदत्तःकरादिकर्तृत्वेनपरिणतत्वात्क
र्त्तासएवयज्ञदत्तादिप्रयोजककरणतयापरिणतत्वात्करणंदिदृक्षूणांदृश्यमानतयापरिणतत्वात्कर्मतांबूलादिदानग्रहणतयापरिणतयाप
रिणतत्वात्संप्रदानं सएवनिःषन्नकरस्यमोचनेपरिणतत्वाद्यादानंकटक्रियाधारत्वेनचपरिणतत्वादधिकरणमित्येवमन्यत्रापिभावनी ३९७
यंतेनकारकसंकरादिकोनदोषोविवक्षातश्चयस्मात्कारकाणिभवंति तस्मात्कल्पनायामप्यदोषएवेति॥तथाहि॥कुंभोविसज्जमाणो

कत्ताकम्मंसरावकरणंच।भाणाकारयाभावं।लहइजहेगोविवरकाए।जहवाणाणाणन्नो।नाणीणियउवउगकालम्मि।एगोवितस्सभावो।सामा
इयकारगोएवं॥व्याख्या॥कुंभोविशीर्यमाणोविशारणक्रियायाःकर्तृत्वेनविवक्षितःकर्त्ताभवति सएवचविशारणक्रियाव्याप्यत्वेनविवक्षमाणः
कर्मसंपद्यते तेनघटपर्यायेणकृत्वाविशीर्यतइतिकरणत्वेनविवक्ष्यमाणःसएवकरणंसंजायते एवंयथैकोपिपदार्थोविवक्षयानानाकार श्य
कभावंलभ्यते यथावामत्यादिज्ञानादनन्योऽभिन्नोज्ञानीजीवोनिजकमात्मविषयःस्वसंवेदनरूपोयउपयोगस्तत्कालेएकोपित्रिस्वभावोभ
वति तथाहिस्वोपयोगेउपयुज्यमानोसौकर्त्ताभवति संवेद्यमानत्वेनतुकर्मकरणभूतज्ञानानन्यत्वाच्च करणमिति एवंसामायिककारकएको
पिविवक्षयाकर्तृकर्मकरणस्वभावोद्रष्टव्यइति।तदेवंकरणव्याख्यातंतद्व्याख्यानेबकरोमीति।सामायिकस्यप्रथमावयवोव्याख्यातोऽथभदंत
इतिद्वितीयावयवंव्याचिख्यासुराह।भदिकल्लाणसुहत्थो।धाउतस्सयभदंतसद्दोयं।सभवंतोकल्लाणं।सुहोइकल्लंकिलारोग्गं।तंतंचनिव्वा
णं।कारणकज्जोवयारउवावि।तस्साहणमणसद्दो।सद्दस्सोअहबगब्भत्थो।कल्लुमणइत्तिगच्छइ।गमयइबुज्झइवबोहयइवत्ति।भण्णइभणाविइ
व।जंतोकल्लाणोसव्वायरिउ॥व्याख्या।भदिकल्याणेसुखेचेतिभदिधातुःकल्याणार्थःसुखार्थश्चतस्यभदिधातोर्भदंतइत्यौणादिकेप्रत्यये
भदंतशब्दोयंनिःपद्यते ततःस्थितमिदंसाभदंतःकल्याणःसुखश्च।तत्रकल्याणशब्दव्युत्पादनार्थमाह॥कल्लंकिलारोग्यमुच्यतइतियत्रासे
र्यंतथ्यंनिरुपचरितंनिर्वाणमेवमवगंतव्यमथवाकारणेकार्योपचारात्तत्साधनंदर्शनज्ञानचारित्रलक्षणंनिर्वाणकारणमवसेयं अणशब्द
इस्तुअणधातोरुभयार्थत्वाच्छब्दार्थोगत्यर्थोवाद्रष्टव्यइति ततश्चकल्यमयोक्तमारोग्यमणतिगच्छयतीतिउनर्थत्वेवापरानुगमयतिबुध्यते
स्वयंबोधयतिवापरान्शब्दार्थत्वेपिकल्यमणतिस्वयंभणतिपरेभ्यभाणयति यस्मात्तस्मात्कल्याणःसचेहाचार्योगुरुर्बोधकइति अथ
वाकलधातुःशब्दार्थःसंख्यानार्थोवाकलशब्दसंख्यानयोरितिधातुपाठात्तस्यकल्यमितिनिपात्यतेततश्चकल्यंशब्दंशास्त्रसंख्याने
वागणितंयस्मादणतिशब्दयति प्रतिपादयतिबुध्यतेबोधयतिवातेनतस्मात्कल्याणोगुरुरित्येतदेवाह।अहवाकलेसद्दत्तो।संखाणस्सोय
तस्सकल्लंति।सद्दंसंखाणंवा।जमणइतेणंवकल्लाणो।गतार्था॥सुखस्तर्हिकथमाचार्यइत्याह।सुपसंसत्थोखाणि।दियाणिसुहंदिउसुहो
भिमउ।वसिंसदिउजमुत्तं।अहसुहोअजिइंदिउभिमउ।सुहमहवानिव्वाणं।तब्बंसेसमवयारउभिमयं।तस्साहणंगुरुत्तिय।सुहमन्नेपाणसव्व।
सुशब्दःप्रशंसार्थोनिपातःखानिइंद्रियाणि शोभनानिखानियस्यासौसुखःसुकृतेंद्रियोभिमतः।किंमुक्तंभवति वशेंद्रियोनिर्विकारेंद्रियःइ
तियदुक्तंभवति अजितेंद्रियस्त्वसुखोऽभिमतइति अथवासुखयतीतिसुखंतथ्यंनिरुपचरितंनिर्वाणमुच्यते शेषंतुसांसारिकमुपचारतः

डाक्टर भाऊ दाजी ... DR BHAU DAJI MEMORIAL

सुखमभिमतं ततोस्य द्विविधस्यापि सुखस्य साधनं कारणं गुरुरित्यस्य सौख्यं कारणे कार्योपचारात् भक्तेः प्राणसंज्ञावदिति। अन्नं प्राणा
वघृतं दुलादित्यादिवद्यथोक्तो भयरूपसुखहेतुत्वात्सुखो गुरुरित्यर्थः। अथवा अन्यथा सुखशब्दार्थमाह। जंवसियं खेदिंतो। णुग्गहरूवं तउ
सुहं तत्थ। अभयाइ तप्पयाया। सुहमिह तस्सत्ति भावाउ॥ यद्वा सुष्टु इतं प्राप्तं स्थितं खेभ्यः इंद्रियेभ्यः मनःप्रसादादिद्रष्टव्यं खेरिंद्रियैः करणभू
तैरित्यर्थः निपातनात्सुखमुच्यते तत्कुतः प्राप्तमित्याह ततो गुरोः सकाशात्तत्र सर्वजीवानहं तव्यादित्यादिगुरुकृतानुग्रहरूपमभयप्रदानादि
द्रष्टव्यं आदिशब्दात् ज्ञानादिपरिग्रहः गुरुप्रदत्तेनाभयप्रदानादिना हि जीवाः पंचभिरिंद्रियैः सुखमनुभवंत्यतस्तत्प्रदाता अभयादिप्रदाता
गुरुरपीह सुखं तद्भक्तिभावात्तत्सुखोपचारात्कारणे कार्योपचारादित्यर्थः। तदेवं करोमि भदंतेति व्याख्यातं। अथवा भंतेत्ति ने दं भदंत इत्यामंत्र
णं किंतु भजंत इति कमाव्युत्पत्तेरित्याह। अहवा भयसेवाए। तस्स भयंतोत्ति सेवए जम्हा। सिवपुरमग्गो सिवमग्गं। सेवोयजउ तदत्थीणं। अथवा भ
ज भजि सेवायामिति भज धातुस्तस्य भजते सेवत इति भजंतस्तस्य संबोधनं हे भजंत गुरो सर्वैरेव सेव्यसे यस्मात्सेवते कान् शिवगतीप्सि
ध्दगति प्राप्तान् अथवा दर्शनज्ञानचारित्रलक्षणं शिवमार्गं मोक्षमार्गं वा अथवा सेव्यश्चयस्माद सौ तदर्थिनां तस्माद्भज्यते सेव्यत इति भजंत
उच्यत इति। अथवा भांतो भ्राजंतो वा गुरुरुच्यते कथमित्याह। अथवा भा भाजोवा। दित्तीए तस्स होइ भंतोत्ति। भाजंतो वायरिऊ। सो नाणतवो
गुणजुईए। अथवा भा धातुर्भ्राज धातुर्वा दीप्तौ एतिदीप्तौ पठ्यते तस्य भांत इति भ्राजत इति वा भवति। स चैवंभूतः क इत्याह। आचार्यः सच
थं भाति भ्राजते वा इत्याह ज्ञानतपोगुणादीप्त्येति॥ अथवा भ्रांतो भगवान्या सावितिदर्शयन्नाह। अथवा भंतो वेऊ। जं मिच्छत्ताइ बंध हेऊउ।
अह वेसरियाइ भगो। विज्जइ से तेण भगवंतो॥ अथवा भ्रम अनवस्थाने इत्यस्य धातोः भ्रांत इत्युच्यते यस्मादपेतो सौ मिथ्यात्वादिबंधहे
तुभ्य इति अथवा ऐश्वर्यादिकः षड्विधो भगो विद्यते तेन तस्य भगवान् गुरुरिति। अथवा भवांतो भयांतो वा अयमित्यादि दर्शयन्नाह। नेरयाइ
भवस्सव। अंतो जं तेण सो भवंतोत्ति। अहवा भवस्स अंतो। होइ भवंतो भयंतो सो॥ अथवा यस्मान्नारकादिभवस्यांत हेतुत्वादंतो सौ तेन
भवांत इति अथवा भयस्यांतो भयांतो भवति भयं च त्रास उच्यते ति। अथ भयं विशेषतोपि व्याचिख्यासुराह। नामाइ चउव्विहं तं। भावा
इभयं सत्तहे इहलोगाइ। इहलोगं जं सजाईउ। परलोयभयं परा वाउ। किंचणमादाणं तन्नयं तु नासहरिणाइउ नेक्खं। वज्झनिमित्ताभावाजं
भयमाकम्हियं तंति। असिलोगभयमजसउ। दुजीयमजीविया भयं नाम। पाणपरिच्चायभयं। मरणभयं नाम सत्तमयं। व्याख्या॥ नामस्थापना ३९८
द्रव्यक्षेत्रकालभावभेदात्सद्विधं भयं तत्राद्याः पंचभेदाः सुव्याख्येया भावभयं तु इह इहपरलोगायाणमकम्हा आजीवमरणमसिलोए इ

ति वचनात्सप्तधा भवति॥ तथा चाह॥ इहलोगाइत्ति तत्रेहलोकजं भयं स्वभवतः स्वाभवाद्यथा मनुष्यस्य मनुष्यात्तिरश्च तिर्यग्भ्यः इत्यादि परलो
कभयं तु परलोकात् यथा मनुष्यादेस्तिर्यगादिभ्यः किंच तद्द्रव्यमादानमुच्यते तद्भयं तु नाशाहरणादिभ्यो द्रेयं यत्तु बाह्यनिमित्ताभावादकस्मादेव
भवति तदाकस्मिकं अश्लोकोश्लाघा तद्भयं त्वयशः इति आजीविका भयं तु दुर्जीविका भयं मरणभयं तु नाम पसत्तमं भयं तत्प्राणपरित्यागभ
यमिति। अथांतशब्दस्य व्युत्पादनार्थमाह। अमगच्छाइसु तस्सेह। अमणं अंतो वसाणं मेगत्थं। अमइ वत्तंते णं तो। भयस्स अंतो भयं तोत्ति। अमरोगेवा
अंतो। रोगो भंगो विणास पज्जाउ। जं भव भय भंगो सो। तउ भवंतो भयंतोयु॥ व्याख्या॥ अम धातुर्गत्यादिषु अर्थेषु पठ्यते तस्येहांत इति रूपं
भवति अमन अमत्ती वसानमित्येकार्थ अमतीति वा यस्मात्तेनांत इति कर्तरि साध्यते भयस्यांतो भयांत इति अथवा अमरोगे रुजो भंगे तत
श्चांतो रोगो भंगो विणास इति पर्यायशब्दा एते इत्यर्थः एवं च सति यस्माद्भवस्य भयस्य च भंगहेतुत्वाद्रोगो सौ गुरुस्ततो भवांतो भयांतश्चेति॥
ननु भवद्भिर्व्युत्पादितानां भदंतादिशब्दानां स्थाने कथं भंते त्ति निःपद्यत इत्याह। एत्थ भयंताईणं। पायय वायरणलक्खणगईए। संभवउ पत्तेयं।
दयगवगाराइ लोगाउ। हस्से कारांतादेस उ यभंतेत्ति सुसामन्नं। गुरुआमंतणवयणं। विहियं सामाइयाईए॥ व्याख्या॥ अत्र भदंतादीनामादिशब्दाद्भजंत
भांत भ्राजंत भगवंत भवांत भयांत परिग्रहः प्राकृतव्याकरणलक्षणगत्या यथासंभवं प्रत्येकं दयगतवकारा अक्षरलोपात्तथा ह्रस्वे कारांतादेशात् भंतेत्ति
सर्वसामान्यं पदं निःपद्यत इति शेषः तत्र भदंत इत्यत्र दकारस्य भयांत इत्यत्र यकारस्य भगवंत इत्यत्र गवकारयोर्लोपः कर्तव्यः आदिशब्दाद्भजंत इत्या
दिषु यकाराद्यक्षराणां लोपो द्रष्टव्यः भांत इत्यादिषु भावीनां ह्रस्वत्वादेशः भंत इति पदे च स्थिते अंते एकारादेशः कर्तव्य इति। भंते इत्येतच्च पदं गुर्वामंत्रण
वचनं सामायिकसूत्रस्यादौ विहितमिति भंतेति पदस्यामंत्रणवचनतामेव भावयति। आमंतेइ करेमी। भंते सामाइयंति सीसोयं आहामंतणवयणं गुरु
णो किं कारणमिणंति॥ करेमि भंते सामाइयमित्येवं शिष्योयमामंत्रयति गुरुं। आह॥ परो ननु गुरोरामंत्रणवचनमिदमादौ विहितमित्यत्र किं कारणमित्येतत
त्कथ्यतामिति। सूरिराह॥ भणइ गुरुकुलवासो। व संगहत्थं जहा गुणाणीह। निच्चं गुरुकुलवासी। हवेज्ज सीसो जउ भिहियं नाणस्स होइ भागी। थिरयरउ
दंसणे चरित्तेय। धन्ना आवकहाए। गुरुकुलवासं न मुंचंति। गीयावासो रइ धम्मे। अणाययणवज्जणा निग्गहो य कसायाणं। एयं धीराण सासणं। रू
पकत्रयं पाठसिद्धं॥ अपि च॥ आवस्सयं पि निच्चं। गुरुपामूलं मि देसियं होइ वीसं पि हु संवसउ। कारणउ जदभिसेज्जाए॥ अनेन गुर्वामंत्रणवचनेन ज्ञा
ननु पकं प्रति क्रमणं गुरुपादमूल एव नित्यं कर्तव्यं इति दर्शितं भवति यद्यस्मादभिशय्याया द्वितीयवसत्या वित्यर्थः कारणातः कारण वशाद्दिवसमपि
संवसतः सोधोः कल्पग्रंथे इयं सामाचारी प्रोक्तेति शेषः॥ का पुनरियं कल्प सामाचारीत्युच्यते। जइ खुडु लगा वसहीतो अन्नत्थ गंतूण वइपयासाहूणे

वसंतितत्राचार्यसमीपे पर्यङ्ककमिउंपाउस्सियकालग्रहणानंतरंकालंसूत्रार्थपौरुषींकृत्वा अन्यस्मिंगच्छंति अर्थांतरगस्वापदादि भयं ततोऽर्थपौरुषींहापयंतित
तःसूत्रपौरुषीमपिकालमपितथाचरमंकायोत्सर्गंद्वितीयमाद्यंयावत्तिष्टत्यपिसहस्वरत्रमौतत्रयोतीति नकेवलंप्रतिक्रमणंकिंतुवमेवशेषाण्यपि
सर्वाण्यिसाधुभिरवश्यंकर्त्तव्यान्यावश्यकानिगुरुनापृच्छ्याकर्त्तव्यानीत्येततज्ञापितमामंत्रणवचनादेनसर्वेषामप्यावश्यकानांसामायिकमेवादौ
मतंभदंतशब्दश्चयस्मात्तदादौनिर्दिष्टस्तेनानुवर्त्ततेतत्कोसौसर्वेष्वप्यावश्यकेषुकथमित्याह इदमिदंचकरोमिभदंतइति।एतदेवाह।एवंवियसव्वा
वस्सयाइं।आपुच्छिऊणकज्जाइं।।जाणाविययमामंतण।वयणाउजेणसव्वेसिं।सामाइयमाइमयं।भदंतसद्दोयजंतदाईए।तेणाणुवत्तइत्तउ।करेमिभंते
त्तिसव्वेस॥गतार्थः॥किमितिगुरुस्तापृच्छ्यैवसर्वावश्यकानिकर्त्तव्यानीत्याह।किञ्चाकिंचगुरुवोविरतिविणयपडिवत्तिहेउंच।उस्सासाइपमोत्तुं।तदणापुच्छाए
पडिसिद्धं॥पाठसिद्धा॥यत्रनहिगुरुर्नभवतितत्रकिंविधेयमित्याह।गुरुविरहम्मियठवणा।गुरुवएसोवदंसणत्थंच।जिणविरहम्मिविजिणबिंब।सेवणामं
तणंसफलं॥रत्नोवपरोक्खस्सवि।जहसेवामंतदेवयाएवा।तहचेवपरोक्खस्सवि।गुरुणोसेवाविणयहेऊ।अहवायुरुगुणनाणे।वउगउभावगुरुसमाणेसो।
इहविणयमूलधम्मो।वएसणत्थंजउगिद्धिपं।विणउसासणेमूलं।विणीउसंजउभवेविणयायोविप्पमुक्कस्स।कउधम्मोकउतवो।विणउवयारमाणस्स।भंज
णापूयणागुरुजणस्स।तित्थयराणयआणा।सपधम्माराहणाकिरिया॥पाठसिद्धगाथेति॥अथवामेदंगुरोरामंत्रणंकिंत्वात्मनएवेतिदर्शयति।आयामंतण
महवा।वसेसकिरियाविसग्गउतंच।सामाइएणकिरिया।नियामगंतदुवउगाउ॥अथवाऽऽत्मनआत्मजीवस्यामंत्रणमिदंहेभोजीवसामायिकंकरोम्यहं
कथंभगवत्रोऽथवापाविसर्गतःसर्वोऽपिक्रियाविसृज्यतेस्यर्थः तच्चात्मामंत्रणंसामायिकेकक्रियायानियमायनियमार्थंतदुपयोगान्नान्यामेवैकस्यांसामायि
ककियायामुपयोगादिति।एवंवस्तंतिकिंमुक्तंभवतीत्याह।एवंचसव्वकिरिया।तमत्तयानदुवउत्तकरणंच।वत्कामंहोइनिसीहियाइकिरियाइवउगोव्व॥एवंवसति
रात्रावसामपिप्रत्यपेक्षणादिक्रियामांपरस्परावसप्रसन्नतात्र्यन्योन्यमनाबाधतातस्यामेवप्रारब्धैककियायामुपयुक्तकरणंचात्मामंत्रणेनव्याख्यातंविशेष
णकथितंभवति यथानैषेधिकानैषेधिकीकरणेनबाह्यक्रियानिषेधतोवमत्सभ्यंतरक्रियोपयोगएवकथितोभवत्येवमिहापीति॥अथवाजिनसिद्धाद्या
मंत्रणार्थायंभदंतशब्दइतिदर्शयति अहवाजहसंभवउ।भदंतसद्दोजिणाइसत्कोणं।आमंतणाविधायी।तस्सक्खेज्जथिरत्तुयपया।गहियंजिणाइसक्खं
मालित्तदुज्झगोरयभयाउ।सामाइयाइयारे।परिहरउतंथिरंहोइ॥व्याख्या॥अथवायथासंभवतोयेकेचनातिशायिनोजिनसिद्धादयःसंभवंति
तेषांजिनादीनांसाक्षिणामामंत्रणाभिधायीभदंतशब्दःभो२जिनादयोभदंता युष्मत्साक्षिकंकरोम्यहं सामायिकमिति तत्साक्षिकत्वेचसामायिककर्तुः ३९१
स्थिरव्रतताभवतीकथमित्याह जिनादिसाक्षिकंगृहीतंमया सामायिकमतःपरिपालनीयमेवेदमित्येवंभावासन्नयासामायिकातिचारान्परिहरतस्तस्यत

सामायिकव्रतंस्थिरंभवति।कुतइत्याह।तदुज्जेत्यादि॥तेषांजिनादीनांसत्कात्समानेपुनर्योगौरवंयोबहुमानोयच्चतदीयंभयंतस्मादिति।अथवाभदंतशब्दोयं
नामंत्रणार्थःकिंतुसामायिकस्येवविशेषणार्थंइतिदर्शयन्नाह।अहवाभंतंचयत्तं।सामाइयंवेतिभंतसामइयं।एत्तमलिकणमेयंभंतेसामाइयंतंच॥भ
दंतंचतत्सामायिकंचभदंतसामायिकंकरोम्यहं कल्याणप्रायकंसुखावहंचयत्सामायिकंतदहंकरोमिनान्यदित्यर्थः भंतेसामाइयमित्यत्रनुपदेत्तमेक
गतत्वंतदंतदलक्षणमलाक्षणिकमंतालुप्यतइति।तच्चनितत्रकिमर्थमेवविशिष्यतेकिमन्यदपियत्सामायिकंविद्यतइत्याह।नामाइचउदासत्थं।नणुसं
सावज्जजोगविरईउ।गम्मइभण्णइनत्तउतत्थविनामाइसब्भावो॥नामस्थापनादिसामायिकव्युदासार्थमिदमेवंविशिष्यतेनामादिसामायिकानांवल्या
णप्रापकत्वसुखावहत्वाभावादित्यविशेषणाद्भावसामायिकमिहगृह्यतइतिभावः॥आह॥नन्वसौनामादिव्युदासःसावज्जंजोगंपच्चक्खामीत्यादिव
चनात्सावज्जजोगविरतेर्गम्यतेनहिसावज्जजोगविरतिरूपाणिनामादिसामायिकानिभवंतीति॥अत्रोत्तरं॥नत्विनतुहुचोपुज्यते तत्रापिसावद्ययो
गविरतानामस्थापनादिरूपसंभवादिदमुक्तंभवति॥यदिभावसावद्ययोगविरतिरसौगृह्येततदासंभवव्यवच्छेदसिद्धिर्नचैतदस्तिनियामकाभावाद
तन्नविशेषणेतुसामायिकस्यैयमपि।ावस्त्यागम्यते नामादिरूपसावद्ययोगविरतेः।भदंतसामायिकरूपत्वायोगादिति॥अथवाभंतेशब्दात्परशीदृश
येतिदर्शयन्नाह।भंतस्सवसामइयं।भंतेसामाइयंजिणाभिहियं।नपरप्पणीयसामा।इयंतिभंतेविसेसणउ॥अथवाकरेमिभंतेसामाइयमित्यत्र
भदंतस्यभगवतःसंबंधिसामायिकमहंकरोमीत्येवंद्रष्टव्यं ततश्चभंतेइतिविशेषणाज्जिनाभिहितंसामायिकंकरोम्यहंनपुनःपरप्रणीतंकुतीर्थिकप्ररू
पितमितितदेवंकरेमिभंतेइतिपदत्रयंव्याख्यातमथसामायिकमितिचतुर्थपदंव्याचिख्यासुराह।रागद्दोसविरहिउ।समोत्तिअयणंअउत्तिगमणं
ति।समगमणंतिसमाउ।सएवसामाइयंनाम।अहवाभवंसमाए।निव्वत्तंतेणतंमयंवावि।जंतप्पउयणंवा।तेणवसामाइयंनेयं।अहवासमाइंसमत्त।ना
णचरणाइंतेसुतेहिंवा।अयणंअउसमाउ।सएवसामाइयंनाम।अहवासमस्सआउ।गुणाणलाभोत्तिजोसमाउसो।अहवासमाणमाउ।नेउसामाइयंना
म॥आगपिनिरुक्तिद्वारेप्रायश्चर्चितार्थाःसंगमाश्वेति।अथवाअन्यथाव्युत्पत्तिरित्याह।अहवासामंमेत्ती।तत्थअउतेणवत्तिसामाउ।अहवासामस्साउ।ला
भोसामाइयंनाम सम्ममउवासमउ।सामाइयमुभयविद्धिभावाउ।अहवासामस्साउ।लाभोसामाइयंहोइ॥अथवासर्वजीवेषुमैत्रीसामभण्यते तत्र
साम्निअयोगमनंसाम्नावाअयोगमनंवर्त्तनंसामायोथवासाम्नःआयोलाभःसामायःसएवसामायिकंनामेति अथवासम्यगर्थःसमशब्दःपूर्ववद्वयधा
तुःसम्यगयनंवर्त्तनंसमयःसमयएवस्वार्थिकेकप्रत्ययोपादानादुभयत्रयवृद्धिभावाच्चसामायिकं अथवासम्यगोमोलाभःसमायःसएवसामायिकं
अथवासमस्यभावःसाम्यंसम्यम्यायोनिपातनात्समायःसएवसामायिकमिति।अथवान्यथानिरुक्तविधिरुच्यतइत्याह।अहवानिरुत्तविहिणा।सामं

सम्मं समं च जं तस्स । इकमप्पाएप वेसणं । सेयं सामाइयं नेयं ॥ अथवा निरुक्तविधिना बहुव्युत्पत्तिकमेतत्सामायिकं ज्ञेयं ज्ञातव्यमिति कथमित्यत्रोच्यते इ
क आत्मोद्देशवचनः क्वापि प्रवेशार्थे वर्त्तते आत्मोपमया परेषां दुःखस्याकरणं सामेह गृह्यते तस्य सामन इक यदात्मनि प्रवेशनं नकारस्यायादेश
निपातनात्सामायिकं तथा सम्यग्दर्शनज्ञानचारित्रत्रयस्य परस्परं योजनं सम्यगिहोच्यते निर्वाणसाधकत्वेनैव तद्योगस्यैव परमार्थतः सम्यग्रूप
त्वात्तस्य सम्यग्दर्शनादिरूपस्य सम्यगित्येतस्यात्मनि यदिकं प्रवेशनं यकारादेशमादेशनिपातनेसकारस्य च दीर्घत्वेन तत्सामायिकं तथा रागद्वेष
माध्यस्थ्यमात्मनः सर्वत्र तुल्यरूपेण वर्त्तनं सममुच्यते तस्य समस्य आत्मनि यदिकं प्रवेशनं समशब्दादयागमे सकारस्य दीर्घत्वे तत्सामायिकमिति
॥ अथ सर्वशब्दव्याचिख्यासुराह ॥ किं पुण तं सामइयं । सव्वसावज्जजोगविरइ त्ति । सियाणंतसतेणसव्वो । तं सव्वं कइविहं सव्वं ॥ किं पुनस्तद्यथोक्तशब्दा
र्थं सामायिकमित्याह सर्वसावद्ययोगविरतिरिति अथ सर्व इति कः शब्दार्थ उच्यते सृगतावित्यस्य धातोः स्रियते सर्व इति श्रियते अनेनेति वाऽऽउणा
दिकव प्रत्यये सर्वः पदार्थो वस्तु नितुवाच्येत सर्वं वस्तु इति भवति कतिविधं पुनरिदं सर्वं भवतीत्यष्टाविंशतिगाथार्थः ॥ ६८० ॥ अथ कतिविधं सर्वमिति
प्रश्नोत्तरमाह । नामं ठवणा दविए आएसे चेव निरवसेसं च तह सव्वधत्तसव्वं च भावसव्वं च सत्तमयं नामसर्वं स्थापनासर्वं द्रव्यसर्वं आदेशसर्वं निरव
शेषसर्वं तथा सर्वधत्तासर्वं भावसर्वं च सप्तम ॥ मिति निर्युक्तिगाथा संक्षेपार्थः ॥ ६८१ ॥ तत्र नामस्थापनासर्वे सुगमे द्रव्यसर्वं तु ज्ञभव्यशरीरव्यतिरिक्तं व्या
चिख्यासुराह । कसिणं दव्वं सव्वं । तद्देसो वा वि रक्कयाभिमउ । दव्वंतद्देसम्मिय सव्वासव्वे चउब्भंगो । सव्वासव्वे दव्वे देसम्मिय नाइमंगुलिदव्वं । संपुण्णदेसएणं । प
ज्जपव्वगदेसोय ॥ व्याख्या ॥ इहांगुल्यादि द्रव्यं यदा कृत्स्नं सर्वैरपि निजावयवैः परिपूर्णं विवक्ष्यते तदा सर्वमुच्यते एवं तस्यांगुल्यादिद्रव्यस्य पर्वादिको देश
पि निजावयवपरिपूर्णत्वविवक्षया सर्वोऽभिमतः वा शब्दो ऽपि शब्दार्थ आख्यातः एतदेव चांगुल्यादि द्रव्यं तद्देशो वा यदा अपरिपूर्णतया विवक्ष्यते त
दा प्रत्येकमसर्वत्वं द्रष्टव्यं ततश्च द्रव्ये तद्देशे च सर्वासर्वत्वेन विवक्षिते चतुर्भंगो भंगचतुष्टयं भवति । तद्यथा ॥ द्रव्यं सर्वं देशोऽपि सर्वः १ द्रव्यं सर्वं देशोऽसर्वः
२ देशः सर्वो द्रव्यमसर्वं ३ देशोऽसर्वो द्रव्यमप्यसर्वमिति ४ अत्र द्रव्यस्य सर्वत्वे असर्वत्वे च यथाक्रमं ज्ञातमुदाहरणं तद्यथा अंगुलीद्रव्यं संपूर्णं विवक्षि
तं द्रव्यसर्वमुच्यते तदेव देशोनं विवक्षितं द्रव्यासर्वमभिधीयते पर्व पुनः संपूर्णं विवक्षितं देशसर्वमुच्यते पर्वैकदेशस्तु देशासर्वमिति ॥ उक्तं द्रव्य
सर्वमथादेशसर्वमाह ॥ आएसोऽवयारो सो बहुतरए पहाणतरए व । देसे वि जहा सव्वं । पत्तं भुत्तं गउ गामो ॥ आदेशः उपचारः स च बहुतरे प्रधानतरे वा
देशेऽपि सर्वतया प्रवर्त्तते । तद्यथा ॥ पाण्डहीतसक्तुमध्याद्बहुतरं भुक्ते सत्यादिश्यते सर्वमनेन भुक्तमिति प्रधानतरेषु च कतिपयपुरुषेषु गतेषु शेषेष्ववतिष्ठ ४००
मानेष्वप्यादिश्यते लोके यथा गतः सर्वो ग्राम इति । निरवशेषसर्वमाह । दुविहं तु निरवसेसं । सव्वासेसं तदेकदेसो य । सव्वासेसं सव्वे । अणिमिसन

यणा जहा देवा । तद्देसा परिसेसं । सव्वे असुरा जहा असियवण्णा । जहनोइसालयाना सव्वे किरतेउलेसागा ॥ व्याख्या ॥ निरवशेषं पुनर्द्विविधं विवक्षित
सर्ववस्तुनिरवशेषं च तत्र सर्वनिरवशेषं यथा सर्वे अनिमिषनयना देवाः इहानिमिषनयनत्वमपरिशेषेष्वपि देवेषु वर्त्तते सनिमेषस्य तेष्वभावादि
ति तद्देशापरिशेषं तु यथा सर्वेप्यसितवर्णाः कृष्णा असुराः यथा वा ज्योतिष्कालया देवाः सर्वेपि किल तेजोलेश्याकाः इहासुरज्योतिष्कालयाश्च दे
वा समस्तदेवानां प्रत्येकमेकदेशे वर्त्तते तेषु सर्वेषु यथासंख्यं कृष्णवर्णत्वं तेजोलेश्यायुक्तत्वं च वर्त्तत इति देशापरिशेषत्वं मंतव्यमिति । अथ सर्वध
त्तासर्वमाह । जीवा २ सव्वं । तं धत्ते तेण सव्वधत्तं ति । सव्वेसि सव्वधत्ता सव्वं जमउ परं णत्थं ॥ इह सर्वस्मिन्नपि लोके यदस्ति तत्सर्वं जीवा अजीवा श्चेत
त्सर्वं धत्ते धारयति येन कारणेन ते नमाविवक्षानिपातनात्सर्वधत्ता सैव चेह जीवाजीवरूपाविवक्षा सर्वधत्तासर्वमुच्यते यस्मादतो जीवाजीवराशि
द्वयात्परं नान्यत्किंचिदस्तीति ॥ आह ननु द्रव्यसर्वस्यादेशसर्वस्य निरवशेषसर्वस्य सर्वधत्तासर्वस्य च कः प्रतिविशेष इत्याह । अह दव्वसव्वमेग
। दव्वाधारं ति भिन्नमन्नेहिं । एगाणेगाधारं । बयारभेएण वादेसं । भिन्नमसेसं जमिहेगं । जाइविसयं ति सव्वधत्ताउ । भिन्ना य सव्वधत्ता । सव्वाधारे ति
सव्वेसिं ॥ व्याख्या ॥ अथ द्रव्यसर्वादीनां भेद उच्यत इति शेषः तत्र द्रव्यसर्वं तावदेकद्रव्याधारमुक्तमित्यन्येभ्यो भिन्नं तेषां तद्रूपत्वाभावादादेशसर्वं
त्वेकानेकद्रव्याधारमिति कृत्वा तथोपचारभेदेन च भिन्नमन्येभ्य इति वर्त्तत इति अशेषसर्वमपि सर्वधत्तासर्वस्मात्सर्वोक्तात् भेद्याच्च भिन्नं यस्मादेवा
द्येकजातिविषयं तदिति सर्वधत्तापि सर्वेभ्यः पूर्वोक्तेभ्यो भिन्ना सर्ववस्त्वाधारत्वादिति ॥ अथ भावसर्वमाह ॥ कम्मोदयस्स भावो । सव्वो असुभो सजो
दउ दइउ । मोहो वसमसभावो । सव्वोउ वसामिउ भावो । कम्मक्खयसभावो खइउ सव्वो य मीसउ मीसो । अह सव्व दव्वपरिणइ । रूवो परिणामिउ सव्वो
॥ सुगमे ॥ ननु सप्तविधसर्वमध्यात्केनात्राधिकार इत्याह । अहिगयमसेससव्वं । विसेसउ सेसयं जहा जोग्गं । गरहियमवज्जयुत्तं । पावं तं सह तेण सा
वज्जं ॥ इह सर्वसावद्ययोगं प्रत्याख्यामीति संबंधान्निरवशेषसर्वं विशेषतोऽधिकृतं शेषकं तु षड्विधं सर्वं यथायोगं यथासंभवं तत्र प्रयोजनी
यमिति ॥ ६ तदेवं करेमि भंते सामाइयं सव्वं इत्यादि मूलद्वारगाथायाः पंचपदानि व्याख्यातान्यथ षष्ठं सावद्यपदं व्याचिख्यासुराह ॥
गरिहियमित्यागर्हितं निंद्यं वस्तवद्यमुक्तं तदिह पापं सह तेनावद्येन वर्त्तत इति सावद्यस्तं सावद्यं जोगं प्रत्याख्यामीति वक्ष्यमाणं गम्यत इति अथ
वा अन्यथा सावद्यशब्दो व्युत्पाद्यत इत्याह । अहवेह वज्जपणिज्जं । वज्जं पावं ति सह सकारस्स । दिग्घत्तादेसाउ । सह वज्जेणं ति सावज्जं ॥ अथवेह वर्ज
नीयं वर्ज्यं तदिति वर्ज्यं पापमुच्यते सह वर्ज्येन वर्त्तत इति । सहस्य सभावात्सवर्ज्यं सकारस्य च प्राकृतत्वेन दीर्घत्वविधानात्सावद्यमित्यर्थः सव
र्जः सपापो योगस्तं सवर्जमिति योगपदव्याख्यानार्थमाह । जोगो जोग्गो वणमा किरिया । समाधाणमाय वावारो । जीविणउदपएवा । जउ समाहिज्जए

सोत्ति।जंतेणजुज्जएवा।सम्मण्णाजंचजुज्जए तंमि नोजोगोसोयमउ तिविहोकायाइवावारो॥व्याख्या॥युजियोगेयुजसमाधौवायोजनं
योगः आत्मकर्म्मसंबंधइत्यर्थः अथवाआत्मनश्चलनस्यंदनादिक्रिययासम्यगाधानंयोजनंयोगःसकर्मकात्मव्यापारइत्यर्थः अथवाजी
वेनसहयुज्यतेसमाधीयतेसंबध्यते यस्मात्ततोयोगोजीवव्यापारएवेति अथवासआत्मातेनकृत्वाकर्म्मणासहयुज्यतेयस्मात्ततोयोगः
अथवायस्मात्तस्मिन्योगेसत्यात्माकर्म्मणायुज्यते ततोयोगःसच त्रिविधःकायादिव्यापारोमतः मनोवाक्कायव्यापारइत्यर्थः।अथसर्वादि
पदानांक्रिययासहसंबंधंकुर्वन्नाह।सव्वोसावज्जोत्तिय।जोगोसंवज्जएतयंसव्वं।सावज्जंजोगंतिय।पच्चक्खामित्तिवज्जेमि।सर्वोनिरवद्योषःसा
वद्योयोगइतिसंबध्यते तंसर्वंसावद्यंयोगंप्रत्याख्यामीतिक्रियाप्रत्याचक्षेवावर्जयामीत्यर्थः इहप्रत्याख्यामिप्रत्याचक्षेवेतिक्रियाद्वयेपिसाव
द्ययोगस्यप्रत्याख्यानंगम्यते।अतस्तदेवप्रत्याख्यानंव्याचिख्यासुराह।पइसद्दोपडिसेहो।अक्खाणंख्यावणाभिहाणंवा।पडिसेहस्सक्खाणं।
पच्चक्खाणंनिवित्तित्ति॥प्रतिशब्दोत्रप्रतिषेधेवर्त्तते आख्यानंत्वाभिमुख्येन आदरेणवाख्यापनाप्रकथनंचक्षिङ्पक्षेअभिधानंवाप्रतिषे
धस्याख्यानंनिवृत्तिरितिगाथाषोडशाकार्थः।६९७।अथप्रत्याख्यानमेवभेदतोनिरूपयन्नाह।नामंठवणादविए।अइत्थपडिसेहभावउतं
च।नामाभिहाणमुत्तं।ठवणागारक्कनिक्खेवो॥तत्रप्रत्याख्यानंनामस्थापनाद्रव्यादित्साप्रतिषेधभावतःषोढा तत्रप्रत्याख्यानमितियदभि
धानंतन्नामरूपंप्रत्याख्यानंनामप्रत्याख्यानमुच्यते आगारात्तिबहिर्मुखहस्ताकारकरणंऊर्द्धांगुलिकंपमानहस्ताकारकरणंवाअक्षा
दौनिक्षेपोवास्थापनाप्रत्याख्यानमितिनिर्युक्तिगाथासंक्षेपार्थः।६९८।द्रव्यप्रत्याख्यानस्वरूपंभाष्यकारःप्राह।दव्वस्सवदव्वाणव।दव्वभू
यस्सदव्वहेउंवा।दव्वपच्चक्खाणंनिन्हाईणंचसव्वंपि॥द्रव्यस्यवासचित्तादेर्द्रव्याणांवासचित्तादीनांप्रत्याख्यानंद्रव्यप्रत्याख्यानंद्रव्यभूत
स्यवाभावरहितस्याभव्यादेःप्रत्याख्यानंद्रव्यप्रत्याख्यानंअथवाद्रव्यहेतुकंद्रव्यलाभार्थंप्रत्याख्यानंद्रव्यप्रत्याख्यानं अथवानिन्हवादी
नांयत्प्रत्याख्यानंतत्सर्वमपिद्रव्यप्रत्याख्यानमुच्यतइति।अदित्साप्रत्याख्यानंप्रतिषेधप्रत्याख्यानंचाह।
भिक्खअदाणमइच्छा।पडिसेहोरोगिणोव्वकिरियाए सिद्धंपच्चक्खाउ।जहरोगीसव्ववज्जेहिं॥भिक्षान्नाणांभिक्षायाअतिगच्छेत्तिवचनाद
दिच्छावचनाद्वा अदानमितिगच्छप्रत्याख्यानमदित्साप्रत्याख्यानंचेति असाध्यरोगिणाक्रियायाःप्रत्याख्यानंप्रतिषेधःप्रतिषेधप्रत्याख्या
नमुच्यते सिद्धंचैतल्लोकेपियथावक्तारस्तत्रभवंतिप्रत्याख्यातोयंरोगीसर्वैर्वैद्यैरिति।अस्यस्थानेनिर्युक्तौकश्चिन्निर्विषयाद्गापनरूपंक्षेत्र ४०१
प्रत्याख्यानंदृश्यतइतिभावप्रत्याख्यानमाह।भावस्सतावउभाव।हेउमहभावएववाभिमयं।पच्चक्खाणदुविहं।तंकयमिहनोकयंचेव।पुव्वं

नोपुव्वकयं।पच्चक्खाणंतिपुव्वकयमुत्तं आउरपच्चक्खाणाईयंचनोपुव्वकयमुत्तं।नोसुयपच्चक्खाणं।मूलुत्तरगुणविहाणउदुविहं।
सव्वेदेसेयमयं।इहसव्वंसव्वसद्दाउ॥व्याख्या॥भावस्यसावद्ययोगपरिणामस्यप्रत्याख्यानंभावप्रत्याख्यानंभावतोवाशुभपरिणामोत्सा
दात्प्रत्याख्यानंभावप्रत्याख्यानंभावहेतोर्वासर्वकर्म्मक्षयार्थंभावएववासावद्ययोगविरतिलक्षणप्रत्याख्यानंभावप्रत्याख्यानमभिहि
तं॥तच्चद्विविधं॥श्रुतभावप्रत्याख्यानंनोश्रुतभावप्रत्याख्यानंचेति श्रुतभावप्रत्याख्यानंपुनरपिद्विविधं पुव्वंत्तिपूर्वश्रुतप्रत्याख्यानं नो
पुव्वसुयंतिनोपूर्वश्रुतप्रत्याख्यानंचेति।तत्रपच्चक्खाणंति॥इहैकदेशेनसमुदायस्यगम्यमानत्वात्प्रत्याख्यानसंज्ञितंनवमंपूर्वंतत्पूर्वश्रु
तप्रत्याख्यानमुक्तं आतुरप्रत्याख्यानादिकंतुश्रुतंनोपूर्वश्रुतप्रत्याख्यानमुक्तं तस्यपूर्वगतबाह्यत्वेनपूर्वश्रुतत्वायोगादिति यत्तुश्रुतनि
षेधरूपंनोश्रुतप्रत्याख्यानंतदपिमूलोत्तरगुणविधानान्मूलोत्तरगुणभेदाद्द्विविधं॥मूलगुणप्रत्याख्यानमुत्तरगुणप्रत्याख्यानंचे
त्यर्थः इदमप्येकैकंद्विविधंमतं सर्वतोदेशतश्चइहसव्वंति इहचसर्वंसर्वमूलगुणप्रत्याख्यानंसर्वोत्तरगुणप्रत्याख्यानंचाधिकृतं।कु
तइत्याह।सव्वेसद्दाउत्ति॥सव्वंसावज्जंयोगमित्यत्रसर्वशब्दोपादानादित्यर्थः।अथयावज्जीवियंतिपदंव्याचिख्यासुराह।जीवोत्तिजीवणंपाणधार
णंजीवियंतिपज्जाया गहियंनजीवदव्वंगहिमंवापज्जयविसिट्ठं॥इहयावज्जीवोयस्यांप्रत्याख्यानक्रियायांसायावज्जीवातयासर्वसावद्यंयोगंप्रत्या
मीतिकिलायमर्थोभिप्रेतइति तत्रजीवइतिकिमुच्यतइत्याह जीवनमितिजीवनंप्राणधारणंजीवितमितिचपर्यायाःयथाश्रुतसंबंधेनतु
जीवतीतिजीवइतिजीवद्रव्यमिहनगृहीतंवक्ष्यमाणदोषसंभवाद्गृहीतंवाजीवद्रव्यमपिकिंनिर्विशेषमित्याह पर्यायविशिष्टंइहभवजीवित
पर्यायविशेषितमित्यर्थः यावदिहभवजीवितविशिष्टोजीवस्तिष्ठतीतितावत्प्रत्याख्याम्यहंनतुपरभवजीवितेअपगतइतिभावः।जीवद्रव्यग्र
हणेतुकोदोषःस्यादित्याह॥इहरावज्जीवंतिजीवद्दव्वग्गहणेमयस्सावि पच्चक्खाणंपावइगहियंमउजीवियंतंच इतरथायावज्जीवमित्यत्रा
विशेषितजीवद्रव्यग्रहणेमृतस्यापिप्रत्याख्यानंप्राप्नोत्यविशेषितजीवद्रव्यस्यसर्वदैवभावात्ततोजीवशब्देनजीवितमिहगृहीतं तच्चनाम्ना
दिभेदभिन्नमित्यनंतरेणासंबंधइति तानेवजीवितस्यनामादिभेदानाह।नामंठवणादविये ओहेभवतब्भवेयभोगेय।संजमजससमस्से।जम
जीवियमितितद्विभागेयं॥नामजीवितंस्थापनाजीवितंद्रव्यजीवितंओघजीवितंतद्भवजीवितंभोगजीवितंसंयमजीवितंयशोजीवितं असं
यमजीवितंइत्येतस्यजीवितस्यविभागोभेदइतिद्वारगाथायांसंक्षेपार्थइति॥अत्रनामस्थापनाजीवितेसुगमे अतोद्रव्यजीवितस्वरूपं
विवरीषुराह दव्वेहिरण्णभेसज्जा।भत्तपुत्तादिजीवियनिमित्तं जंदव्वजीवियंतंदव्वस्सवजीवियमवत्था।दव्वेत्ति॥द्रव्यजीवितेविचार्यमाणेद्रव्य

जीवितंयदुक्किमित्याह नंतित्कनकोषजभक्कपुत्रादिकंजीवितनिमित्तंजीवितोपष्टंभकारकं अथवासच्चित्ताच्चित्तभेदभिन्नस्यद्रव्यस्यैवय
याअवस्थयाजीवतिपारदोजीवतिविषंजीवत्यभ्रकंजीवतिलोहमित्येवंताम्रकवर्णादिष्वपिवाच्यं नपुनरेतद्यापिमृतमित्यादिव्यपदेशः
प्रवर्त्ततेसाविशिष्टाकाचिदवस्थाद्रव्यजीवितमुच्यतइति। अथोघभवजीवितयोर्विवरणमाह। आउस्सदव्वतया। सामन्नंपाणधारणमिहोहो
भवजीवियंचउद्दानेरइयाईणजावठ्ठा आयुषःआयुर्मात्ररूपस्यकर्म्मणःसंबंधीनियानिसतिजीवस्यसन्तावर्त्तीनिद्रव्याणितान्यायुःस
द्रव्याणितद्भावआयुःसद्रव्यतातयाआयुःसद्रव्यतयासंसारेपरिभ्रमतोजीवस्ययत्सामान्यंप्राणधारणंयदाश्रित्यसिद्धाएवमृताउच्यते
तेनसंसारिणःतदिहसंसारिणांजीवितसामान्यमात्ररूपमोघः ऽघजीवितमुच्यतइतिभवतिप्राणिनोऽस्मिन्निति भवः संसारस्तत्रावस्थि
तिहेतुभूतंजीवितंभवजीवितं तच्चतुर्द्धाकिंपुनस्तदित्याह नारकादीनांवाजन्मनःप्रथमसमयाच्चरमसमयंयावदवस्थाअवस्थितिरवस्थि
तिनंतद्धेतुत्वात्साभवजीवितमिति तद्भवजीवितंभोगजीवितंचाह तद्भवजीवियमोरालियाणजंतज्जवोववन्नाणं। चक्कहराईणभोग। जीवियंस
सुरगणाणंच पुनः२तत्रैवविवक्षितभवेउत्पन्नास्तद्भवोत्पन्नास्तेषांतद्भवोत्पन्नानांयज्जीवितंतद्भवजीवितमुच्यते तच्चऔदारिकशरीरिणांतिर्य
मनुष्याणामेवावगंतव्यंतत्रैकेंद्रियाणांपुनः२तत्रैवैकेंद्रियाभवेउत्पद्यमानानामनंतानिभवग्रहणान्येतदुत्कृष्टतोवसेयं द्वीन्द्रियाणांतुसंख्याता
निभवग्रहणानिपंचेंद्रियतिरश्चांमनुष्याणांचसप्ताष्टौवाभवग्रहणानिइतिमंतव्यं जघन्यतस्तुसर्वत्रद्वेभवग्रहणे वैक्रियशरीरिणांतुदे
वनारकाणामिदंनसंभवत्येवपुनः२स्तत्रैवोत्पत्त्यभावादिति चक्रधरादीनांतुभोगपुरुषाणांसुरवराणांचदेवानांजीवितंभोगजीवितमि
ति। शेषजीवितानितुत्रीण्याह संजमजीवियमिसिणं। असंजमजीवियंअविरयाणं जसजीवियंजसो नामउजिणाईणलोगम्मि॥पाठसि
द्धानवरमिसिणंतिऋषीणांयतीनामिति जसनामउत्ति यशोनामकर्म्मोदयादित्यर्थः। नन्वेषांमध्यात्किंजीवितमिहाधिकृतमित्याह। नरभवजीवि
यमहिगय। विसेसउसेसयंजहाजोगं। जावज्जीवामितयंतापच्चक्खामिसावज्जां॥भवजीवितरूपंनरभवजीवितंमनुष्यभवजीवितंविशेषतोत्रा
ऽधिकृतंमनुष्याणामेवचारित्रसामायिकाधिकारात्शेषंतुनामादिजीवितं यथायोगंयद्यत्रयुज्यते तत्तत्रयोजनीयं ततश्चसएवमनुष्यःप्रतिजा
नीतेयावदनेननरभवजीवितेनजीवामि तावत्तत्कंसर्वंसावद्यंयोगंप्रत्याख्यामीति अथयावच्छब्दस्यार्थमाह यावदयंपरिमाणेमज्जायाएवधा ४०२
रणेचेति तावज्जीवंजीवणपरिमाणंजन्तियमित्ति। जावज्जीवमिहारेणमरणमज्जायऽनभंकालं। अवधारणेविजावज्जीवणमेवहनउपरउ
॥व्याख्या॥ इहयावदयंशब्दस्त्रिष्वर्थेषुवर्त्तते तद्यथा परिमाणेमर्यादायामवधारणेचेति तत्रपरिमाणार्थेतावदाह यावज्जीवमितिकिमुक्तं

भवति॥ यावन्मेजीवनपरिमाणमिहभवायुष्कस्यपरिमाणंतावंतंकालंप्रत्याचक्षेइतिमर्यादार्थमाह यावज्जीवमित्यादि यावज्जीवमितिकिमु अत्र
क्तंभवत्यारेणमरणमर्यादयाअर्वाक्प्रत्याचक्षेनपुनस्तत्कालंप्रत्याख्यानग्रहणकालएव किंतुमरणसीमांयावत्प्रत्याख्यामीति अवधारणे
पियावदिहभवजीवनंतावदेवप्रत्याचक्षेनतुपरलोकेवाद्यवस्थायामविरतत्वेप्रत्याख्यानभंगप्रसंगात्परतोमुत्कलमिति विधिरपिनकर्त्तव्यो
भोगाशंसादोषानुषंगादितिस्वयमेवद्रष्टव्यमिति॥ अत्राक्षेपपरिहारावाह। यावज्जीयंपत्ते। यावज्जीवाएलिंगवच्चासो भावप्पच्चयउवा जा
जावज्जीवयाताए॥ननूक्तन्यायेनयावज्जीवमितिनिर्देशेप्राप्तेयावज्जीवयेतिनिर्देशः किमर्थंभगवतासूत्रकृताविहितमिति इतिशेषः। अत्र
परिहारमाह। लिंगवच्चासोत्ति॥ लिंगव्यत्ययोत्रभगवतोऽभिमतस्तेनेत्थंनिर्देशःकृतइत्यर्थः अथवायावज्जीवशब्दाद्भावप्रत्ययउत्पाद्यते
ततश्चेत्थंभावप्रत्ययेउत्पादितेयायावज्जीवतेतिनिःपद्यते तयायावज्जीवतयाप्रत्याख्यामीतिसंबध्यतइति नन्वेवमपियावज्जीवतयेति
प्राप्तेयावज्जीवयेतिकथंभवतीत्याह। यावज्जीवतयाइत्ति। यावज्जीवाएवण्णलोवाउ। जावज्जीवोजीसे। जावज्जीवाहवासाउ॥ यावज्जीवतयेति
निर्देशेप्राप्तेयावज्जीवयेत्युक्तं तत्तत्कारलक्षणवर्णलोपादितिद्रष्टव्यं। तृतीयंपरिहारमाह। अथवाजीवनंजीवायावज्जीवोयस्यांसायावज्जी
वेतिबहुव्रीहिस्तयायावज्जीवयेत्येवंद्रष्टव्यमिति। अत्रविनेयपृच्छामुत्तरंचाह। कापुणसासंबज्झइ। पच्चक्खाणकिरियातयासव्वं। जावज्जीवाए
अहं पच्चक्खामीतिसावज्जं॥कापुनःसाबहुव्रीहावन्यपदार्थेसंबध्यतइत्याह प्रत्याख्यानक्रियेतितयायावज्जीवयाप्रत्याख्यानक्रिय
यासर्वंसावद्ययोगमहंप्रत्याख्यामीतिसंबंधइति परिहारांतरमाह। जीवणमहवाजीवाजावज्जीवापुरावसानेया। तएपायपवयणे। जावज्जी
वाएतइएयं॥ अथवाजीवनंजीवाइति। स्त्रीलिंगाभिधायकएवायंशब्दःसाध्यतेनतुजीवइतिपुल्लिंगाभिधायकःततश्चयथापुराप्रदर्शितथा
अत्राप्यर्थत्रयवृत्तिनायानावच्छब्देनसहसमासेसायावज्जीवाज्ञेया। तद्यथा॥ यावत्परिमाणाजीवायावज्जीवा एवंमर्यादावधारणयोरपिसमासःका
र्यः तयायावज्जीवयाप्रत्याख्यामिप्राकृतवचनेचपर्यन्तेएकारनिर्देशेनतृतीयेयमवसेयेति॥ अथत्रिविधंत्रिविधेनेत्यस्यव्याख्यानार्थमाह। पच्चक्खामित्तिमउ। उत्तमपु
रिसेगवयणउकत्ता। तिन्निविहाजस्सतउ। तिविहोजोगोमउद्दिगउ। तंतिविहंविइयाए। पच्चक्खपमिहकम्मभावाउ। निन्निविहाजस्सेतयं। तिविहंतिविहेणंत
ंति॥ व्याख्या॥ इहप्रत्याख्यामीतिवर्त्तमानायाउत्तमपुरुषैकवचननिर्देशात्कर्त्ताभिमतःतिस्रोविधाविधानानिभेदायस्यसकोसौत्रिविधोमनोवाक्कायव्या
पारलक्षणोयोगइहाधिकृतोमंतव्यइति तंत्रिविधंयोगमिहसत्रेप्रत्याख्येयत्वेन कर्म्मभावाद्वितीययाविभक्त्यानिर्दिशतीतिशेषः॥ तदनेनत्रिविधमि
तिव्याख्यातमथत्रिविधेनेतिव्याचिख्यासुराह॥ तिन्नीत्यादितिस्रोविधाभेदायस्यतत्त्रिविधंकरणमितिगम्यतेतेनत्रिविधेनकरणेनप्रत्याख्या

मीतिप्रक्रमः। ननु तेनेत्येतावन्मात्रनिर्देशात्करणेनेति कथं लभ्यत इत्याह। तेणत्ति साधकतमं। करणं तइयाभिहाणउ अभिमयं। केण त्ति विहेण भणिए।
मणेण वायाए काएणं॥ तेनेति तृतीयाविभक्त्यभिधानात्साधकतमं करणमभिमतं अतस्तेन त्रिविधेन करणेनेत्यनंतरगाथायां व्याख्यातं केन पुनस्त्रि
विधेन करणेनेति विनेयेन भणिते पृष्टे सति। सूत्रावयवमाह॥ मणेणं वायाए काएणंति। अत्र मनःकरणव्याख्यानमाह मणणं व मन्नए व णेण मणो तेण
दव्वउ तं च। तज्जोगपोग्गलमयं। भावमणो भण्णए मंता॥ मननं मनुबोधनं वा मननं मन्यते वा अनेनेति प्रतत्तेन मन उच्यते तच्च द्रव्यतो द्रव्यमनस्तद्योग्य
पुद्गलमयं द्रष्टव्यं भावमनस्तु मंता जीवो भण्यते। इदमुक्तं भवति॥ मनो द्विविधं द्रव्यमनो भावमनश्च तत्र यत्तद्योग्यैर्मनोयोग्यैर्मनोवर्गणायोग्यगृही
तैरनंतैः पुद्गलैर्निर्वृत्तं तद्द्रव्यमनो भण्यते यत्तु तद्धन्यं मननं चिंतनं तद्भावमनोभिधीयते इह तु तदव्यतिरिक्तत्वान्मंता जीवो भावमनस्त्वेनोक्त इति।
वाक्करणमाह। वयणं वा गुच्चए वा। णेणत्ति वा यत्ति दव्वउ साय। तज्जोग्गपुग्गला जे गहियातप्परिणया भावे॥ वचनं वागुच्यते वा अनयेति वाक् सा च द्रव्य
तो द्रव्यवाग्यतद्योग्या भाषावर्गणायोग्यगृहीताः पुद्गला इति ये तु तत्परिणता भाषत्वेन परिणता उच्यमानाः पुद्गलास्ता भावे भाववागिति। काय
कारणमाह। जीवस्स निवासाउ॥ पोग्गलचयउय। सरणधम्माउ काउ वयवसमाहाणउ य सो दव्व भावमउ। तज्जोग्गा पोग्गला जे। मुक्का यपउगपरिणयाउ
य। सो होइ दव्वकाउ। बद्धा पुण भावउ काउ॥ व्याख्या॥ चित्र चयने इति धातोश्चयनं कायः चीयंते अनेनेति वा कायः निवासश्चितिशरीरोपसमाधानेषाद्देश्च
क इत्यनेनादेरिह ककारः तएवाह जीवस्य कायेनिवासात्पुद्गलानां चयात्प्रतिक्षणं च विसरणधर्मकत्वाच्छिरउरोबाहाद्यवयवानामिह सम्यगाधा
नाच्च कलनिधानं हेतवो निवासादयो द्रष्टव्या मंतव्याः स च कायो द्रव्यभावमयो बोद्धव्यो द्रव्यकायो भावकायश्चेत्यर्थः तत्र ये औदारिकादिवर्गणागता
तद्योग्या औदारिकादिकाययोग्या औदारिकायपरिणतेरभिमुखतां प्राप्ता जीवेन पुनरद्याप्यगृहीताः पुद्गलाः स द्रव्यकायः न केवलं त एव किं तु ये औ
दारिकादिकाययोग्या औदारिकादिकायरूपतया परिणमय्य जीवेन मुक्तास्त्यक्ताः पुद्गलाः सोपि द्रव्यकायो भवति किं सर्वदा नेत्याह यावत्प्रयोगपरिण
ताः यावत्तं जीवस्य जीवप्रयोगपरिणामं न मुंचंतीत्यर्थः तं च जीवपरिणामं ते मुक्ताः पुद्गला जघन्यतो अंतर्मुहूर्तमुत्कृष्टतोऽसंख्येयं कालं न मुंचंति
ततः परं त्ववश्यं परित्यजंति न मिति ये पुनर्जीवेन बद्धा औदारिकादिकायपरिणतिमापन्नाः पुद्गलास्ते भावतः कायो भावतः कायो भावकाय इत्यर्थः ४
तदेवं मनःप्रभृति त्रिविधं करणं व्याख्याय प्रस्तुतयोजनामाह। तेण त्ति विहेण मणसा। वायाकाएण कि तयेति विहं। पुव्वाहिगयं जोग्गं। न करेमिच्चाइ
सायज्जं। तेन यथोक्तस्वरूपेण त्रिविधेन करणेन मनसा वाचा कायेन मनोवाक्कायलक्षणेनेत्यर्थः किमत आह न कं पूर्वाधिकृतं त्रिविधं सावद्ययोगं
न करोमीत्यादि संबध्यते न करेमि न कारवेमि करंतं पि अन्नं न समणुजाणामीति संबध्यत इत्यर्थः। अथवा अन्यथा संबंधयन्नाह। पुव्वं व जमुद्दि

ट्ठं। तिविहं तिविहेण तस्थ करणस्स। तिविहत्तणं विवरियं मणेण वायाए काएणं तिविहमिहाणिं जोग्गं। पच्चक्खेयमणुभासए कत्तं। किं पुण उक्कमि
ऊणं। जोगकरणस्स निद्देसो। नो न जहुद्देसं चिय। निद्देसो भण्णए निसामेहि जोगस्स करणतं तोव। दरिसणत्थं विवज्जासो। देसियमेवं जोगो। कर
णवसो नियय मप्पहाणो त्ति। तज्जावे भावाउ। तदभावे वप्पभावाउ॥ व्याख्या॥ अथवा पूर्वं सत्रे यदुद्दिष्टं त्रिविधं त्रिविधेनेति तत्र करणस्य त्रिविधत्वं
मणेणं वायाए काएणमिति सूत्रगतेनैवावयवेन विवृतं व्याख्यातमिति इदानीं तु त्रिविध प्रत्याख्येयं योगं सूत्रमनुभाषते विवृणोति न करेमि न का
रवेमीत्यादि नैव सूत्रावयवेन अत्राह परो ननु यद्येवं तर्हि किं पुनः कारणं येन योगमुत्क्रम्यातिलंघ्य करणस्य प्रथमं निर्देशः कृतः उद्देसकाले हि प्रथमं
त्रिविधमित्युद्देशाद्योग एव प्रथममुद्दिष्टस्तदनंतरं त्रिविधेनेत्यभिधानात्पश्चात्करणस्योद्देशः कृतः एवं च सति यथोद्देशं निर्देश इति न्यायादिह
निर्देशोपि प्रथमं योगस्य पश्चात्करणस्य प्राप्नोति। तद्यथा॥ न करेमि न कारवेमि करंतं पि अन्नं न समणुजाणामि मणेणं वायाए काएणमि
ति न चैवं निर्दिष्टं व्यत्ययाभिधानादिति तोत्तितत्तोन यथोद्देशमेव निर्देशः कृतः अत्र संज्ञात त्त्वात्किमत्र कारणमिति वाच्यं। गुरुराह॥ निशमयाकर्णय भ
ण्यते अत्र कारणं करणकारणादिलक्षणस्य योगस्य करणं तत्त्वोपदर्शनार्थं मनोवाक्कायलक्षणकरणायत्ततोपदर्शनार्थमयं व्यत्यासः कृ
त इति एतदेव भावयति॥ देशितमुपदिष्टमेवं व्यत्यासकरणेन भगवता सूत्रकृता योयं करणकारणादिव्यापारलक्षणो योगः स मनः प्रभृतिक
रणवशस्तदायत्त इति नियतं निश्चितं स्वयमप्रधानः तद्भावे करणभाव एव भावात्तदभावे वपि च। करणाभावे अवश्यमभावादिति किमिति यो
गः करणभाव एव भवति तदभावे तु न भवतीत्याह। तस्स तदाधाराउ। तक्कारणउ य तप्परिणईउ। परिणंतुरणअंतर। भावाउ करणमेव कउ॥ तस्य
योगस्य तदाधारकत्वात्करणाधारत्वात्तथा तन्मनःप्रभृति करणमेव कारणं यस्यासौ तत्कारणस्तद्भावस्तत्त्वं तस्मात्कारणत्वात्तस्य योगस्य तथा तत्प
रिणत्वात्करणपरिणतिरूपत्वात्तस्य तथा परिणातुः करणस्य अनर्थांतरत्वादनन्यत्वात्तस्य यतः करणमेव तत्कर्तासौ योगस्ततस्तदात्मकत्वात्तद्भाव
एव भवति आह यद्येवमुद्देशोप्येवं कस्मान्न कृतः उच्यते योगस्यापि प्रत्याख्येयत्वेन प्राधान्यख्यापनार्थमिति। तदेवं योगस्य करणात्मकत्वं दर्शितम
थ करणयोगयोः पुनः समुदितयोर्जीवात्मकत्वं दर्शयन्नाह। गत्तो च्चिय जीवस्स वि तस्स या करणयोगपरिणामा। गम्भद्दून यंतराउ। कयाइ समएउ
भिहियं॥ यत एव परिणंतुः परिणामो नर्थांतरमुक्तं अत एव जीवस्यापि तन्मयतात्परिणामस्य करणयोगात्मता गम्यते। कुत इत्याह॥ करणयो
गपरिणामित्ति करणं च योगश्च करणयोगौ तौ परिणामः स्वभावो यस्यासौ करणयोगपरिणामस्तद्भावस्तत्त्वं तस्मात्करणयोगपरिणामत्वा
ज्जीवस्य स हि करणयोगपरिणामेन परिणमति परिणामश्च परिणंतुरनर्थांतरमतः करणयोगात्मता जीवस्य गम्यते कदाचित्कथंचिन्नया

तरान्निश्चयनयलक्षणंनयांतरमाश्रित्येति।यतःसमयेसिद्धांतेअभिहितंकिमित्याह।आयाचेवअहिंसा।आयाहिंसत्तनिच्छउएस।जोहोइअप्पमत्तो
।अहिंसउहिंसउदियरो॥इहात्मामनःप्रभृतिनाकरणेनहननघातनानुमतिलक्षणांहिंसांतन्निवृत्तिरूपामहिंसांचकरोतीतिव्यवहारः अस्यांचगाथा
यांनिश्चयनयमतेनात्मैवहननादिलक्षणाहिंसासएवचतन्निवृत्तिरूपाअहिंसेत्युक्तं तदनेनात्मनःकरणस्ययोगलक्षणस्यकर्मणश्चैकत्वमुक्तं
भवतीति॥अत्रपरप्रेर्यमाशंक्यपरिहरन्नाह।आहेगत्तेकत्ता।कम्मंकरणंतिकोविभागोयं।भण्णइपज्जायंतर।विसेसणाउनदोसोत्ति॥आहपरो
नन्वेवंत्रितयस्याप्येकत्वेकर्त्ताकर्मकरणंचेतिकोविभागः कोभेदोभण्यतेअत्रोत्तरंपर्यायांतरेणविशेषणपर्यायांतरविशेषणंतस्माददोष
इदमुक्तंभवति एकएवकर्त्ताआत्माव्यतिरिक्तैःकथंचिद्भेदभिन्नैःकर्मकरणादिपर्यायांतरैर्विशिष्यतइत्याहेतिनैकदोषइति।पूर्वभावित
मर्थंपुनरपिस्मारयन्नाह।एवंपिसव्वकारगपरिणामानन्नभावयानइ।नायाणाणणाणंणा।जहविन्नेयाइपरिणामं॥एकमपिघटादिकंवा।
सर्वकारकपरिणामलक्षणमन्यान्यभावतामनन्यरूपतामेति यथाज्ञाताज्ञानंज्ञानानन्यःसन्विज्ञेयादिपरिणाममेति सएवहिस्वज्ञाने
उपयुज्यमानःकर्त्ताकरणभूतज्ञानानन्यत्वात्सएवचकरणंस्वयंसंवेद्यमानस्तुसएवविज्ञेयइति सविस्तरेणप्रागुक्तमिति॥ननुसर्वंसावद्य
योगंप्रत्याख्यामीत्युक्तं।कपुनरसौसावद्योयोगइत्याह।सयसावज्जोजोगो।हिंसाइउनयंसयंसव्वं।नकरेमिनकारवेमियनयाणुजाणेकरेत
पि॥सचसावद्योयोगोहिंसानृतस्तेयादिकोमंतव्यःतकंसर्वमपिस्वयंनकरोमिनकारयाम्यन्यैरेवंनानुजानामिकुर्वंतमपीति अथेदंप्रत्याख्या
नंयतिगृहस्थयोर्भेदेनव्यवस्थापयन्नाह।करणतिगेणेक्केक्कं।कालतिगेतिघणसंखियमिसीणं।सव्वंतिजउगहियं।सीयालसयंपुणगिहीणं
॥अत्रनकरोमिनकारयामीत्यादिकमेकैकंयोगंमनःप्रभृतिनाकरणत्रयेणसहकालत्रिकेचारयेत्ततश्चत्रयाणांयोयेनःसप्तविंशतिलक्षणतस्सं
खितंभंगकसंख्यामाश्रित्यसंख्याप्रमाणामृषीणांसाधूनामयबुध्यतेतिशेषः।कस्मादित्याह॥यतःसर्वसावद्ययोगंप्रत्याख्यामीतिसाधुभिःप्रत्याख्या
नंगृहीतं ततस्तत्प्रत्याख्यानभंगकानामितसंख्याप्रमाणता असर्वसावद्ययोगप्रत्याख्यायिनां॥पुनर्गृहीणांप्रत्याख्यानस्यसप्तचत्वारिंशदधि
कंभंगकशतंविज्ञेयमिति।इयमत्रभावना॥त्रिविधंत्रिविधेनेत्यनेनसर्वसावद्ययोगप्रत्याख्यानादर्थतःसाधुप्रत्याख्यानस्यसप्तविंशतिभंगाः
सूचितास्तेचैवंभवंतियन्नकरोतिनमनस्यवाचाकायेनएवंनकारयत्यपिमनसावाचाकायेन एवंनसमनुजानातिचमनसाकायाकायेनेत्येवंव
र्तमानेकालेनवभंगाभवंति एवमतीतेपिनवभविष्यत्यपिनवेत्येवंसप्तविंशतिर्भंगाःसाधुप्रत्याख्यानस्यभवंति॥गृहिणस्तर्हिकथंसप्तच
त्वारिंशभंगशतमितिचेदुच्यते॥गृहीसावद्ययोगंनकरोतिनकारयतिनान्यंसमनुजानातिमनसावाचाकायेनचेत्येकोभंगः।१।अथवानकरोति

नकारयतिनानुजानातिमनसा ५ अथवावचसा ६।अथवाकायेन ७। अथवानकरोतिनकारयतिमनसावाचाकायेन ८। अथवानकरोतिनानु
जानातित्रिभिरपिकरणैः ९। अथवानकारयतिनानुजानातित्रिभिरपिकरणैः १०। अथवानकरोतिनकारयतिमनसावचसा ११। अथवामनसाकाये
नच १२ अथवावचसाकायेनच १३। अथवानकरोतिनानुजानातिमनसावचसा १४। अथवामनसाकायेन १५। अथवावचसाकायेन १६।
अथवानकारयतिनानुजानातिमनसावचसा १७। अथवामनसाकायेन १८। अथवावचसाकायेन १९ अथवानकरोतिनकारयतिमनसा २०
अथवावचसा २१। अथवाकायेन २२। अथवानकरोतिनानुजानातिमनसा २३। अथवावचसा २४। अथवाकायेन २५। अथवानकारयतिना
नुजानातिमनसा।२६। अथवावचसा २७। अथवाकायेन २८ अथवानकरोतिमनसावचसाकायेन २९। अथवानकारयति ३०। अथवानानुजानाति
३१॥ अथवानकरोतिमनसावचसा ३२॥ अथवामनसाकायेन ३३॥ अथवावचसाकायेन ३४। अथवानकारयतिमनसावचसा ३५। अथ
वामनसाकायेन ३६। अथवावचसाकायेन ३७। अथवानानुजानातिमनसावचसा ३८। अथवामनसाकायेन ३९ अथवावचसाकायेन ४० अ
थवानकरोतिमनसा ४१ अथवावचसा ४२ अथवाकायेन ४३ अथवानकारयतिमनसा ४४। अथवावचसा ४५। अथवाकायेन ४६ अथवा
नानुजानातिमनसा ४७ अथवावचसा ४८ अथवाकायेन ४९।एवमेतेवर्त्तमानकालेएकोनपंचाशद्भंगादर्शिता।एवमतीतेभविष्यतिचप्रत्येकमेते
द्रष्टव्यास्ततःसर्वमिलितसप्तचत्वारिंशंशतंभंगानांभवति अत्रचायंभावार्थःतिविहंतिविहेणपढमोतिविहंदुविहेणबीयउहोइ।तिविहंएक्कविहेणं
दुविहंतिविहेणंतिचउत्थो।दुविहंदुविहेणपंचम।दुविहेक्कविहंमछट्ठउहोइ।एक्कविहंतिविहेण।दुविहेणयसत्तमट्ठमउ एक्कविहंएक्कविहेणं।न
वमंपढमंमिएक्कोभंगोय सेसेसुतिन्नितिन्निय तिन्निंयनवनवयतहतिन्नि नवनवयहोंतिकमसो एएसंवीएगुणवन्नासं।कालतिएणंगुणिया सीया
लसयंतुभंगाणं।आहकहंपुणमणसा।करणंकारावणंअणुमईयजहवइतणुजोगेहिं।करणाइतहभवेमणसा।नदहीणुन्नोवयतणु।करणाई
णमहवमणकरणं।सावद्यजोगमणणं।पन्नत्तंवीयरागेहिं।कारवणंपुणमणसा।चिंतेइकरेउएससावद्यं।चिंतेइजंचकएउणसुटुकयअणु
मईहोइ॥इत्यलंविस्तरेणानदर्थिनानुभवत्स्यादिग्रंथाःसमनुसरणीयाइति॥एतेचभंगायस्यार्थतोवगताःसएवसामायिकप्रत्याख्यानेकुशलइ
तिदर्शयन्नाह सीयालंभंगसयं।पच्चक्खाणंमिजस्सउवलद्धं सोसामाइयकुसलो।सेसासव्वेअकुसलत्ति॥ गतार्था॥ अत्रत्रिविधंत्रिविधेनेति
गृहस्थप्रत्याख्यानस्यप्रथमभंगमाश्रित्याक्षेपपरिहारावाह।केईभणंतिगिहिणो।तिविहंतिविहेणणत्थिसंवरणं।तन्नजउनिद्दिट्ठं।पन्नत्तीएवि
सेसेउं।तोकहंनिज्जुत्तीए।णुमइनिसेहोत्तिसोसविसयम्मि।सामन्नेवन्नत्थउ।तिविहंतिविहेणकोदोसो।पुत्ताइसंतइनिमित्त मित्तमेकारसिंप

वचनस्स। जयंति केइ गिहिणो दिक्खाभिमुहस्स तिविहंति॥ एतास्मिंश्चोपि पूर्वमुपोद्घाते किं कइविहमित्यादिगाथायां कस्य सामायिकं भवतीति द्वारे विस्तरे
ण व्याख्याता एवं न वरं सामान्येनास्य विषय २ बहिर्भागे चिंतामुत्सृज्य प्रत्याख्याने क्रियमाणे निर्युक्ता वनुमतिनिषेध उक्तो ऽन्यत्र तु विशेषणो विषयब
हिर्भागे त्रिविधं त्रिविधेनेति न दोष इति। अपरस्त्वाह। जुत्तं संपयमिस्सं। संवरणं कहमितीयविसयंतु। कह मउणवज्जेयं। कए वन कहं पुसावाउ॥ युक्तं
साम्प्रतैष्यतोः कालयोः सावद्ययोगस्य संवरणं प्रत्याख्यानं तयोस्तस्याद्याप्यनासेवितत्वाद् अतीतकालविषयं तु तत्कथं युक्तं पूर्वमेव तस्यासेवितत्वात् क
थं च तदतीतसावद्ययोगप्रत्याख्यानमेकोनपंचाशद्भेदं वक्तुं युज्यते मूलत एवासंभवात् कृते वा तस्मिन्नतीतसावद्यप्रत्याख्याने कथं न मृषावादो ऽसद्भू
तविषयत्वादिति। अत्र परिहारमाह। निंदणमईयविसयं। न करेमिच्चाइवयणउ भिहियं। अणुमइसंवरणं वा। तीतस्स करेमि जं भणियं। अतीतसाव
द्ययोगं न करेमि न कारयामीत्यादिवचनतो ऽतीतकृतसावद्ययोगविषयं निंदनमहमिदानीं करोमीत्यभिहितं कष्टं तदा सावद्ययोगासेवनं मया कृतमि
त्येवं रूपाया अनुमतेर्वा संवरणमतीतस्य सावद्ययोगासेवनस्य इदानीं करोमीति यदुणितं भवति न करोमीत्यादिना अतीतस्य संवरणं करोमीत्ये
तदुक्तं भवतीत्यर्थः॥ परिहारान्तरमाह। अहवा तयविरईउ। विरमे संपयमईयविसयाउ। संपइ सावज्जाइव। यव वउ को मुसावाउ॥ अथवा तस्मात्सा
वद्ययोगाद् विरतिस्तद्विरतिस्तस्मात्तद्विरतेरतीतविषयायाः सांप्रतं सावद्यादिव विरमामि सांप्रतमहमित्येवमतीतकालविषयं प्रत्याख्यानं प्र
द्यमानस्य को मृषावादो न कश्चिदिति। आह ननु न करेमि न कारवेमि न समणुजाणामीत्येतावतैव विवक्षितार्थसिद्धेः करितंपि अन्नं न मित्येतत्किमर्थ
मुक्तमित्याशंक्याह। न समणुजाणंति गए। करेतमन्नंपि जं सए भिहियं। संभावणं विरुद्धो। न दिहो भयसद्द मज्झत्थो। न करेमि न कारवेमि न समणुजाणा
मीत्येतावतैव गतेस्सिद्धे यत्करेंतंपि अन्नं न मिति प्रस्तुते सामायिकसूत्रे अभिहितं तदिह करेंतं अन्नमित्यत्र अपि शब्दो यो मध्यस्थो मध्ये वर्त्तमानो ऽपि शब्दः
संभावने यथा स्यादित्येतदर्थमवगंतव्यमिति किंपुनरयमधिकं संभावयतीत्याह। न करेंतं पि त्ति न कारवेंतमविनाविणुज्जाणंतं। न समणुजाणे
मि न कारयामि। अविनाणुज्जाणयावे। अन्नं पि अप्पयंपिव। सहसाकाराइणा पयत्तंतं। इह सव्वो संगहिउ। कत्ताकिरिया परं परउ॥ व्याख्या॥ यथा आ
त्मानं सहकारादिना सावद्ययोगे वर्त्तमानं कष्टं कृतमित्येवं न समनुजानामि किंतु मिथ्या दुःकृतदानादिना ततो निवर्त्तयाम्येवं कुर्वंतमप्यपि शब्दात्का
रयंतमप्यनुज्ञानंतमप्यन्यं न समनुजानामि यथा चान्यं कुर्वंतं न कारयाम्येवमपि शब्दात्कारयंतमप्यन्यं न कारयामीत्यादि यथा चान्यं नानुजानाम्ये
वमपि शब्दादनुजानंतमप्यन्यं नानुजानामीत्यादि इत्यादिप्रकारेणासंभवत्सर्वोपि कर्तृक्रियापरंपरको ऽपि शब्देनेह संगृहीत इति॥ अथवा त्रिकालो ४०९
पसंग्रहार्थो ऽपि शब्द इति दर्शयन्नाह। नकरिंतं वासणिए। अविसद्दो नकयंतमिच्चाइ। समइयमागमिस्सं। तहं न करिस्संतमिच्चाइ। अथवा कुर्वं

तमप्यन्यं न समनुजानामीति वर्त्तमानकालमाश्रित्य भणिते अपि शब्दात्समतीतमपि कालमनुसृत्येत द्रष्टव्यं कृतवंतमप्यादि शब्दात्कारितवंतमप्य
नुज्ञातवंतमप्यन्यं नानुजानामीति तथा आगमिष्यंतमपि कालमंगीकृत्यादि शब्दादितद्रूपं करिष्यंतमेप्यादि शब्दात्कारयिष्यंतमप्यनुज्ञास्यंत
मप्यन्यं नानुजानामीति। अथवा अन्यथा त्रिकालोपसंग्रह इत्याह। सव्वं पच्चक्खामि त्ति वा तिकालो वसंगहो भिमउ अविसद्दाउ तस्सेव। कत्तकि
रियाभिहाणंति॥ अथवा सर्वं सावद्ययोगं प्रत्याख्यामीति गम्यत इत्यर्थः इदानीं तु करेंतंपि अन्नमित्यत्रापि शब्दान्तस्यैव कालत्रयस्य संबंधि
कर्तृक्रियाभिधानमभिहितं यथा वर्तमानकाले अहं न करोमि न कारयामि कुर्वंतमन्यं न समनुजानामि तथा अपि शब्दादतीते भविष्यति च का
ले न करोमि न कारयामि कुर्वंतमन्यं न समनुजानामीति प्रत्येकमवगंतव्यमिति। अत्राक्षेपं परिहारं चाह। एवं सव्वं सासं। सविसयउ तीयणा
गएसंपि। पावइ सव्वनिसेहो। भण्णइ तं नाववायाउ। नन्वेवमुक्तप्रकारेणातीतेनागते च सर्वस्मिन्नपि काले आसेवितस्यासेविष्यमाणस्य च स
र्वस्यापि सावद्ययोगस्य निषेधः प्राप्नोति। कुत इत्याह। सव्वस्सेत्यादि सर्वस्य सर्वशब्दस्याशेषविषयत्वादशेषविषयत्वेन पूर्वमिहैव व्याख्यात
त्वादित्यर्थः। न चैतद्युक्तं॥ अतीतसावद्ययोगस्यासेवितत्वादासेवितस्य च प्रत्याख्याने मृषावादिदोषप्रसंगाद्भविष्यतश्चतस्य सर्वस्यापि प्रत्या
ख्याने भंगादिदोषानुषंगादिति भण्यते॥ अत्रोत्तरं। तदेतन्न प्राप्नोति कुत इत्याह अपवादादपवादबाधितत्वादिति। तमेवापवादं दर्शयति
। भूयस्स पडिक्कमणा। भिहाणउ णुमइमेत्तमागहियं। जावज्जीवग्गहणाएस्सस्स य मरणमज्जाया॥ तस्स भंते पडिक्कमामीत्यादिना प्रस्तुत एव सा
मायिकसूत्रे प्रतिक्रमणस्याभिधानतो भूतस्यातीतसावद्ययोगस्यानुमतिमात्रमेव प्रत्याख्यायत्वेनावगृहीतं न पुनः सर्वोपि सावद्ययोगः तद
नुमतेश्च प्रत्याख्याने न कश्चिन्मृषावाद इति अनंतरमेव प्रागुक्तं यावज्जीवग्रहणात्तु नरेष्यतोपि सर्वसावद्ययोगस्य प्रत्याख्याने मरणमर्या
दा अपवादः यावज्जीवमेव तं प्रत्याचक्षे न परत इति। अथवा अस्मिन्नेव सामायिकसूत्रे निरवशेषवचनोपि सर्वशब्दः प्रतिनियतविषयत्वेन व्य
वस्थापित इति दर्शयन्नाह। अहवा जावज्जीव। ग्गहणाउ णागयावरोहोयं संपइकालग्गहणं न करेमिच्चाइवयणाउ। भूयस्स पडिक्कमणाइ
णाप्यतेणेह सव्वसद्दोयं। नेउ विसेसविसउ जउयस्सत्ततरे भिहियं॥ व्याख्या॥ अथवा सूत्र एव यावज्जीवग्रहणादनागतकालस्यायमवरोधः
कृतो ऽद्याप्यनागतकालो यावज्जीवग्रहणान्नियत्यविधाने न विशेषव्यवस्थापित इत्यर्थः न करोमि न कारयामीत्यादिवचनात्तु सांप्रतकाल
ग्रहणमिति तस्स भंते पडिक्कमामीत्यादिसूत्रावयवे च भूतस्यातीतस्य सावद्ययोगस्य प्रतिक्रमणादिना आदि शब्दान्निंदागर्हाविधानेन च
विशेषविषयता गर्भमतीतकालग्रहणमिति विशेषः येनैवं तेनेह निरवशेषवचनोप्ययं सर्वशब्दो विशेषविषयो ज्ञेयः ततश्च भविष्यका

लसावद्ययोगइह जीवितभवपर्यंतएवनियमशेषः सर्वत्राद्विनगृहीतः अतीतसावद्ययोगोप्यनुमतिमात्रकएवनिरवशेषस्तेन क्रोडीकृतइतिभावः
पूर्वमुत्सर्गतः कालत्रयगतसमस्तसावद्ययोगविषयं सर्वत्रादि कृत्वा अपवादेन बाधा प्राक्ताइहतु सामायिकसूत्रे नियंत्रणाद्वारेण प्रथमत एव देश
तोनिरवशेषविषयता सर्वशब्दस्य दर्शितेत्येतावन्मात्रो व्याख्याद्वयस्य विशेषो ऽवसेयइति प्रस्थं चैतद्गाथाकर्तव्यं यतः सूत्रांतरेप्यभिहितं किमि
त्याह समइयं पडिक्कमइ पच्चुप्पन्नं संवरेइत्ति पच्चक्खाइ अणागयं मेवंइहइं पि विन्नेयं ॥ सूत्रोत्थानवरमतीतप्रतिक्रमणेन तदनुमतिमात्रं प्रत्याख्या
नमुक्तं पच्चक्खाइ अणागयमित्यत्र यावज्जीवमिति शेषः ततश्च देशतो निरवशेषविषयः सर्वशब्दः सिद्धइति । तस्स भंते इत्यादेर्व्याख्यानार्थमाह त
स्सत्ति सम्बज्झइ जोगोसावज्जोएवजो हिगाउ नमितिविइत्याहिगारा दंसेइ एकिमिहतस्सत्ति । तस्येत्यत्र सोधिकृत एव सावद्ययोगः संबध्यते इत्यप
र आह । ननु प्रतिक्रमामीतिक्रियायोगतो द्वितीयाधिकारात्तमित्यभिधेयेवक्तव्ये किमिह षष्ठीनिर्देशः तस्येत्युक्तमिति । गुरुराह । संबंधलक्खणाए
छट्ठीए वयवलक्खणाए वासमतीयं सावद्यं । संबज्झावेइ न उ सेसं । इह संबंधलक्षणया अवयवलक्षणया वा षष्ठ्यासमतीतकालविषयमेव साव
द्ययोगसंबंधइति इदमुक्तं भवति तस्यत्रिकालगतयोगस्य संबंधिनं तदवयवभूतं यातीतसावद्ययोगं प्रतिक्रमामीति सामान्येन संबंधलक्ष
णयाऽवयवलक्षणया वा षष्ट्या तस्येत्यत्रातीतसावद्ययोगसंबंधयतिसूत्रकारः नतु शेषं वर्तमानमेष्यं वा तस्य संक्रियमाणत्वात्प्रत्याख्याय
मानत्वाच्च प्रतिक्रमणस्य चातीतविषयत्वादिति । अत्र केचिन्मतमुपन्यस्य दूषयन्नाह । अविसिद्धं सावद्यं संबज्झावेतिकेइ छट्ठीए तन्नप्पउय
णाभावउ तहागं धगुरुयाउ । पच्चुप्पन्नस्स पडिक्कमण उ य पायं च भूयविसयाउ । तीयपडिक्कमणाउ पुणरुत्ताउ य संगाउ । व्याख्या ॥ इह केचनाप्याचा
र्यदेशीयास्तस्येत्यत्र षष्ठ्या अविशिष्टमेव त्रैकालिकं सावद्ययोगसंबंधयंति । तदेतदयुक्तं ॥ अविशिष्टत्रैकालिकसावद्ययोगसंबंधस्येह प्रयो
जनाभावात्तदभावश्चातीतस्यैव प्रतिक्रमणसंबंधादथ सामान्ययोगसंबंध्यपश्चाद्विशेषेणातीतस्यैव तस्य प्रतिक्रमणं व्याख्यास्यत इति ग्राऽऽह
ह ॥ प्रायश्चित्तस्य च प्रायो भूतविषयत्वादासेवितसावद्ययोगविषयत्वात्किमिह सामान्यसावद्ययोगसंबंधेनेति प्रायोग्रहणं चेमिथ्यादुःकृतदाना ह
देर्वर्तमानसावद्ययोगविषयत्वादपीति तथातीयं पडिक्कमइ पडुप्पन्नं संवरेइ अणागयं पच्चक्खाई त्यादावतीतस्यैव प्रतिक्रमणोक्तेर्नेह त्रैका
लसामान्यसावद्ययोगसंबंधः पौनरुक्त्यादिदोषप्रसंगाच्च सामान्यसावज्जो जोगोत्ति संबज्झसावज्जं जोगं पच्चक्खामीत्यनेनैव प्रत्याख्यातः किं तस्येत्यपु
नरपि तद्ग्रहणेनेति भावइति उपसंहरन्नाह । तम्हा पडिक्कमामित्ति । तस्स व सेसं कमामि संबज्झ । भवमिह कम्मणा तं च । भूयसावज्जउ पन्नं ॥ तस्मा ४०६
त्तस्य प्रतिक्रमामीत्यस्य शब्दस्यावयवं कर्मणो भाव्यं ततः प्रकृते किमित्याह तच्च कर्म पूर्वोक्तविवक्षयातस्येति सामान्यसावद्ययोगस्यावयवभू

ताद्भूतसावद्ययोगादुक्तन्यायेनान्यच्चसंभवति तस्माद्यदिहातीतस्यैव सावद्ययोगस्य संबंधो नेतरयोरितीति षष्ठीगाथार्थः ।३५९८। अथ तिविहं
तिविहं तिविहेणेत्यत्राक्षेपपरिहारावाह । तिविहेणंति न जुत्तं । पइ पय विहिणा समाहियं जेणा । अह विगप्पणयाए गुणभावणयत्ति को दोसो
आह ननु त्रिविधेनेति न युक्तं त्रिविधं त्रिविधेनेति पदस्त्रैप्रथममुद्दिष्टं तन्न युक्तमित्यर्थः । कुत इत्याह ॥ येन यस्मात्प्रतिपदविधिनैव तत्सामाहितं
समापित मणेणं वायाए काएणं नकरेमि न कारवेमि करेंतं पि अन्नं न समणुजाणामीत्यनेनैव प्रतिपदनिर्देशेन सिद्धमेतदित्यर्थः । अथ प
रिहारमाह ॥ अर्थविकल्पनया अर्थभेदोपदर्शनाद्गुणभावनया गुणभावनातः को दोषो न कश्चिदित्यर्थः इयमत्र भावना ॥ एवंत्यक्तेसामान्यवि
शेषभेदरूपत्वं सर्वस्याप्यर्थस्य दर्शितं भवति तिविहं तिविहेणेत्यनेन वस्तुनः सामान्यरूपतादर्शना मणेणं वायाए इत्यादि नातु तस्य विशेषरूपता
प्रकाशनादिति अन्यच्चैवमिह पुनः पुनरभिहितसामायिकलक्षणो योगुणस्तस्य संबंधिनीभावनानिविडवासनाऽऽत्मन्यारोपिता भवतीति न कश्चि
द्दोषः । इति निर्युक्तिगाथार्थः ३५९९ समाधानांतरमाह । अहवा मणसा वाया काएणं सा भवे जहासंखं न करेमि न कारवेमि । न याणुजाणेन पन्नेयं
॥ अथवा मणेणं वायाए इत्यादिमात्रक एवोक्ते मनसा न करोमि वाचा न कारयामि कायेन नानुजानामीत्येवंभूतमिष्ट यथासंख्यं मा भूदिति
तिविहं तिविहेणेत्यादि अभिहितं यतश्च मनसा न करोमि न कारयामि नानुजानामि इत्येवं वाचा कायेन च सह योगत्रयस्य प्रत्येकं संबंधोभिमतः स ना
भविष्यदिति ततः किमित्याह तोतिविहंतिविहेणं भण्णइ पइपयसमाणयाहेउं नकरेमित्तिपडिपयं जोगविभागेण वासज्जं तन्न त्रिविधं त्रिविधेनेति
भण्यते किमर्थमित्याह प्रतिपदसमापनहेतोः मनसा न करोमि न कारयामि नानुजानामि एवं वाचा कायेन च सह योगत्रयस्य प्रत्येकं संबंधहेतोरित्यर्थः
त्रिविधं त्रिविधेनेत्यस्याभावेदूषणांतरमप्याह । नकरोमीत्यादि ॥ अथवा त्रिविधं त्रिविधेनेतिअस्याभावे न करोमीत्यादिप्रतिपदं योगानां करणकार
णानुमतिलक्षणानां योगविभागो विच्छेदस्तेन प्रस्तुताभिमतं साध्यं वस्तु स्यात्तथा च सति प्रतिपत्तिगौरवं स्यादिति शेषः । इदमुक्तं भवति । त्रिविधं
त्रिविधेनेत्यस्याभावे न करेमि मणेणं वायाए काएणं न कारवेमि मणेणं वायाए काएणं नानुजाणामि मणेणं वायाए काएणमित्येवमेकैकयोग
विच्छेदनकरणत्रयसंबंधे यथासंख्यनिराकरणेन प्रस्तुताभिमतोऽर्थः साध्यो भवेदेवं च सति प्रतिपत्तिगौरवं स्यादतः सुखप्रतिपत्त्यर्थं वक्तव्यं त्रिवि
धं त्रिविधेनेति । समाधानांतरमाह । अहवा कारेतं पन्नं । न समणुजाणेवि सहउ नेयं अहव विकप्पणयाए विसेसउ तो समाजोज्जं अथवा करेंतं पि
अन्नं न समणुजाणामीत्यत्रापि शब्दायत पूर्वत्रिकालविषयशेषमुक्तं तोत्रिविभक्तिव्यत्ययादिहानयार्थविकल्पनया विशेषतः समायोज्यं क
थमिति चेदुच्यते अतीते कृतस्य कारितस्यानुमतस्य च संबंधिनी अनुमतिरिदानीं प्रत्याख्यायते ननु करणकारणे तयोः कृतकारितत्वादितर

विशेषावि. कालत्रयेऽपि करणकारणानुमतयः प्रत्याख्येयत्वेन न निवार्यन्ते अविरुद्धत्वादित्यस्याप्यर्थस्य दर्शनार्थं त्रिविधमित्यादिकर्तव्यमिति भंतेइति
४०७ तिदिशन्नाह भंतेत्तिपुव्वभणियं तेणं वियप्पणइ किंपुणो भणियं। सव्वत्थ सोऽणुवत्तइ। भणियं वादिय्यउत्तोत्ति अणुवत्तणत्थमेवय तग्गहणं ना
णुवत्तणाईव अणुवत्तंते विधउ जमहिकयाविं तु जत्तेणं। भंतेत्तिपदं पूर्वमेव भणितं व्याख्यातमिति नेह व्याख्यायते तेनैव कारणेनात्रैव
हेतुना तर्हि परो भणति प्रेरयति यदि पूर्वमेवेदं भणितं तर्हि किं पुनरपीह भणितं सूत्रकृता ननु सर्वत्र सूत्रे तं यावदनुवर्तत एवासौ भणितं वान्य
न्यथाप्यादौ प्रयुक्तोऽर्थः सर्वत्रानुवर्तत इति॥ गुरुराह॥ सत्यमेवैतत्सूत्रे तं यावदनुवर्तनार्थमेव तस्यैव भदंतशब्दस्य ग्रहणं तद्ग्रहणमादौ
कृतं केवलं नानुवर्तनादेव नानुवर्तनमात्रादेव यस्मादधिकृतादिधयोऽनुवर्तंते भवंति किं तु यत्नेन कृतेन ते भवंति॥ तथा चोक्तं॥ परिभाषा सूत्र
नुवर्तंते च नाम विधयो न चानुवर्तनादेव भवंति किं तर्हि यत्नाद्भवंति स चायं यत्नो यस्तस्यानुस्मरणार्थं पुनरुच्चारणमिति। अथवा पुनस्त
द्ग्रहणेन समधानांतरत्रयमाह। अहवासमत्तसामाइयकिरियाउ तव्विसोहणत्थाए। तस्सातीयारनियत्तणाइ। किरियंतराभिमुहो न वपुरा निद्दि
गुरुं जहावासयाइं सव्वाइं आपुच्छिउं व रेज्जा तयणेण समथियं होइ। सामाइयपच्चप्पिण वयणो वायं भदंत सद्दोत्ति। सव्वकिरियावसाणे भणियं पच्च
प्पणमणेणं। व्याख्या॥ अथवा समाप्तप्रस्तुतसामायिकप्रतिपत्तिक्रियस्तन्मालिन्यविशुद्धिहेतोस्तस्य सामायिकस्य येऽतीचारा मालिन्यप्रकारास्तेषां
नि वर्तनादिरूपं क्रियांतरमादित्सुः शास्त्रान्निंदागर्हाक्रियांतरपरिग्रहस्तदभिमुखः पुनरपि भदंतशब्दमुच्चारयतिविनेय इति शेषः यद्वै हैवपुरापूर्वं नि
र्दिष्टं यथा गुरुमापृच्छ्य सर्वाण्यावश्यकानि कुर्याद्विनेयस्तदनेन पुनरपि भदंतशब्दोच्चारणेन समर्थितं भवति पूर्वं त्वनेन भदंतशब्दोच्चारणाद्गुरूमा
पृच्छा सामायिकावश्यके प्रतिपन्नं इदानीं तु तदतीचारप्रतिक्रमणावश्यके पुनरपि तदुच्चारणात्तमापृच्छा कुर्वता यथोक्तार्थः समर्थितो भवतीति अ
थवा भवतः पृष्ट्वा यत्पूर्वं कर्तुमारब्धं सामायिकं तदिदानीं कृतं समर्थितं भदंतमयैतेयं सामायिकक्रियाप्रत्यर्पणवचनोऽयं भदंतशब्दः अनेन च गुरुमापृच्छ्या
रब्धानां सर्वासामपि क्रियाणामवसाने गुरोः प्रत्यर्पणनिवेदनमवश्यविधेयमित्येतद्भणितं भवति। अथ पडिक्कमामीत्यादिक्रियाव्याख्यानार्थमाह। नें
यं पडिक्कमामित्ति। भूयसावज्जाउ नियत्तामि। तत्तोय तन्नियत्ती। तदणुमई उविरमणं जं निंदामित्ति दुगुंछे। गरिहामि तदेवतो कउ भेदो। भण्णइ सामण्णालो
गओ दिट्ठो विसेसओ। जह गच्छइत्ति गो सप्पइत्ति सप्पो गमेवि गच्छओ गम्मइ विसेसगमणं तह निंदा गरहयाणं॥ व्याख्या॥ प्रतिक्रमामीत्यस्य ४०७
व्याख्यानं त्वियं किमित्याह भूतसावद्ययोगान्निवर्तेऽहमिति प्रेरकः पृच्छति भूतसावद्ययोगस्यासैवितत्वात्कालानामिदानीं ततो निवृत्तिरित्याह यत्तदनुमतेर्वि
रणं न पुनस्तत्करणकारणयोस्तयोरतिवृत्तत्वेन विरमणायोगादिति निंदामीतिको ऽर्थो जुगुप्से आत्मानमतीतसावद्ययोगकारिणमिति संबंधं वक्ष्यति गर्हामीत्यनेनापि त

से

दे वोक्तं जुगुप्स इति आह ननु तर्हि कुतो निंदागर्हयोरर्थतो भेदो द्वयोरपि जुगुप्सार्थत्वाद्भण्यते अत्रोत्तरं॥ सामान्यार्थाभेदेऽपि विशेषार्थो विशेषवदर्थाभिधायकत्वेन गर्हाशब्द
इति यथा गच्छतीति गौः सर्पतीति सर्पः इत्यनयोः समानेऽपि गत्यर्थत्वे द्वयोरपि विशेषवदेव गमनं गम्यते प्रतीयते। तथा निंदागर्हार्थयोरपि विशेषरूपत्वं वक्ष्यतीति तदेवाह
सप्पच्चक्खकदुगुंछा तह निंदामित्ति गम्मए समए। गुरुपच्चक्खकदुगुंछा। गम्मइ गरिहामि संदिट्ठं॥ तहत्ति तथा गोसर्पयोर्गमनस्य सामान्यतो अभेदेऽपि विशेषतो भेदो दृष्टः
तथा निंदागर्हा अभिधेयस्यापि तु जुगुप्सार्थस्य विशेषतो भेदोऽस्ति॥ तथा हि॥ या स्वप्रत्यक्षा आत्मसाक्षिकी जुगुप्सा सा समये सिद्धांते निंदामीत्यनेन गम्यते अवबु
ध्यते या तु गुरुप्रत्यक्षा गुरुसाक्षिकी जुगुप्सा सा गर्हामीत्यनेन शब्देन गम्यत इति॥ अथ एकार्थयोरपि निंदागर्हयोर्ग्रहणं भवत्वादरार्थमिह न विरुध्यत
इति दर्शयन्नाह॥ एगत्थोभयगहणं। पिसादरत्थं व जमुदियं होइ। कुच्छामि २ तदेव निंदामि गरिहामि। पिसमायरउं व पुणो पुणो वकुच्छामि जमुदि
यं होइ पुणरुत्तमणत्थं चेह नाणुवादादराईसु॥ व्याख्या॥ एकार्थं च तदुभयं च निंदागर्हालक्षणमेकार्थोभयं तस्य ग्रहणमेकार्थोभयग्रहणमा
दरार्थं न विरुध्यते ततश्च कुच्छामीत्यनेन यदुक्तं भवति निंदामि गरिहामीत्यनेनापि तदेवोक्तं भवतीति भ्रमात्यर्थमादरतो वा पुनः पुनरेव कुत्सा
मीति यदुक्तं भवति॥ इदमुक्तं भवतीत्यर्थः॥ न चेहानुवादादरादिषु पुनः पुनरपि प्रत्युक्तमपि वचः पुनरुक्तमनर्थकं वा भवतीति। अथ निंदामि ग
रहामीत्यनयोः कर्मपदसंबंधनार्थमाह। किं कुच्छमप्पाणं। अईयसावज्जकारिणमसग्घं। अत्ताणमयणमहवा। सावज्जमईयजोगंति॥ विं
कुच्छामीजुगुप्से इत्याह आत्मानं निजजीवं कथंभूतमतीतसावद्ययोगकारिणमत एवाश्लाघ्यमप्रशंसनीयं अथवा अत्राणं संसारे निय
तत्राणमशरणं अननं वा अनादिकालात्सातत्यभवनप्रवृत्तमतीतसावद्ययोगं कुत्सामि जुगुप्से भवहेतुत्वात्सर्वविरतिसामायिकस्यैवा
वाऽव्योनिमज्जंतां त्राणत्वादिति॥ अथ व्युत्सृजामीति सूत्रस्य चरमावयवसंबंधयन्नाह॥ विविहं विसेसउवा। भिसं सिरामित्ति वोसिरामि
त्ति थंडेमित्ति जमुत्तं तमेयसमईयसावज्जं॥ विशब्दो विविधार्थो विशेषार्थो वा उच्छब्दस्तु भृशार्थस्ततश्च विविधं विशेषतो वा भृशमत्य
र्थं सृज विसर्गे सृजामि त्यजामीति यदुक्तं भवति किमित्याह तमेवातीतसावद्ययोगं व्युत्सृजामीति वा अवशब्दो ऽधःशब्दार्थो विशेषेणा
धः सृजामि क्षिपामि व्यवसृजामीति॥ आह॥ नन्वेवं सावद्ययोगपरित्यागं करोमि भदंत सामायिकमिति सावद्ययोगनिवर्तनमुच्यते
तदनंतरं व्युत्सृजामीत्यनेनत्सावद्ययोगनिवर्तनं त्यजामीति वैपरीत्यमापद्यते। तन्न कुत इत्याह। मंसाइविरमणाउ। जह हेह भणियम्मि
वोसिरामिति। तप्पडिवरखचाउ गम्मइ सामाइए चेवं। यथेह मांसादिविरमणादनंतरं व्युत्सृजामीति भणिते तत्प्रतिपक्षत्यागो मांसाभक्षण
निवृत्तिरूपो गम्यते अवसीयते तथा संव्यवहारदर्शनात्प्रस्तुतसामायिकेऽप्येवमेवावगंतव्यं॥ इदमुक्तं भवति॥ यथा मंसरकराइयं पच्च

रकामी जावज्जीवाए दुविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि करंतं पि अन्नं न समणुजाणामि तस्स भंते पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि ति मासविरमणादनंतरं व्युत्सृजामीत्युक्ते मांसादिभ
क्षणरूपं तद्विपक्षं त्यजामीति गम्यते एवमिहापि तस्स भंते पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामीत्येतत्पर्यंतेन सूत्रेण यत्सर्वसावद्ययो
गप्रत्याख्यानमुक्तं तदनंतरं व्युत्सृजामीत्युक्ते तद्विपक्षरूपं सावद्ययोगाविरमणं त्यजामीति गम्यत इति। अथ कः पुनः सर्वसावद्ययोगप्रत्याख्या
नरूपस्य सामायिकस्य विपक्ष इत्याशंक्य तदुपदर्शनार्थमाह। तम्हा ना इयमयंतं। मिच्छत्ताईणि न द्विवरकोय। ताण विसग्गो गम्मइ पभासि
एवोसिरामि त्ति॥ तच्च सामायिकं सामाइयं च तिविहं सम्मत्त सुयं तहा चरित्तं चेत्यादि वचनात्सम्यक्त्वश्रुताद्यात्मकं च ततश्च मिथ्यात्वाज्ञाना
विरतयस्तद्विपक्षोऽत्र से यः व्युत्सृजामीति प्रभाषिते तेषां मिथ्यात्वादीनां विसर्गस्त्यागो गम्यत इति। तदेवं निंदामि गर्हामि व्युत्सृजामीति क्रि
यात्रयस्य विषयविभागो दर्शितः अथ वातीतसावद्ययोगप्रायश्चित्तसंग्रहार्थमिदं क्रियात्रयमिति दर्शयन्नाह अहवातिथिपसायत्थं। जो ग पच्छि
त्तसंग्रहच्छाय। संखिवइ भिहाणं निंदामि च्चाइ सुत्तम्मि। निंदा गरहं ग्रहणा। दालोय पडिक्कमो भय ग्रहणं। द्वोदुवि वेगाईणं। छेयंताणं
विसग्गाउ॥ अथ वात्रातिक्रांतसावद्ययोगप्रायश्चित्तस्य संक्षेपतः संग्रहार्थं निंदामीत्यादि सूत्रे अभिधानमिति तत्र प्रायश्चित्तं आलो
अण पडिक्कमणे मीस विवेगे तहा विउस्सग्गे तव छेय मूल अणवट्ठया य पारंचिये चेव इति वचनाद्दशविधं तत्र निंदागर्हयोर्ग्रह
णादालोचनप्रतिक्रमणोभयलक्षणस्याद्यप्रायश्चित्तत्रयस्य ग्रहणं व्युत्सृजामीति विसर्गग्रहणात्पुनर्विवेकादीनां छेदांतानां चतु
र्णां प्रायश्चित्तभेदानां ग्रहणं भवति मूलादयस्तु त्रयः प्रायश्चित्तभेदा इह न संभवंति ते षां चारित्रोत्तीर्णजंतुविषयत्वादिहतु प्रति
पन्नचारित्रसत्वप्रकरणादिति तावदेष भवगंभ्रामस्तत्वं तु केवलिनो बहुश्रुता वा विदंतीति। तदेवं व्याख्यातं सामायिकसूत्रं तद्व्याख्या
नेचावसितोऽनुगमस्ततः पूर्वोक्तमुपसंहरन्नुत्तरनयद्वारसंबंधनार्थमाह। एवं सुत्ताणुगमो। सुत्तालावगय निक्खेवो य सुत्तफासियनिज्जुत्ती भणिया नयाणु
जोगद्दारं वसरो धुणाते य अत्थाणुगमगविय तेणजहासंभवं तहिं चेव। भणिया तहा वि पत्थुय। द्वारासुन्नत्थमुन्नेहं॥ व्याख्या॥ एवमुक्तप्र
कारेण सूत्रानुगमः सूत्रालापकानां च न्यासो निक्षेपः सूत्रार्थयुक्तिश्च सूत्रस्पर्शिकनिर्युक्तिश्चेत्यर्थः भणिता प्रतिपादिता अधुना नयलक्ष
णचतुर्थानुयोगद्वारस्यावसरस्ते च नयाः अर्थानुगमांगमेव ते न यथासंभवं तत्रैवार्थानुगमे तत्र स्थाने भणितास्तथापि प्रस्तुतद्वाराशून्या
र्थं तान् किंचिद्वक्ष्ये भणिष्याम्यहमिति। तत्र नैगमनयस्य संग्रहव्यवहारयोरंतर्भावात् शेषाणां संग्रहादीनां षण्णां नयानां संक्षिप्य मतं ताव

दुपदर्शयन्नाह सामन्नमह विसेसो। पच्चुप्पन्नं च भावमेत्तं च पइसद्दं च जहत्थं च वयणमिह संगहाईणं॥ इह सामान्यमेवास्ति न विशेषा
इति संग्रहस्य वचनं विशेषा एव संति न सामान्यमिति व्यवहारस्य वचः प्रत्युत्पन्नं च वर्तमानमेव वस्त्विति तदतीतमनागतं चेति ऋजुसूत्र
स्य वचनं नामादि निक्षेपाणां मध्ये भावेंद्रादिकं भावमात्रं भावनिक्षेप एवास्ति न नामादिनिक्षेपा इति शब्दनयस्य वचः इंद्र शक्र पुरंदरादि
शब्दानां प्रति शब्दमन्यान्य एवार्थो वाच्यो न त्वेक एवेति समभिरूढस्य वचः यथार्थमेव स्वाभिधायकशब्दवाच्यमर्थं कुर्वदेव घटादिकं
वस्तु भवति नान्यथेत्येवंभूतनयस्य वचनं इत्येवंप्रकारं संग्रहादीनां वचनं मतं संक्षेपेणावगंतव्यमिति। ततः किमित्याह। एयाण
समोयारो। दव्वट्ठियपज्जवट्ठियदुगम्मि। सेसे सकायसंभवउ। ताणं च परोप्परं कज्जो॥ एतेषां च संग्रहादिनयानां द्रव्यार्थिकपर्यायार्थि
कनयद्वये समवतारोऽंतर्भावः कार्यः उक्तं च तित्थयरवयणसंग्रहविसेसपत्थारमूलवागरणी दव्वट्ठिउ य पज्जवनउ य सेसा वियप्पा
सिं तथा तेषामेव संग्रहादिनयानां शेषेषु निश्चयनयव्यवहारज्ञानक्रियादिनयेषु पूर्वोक्तेषु वा सप्तसु नयशतेषु समवतारो विधेयत
थाताणं च त्ति तेषामेव संग्रहादिनयानां परस्परं संभवतो यथासंभवं समवतारः कार्यः तद्यथा ऋजुसूत्रः पर्यायादिवादित्वसाम्याच्छब्दनये
समवतरति शब्दनयोपि भावाद्यभ्युपगमसाम्यात्समभिरूढे सोपि प्रतिशब्दमन्यान्यार्थवाचित्वादिना एवंभूत एवमन्यथापि यथासंभ
वं परस्परमेषामंतर्भावो वाच्य इति॥ अथ द्रव्यपर्यायार्थिकयोर्मतं तद्दर्शयन्नाह। दव्वट्ठियस्स दव्वं। वत्थुं पज्जवनयस्स पज्जाउ। अप्पि
यमयं विसेसो। सामन्नमणप्पियनयस्स॥ द्रव्यार्थिकस्य द्रव्यमेव वस्तु न तु पर्यायास्तेषां तन्मतेनावस्तुत्वादत एव द्रव्यमर्थोऽस्येति द्रव्यार्थि
कोयमुच्यते पर्यायनयस्य तु पर्याया एव वस्तु न तु द्रव्यं तस्य तन्मतेनावस्तुत्वादत एव पर्याया अर्थोऽस्येति पर्यायार्थिकोसावुच्यते तथार्पितवि
शेष्यते इत्यर्पितो विशेषस्तद्वादीनयोऽर्पितनयः समयप्रसिद्धो ज्ञेयः तन्मतं विशेष एवास्ति न सामान्यं अनर्पितमविशेषितं सामान्यमुच्य
ते तद्वादी नयोऽनर्पितनयः सोपि समयप्रसिद्ध एव बोद्धव्यस्तन्मतं तु सामान्यमेवास्ति न विशेषः अत्राप्यर्पितानर्पितनयद्वये संग्रहादी
नां समवतारो द्रष्टव्य इति। अथ वा व्यवहारनिश्चयनयद्वये तेषां समवतारोऽतस्तस्यैव व्यवहारनिश्चयद्वयस्य स्वरूपमुपदर्शयन्नाह
। लोगववहारपरो ववहारो भणइ कालउ भमरो परमत्थपरो मन्नइ। निच्छइउ पंचवण्णो त्ति लोकव्यवहाराभ्युपगमपरो नयो व्यवहारन
य उच्यते स च कालवर्णस्यैव उत्कटत्वेन लोके व्यवह्रियमाणत्वात् कृष्ण इति प्रतिपादयति कालकोभ्रमर इति परमार्थपरस्तु परमार्थिका

र्थवादी नैश्चयिको निश्चय उच्यते । मधुनर्मन्यते पंचवर्णो भ्रमरः बादरस्कंधत्वेन तच्छरीरस्य पंचवर्णपुद्गलैर्निष्पन्नत्वात् शुक्लादीनां चाप्रभूतत्वेना
नुपलक्षणादिति अथवा प्रकारांतरेण व्यवहारनिश्चयनयस्वरूपमवसेयं । कथमित्याह । अहवा एगनयमयं चिय । ववहारो जं न सव्वहा सव्वं । स
व्वनयसमूहमयं विणिच्छओ जं जहाभूयं ॥ अथवा यत्किमप्येकैकस्यैव नयस्य मतं तदेव व्यवहारः प्रतिपद्यते नान्यत् । कुत इत्याह ॥ जमित्यादि यस्मा
न्न सर्वथा सर्वैरपि प्रकारैर्विशिष्टं सर्वनयमतसमूहमयं वस्त्वसौ प्रतिपत्तुं शक्नोतीति शेषः स्थूलदर्शित्वादिति विनिश्चयस्तु निश्चयन
यो यद्यथाभूतं परमार्थतो वस्तु तत्तथैव प्रतिपद्यत इति । अथवा ज्ञानक्रियानयद्वयं संग्रहादीनां समवतारो ऽतस्तत्स्वरूपमेवाह । नाणाहीणं सव्वं स्व
। नाणनओ भणइ किं थ किरियाए । किरियाए करणनओ तदुभयगाहो य सम्मत्तं ॥ ज्ञानाधीनमेव सर्वमैहिकामुष्मिकं फलं किमत्र क्रियया कर्त
व्यं युक्तिश्चेहानंतरमेव वक्ष्यति करणनयस्तु क्रियानयो वक्ष्यमाणोपपत्तेरेव सर्वमैहिकामुष्मिकं फलं क्रियायाएवाधीनमिति भणति
उभयग्राहश्चेह सम्यक्त्वं स्थितपक्ष इति ॥ एतदेवाह निर्युक्तिकारः । नायम्मि गिण्हियव्वे । अगिण्हियव्वंमि चेव अत्थम्मि जइयव्वमेव इति । जो उव
एसो सो नओ नाम ॥ ज्ञाननयमतेन तावदियं गाथा व्याख्यायते तत्र नायम्मित्ति ज्ञाते सम्यक्परिच्छिन्ने ग्रहीतव्ये उपादेये अग्रहीतव्ये ऽनुपा
देये हेय इत्यर्थः चशब्दो द्वयोरपि ग्रहीतव्याग्रहीतव्ययोर्ज्ञातत्वानुकर्षणार्थः उपेक्षणीयसमुच्चयार्थो वा एवेति गाथालंकारमात्रे अत्थम्मित्ति
अर्थ इत्यर्थः । स च द्विविधश्चेति ॥ ऐहिक आमुष्मिकश्चेति तत्रैहिकस्त्रिधा ग्राह्यो ऽग्राह्य उपेक्षणीयश्च तत्र ग्राह्यः स्रक्चंदनांगनादिः अग्राह्यो ऽ
हिविषकंटकादिः उपेक्षणीयस्तु तृणपांशुशर्करादिः एवमामुष्मिकोपि ग्राह्यादिभेदात्त्रिधा तत्र ग्राह्यः सम्यग्दर्शनचारित्रादिः अग्राह्यो मिथ्या
त्वाज्ञानाविरत्यादि उपेक्षणीयस्तु स्वर्गविभूत्यादि एवंभूते ऽर्थे यतितव्यमेवेत्यत्रैवकारो ऽवधारणे तस्य च व्यवहितः प्रयोगस्तद्यथा ज्ञात एवेति
तदयमर्थो ग्राह्याग्राह्योपेक्षणीये ऽर्थे ज्ञात एव तत्प्राप्तिपरिहारोपेक्षार्थिना यतितव्यं प्रवृत्त्यादिलक्षणः प्रयत्नः कार्य एवेति एवंभूतः सर्वव्यवहारा
णां ज्ञाननिबंधनत्वप्रतिपादनपरो यः उपदेशः स किमित्याह नय इति प्रस्तावात् ज्ञाननयो नामेति शिष्यामंत्रणे । इत्यक्षरघटना भावार्थ
स्त्वयं ॥ इह ज्ञाननयो ज्ञानप्राधान्यख्यापनार्थमिदं निगादयति नन्वैहिकामुष्मिकफलार्थिना तावत्सम्यग्विज्ञात एवार्थे प्रवर्तितव्यमन्यथा ४०९
प्रवृत्तौ फलविसंवाददर्शनात्तथा चान्यैरप्युक्तं । विज्ञप्तिः फलदा पुंसां न क्रिया फलदा मता मिथ्याज्ञानात्प्रवृत्तस्य फलासंवाददर्शनात्त
थाप्यागमेप्युक्तं ॥ पढमं नाणं तओ दयेत्यादि जं अन्नाणी कम्मं खवेइ इत्यादि तथा अपरमप्युक्तं । पावाउ विणिउत्ती । पवत्तणा तह य कुस

लपक्खम्मि विणयस्स य विपडिवत्ती तिन्निवि नाणे समप्पंति ॥ इतश्च ज्ञानस्यैव प्राधान्यं यतस्तीर्थकरगणधरैरगीतार्थानां केवलानां
विहारोपि निषिद्धः ॥ तथा च तद्वचनं ॥ गीयत्थो य विहारो बीओ गीयत्थनीसिओ भणिओ एत्तो तइयविहारो नाणुन्नाओ जिणवरेहिं न यस्मा
दंधेनांधः समाकृष्यमाणः सम्यक्पंथानं प्रतिपद्यत इति भावः एवं तावत्क्षायोपशमिकं ज्ञानमधिकृत्योक्तं क्षायिकमप्यंगीकृत्य विशिष्ट
फलसाधकत्वं तस्यैव ज्ञेयं यस्मादर्हतोपि भवांभोधेस्तटस्थस्य दीक्षां प्रतिपन्नस्योत्कृष्टतपश्चरणवतोपि न तावदपवर्गप्राप्तिः संजाय
ते यावदखिलजीवादिवस्तुस्तोमसाक्षात्करणदक्षं केवलज्ञानं नोत्पन्नं तस्माज्ज्ञानमेव पुरुषार्थसिद्धेर्निबंधनं प्रयोगश्चात्र यदेन वि
ना न भवति तत्तन्निबंधनमेव यथा बीजाद्यविनाभावी तन्निबंधन एवांकुरो ज्ञानाविनाभाविनी च सकलपुरुषार्थसिद्धिरिति ततश्चा
यं नयश्चतुर्विधसामायिके सम्यक्त्वश्रुतसामायिके एवाभ्युपगच्छति ज्ञानात्मकत्वेन तयोरेव मुख्यमुक्तिकारणत्वाद्देशसर्वविरतिसामा
यिके तु नेच्छति ज्ञानकार्यत्वेन गौणत्वात्तयोरिति ॥ तदेवं ज्ञाननयमतेनेयं गाथा व्याख्याता । अथेयमेव क्रियानयमतेन व्याख्यायते
तत्र क्रियानयो वदति इह ज्ञाते ऽपि ग्रहीतव्यादिके ऽर्थे सर्वापि पुरुषार्थसिद्धिमभिलषता यतितव्यमेव प्रवृत्त्यादिलक्षणा क्रियैव क
र्तव्येत्येवमत्र व्याख्याने एवकारः स्वस्थान एव योज्यते एवं च सति ज्ञातेप्यर्थे क्रियैव साध्या तत्र ज्ञानं क्रियोपकरणत्वाद्गौणमित्यतः सक
लस्यापि पुरुषार्थस्य क्रियैव प्रधानं कारणमित्ययमुपदेशः स नय प्रस्तावात्क्रियानयः शेषं पूर्ववदयमपि स्वपक्षसिद्धये युक्तीरुद्भावयति
ननु क्रियैव प्रधानं पुरुषार्थसिद्धिकारणं प्रयत्नादिलक्षणक्रियाविरहेण ज्ञानवतोप्यभिलषितार्थसंप्राप्त्यदर्शनात्तथा चान्यैरप्युक्तं
॥ क्रियैव फलदा पुंसां न ज्ञानं फलदं मतं यतः स्त्रीभक्ष्यभोगज्ञो न ज्ञानात्सुखितो भवेत्तथा आगमेपि तीर्थकरगणधरैः क्रियाविकलानां
ज्ञानं निःफलमेवोक्तं । सुबहुंपि सुयमहीयं । किं काही चरणविप्पमुक्कस्स ॥ अंधस्स जह पलित्ता । दीवसयसहस्सकोडीवि । नाणं सविसय
नियमियं न नाणमेत्तेण कज्जनिप्फत्ती । मग्गन्नू दिट्ठंतो । होइ सचेट्ठो य । जाणंतो वि तरिउं । काइयजोगं न जुंजई नईए । सो वुज्झइ सोएणं ए
वं नाणी चरणहीणो ॥ जहा खरो चंदणभारवाहीत्यादि एवं तावत्क्षायोपशमिकी चरणक्रियामंगीकृत्य प्राधान्यमुक्तमथ क्षायिकीम
प्याश्रित्य तस्या एव प्राधान्यमवसेयं यस्मादर्हतोपि भगवतः समुत्पन्नकेवलज्ञानस्यापि न तावन्मुक्त्यवाप्तिः संपद्यते यावदखिलकर्मे
धनानलज्वालाकलापकल्पा शैलेश्यवस्थायां सर्वसंवररूपचारित्रयानप्राप्तेति तस्मात्क्रियैव प्रधानं सर्वपुरुषार्थसिद्धिकारणं प्रयोगश्चा
त्र यद्यत्समनंतरभावि तत्कारणं यथांत्यावस्थाप्राप्तपृथिव्यादिसामग्र्यनंतरभावी तत्कारणो ऽकुरः क्रियानंतरभाविनी च सकलपुरुषार्थ

विशेषावि·वृ· सिद्धिरिति ततश्चैष चतुर्विधसामायिके सर्वदेशविरतिसामायिकं एवमन्यत्र क्रियारूपत्वेन प्रधानमुक्तिकारणत्वात्सम्यक्त्वश्रुतसामा
४१० यिके तु तदुपकारित्वमात्रतो गौणत्वान्नेच्छतीति। ननु पक्षद्वयेपियुक्तिदर्शनात्किमिह तत्त्वमिति न ज्ञायते इति शिष्यजनसंमोहमाशंक्य
ज्ञानक्रियानयमतदर्शनानंतरं स्थितपक्षमाह निर्युक्तिकारः सव्वेसिं पि नयाणं। बहुविहवत्तव्वयं निसामित्ता। तं सव्वनयविसुद्धं। जं चरण
गुणट्ठिओ साहू॥ नवेदमनंतरोक्तनयद्वयस्यैव किं तर्हि सर्वेषामपि स्वतंत्रसामान्यविशेषवादिनां नामस्थापनादिवादिनां वा नयानां वक्तव्य
ताम् परस्परविरोधिनीं श्रोतुं निशाम्य श्रुत्वा तदिह सर्वनयविशुद्धं सर्वनयसम्मतं तत्त्वरूपतया ग्राह्यं॥ यत्किमित्याह॥ यश्चरणगुणस्थितः
साधुः चरणं चारित्रं गुणो ज्ञानं तयोः स्थितः। ज्ञानक्रियाभ्यां द्वाभ्यामपियुक्त एव साधुर्मुक्तिसाधको न पुनरेकेनकेनचिदिति भा
वः यथाहि यत्ताव ज्ञानवादिनाप्रोक्तं यद्यन्न विना न भवति तन्निबंधनमेव तत्स्यादित्यत्र तदविनाभावित्वलक्षणो हेतुरसिद्ध एव ज्ञानमा
त्राविनाभाविन्याः पुरुषार्थसिद्धेः क्वाप्यदर्शनात्नहि दाहपाकाद्यर्थिनो दहनादिपरिज्ञानमात्रादेव तत्सिद्धिर्भवति किंतु तदानयनसंधु
क्षणज्वलनादिक्रियानुष्ठानादपि नचतीर्थकरोपि केवलज्ञानमात्रान्मुक्तिं साधयति॥ किंतु॥ यथाख्यातचारित्रक्रियोपेतस्माल्स
र्वज्ञानक्रियाविनाभाविन्येव पुरुषार्थसिद्धिस्ततस्तदविनाभावित्वलक्षणो हेतुर्यथा पुरुषार्थसिद्धेर्ज्ञाननिबंधनत्वं साधयति तथा
क्रियानिबंधनत्वमपि तामप्यंतरेण तदसिद्धेरित्यनैकांतिकोप्यसाविति एवं क्रियावादिनाप्यत्र समनंतरभावित्वकारणमित्यादि प्र
योगे यस्तदनंतरभावित्वलक्षणो हेतुरुक्तः सोप्यसिद्धोनैकांतिकश्च॥ तथाहि स्त्रीभक्ष्यभोगादिक्रियाकालेपि ज्ञानमस्ति तदनंतरे
णात्रप्रवृत्तेरेवायोगात् शैलेश्यवस्थायां सर्वसंवररूपक्रियाकालेपि केवलज्ञानमस्ति तदंतरेण तस्या एवाप्राप्तेस्तस्मात्केवल
क्रियानंतरभावित्वेन पुरुषार्थस्य क्वाप्यसिद्धेरसिद्धो हेतुर्यथा च तदनंतरभावित्वलक्षणो हेतुः क्रियाकारणत्वमुक्त्यादिपुरुषार्थ
स्य साधयति तथा ज्ञानकारणत्वमपि तदप्यंतरेण तस्य कदाचिदप्यभावादित्यनैकांतिकताप्यस्येति तस्मात् ज्ञानक्रियोभयसाध्ये
वमुक्त्यादिसिद्धिरुक्तंच प्रागिहापि। हयं नाणं कियाहीणं। हया अन्नाणउ किया। पासंतो पंगुलो दड्ढो। धावमाणोय अंधउ। संयोग
सिद्धीए फलं वयंति। नहु एगचक्केण रहो पयाइ। अंधोय पंगूय वणे समिच्चा। ते संपउत्ता नगरं पविट्ठा इत्यादि॥ अत्राह॥ नन्वेवं ज्ञान ४१०
क्रियेयोर्मुक्तत्वावाप्तिकारणत्वशक्तिः प्रत्येकमसती समुदायेपि कथं स्यान्नहि यद्येषु प्रत्येकं नास्ति तत्तेषु समुदितेष्वपि भवति यथा प्र
त्येकमसत्समुदितेष्वपि सिकताकणेषु तैलं प्रत्येकमसती च ज्ञानक्रिययोर्मुक्त्यवाप्तिकारणशक्तिः। तथा चेहापि प्रागुक्तं। पत्तेयम

भावाउ। निव्वाणं समुदियासु विन जुत्तं। नाणकिरियासु वोत्तुं। सिकयासमुदायतेल्लंव। तद्यथा। उच्यते॥ स्यादेतद्यदि सर्वथा प्रत्येकं तयोर्मु
क्त्यनुपकारिता अभिधीयेत यदा तयोः प्रत्येकं देशोपकारिता समुदायेन संपूर्णोपकारिता तदा न कश्चिद्दोषः॥ तथा चेहापि प्रागिदमप्युक्तं
।वीसुं न सव्वहच्चिय सिकयातेल्लं व साहणाभावो। देसोवगारिया जा। सा समवायम्मि संपुण्णा॥ अतः स्थितमिदं ज्ञानक्रिये समुदिते एव मुक्ति
कारणं न प्रत्येकमिति तद्युक्तश्च भावसाधुः सर्वैरपि नयैरिष्यत एव तस्माद्व्यवस्थितमिदं तत्सर्वनयविशुद्धं यश्चरणगुणस्थितः साधुरिति॥
अमुमेव गाथार्थं विवृण्वन्नाह। नाउत्ति परिच्छिन्नो। गहिओ जो क असाहणाहोइ। अगहेओ अणुवगारी। अत्थो दव्वगुणो वावि। जइ
यव्वंति पयत्तो। कायव्वो गिण्हियव्वेत्ति। अगेण्हाणादओ। बहुभेओ वच्चओयं। इतिजो नाणनओ। उवदेसो ताणाणाणाइ सोत्ति। सोपु
ण सम्मद्दंसण। मायमाम इयंति बोधव्वो॥ तिस्रोपिगतार्थाः नवरं नायमीत्यस्य व्याख्या नं ज्ञातइति परिच्छिन्नः गिण्हियव्वे इत्यादेर्व्याख्यानं
ग्रांइत्यादि। अर्थ इत्यस्य विवरणं द्रव्यगुणोवेति ज्ञानाज्ञानउ सोनिज्ञानन सदइत्यर्थः अस्यापलक्षणत्वाद्दर्शितव्याख्यासंबंधेन क्रि
यानयोपि योजनीयः वं चलं देशसर्वविरतिसामायिकरूपोसावित्यादि सर्वप्राक्तस्त्वय मेवानुसरणीयमिति। सव्वेसिंपि नयाणमित्यस्य व्या
ख्यामाह सव्वेत्तिमूलसाहय। साहभेयाविसइत्तेसिं। किंपुण मूलनयाणं। अहवा किमुताविसद्धाणं॥ सव्वेसिंपित्ति कोर्थ इत्याह मूलत्ति
मूलनयानां नैगमादिनयानामपि शाखाप्रशाखाप्रभेदरूपा नेसिंति तेषामेवमूलनयानामुत्तरभेदाः पृथग्नेतेषां सर्वेषामपि किंपुनः केव
लानां मूलतया नामस्थापनाविशुद्धानां द्रव्यार्थिकादीनामपि बहुविहवत्तव्वयमित्यादेर्व्याख्यानमाह। सामन्नविसेसा भयं भेयाव
त्तव्वयाबहुविहत्ति अहवा नामाईणं। इच्छइ को व नउसाहुं। सोउंसद्दहिऊणय। नाऊणयतं निणोवएसेणं। तं सव्वनयविसुद्धं। तिसव्वनयसम्मयं
जं तु। चरणगुणस्स ट्ठिउहोइ। साहुएस किरियानउनाम। चरणगुणकट्ठियं जं। चरणनयाबेतिसाहुत्ति सोजेण भावसाहू सव्वनयाजं च भावमिच्छंति
। नाणकिरिया नउभय। जुत्तोय जउसयासाहू॥ एता अपि गतार्थाः नवरं अहवा नामाईणमित्यादि अथवा नामस्थापनाद्रव्यभावसाधूनां मध्ये को नयः
कं साधुमिच्छतीत्यादिकां वक्तव्यतां श्रुत्वा ज्ञात्वा वावबुध्येत्यर्थः एस किरियानउ नामत्ति एष ज्ञानाविनाभूतक्रियालक्षणनयो मीतिपक्षः स्थितप
क्ष इत्यर्थः यस्माच्चरणनयाश्चरणवत्तयः परममुनयश्चरणगुणस्थितमेव साधुं ब्रुवते नापरं सच्च येन यस्माद्भावसाधुरिति गृह्यते सर्व
नयाश्च यस्माद्भावसाधुमिच्छंति ज्ञानक्रियानयोभययुक्तश्च यतः सर्वदैव भावसाधुरुच्यते तस्मात् ज्ञानक्रियास्थितः साधुरित्ययं सम्य
क्पक्ष इति। अथ प्रकृतोपसंहारार्थमात्मनो औद्धत्यपरिहारार्थं च श्री जिनभद्रगणिक्षमाश्रमणपूज्याः प्राहुः। इय परिसमापियमिदं। सामाइय

MEMORIAL
MEMORIAL

मश्रउसमासेण। विथरउ केवलिणो। पुव्वविऊ चापहासंति॥ इत्यनंतरप्रकारेण सर्वेणापि भाष्येणाव्रश्यकग्रंथस्य प्रथमाध्ययनं सामायिकं समासेन सं
क्षेपेणार्थतः परिसमापितं संक्षेपेणास्यार्थः कथितः संक्षेपभणनमात्रशक्तिकत्वान्मम विस्तरतस्त्वशेषविस्तरेणातिगंभीरार्थत्वादिदं केवलि
नः पूर्वविदो वा प्रभाषंत इति। अथैतद्भाष्यं श्रुत्वा विनेयानां यदिहैव फलं भवति तदुपदर्शयितुमाह। सव्वाणुउगमूलं। भासं सामाइयस्स सोऊण
। होइ परिकम्मियमई। जोग्गो सेसाणुउगस्स॥ इदं च सर्वानुयोगमूलं सर्वदानुयोगकारणं सामायिकस्य भाष्यं विवरणं श्रुत्वा निसम्य एतत्परिकर्मि
तमतिः सन्विनेयः शेषस्याप्यनुयोगस्य योग्यः कुशलः क्षमो भवतीति चत्वारिंशद्गाथार्थः।८०९॥ पूर्वं चाध्ययनपर्यंतव्याख्यानगाथा
नां।२९८३। उभयं व्याख्यानभाष्यगाथानां।३६८२॥ शेषाणि तु चतुर्दशाधिकसप्तशतानि अतिदेशेनैव गतानि न तु व्याख्यातानि अतो नेह गणि
तानीत्येषा शिष्यहितानाम विशेषावश्यकवृत्तिः समाप्ता॥ नमः श्रीमदर्हद्भ्यः॥ इह गंभीरापारजन्मजरामरणसलिलसंचयसंपूर्णे अनवरतभ्रा
म्यन्महामोहावर्त्तभीमे विविधधिस्रोतसिकावेलाव्यतिकरदुरतिक्रमे निःसंख्यकुविकल्पकल्लोलमालाकुले प्रसरदज्ञानमहामेघदुर्दिनांधका
रनिकुरंबभीषणे अनेकापदितक्षिप्तसंपादितमहाभयेरागद्वेषदुर्वातसंततिसंजनितहृदयोत्कंपे अविश्रांतसंज्वलितक्रोधाग्निरौद्रवडवा
मुखे अमानमानशैलस्खलनदुर्गीकृतशुभमार्गव्यतिकरे मायावल्लीवितानगुप्यत्सत्वसंघाते विभवसलिलातिदुःपूरलोभमहोदरे वि
विधव्याधिसंबंधमत्स्यकच्छपउटोपकच्छटाटोपग्राहनक्रादिप्रचुरजलचरसंचरणसंजनितविषमसंचारे शारीरमानसानंतदुःखप्रद्रापा
रसंसारपारावारे निधौ मानिमग्नं विकलं निःत्राणं दीनमवलोक्य कोपि करुणार्द्रितमानसः सद्गुणगुरुर्महापुरुषः सम्यग्दर्शनातिदृढमहाप्रतिष्ठा
नं अष्टादशशीलांगसहस्रविचित्रफलकनिबिडघटनाविराजितं। सम्यग्ज्ञाननिर्यामकान्वितं सत्साधुसंसर्गकाथसत्रनिबिडबंधनबद्धं
संवरकीलप्रभग्ननिःशेषास्रवच्छिद्रं स्फुरितसामायिकछेदोपस्थापनीयभेदभिन्नरम्यभूमिकाद्वयं तदुपर्युपकल्पितसाधुसमाचारकर
णमंडपं समंततो गुप्तित्रयप्रस्तवरागुप्तं असंख्यशुभाध्यवसायसन्नद्धदुर्योधयोधसहस्रदुरवलोकं सर्वतो निवेशितसद्भूपदेशाव
लिप्त निकुरंबमध्यव्यवस्थापितस्थिरतराति सरलसद्बोधकूपस्तंभं तद्विन्यस्तप्रकृष्टशुभभावमयमहासितपटं तदग्रसमारूढप्रौढस
द्दुपयोगपंजरदौवारिकं तदवबद्धाप्रमादनंगरनिकरसमायुक्तमित्यादिसर्वांगसंपूर्णतया प्रवणं चारित्रमयं महायानपात्रं समर्प्यया ४११
मास भणितवांश्च भो महाभाग समधिरोह त्वमस्मिन्यानपात्रे समारूढश्चात्र मदीयशिक्षां कुर्वाणस्त्वमशेषेणैव दुस्तरमप्यमुं भवजलधि
मुत्तीर्य प्राप्स्यसि निःशेषदुःखातिक्रांतमनंतसुखमयं शिवरत्नद्वीपं ततस्त्वत्तद्वचनेनाश्वासितोहमारूढस्तत्र समर्पितं च ममतेन महापुरु

षेण सद्भावनामंजूषायां प्रक्षिप्य शुभमनो नाम कं महारत्नं अभिहितं च मां प्रति रक्षणीयमिदं प्रयत्नेनतो भद्र तिष्ठति यस्मिन्महाप्रभावेशु
भमनोरत्ने एतद्यानपात्रं यथोक्तैर्निर्यामकः कूपस्तंभयोधापंजरदौवारिकादिकं सर्वं क्षेमेणावतिष्ठमानं अभीष्टदेशं त्वां प्रापयत्येतदभावे तु
सर्वमेतत्प्रलयमुपयात्यत एव तवप्रष्टतः सर्वादरेणैतदपहरणार्थं लगिष्यंति मोहराजादयो दुष्टतस्कराः तैश्च यत्नेन सम्यग्रक्षणीयं
सद्भावनामंजूषायां नावाग्रेतनानां भंगसंभवे अन्यान्यमुनिचतदंगानि तस्यानि वेशनीयानीत्यादिशिक्षां प्रयच्छ मयापि समंदूरदेशं गत्वा ततोऽ
तर्हितः संजातः श्रुतश्चायं सर्वोपि व्यतिकरः प्रमादपरतापिधानां महापल्लीं समाश्रितेन दुष्टतस्कराधिपतिना मोहराजेन ततो रेरे तस्कराधमा
हतोवयं यतः केनाप्यस्मद्वैरिणा निजयानपात्रमारोप्यास्मदविषयभूतं शिवरत्नद्वीपं नेतुमारब्धः सोऽमुकसंसारिजीवः स चुनके
वलस्थयं चलितः किं त्वन्यानपि यथा दैमात्मना सह अनेकान्नयन्नूस्तिष्ठति तद्यदि वत्तदस्मदीयसंसारताद्यं सर्वशून्यं करोति
तावद्धावतधावतेति श्रूयमाणाः ससंभ्रममुत्थाय महादुर्बुद्धिनामिकां महानावमारूढाः कुवासनाभिधाननौवृंदादिरूढाशेषतस्करनिकरसहि
ता एव प्रधाविताः सत्वरं समागताश्च यानपात्रदेशं ततः पूत्कृतं पंजरदौवारिकेण भोभोः समायातास्तस्करचेडिकाः अणगुणीभवतयूयं त
तः एतत् श्रुत्वा निर्यामकोत्साहितास्तदुपदेशविधिनेवरेण मंडपमारूढाः सज्जीभूताश्च चारित्रधर्मनृपतिसैन्ये न सह पूर्वोक्तिरूपा योधा
गृहीतानि च सर्वैरपि पंजरदौवारिकादिभिर्यथोचितं शीलांगादितत्वचिंतनादिरूपाणि नाराचादिप्रहरणानि मोहराजेनापि निरूपितो
मिथ्यादर्शनमंत्री उत्साहिताः कषायचरटास्तज्जितं हास्यादिषट्कलुंटाकवृंदं पुरस्कृतः पुरुषवेदादिपरिवृतः काममहातस्करः
व्यापारिता निद्रातंद्रादयः प्रेरिताश्चक्षुर्दर्शनावरणोदयः अग्रेसरीकृतं रोगाद्यसातवेदनीयसैन्यं प्रवर्त्तिता जरांतरायादयः म
हातस्कराः व्यापारितानिद्रातंद्रादयः प्रेरिताश्चक्षुर्दर्शनावरणादयः अग्रेसरीकृतं रोगाद्यसातवेदनीयसैन्यं प्रवर्त्तिताजरांतरायादयः स्वय
मपि च निजकेसरितनयरागकेसरिद्वेषगजेंद्रादितलवर्गान्वितेन मोहचरटाधिपेन वेष्टितं समंततोऽनंतगुणपरिपाल्यायानपात्रं प्र
हर्तुमारब्धं चाक्षेपेण सर्वैरेव समकालं ततश्च सदागमसेनाधिपोत्साहितेन सम्यग्दर्शनमंत्रिणा समाश्रितो मिथ्यादर्शनमंत्री प्रशम
मार्दवार्जवादिमहायोधैरपि लीलयैव निरुद्धाः क्रोधादिकषायचरटाः वैराग्यब्रह्मव्रतादिमहासुभटैरपि दूरमुद्वासितो हास्यादिनिज
ननवर्गानुगतः काममहालुंटाकः अप्रमादमहारथिना विश्रुतोपयोगायमादिनाराचैस्ताडिताः सिरसि निद्रातंद्रादयः तदावरणक्षयो
पशमवीर्येणाप्यधरीकृताश्चक्षुर्दर्शनावरणादयः सद्धर्मानुष्ठानोद्दीपितसातोदयसैनिकेनापि विलक्षीकृतं रोगाद्यसातवेदनीय

सैन्यं पुण्योदयमहाबलवद्राजपुत्रेणापि निःप्रभावीकृतानं ततोऽदयः एवमन्येषामप्यनंतानां चारित्रधर्मराजसैनिकानां निजं प्रति
पक्षेण सह महासमरसंमर्दे प्रवृत्ते निजसैन्यं किंचिद्भज्यमानमवलोक्य रे रे तस्कराधमा कि मेतदारब्धं स्थिरीभूय लगत २ सुबोध
नेतिब्रुवाणो मोहचरटचक्रवर्त्ती ससैन्य एवारब्धो युगपत्प्रलयहेतुकेचित्तु लीव तुलयाति नो मोहसैनिका केनापि पक्षेण समारोहंति
तद्यानपात्रं विप्रतारयितुमुपक्रमंते मात्र विशतिरणमंडपस्यांतः प्रहरंति च श्रीभूताः समाहस्य तज्जोरयंति सद्भावनामंजूषां गुणानि
ततो मया तस्य परमपुरुषस्योपदेशं स्मृत्वा विरच्य्यद्भिटिति निवेशितमावश्यकटिप्पनिकाभिधानं सद्भावनामंजूषायां नूतनफलकंत
तोऽपरमपि शतकविवरणनामकं अन्यदप्यनुयोगद्वारवृत्तिसंज्ञितं ततोऽपरमप्युपदेशमालासूत्राभिधानं अपरं तु तद्वृत्तिनामकं अन्य
च्जीवसमासविवरणनामधेयं अन्यत्तु भवभावनासूत्रसंज्ञितं अपरं तु तद्विवरणनामकं अन्यच्च नंदिटिप्पनकनामधेयं नूतनं दृढफलकं एतैश्च भूतनफलकैर्निवेशितैर्वज्रमयीव संजाता सा मंजूषा तेषां पा
पानामगम्याः ततस्ते रतीव छलघातितया संचूर्णयितुमारब्धं तद्द्वारकपाटसंपुटं ततो मया ससंभ्रमेण निपुणं तत्प्रतिविधानोपायं चिं
तयता चिरत्वयितुमारब्धं तद्द्वारपिधानहेतोर्विशेषावश्यकविवरणाभिधानं वज्रमयमिव नूतनं कपाटसंपुटं ततश्चाभयकुमारगणि
धनदेवगणि जिनभद्रगणि लक्ष्मणगणि विबुधचंद्रादिमुनिवृंदश्रीमदानंदश्रीमहत्तरा वीरमतिगणिन्यादिसहाय्यादरेणैतमिदा
नीं हत्वा वसंयद्येतन्निः पद्यते ततो धावत २ गृह्णीत २ लगत २ लगतेत्यादि पूत्कुर्वतां सर्वात्मशक्त्या युगपत्प्रहरतां हाहारवं कुर्वतां च मोहादिच
रटानां चिरात्कथंकथमपि विरच्य्य तद्द्वारे निवेशितमेतदिति ततः शिरोहृदयं च हस्ताभ्यां कुट्टयन्विषण्णो मोहमहाचरटः समस्तम
पि विलक्षीभूतं तत्सैन्यं निलीनं च सनायकमेव ततश्च निश्चिंततः क्षेमेणाशिवरत्नद्वीपं प्रति गंतुं प्रवृत्तं तद्यानपात्रमिति ॥ छ श्रीजिनभ
द्रगणेः पूज्यस्य ॥ तानि भाष्यवचनानि । तर्कव्यतिकरदुर्गाण्यतिगंभीराणि ललितानि ॥१॥ निवृतानि स्वयमेव हि । कोट्याचार्यैश्च बुध
जनप्रवरैः संगच्छते हि पुनरपि ममापि वृत्तेः प्रयासोऽत्र ॥२॥ सत्यं भणितमिच्छतामिहं तथापि मत्तोऽपि मंदबुद्धीनां उपकारः केषांचि
त्समीक्ष्यते शिष्टलोकानां ॥३॥ तेनात्मपरोपकृतिः संभाव्यमयापि भाष्यवृत्तिरियं विहिता श्रुतेति भक्तिं च शुभविनोदं च चिंतयता ॥४॥
यच्चेह किमपि वितथं । लिखितमनाभोगतः कुबोधाद्वा । तत्सर्वं मध्यस्थै [illegible] मय्यनुकंपाभिः शोध्यं ॥५॥ कृत्वा च विवरणमिदं । यत्पुण्यमुपा
र्जितं मयाविकं चित्तेनाभवश्यादस्तु जिनमतप्रीत्यविच्छेदः ॥६॥ ग्रंथाग्रं प्रत्यक्षरगणनया सहस्राणि ॥२८०००॥ श्रीप्रश्नवाहन

कुलांबुनिधिप्रसृतः क्षोणीतलप्रथितकीर्त्तिरुदीर्णशाखः । विश्वप्रसाधितविकल्पितवस्तुरुच्चैश्छायाश्रितप्रचुरनिर्वृतभव्यजंतुः ॥१॥
ज्ञानादिकुसुमनिचितः कलितः श्रीमन्मुनींद्रफलवृंदैः । कल्पद्रुमवद्गच्छः श्रीहर्षपुरीयनामास्ति ॥२॥ एतस्मिन्गुणरत्नरोहणगिरि
र्गांभीर्यपाथोनिधिः स्तुंगत्वानुकृतक्ष्माधरपतिः सौम्यत्वतारापतिः ॥ सम्यग्ज्ञानविशुद्धसंयमतपःस्वाचारचर्यानिधिः शांतः श्री
जयसिंहसूरिरभवन्निःसंगचूडामणिः ॥३॥ रत्नाकरादिवेतस्मात् शिष्यरत्नं बभूव यत् सवागीशोऽपि नो मन्ये यद्गुणग्रहणे प्रभुः ॥४॥ श्री
वीरदेवविबुधैः सन्मंत्राद्यतिशयप्रवरतोयैः द्रुम इव यः संसक्तः कस्तद्गुणकीर्तने विबुधः ॥५॥ तथाहि ॥ आज्ञा यस्य नरेश्वरैरपि शि
रस्यारोप्यते सादरं । यं दृष्ट्वापि मुदं व्रजंति परमां प्रायोऽतिदुष्टा अपि । यद्वक्त्रांबुनिधिर्यदुज्ज्वलवचःपीयूषपानोद्यतैर्गीर्वाणैरिव बुद्
धसिंधुमथने तृप्तिर्न लेभे जनैः ॥६॥ कृत्वा येन तपः सुदुष्करतरं विश्वं प्रबोध्य प्रभो । स्तीर्थं सर्वविदः प्रभावितमिदं तैस्तैः स्वकीयैर्गु
णैः । शुक्लीकुर्वदशेषविश्वकुहरं भव्यैर्निबद्धस्पृहं । यस्यावाप्यनिवारितं विचरति श्वेतांशुगौरं यशः ॥७॥ यमुनाप्रवाहविमला श्री
मन्मुनिचंद्रसूरिसंपर्कात् । अमरसरितेव सकलं पवित्रितं येन भुवनतलं ॥८॥ विस्फूर्जत्कलिकालदुस्तरतमःसंतानलुप्तस्थि
तिः सूर्येणेव विवेकभूधरशिरस्यासाद्य येनोदयं । सम्यग्ज्ञानकरैश्चिरं तनमुनिश्रुण्णः समुद्योतितो मार्गः सोऽभयदेवसूरिरभव
त्तेभ्यः प्रसिद्धो भुवि ॥९॥ तच्छिष्यलवप्रायैरवगीतार्थैरपि शिष्टजनतुष्ट्यै ॥ श्रीहेमचंद्रसूरिभिरियमनुरचिता प्रकृतवृत्तिः ॥१०॥ शरदां
च पंचसप्ताधिकैकादशशतेष्वतीतेषु ॥ कार्त्तिकसितपंचम्यां श्रीमज्जयसिंहनृपराज्ये ॥११॥ श्रेष्ठिश्रीरकसत्पुत्र श्रेष्ठिवच्छुकसं
ज्ञयोः ॥ शास्यात रयोर्गेहे सा वृत्तिर्निष्पत्तिमागता ॥१२॥ श्रीमच्छागरगच्छे सकलभट्टारकप्रभामिणी भालस्थिललक्षित्तलकायमानभ
१०८ श्रीपुण्यसागरसूरीभिर्वचनात् । श्रीमद्गुर्जरदेशे श्रीमच्छुरतिबिंदरे । श्रीसमस्तसंघेन लख्याश्रितं । श्रीमत्तपागच्छे ॥ सकलपंडि
तप्रवरपंडितोत्तमपंडितश्री ५ श्रीयं ॥ क्षमं तिविजयग । तत्शिष्यचरणरेणुसमानयं । राजेंद्रविजयगलपीकृतं । सं १८१८ वर्षे
मासोत्तममासे शुक्लपक्षे मधुमासे तृतीयादिवसे चंद्रवासरे । श्रीशांतिनाथजिनप्रसादात् । शुभं भवतु । कल्याणमस्तु । मंगल
लेखकानां च । पाठकानां च मंगलं । मंगलं सर्वलोकानां । भूमिभूपतिमंगलं ॥२॥ श्रीः ॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया
॥ यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥१॥ श्रीचतुर्विधसंघस्य शांतिर्भवतु ॥ छ ॥ श्रीः ॥ छ ॥ ॥ छ ॥ ॥

विशेषा वि-इ. हेपुस्तकतारीख १६ माहे आगष्ट संन १८७२ श्रावणशुद्ध द्वादशी रोजी समाप्त झाहालें मूळापासून शेवटपर्यंत पूर्ण आहे ग्रंथसंख्या २९५०० सहस्त्र
आहे ॥ ७ ॥ श्री: ॥

४१३

४१३

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

Pothi 63
B.D. 1

॥ समाप्तः विशेषविशेषभाष्यसमाप्त ॥

MEMORIAL